# yuktidIpikA

# યુક્તિદીપિકા

## Document Information

Text title : yuktidIpikA

File name : yuktidIpikA.itx

Category : major_works

Location : doc_z_misc_major_works

Transliterated by : Dhaval Patel drdhaval2785 at gmail.com

Proofread by : Dhaval Patel drdhaval2785 at gmail.com

Latest update : September 15, 2014, October 6, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

November 5, 2024

*sanskritdocuments.org*

# યુક્તિદીપિકા

વીતાવીતવિષાણસ્ય પક્ષતાવનસેવિનઃ ।
પ્રવાદાઃ સાંખ્યકરિણઃ સલ્લકીષંડભઙ્ગુરાઃ ॥ ૧॥

ઋષયે પરમાયાર્કમરીચિસમતેજસે ।
સંસારગહનમધ્વાન્તસૂર્યાય ગુરવે નમઃ ॥ ૨॥

તત્ત્વં જિજ્ઞાસમાનાય વિપ્રાયાસુરયે મુનિઃ ।
તદુવાચ મહત્તન્ત્રં દુઃખત્રયનિવૃત્તયે ॥ ૩॥

ન તસ્યાધિગમઃ શક્યઃ કર્તું વર્ષશતૈરપિ ।
ભૂયસ્ત્વાદિતિ સંચિન્ત્ય મુનિભિઃ સૂક્ષ્મબુદ્ધિભિઃ ॥ ૪॥

ગ્રન્થેનાલ્પેન સંક્ષિપ્ય તદાર્ષમનુશાસનમ્ ।
નિબદ્ધમમલપ્રજ્ઞૈઃ શિષ્યાણાં હિતકામ્યયા ॥ ૫॥

પ્રતિપક્ષાઃ પુનસ્તસ્ય પુરુષેશાણુવાદિનઃ ।
વૈનાશિકાઃ પ્રાકૃતિકા વિકારપુરુષાસ્તથા ॥ ૬॥

તેષામિચ્છાવિઘાતાર્થમાચાર્યૈઃ સૂક્ષ્મબુદ્ધિભિઃ ।
રચિતાઃ સ્વેષુ તન્ત્રેષુ વિષમાસ્તર્કગહ્વરાઃ ॥ ૭॥

શિષ્યૈર્દુરવગાહાસ્તે તત્ત્વાર્થભ્રાન્તબુદ્ધિભિઃ ।
તસ્માદીશ્વરકૃષ્ણેન સંક્ષિપ્તાર્થમિદં કૃતમ્ ॥ ૮॥

સપ્તત્યાખ્યં પ્રકરણં સકલં શાસ્ત્રમેવ વા ।
યસ્માત્ સર્વપદાર્થાનામિહ વ્યાખ્યા કરિષ્યતે ॥ ૯॥

પ્રધાનાસ્તિત્વમેકત્વમર્થવત્ત્વમથાન્યતા ।
પારાર્થ્યઞ્ચ તથાઽનૈક્યં વિયોગો યોગ એવ ચ ॥ ૧૦॥

શેષવૃત્તિરકર્તૃત્વં ચૂલિકાર્થાઃ સ્મૃતા દશ ।
વિપર્યયઃ પઞ્ચવિધસ્તથોક્તા નવ તુષ્ટયઃ ॥ ૧૧॥

કરણાનામસામર્થ્યમષ્ટાવિંશતિધા મતમ્ ।
ઇતિ ષષ્ટિઃ પદાર્થાનામષ્ટાભિઃ સહ સિદ્ધિભિઃ ॥ ૧૨॥

યથાક્રમં લક્ષણતઃ કાત્સ્ન્યેનેહાભિધાસ્યતે ।
તસ્માદતઃ શાસ્ત્રમિદમલં નાનાત્વસિદ્ધયે ॥ ૧૩॥

અલ્પગ્રન્થમનલ્પાર્થં સર્વૈસ્તન્ત્રગુણૈર્યુતમ્ ।
પારમર્ષસ્ય તન્ત્રસ્ય બિમ્બમાદર્શગં યથા ॥ ૧૪॥

તસ્ય વ્યાખ્યાં કરિષ્યામિ યથાન્યાયોપપત્તયે ।
કારુણ્યાદપ્યયુક્તાં તાં પ્રતિગૃહ્ણન્તુ સૂરયઃ ॥ ૧૫॥

આહ, કરિષ્યતિ ભવાન્ વ્યાખ્યામ્ । ઇદં ત્વાદાવુપન્યસ્તં સર્વૈસ્તન્ત્રગુણૈર્યુતમિદં તન્ત્રમિતિ । કે તન્ત્રગુણાઃ, કિયન્તો વેતિ ?
ઉચ્યતે -
સૂત્રપ્રમાણાવયવોપપત્તિરન્યૂનતા સંશયનિર્ણયોક્તિઃ ।
ઉદ્દેશનિર્દેશમનુક્રમશ્ચ સંજ્ઞોપદેશાવિહ તન્ત્રસમ્પત્ ॥

સૂત્રાણિ ચ પ્રમાણાનિ ચ અવયવાશ્ચ, સૂત્રપ્રમાણાવયવાઃ । તેષામ્ ઉપપત્તિઃ સૂત્રપ્રમાણાવયવોપપત્તિઃ । ઉપપત્તિઃ સમ્ભવ ઇત્યનર્થાન્તરમ્ । અનન્યોઽર્થોઽનર્થાન્તરમ્ । ઉપપત્તિશબ્દઃ પ્રત્યેકં પરિસમાપ્યતે સૂત્રોપપત્તિરિત્યાદિ ।
આહ, લક્ષણોપેતસૂત્રોપપત્તિરિતિ વક્તવ્યમ્ ।
ઇતરથા હિ અલક્ષણોપેતસ્યાપિ સૂત્રસ્ય તન્ત્રાઙ્ગભાવઃ સ્યાદિતિ ।
ઉચ્યતે ન, નાન્તરીયકત્વાત્ । ન હ્યન્તરેણ લક્ષણોપેતત્વં સૂત્રત્વમ્ ।
અતો ન વક્તવ્યમેતદિતિ ।
આહ, અથ સૂત્રમિતિ કસ્માત્ ?
ઉચ્યતે- સૂચનાત્ સૂત્રમ્ । સૂચયતિ તાંસ્તાનર્થવિશેષાનિતિ સૂત્રમ્ ।
તદ્યથા- કારણમસ્ત્યવ્યક્તમ્ (kA0 16), ભેદાનાં પરિમાણાદિતિ (kA0 15) । અત્ર પ્રતિજ્ઞાહેતૂ કણ્ઠોક્તૌ । તયોરુપયોગિ દૃષ્ટાન્તં સાધ્યસિદ્ધયે સમર્થમિતિ કૃત્વા મૂલશકલાદયોઽત્રાન્તરનભિહિતા અપ્યેતસ્માદવસીયન્તે । અથવા ભિક્ષોરુપસંહૃતબહિષ્કરણાન્તઃકરણસ્ય તેષુ તેષ્વતીન્દ્રિયેષુ અપિ પ્રધાનાદિષ્વર્થેષુ બુદ્ધિં સૂચયતીતિ સૂત્રમ્ ।
અથવા, સૌક્ષ્મ્યાત્તદનુપલબ્ધિરિતિ (kA0 8) સૂત્રમ્ । તદ્યથા-
અલ્પાક્ષરમસન્દિગ્ધં સારવદ્વિશ્વતોમુખમ્ ।

અસ્તોભમનવદ્યં ચ સૂત્રં સૂત્રવિદો વિદુઃ ॥

અસ્તોભમપુનરુક્તમિત્યર્થઃ । તથા
લભૂનિ સૂચિતાર્થાનિ સ્વલ્પાક્ષરપદાનિ ચ ।
સર્વતઃ સારભૂતાનિ સૂત્રાણ્યાહુર્મનીષિણઃ ॥

પ્રમાણાનિ ચ પ્રત્યક્ષાદીનિ, તાન્યુત્તરત્ર વક્ષ્યતિ
'દૃષ્ટમનુમાનમાપ્તવચનં ચ' (kA0 4), 'પ્રતિવિષયાધ્યવસાયો
દૃષ્ટમિત્યાદિ' (kA0 5) ।
અવયવાઃ પુનર્જિજ્ઞાસાદયઃ, પ્રતિજ્ઞાદયશ્ચ । તત્ર જિજ્ઞાસાદયો
વ્યાખ્યાઙ્ગમ્ । પ્રતિજ્ઞાદયઃ પરપ્રત્યાયનાઙ્ગમ્ ।તાનુત્તરત્ર વક્ષ્યામઃ ।
આહ, અવયવાનભિધાનમુપદેશાત્ । ન હિ તથા પ્રત્યક્ષાદીનિ
પ્રમાણાન્યુપદિષ્ટાનિ તથા અવયવા ઉપદિષ્ટાઃ ।
તસ્માદવયવોપપત્તિરિત્યેતદસત્ ।
ભાષ્યકારપ્રામાણ્યાદદોષ ઇતિ ચેત્ સ્યાન્મતમ્ । યદ્યપિ
સૂત્રકારેણાવયવોપદેશો ન કૃતસ્તથાઽપિ ભાષ્યકારાઃ કેચિદેષાં
સંગ્રહં ચક્રુઃ । તે ચ નઃ પ્રમાણમ્ । તસ્માદ્યુકતમવયવોપપત્તિરિતિ ।
એતચ્ચાયુક્તમ્ । કસ્માત્ ?
ઉત્સૂત્રત્વાત્ । નહ્યુત્સૂત્રં વ્યાચક્ષાણા ભાષ્યકારાઃ પ્રમાણં ભવન્તિ ।
તથા ચૈતદુત્સૂત્રિતમિતિ ।
ઉચ્યતે, ન । લિઙ્ગાત્ । નૈતદ્યુક્તમનુપદેશાન્ન સન્તિ જિજ્ઞાસાદયઃ ।
કિન્તર્હ્યનુપદિષ્ટમપ્યેષામસ્તિત્વં લિઙ્ગાત્ પ્રતિપદ્યામહે
યદયમાચાર્યો દુઃખત્રયાભિઘાતાજ્જિજ્ઞાસા તદપઘાતકે હેતાવિતિ (kA0 1)
જિજ્ઞાસાપ્રયોજનમાચષ્ટે । કારણમસ્ત્યવ્યક્તમિતિ (kA0 16) પ્રતિજ્ઞાં કરોતિ ।
ભેદાનાં પરિમાણાદિતિ (kA0 15) હેતુમુપદિશતિ । નટવદ્ વ્યવતિષ્ઠતે
લિંગમિતિ (kA0 42) દૃષ્ટાન્તં દ્યોતયતિ । ક્ષીરસ્ય યથા તથા પ્રવૃત્તિઃ
પ્રધાનસ્યેત્યુપસંહરતિ (kA0 57) । તસ્માત્ ત્રિવિધં કરણં દ્વારીતિ (કા૦
૩૫) નિગમયતિ । ન ચાનભિપ્રેતૈરાચાર્યાણાં શાસ્ત્રે વ્યવહારો લક્ષ્યતે ।
તેન વયં લિઙ્ગાત્પ્રતિપદ્યામહે સન્તિ જિજ્ઞાસાદયોઽવયવાઃ શાસ્ત્ર ઇતિ ।
આહ, સતામનુપદેશે પ્રયોજનવચનમ્ । એવં ચેન્મન્યસે- સન્તિ
જિજ્ઞાસાદયોઽવયવાઃ, શાસ્ત્રે તેષામનુપદેશે પ્રયોજનં વક્તવ્યમ્-
અમુષ્માદ્ધેતોરાચાર્યેણ નોપદિશ્યન્તે, સન્તિ ચ તે ઇતિ ।
ઉચ્યતે, પ્રમાણાન્તર્ભાવાત્ । પ્રમાણેષ્વન્તર્ભાવ એષામિત્યયમુપદિષ્ટો

હેતુરસ્માભિઃ । અનુમાનાઙ્ગં હિ જિજ્ઞાસાદયઃ, તસ્માત્તદન્તર્ભૂતાસ્તે ઇતિ
ન પૃથગુપદિશ્યન્તે । કિઞ્ચ, તન્ત્રાન્તરોક્તેઃ । તન્ત્રાન્તરેષુ હિ
વિન્ધ્યવાસિપ્રભૃતિરાચાર્યૈરુપદિષ્ટાઃ । પ્રમાણં ચ નસ્તે આચાર્યા
ઇત્યતશ્ચાનુપદેશો જિજ્ઞાસાદીનામિતિ ।
આહ ન, પ્રમાણાનુપદેશપ્રસંગાત્ । યદિ ચ
તન્ત્રાન્તરોપદેશાદેવાવયવાનામનુપદેશઃ, પ્રત્યક્ષાદીન્યપિ
ચ તન્ત્રાન્તરેષૂપદિશ્યન્તે । શ્રોત્રાદિવૃત્તિઃ પ્રત્યક્ષમ્ ।
સમ્બન્ધાદેકસ્માચ્છેષસિદ્ધિરનુમાનમ્ । યો યત્રાભિયુક્તઃ
કર્મણિ ચાદુષ્ટસ્સ તત્રાપ્તસ્તસ્યોપદેશ આપ્તવચનમિતિ
તેષામપ્યનુપદેશપ્રસઙ્ગઃ । અથ સતિ તન્ત્રાન્તરોપદેશે
પ્રમાણાન્યુપદિશ્યન્તે નાવયવા ઇતિ, નન્વેતદિચ્છામાત્રમિતિ ।
ઉચ્યતે, પૂર્વ એવ તર્હિ પરિહારોઽસ્તુ । અથવા પુનરસ્તુ
તન્ત્રાન્તરોક્તેરિત્યયમપિ પરિહારઃ । યત્તૂક્તં પ્રમાણાનુપદેશપ્રસઙ્ગ
ઇતિ અત્ર બ્રૂમઃ- અયુક્તમેતત્ । કસ્માત્ ? પ્રયોજનવતામુપદેશસ્યાદોષત્વાત્ ।
અનુપદેશો હિ પ્રયોજનવતશ્ચોદ્યત ઇતિ યુક્તમેતત્ । ઉપદેશમેવ
તુ સદોષ ઇતિ કૃત્વા કઃ પ્રત્યાચક્ષીત ? તસ્માન્ન કિઞ્ચિદેતત્ ।
કિઞ્ચાન્યત્, પ્રધાનોપદેશે ગુણભૂતાન્તર્ભાવસિદ્ધેઃ । તદ્યથા, તક્ષણુહિ
ચૈત્ર ઇત્યુક્તે યાવદ્ભિસ્સાધનવિશેષૈર્વિના તક્ષણં નોપપદ્યતે
સર્વાસ્તાંશ્ચૈત્ર ઉપાદત્તે । તથા પ્રત્યક્ષાદિષુ પ્રમાણેષૂપદિષ્ટેષુ
યૈરેષામવિનાભાવઃ સર્વાણિ તાન્યુપાદાસ્યામહે । કિઞ્ચાન્યાત્, અન્યત્રાપિ
તદનુષ્ઠાનાત્ । ન કેવલમિહ, અન્યત્રાપ્યયમાચાર્યઃ પ્રધાનામેવોપદેશં
કરોતિ । તદઙ્ગભૂતાસ્તુ તદુપદેશાદેવ પ્રતીયન્તે । તદ્યથા,
કારણમસ્ત્યવ્યક્તમ્ (kA0 16) bhedAnAM parimANAditi (kA0 15) । ઇતરથા હિ
દૃષ્ટાન્તાભાવાદસાધનમેતત્સ્યાત્ । પશ્યતિ ત્વાચાર્યો નાદૃષ્ટાન્તં સાધનં
સાધ્યમાપ્નોતીતિ કૃત્વા પ્રતિપાદકાઃ પ્રતિપાદનકાલે તન્ત્રાન્તરોપદિષ્ટાનપિ
મૂલશકલાદીનાક્ષેપ્સ્યન્તિ ઇતિ । કિઞ્ચાન્યત્, અનુમાને ભૂતવદુપદેશાત્ ।
અતશ્ચૈતદેવં યદયમાચાર્યસ્ત્રિવિધમનુમાનમાખ્યાતમિતિ
(kA0 5) બ્રવીતિ । કથં કૃત્વા જ્ઞાપકમ્? આખ્યાતસ્ય હિ
પ્રત્યામ્નાયે ભૂતવાચિના શબ્દેનોપદેશો ભવતિ । ન ચાનેન પૂર્વં
ત્રિવિધમનુમાનમાખ્યાતમ્ । આખ્યાતમિતિ ચેત્, ન તદાખ્યાતં ક્વચિદિતિ
શક્યં પ્રતિપાદયિતુમ્ । સોઽયમનાખ્યાયાપિ યદ્ભૂતવાચિનં શબ્દમુપાદત્તે
તજ્જ્ઞાપયત્યાચાર્યસ્તન્ત્રાન્તરક્લૃપ્તાનામપીહ સન્નિવેશોઽઙ્ગીક્રિયતે ।

કિમેતસ્ય જ્ઞાપને પ્રયોજનમ્ ? તન્ત્રાન્તરોપદિષ્ટોऽપિ કર્મયોનીનામ્
પ્રાણભેદાદીનાં ચ લક્ષણોપદેશસ્સંગૃહીતો ભવતીતિ સિદ્ધં
તન્ત્રાન્તરોપદેશાદવયવાનુપદેશઃ । તસ્માત્સૂક્તમેવાવયવોપપત્તિરિતિ ।
અન્યૂનતા । પદાર્થકાત્સ્ન્યર્મશેષતાऽન્યૂનતેત્યભિધીયતે । પદાર્થાશ્ચ
દશ ચૂલિકાર્થાઃ, પંચાશત્પ્રત્યયાઃ । તત્રાસ્તિત્વમેકત્વં
પંચભિર્વીતૈઃ સિદ્ધમ્ । અર્થવત્ત્વં કાર્યકારણભાવઃ ।
પારાર્થ્યં સંહત્યકારિણાં પરાર્થત્વાત્ । અત એવાન્યત્વમ્ ।
ચેતનાશક્તેર્ગુણત્રયાજ્જન્મમરણકરણાનામિત્યેવમાદિભિઃ પુરુષબહુત્વમ્ ।
પુરુષસ્ય દર્શનાર્થ ઇતિ સંયોગઃ । પ્રાપ્તે શરીરભેદે ઇતિ વિયોગઃ ।
સમ્યગ્જ્ઞાનાધિગમાદિતિ શેષવૃત્તિઃ । તસ્માચ્ચ વિપર્યાસાદિતિ
પુરુષસ્યાકર્તૃત્વમિત્યેતે દશ ચૂલિકાર્થાઃ ।
પઞ્ચ વિપર્યયભેદા ભવન્ત્યશક્તિશ્ચ કરણવૈકલ્યાત્ ।
અષ્ટાવિંશતિભેદા તુષ્ટિર્નવધાऽષ્ટધા સિદ્ધિઃ ॥ (kA0 47)
ઇતિ પઞ્ચાશત્પ્રત્યયાઃ । સૈષા ષષ્ટિઃ પદાર્થાનામ્ । તદુપપત્તિરન્યૂનતા ।
સંશયનિર્ણયોક્તિઃ । સંશયશ્ચ નિર્ણયશ્ચ તૌ સંશયનિર્ણયૌ
તયોરુક્તિસ્સંશયનિર્ણયોક્તિઃ । સામાન્યાભિધાનં સંશયઃ । તદ્યથા મહદાદિ
તચ્ચ કાર્યં પ્રકૃતિવિરૂપં સરૂપં ચેત્યુક્તે (kA0 8) સંશયો ભવતિ
કેન ધર્મેણ કાર્યં પ્રકૃતિવિરૂપં કેન વા સરૂપમિતિ । વિશેષાભિધાનં
નિર્ણયઃ । સ ચ દ્વિવિધઃ, શબ્દતોऽર્થતશ્ચ । શબ્દસ્તાવત્ યથા
હેતુમદાદિભિઃ કાર્યં પ્રકૃતિવિરૂપમ્, ત્રૈગુણ્યાદિભિઃ પ્રકૃતિસરૂપમિતિ ।
અર્થતસ્તત્ યથા તેભ્યો ભૂતાનિ પઞ્ચ પઞ્ચભ્યઃ, એતે સ્મૃતા વિશેષાઃ
(kA0 38) . kiM kAraNam ? yasmAt shAntA ghorAshcha mUDhAshcha (kA0 38) ।
અશાન્તઘોરમૂઢત્વાત્તન્માત્રાણ્યવિશેષાઃ ।
ઉદ્દેશનિર્દેશમ્ । ઉદ્દેશશ્ચ નિર્દેશશ્ચ ઉદ્દેશનિર્દેશમ્ । સર્વો દ્વન્દ્વો
વિભાષયૈકવદ્ભવતિ ઇતિ દ્વન્દ્વૈકવદ્ભાવઃ । સઙ્ક્ષેપવચનમુદ્દેશઃ ।
તદ્યથા, એષ પ્રત્યયસર્ગો વિપર્યયાશક્તિતુષ્ટિસિદ્ધ્યાખ્યઃ (kA0 46) ।
વિસ્તરવચનં નિર્દેશઃ । તદ્યથા, પઞ્ચ વિપર્યયભેદા ભવન્તિ
(kA0 47) bhedastamaso.aShTavidha (kA0 48) ઇત્યાદિઃ ।
અનુક્રમશ્ચ- પદાર્થાનામાનુપૂર્વ્યા સન્નિવેશોપદેશોऽનુક્રમઃ, તદ્યથા
- 'પ્રકૃતેર્મહાંસ્તતોऽહંકારસ્તસ્માદ્ ગણશ્ચ ષોડશકઃ' (kA0 22)
ઇત્યન્તેન ।
સંજ્ઞોપદેશૌ । સંજ્ઞિપ્રત્યાયનાર્થઃ શબ્દઃ સંજ્ઞા ।

સા ચ દ્વિવિધા । અર્થનિબન્ધના, સ્વરૂપનિબન્ધના ચ ।
તત્રાર્થનિબન્ધનાઽર્થવશેનાર્થક્રિયાપેક્ષા । જાત્યાદ્યર્થસ્વરૂપાન્તર્ભાવી
યથાઽર્થસ્તથાભૂતમેવ સંજ્ઞિનં પ્રત્યાયતિ । તદ્યથા પાચકો
લાવક ઇતિ । સ્વરૂપનિબન્ધના પુનઃ સંજ્ઞિપ્રત્યાયનોપાયમાત્રમ્ ।
સ્વરૂપમાત્રોપકારિણી વિનાઽવયવાર્થં સમયવશાદતથાભૂતમપિ સંજ્ઞિનં
પ્રત્યાયતિ । તદ્યથા, ગજકર્ણોઽશ્વકર્ણ ઇતિ । પ્રયત્નતો ભગવતઃ
પરમર્ષેરાર્ષેણ જ્ઞાનેન સર્વતત્ત્વાનાં સ્વરૂપમુપલભ્ય સંજ્ઞાં વિદધતો
નાસ્તિ સ્વરૂપનિબન્ધનઃ શબ્દઃ । તદ્યથા, પ્રધીયન્તેઽત્ર વિકારા ઇતિ
પ્રધાનમ્, પુરિ શેત ઇતિ પુરુષ ઇત્યાદિ । તન્મતાનુસારિણામપ્યાચાર્યાણાં
તાભિરેવ સંવ્યવહારાન્નાસ્ત્યપૂર્વસંજ્ઞાવિધાનં પ્રત્યાદરઃ ।
ઉપદેશઃ । ઇતિકર્તવ્યતા, ફલસમાખ્યાનમુપદેશઃ । તદ્યથા,
એવં તત્ત્વાભયસાન્નાસ્મિ ન મે નાહમિત્યપરિશેષમ્ ।
અવિપર્યયાદ્વિશુદ્ધં કેવલમુત્પદ્યતે જ્ઞાનમ્ ॥ (kA0 64)
એતે સૂત્રોપપત્ત્યાદયસ્તન્ત્રગુણાઃ ।
ઇતિ કરણં પ્રકારાર્થમ્ । એવમ્પ્રકારા અન્યેઽપિ દ્રષ્ટવ્યાઃ । તદ્યથા,
ઉત્સર્ગોઽપવાદોઽતિદેશ ઇત્યાદિઃ । તત્રોત્સર્ગઃ પ્રકૃતિવિરૂપં
(kA0 8) vyaktam, sarUpaM (kA0 8) ચેત્યપવાદઃ । તથા તદ્વિપરીત
(kA0 11) ityutsargaH, tathA cha pumAn (kA0 11 ) ઇત્યપવાદઃ ।
સામાન્યમચેતનં પ્રસવધર્મિ વ્યક્તં, તથા પ્રધાનમ્ (kA0 11)
ઇત્યતિદેશઃ । ઇત્યેવમન્યા અપિ તન્ત્રયુક્તયઃ શક્યા ઇહ પ્રદર્શયિતુમ્ ।
અતિપ્રસઙ્ગસ્તુ પ્રકૃતં તિરોદધાતીતિ નિવર્ત્યતે । સિદ્ધં તન્ત્રયુક્તીનાં
સમ્બન્ધોપપત્તેસ્તન્ત્રમિદમિતિ ।
કિઞ્ચ તન્ત્રાન્તરાવિરોધાત્ । યદિ ખલ્વપીદમપિ પ્રકરણં સ્યાત્
તન્ત્રાન્તરે પાતઞ્જલપઞ્ચાધિકરણવાર્ષગણપ્રભૃતીનામન્યતમસ્ય
શેષભૂતં સ્યાત્ । તૈશ્ચાપ્યવિરોધસ્તત્ર તત્રેતિ
વક્ષ્યામઃ । પૂર્વતન્ત્રશેષભાવાદિતિ ચેત્, તુલ્યમ્ । એતાન્યપિ
પૂર્વતન્ત્રશેષભૂતાનિ, તેષામપિ પ્રકરણત્વપ્રસઙ્ગઃ । અથ
મતમ્- સકલપદાર્થસંગ્રહાત્તન્ત્રાન્તરાણ્યેતાનિ, એવમિહાપિ
સકલપદાર્થસંગ્રહાત્તન્ત્રાન્તરત્વમભ્યુપગન્તવ્યમ્ ।
તસ્માદ્યુક્તમેતત્તન્ત્રમિદમ્ । ઇત્યુપોદ્ધાતઃ ॥

————————-

કારિકા ૧

————————-

આહ, કિંગુણવિશિષ્ટાય શિષ્યાય પુનરિદં તન્ત્રં વ્યાખ્યેયમિતિ ।
ઉચ્યતે- જિજ્ઞાસવે મતિમતે મીમાંસકાયાર્થિનેઽભ્યુપગતાય શિષ્યાય વ્યાખ્યેયં શાસ્ત્રમ્ ।
કસ્માત્ ?
પરમર્ષિપ્રામાણ્યાત્ । યસ્માદ્ ભગવાન્ વિશ્વાગ્રજઃ પરમર્ષિર્ભગવદાસુરેર્જિજ્ઞાસામુપલભ્યોત્તરગુણવિશેષસમ્પદં ચ વ્યાખ્યાતવાન્ । રજ એવ દુઃખં તન્નિરાકરિષ્ણોર્વિવેકોઽયં, સત્ત્વાત્ । સત્ત્વં ચાસ્માન્નાનેત્યેવમાદિના વચનપ્રતિપાદ્યોઽયમર્થો મહદ્ભિશ્ચોક્તઃ । તસ્માદ્રજોદુઃખોપઘાતોપઘાતકજિજ્ઞાસોઃ સત્ત્વાદ્ધર્માદિકુશલમૂલવિપાકોત્પિત્સોર્દુઃખત્રયનિવૃત્તય ઇદં શાસ્ત્રં પ્રવૃત્તમ્ । તદર્થાત્પરિણમતે શિષ્યસ્યેતિ । કથં નામ શિષ્યસ્ય નિઃશ્રેયસેન યોગઃ સ્યાદિત્યેવમર્થમિદં વ્યાખ્યાનં ક્રિયત ઇતિ ।
આહ, યદુક્તં જિજ્ઞાસવે વ્યાખ્યાનં કર્તવ્યમિતિ તત્ર કુતઃ પુનરિયં જિજ્ઞાસા કસ્મિન્ વાઽર્થે ભવતીતિ ?
ઉચ્યતે - યત્તાવદુક્તં કુતઃ પુનરિયં જિજ્ઞાસા ભવતીત્યત્ર બ્રૂમઃ

॥ દુઃખત્રયાભિઘાતાજ્જિજ્ઞાસા ॥

દુઃખં રજ ઇત્યનર્થાન્તરમ્ । દુઃખયતીતિ દુઃખં ભવતીતિ । ત્રયમિતિ સંખ્યાપદં સર્વદ્રવ્યવિષયં, દુઃખશબ્દેન વિશિષ્યતે । પ્રાધાન્યાચ્ચ વ્યતિરિક્તબુદ્ધ્યા ગૃહ્યમાણં સમ્બન્ધિત્વાદાધારસ્ય ભેદનિબન્ધનાયાઃ ષષ્ઠ્યા નિમિત્તત્વં પ્રતિપદ્યતે- દુઃખાનાં ત્રયં દુઃખત્રયમ્ ।
અભિહન્યતેઽનેનેત્યભિઘાતઃ ।
કઃ પુનરયમભિઘાતો નામ ?
ઉચ્યતે- યોઽસાવુપર્યુક્તદુઃખત્રયેણાન્તઃકરણેન ચેતનાશક્તેરભિસમ્બન્ધઃ । તસ્માદ્દુઃખત્રયાભિઘાતાજ્જિજ્ઞાસા ।
યદુક્તં કસ્મિન્નર્થે ભવતીતિ તત્રાહ-

॥ તદપઘાતકે હેતૌ ॥

અપહન્તીત્યપઘાતકઃ, તસ્યાપઘાતકસ્તદપઘાતકઃ ।
આહ, તદપઘાતકે ઇતિ સમાસાઽનુપપત્તિઃ, પ્રતિષેધાત્ । કર્તરિ યૌ તૃજકૌ

તાભ્યાં સહ ષષ્ઠી ન સમસ્યતે । તસ્માત્તસ્યાપઘાતક ઇતિ વક્તવ્યમ્ ।
ઉચ્યતે- ન, શાસ્ત્રે દર્શનાત્ । "તત્પ્રયોજકો હેતુશ્ચ" ઇતિ શાસ્ત્રે
દૃષ્ટઃ પ્રયોગઃ । પદકારશ્ચાહ- જાતિવાચકત્વાત્ । તથા કદાચિદ્ગુણો
ગુણવિશેષો ભવતિ, કદાચિદ્ગુણિના ગુણો વિશિષ્યત ઇતિ ચૂર્ણિકારસ્ય
પ્રયોગઃ તસ્મદનવદ્યમેતત્ ।
અયં તુ પિણ્ડાર્થઃ । ત્રિવિધેન દુઃખેનાભિહતો બ્રાહ્મણસ્તદપઘાતકં
હેતું જિજ્ઞાસતે । કો નામાસૌ હેતુઃ સ્યાદ્યો દુઃખત્રયમભિહન્યાદિતિ ।
આહ, દુઃખશબ્દાવચનમાદાવમઙ્ગલાર્થત્વાત્ । મઙ્ગલાદીનિ હિ શાસ્ત્રાણિ
પ્રથન્તે વીરપુરુષાણિ ચ ભવન્તિ, અધ્યેતારશ્ચ મંગલેનાભિહતસંસ્કારાઃ
શાસ્ત્રાર્થાનાસુ પ્રતિપદ્યન્તે । દુઃખમિત્યયં ચામઙ્ગલાર્થઃ શબ્દઃ,
તસ્માન્નારબ્ધવ્યઃ શાસ્ત્રાદાવિતિ ।
ઉચ્યતે ન, વાક્યસ્યાર્થે પ્રયોગાત્ પદસ્યાનર્થક્યાદમઙ્ગલાર્થત્વાનુપપત્તિઃ ।
વાક્યમર્થપ્રત્યાયનાર્થં પ્રયુજ્યતે, વિશિષ્ટાર્થાભિધાનાત્ । ન
પદમ્ । તથા હિ પદાર્થવ્યતિરેકેણ વિશિષ્ટ એવ વાક્યાર્થઃ પ્રતીયતે,
કેવલં તુ પદં સામાન્યાર્થાદપ્રચ્યુતં વિશિષ્ટાર્થાભિધાનાસમર્થમ્ ।
અતએવ ન વિવક્ષિતાર્થપ્રત્યાયનયોગ્યતયોપાદીયતે । તદ્યથા-
દેવદત્તેત્યયં શબ્દઃ કર્તૃવાચકત્વેનોપાત્તઃ, સર્વક્રિયાવિષયત્વાત્,
નાન્તરેણ કર્મક્રિયાશબ્દૌ વિશિષ્ટાર્થઃ પ્રતીયતે । તથા ગામિતિ
કર્મ, સર્વક્રિયાકર્ત્રભિધાનનિમિત્તત્વાત્ । તથા અભ્યાજેતિ ક્રિયા,
સર્વકર્મકર્તૃવિષયત્વાત્ । યદા તુ દેવદત્ત ગામભ્યાજ શુક્લામિત્યુચ્યતે
તદા દેવદત્તેન ગોશબ્દેન કર્માન્તરેભ્યો વિચ્છિદ્ય સ્વાત્મન્યવસ્થાપ્યતે ।
ક્રિયા ચ ગોશબ્દશ્ચ સર્વકર્તૃભ્યો દેવદત્તકર્મતયા વ્યવસ્થાપ્યતે ।
કર્તૃકર્મણી ચાભ્યાજિક્રિયાયાઃ સાધનભાવેનૈવ નિયમ્યેતે । શુક્લશબ્દો
ગોશબ્દશ્ચ ગોશબ્દં સર્વગુણવિષયમાધેયાન્તરેભ્યો વ્યવચ્છેદ્ય
સ્વાત્મન આધારત્વે નિયમ્ય, તદ્વિષયતાં પ્રતિપાદયતીત્યનેન
ક્રમેણ વિશિષ્ટો વાક્યાર્થઃ । કેવલાનાન્તુ પદાનાં સામાન્યાર્થાત્
પ્રચ્યુતાનામ્વિશેષાનભિધાનાદાનર્થક્યમ્ । આહ ચ-
પૃથઙ્નિવિષ્ટતત્ત્વાનામ્પૃથગર્થાભિપાતિનામ્ ।
ઇન્દ્રિયાણાં યથા કાર્યમૃતે દેહાન્ન લભ્યતે ॥

તથૈવ સર્વશબ્દાનામ્પૃથગર્થાભિધાયિનામ્ ।
વાક્યેભ્યઃ પ્રવિભક્તાનામર્થવત્તા ન લભ્યતે ॥ ઇતિ

એવં સતિ કુતોઽયં નિશ્ચયપ્રતિલમ્ભો યદ્દુઃખશબ્દોઽયમમઙ્ગલાર્થો યાવતા સન્દિહ્યત એવ અયં કિં સ્વાર્થપ્રતિપત્ત્યર્થમુપાત્તોઽથ હેયત્વાયેતિ । વાક્યસ્ય તુ મઙ્ગલાર્થત્વમ્, દુઃખપ્રહાણાર્થમુપાદાનાત્ । યદ્ધિ દુઃખપ્રહાણાર્થં વાક્યમુપાદીયતે તન્મઙ્ગલાર્થં દૃષ્ટમ્ । તદ્યથા વ્યાધ્યપગમઃ સ્યાદલક્ષ્મીર્મા ભૂદિતિ । દુઃખપ્રહાણાર્થં ચેદં વાક્યમુપાત્તં તસ્માન્મઙ્ગલાર્થમિદમ્ । તત્ર યદુક્તં દુઃખશબ્દાવચનમાદાવમઙ્ગલાર્થત્વાદિત્યેતદયુક્તમ્ ।

આહ, ત્રયગ્રહણાનર્થક્યં, ગુણૈકત્વાત્ । દુઃખં રજ ઇતિ પ્રતિપન્નો ભવાન્, તચ્ચૈકં શાસ્ત્રે પઠ્યતે । તસ્માત્ત્રયગ્રહણમનર્થકમિતિ ।

નિમિત્તભેદાદ્ભેદોપચાર ઇતિ ચેત્, સ્યાન્મતમ્ । યદ્યપિ એકં દુઃખં તથાપિ નિમિત્તાનામધ્યાત્માધિભૂતાધિદૈવલક્ષણાનાં ભેદાદસ્ય ભેદોપચારઃ કરિષ્યત ઇતિ ।

તચ્ચ નૈવમ્ ।

કસ્માત્ ?

નિમિત્તાનન્ત્યેન ગુણાનન્ત્યપ્રસઙ્ગાત્ । આધ્યાત્મિકં હિ દ્વિવિધં, શારીરં માનસં ચ । શારીરં તાવદ્વાતપિત્તશ્લેષ્મણાં વૈષમ્યનિમિત્તમ્ । તથા માનસં કામક્રોધલોભમોહવિષાદભયેર્ષ્યાઽસૂયારત્યવિશેષદર્શનનિમિત્તમ્ । આધિભૌતિકં ચ મનુષ્યપશુમૃગપક્ષિસરીસૃપસ્થાવરનિમિત્તમ્ । આધિદૈવિકં શીતોષ્ણવાતવર્ષાશન્યવશ્યાયાવેશનિમિત્તમ્ । તત્ર નિમિત્તભેદાત્ત્રિત્વપ્રગિજ્ઞાસ્ય ગુણાનન્ત્યપ્રસઙ્ગઃ, સ ચ નેષ્ટસ્તસ્માન્ન નિમિત્તભેદાત્ત્રિત્વમ્ ।

ઉચ્યતે- યદુક્તં રજસ એકત્વાત્ ત્રિત્વાનુપપત્તિઃ, તસ્ય નિમિત્તભેદાત્ ત્રિત્વોપચાર ઇતિ સત્યમેતત્ । યત્તૂક્તં નિમિત્તાનન્ત્યેન ગુણાનન્ત્યપ્રસઙ્ગ ઇતિ તદયુક્તમ્ । કસ્માત્ ? ભેદેઽપિ સતિ વર્ણસંખ્યાવદ્વ્યવસ્થાનોપપત્તેઃ । તદ્યથા ચત્વારો વર્ણા ઇત્યસ્યાઃ સંખ્યાયાઃ સતિ પૈપ્પલાદાદિભેદે તેષાં બ્રાહ્મણત્વાદિવ્યતિરેકાભાવાન્ન સંખ્યાન્તરહેતુત્વં નો ખલ્વપિ વર્ણાવ્યતિરેકાદેકત્વં ભવતિ । એવં ત્રીણિ દુઃખાનીત્યસ્યાઃ સંખ્યાયાઃ સતિ શરીરાદિભેદે તેષામાધ્યાત્મિકાદિવ્યતિરેકાસમ્ભવાન્ન સઙ્ખ્યાન્તરહેતુત્વં નો ખલ્વપિ દુઃખાવ્યતિરેકાદેકત્વં ભવિતુમર્હતિ । કિઞ્ચાન્યત્, નિમિત્તભેદાદ્ ભેદોપચાર ઇતિ ભવાનેવ પ્રતિપન્નઃ । ન ચોપચારઃ પરમાર્થ ઇત્યલમસ્થાને યત્નેન ।

આહ- અભિધાતાજ્જિજ્ઞાસાયામતિપ્રસઙ્ગઃ, સર્વેષાં સમ્ભવાત્ ।

યથાસુરેર્દુઃખત્રયાભિઘાતાજ્જિજ્ઞાસા ભવતીત્યેતદિષ્ટં તેન
સર્વેષામભિઘાતોઽસ્તીતિ સર્વેષાં જિજ્ઞાસાપ્રસઙ્ગઃ । અથ
મતં દુઃખાભિઘાતે કસ્યચિજ્જિજ્ઞાસા ભવતિ કસ્યચિન્નેતિ ।
નન્વેવમિચ્છામાત્રમ્ । પ્રાક્પ્રસઙ્ગાચ્ચ । પ્રાગપ્યાસુરેર્જિજ્ઞાસાયા
દુઃખત્રયાભિઘાતો ન ચાસ્યાત્યન્તિકે હેતૌ જિજ્ઞાસા બભૂવ । તેન
કિં પ્રાપ્તમ્ ? પશ્ચાદસ્ય યતો બભૂવ તદ્વક્તવ્યમ્ । યથાઽન્યત્ર
બ્રહ્મણોઽભ્યાસનિમિત્તાદધર્મક્ષયાત્ પૂર્વધર્માનુગ્રહાચ્ચ
વિવિદિષા, તથાઽન્યેષાં કુશલમૂલાભ્યાસપરિપાકાત્ । ન ચાપદિષ્ટમતો
લઘૂક્તમેતત્ । કિઞ્ચાન્યત્, તદપઘાતાચ્ચાનિર્મોક્ષોઽકૃત્સ્નત્વાત્ ।
મોક્ષો હિ કામરૂપારૂપ્યધાતુત્રયાદિષ્યતે । દૈવમાનુષ્યતિર્યગ્યોનિત્રયાદ્વા ।
એકદેશશ્ચ સંસારસ્ય દુઃખત્રયમ્ । તસ્માત્ પ્રયોજનમપ્યયુક્તમ્ । કિઞ્ચ
નિમિત્તાન્તરસદ્ભાવાદ્દિવ્યકામધ્યાનસુખાનપેક્ષસ્યાપિ વિવિદિષા સમ્ભવતિ,
ન કેવલં તાપોદ્વિગ્નસ્યાપિ । તસ્માન્નિમિત્તમપ્યયુક્તમ્ । કિઞ્ચાન્યત્ । ઉભયથા
ચાસમ્ભવાત્ । પરિકલ્પ્યમાના ખલ્વપીયં જિજ્ઞાસા પુરુષસ્ય વા સ્યાદ્ગુણાનાં વા ।
કિંચાતઃ ? તન્ન તાવત્પુરુષસ્ય સમ્ભવતિ । કસ્માત્ ? નૈર્ગુણ્યાભ્યુપગમાત્ ।
ઇચ્છાદ્વેષપ્રયત્નસુખદુઃખધર્માધર્મજ્ઞાનસંસ્કારાણામાત્મગુણત્વં
ન ભવદ્ભિરભ્યુપગમ્યતે । ન ગુણાનામ્, આચેતન્યાત્ । ન હ્યચેતના
ઘટાદયો હિતાહિતપ્રાપ્તિપરિહારં જિજ્ઞાસમાના દૃશ્યતે । ન ચ
ચેતના ભવતાં ગુણાઃ, સામાન્યમચેતનં પ્રસવધર્મિ પ્રધાનમિતિ
(kA0 11) વક્ષ્યમાણવચનાત્ । કિંચાન્યત્, તત્ત્વાન્તરાનુપપત્તેઃ । ન ચ
ગુણપુરુષવ્યતિરિક્તં વસ્તુતસ્તત્ત્વાન્તરમસ્તિ યસ્ય જિજ્ઞાસા પરિકલ્પ્યમાના
પરિકલ્પ્યેત । તસ્માદનુપપન્ના જિજ્ઞાસા ।
ઉચ્યતે । યદુક્તમભિઘાતાજ્જિજ્ઞાસાયામતિપ્રસઙ્ગઃ, સર્વેષાં
તત્સમ્ભવાદિતિ અત્ર બ્રૂમઃ ન, અભિઘાતત્વેનાપ્રતિપત્તેઃ ।
યદ્યપ્યવિશિષ્ટોઽભિઘાતસ્તથાપિ સર્વે નૈનમભિઘાતત્વેન પ્રતિપદ્યન્તે ।
તથાહિ, સત્સ્વાધ્યાત્મિકાદિદુઃખેષ્વર્જનરક્ષણક્ષયસંગહિંસાસુ
ચ પ્રીત્યભિષ્વઙ્ગાદેષાં ન વિષયેષૂદ્વેગાપદ્વેષૌ । ન
ચ વિષયપરિત્યાગો ભવતિ । તસ્માન્નાવિશિષ્ટોઽભિઘાતઃ ।
વિશેષેઽભિઘાતબુદ્ધેર્નિમિત્તાભિધાનમિતિ ચેત્ ? અથાપિ
સ્યાદ્યેયમસતિ વિશેષે સર્વપ્રાણભૃતામાસુરેરેવ ભગવતો
દુઃખત્રયાભિઘાતબુદ્ધિર્ભવતિ, ન પુનરન્યેષામિત્યત્ર નિમિત્તમભિધાનીયમ્ ।
ન હ્યન્તરેણ નિમિત્તમસૌ વિશેષોઽવસ્થાપયિતું શક્યત ઇતિ ।

એતચ્ચાયુક્તમ્ । કસ્માત્ ? પ્રશ્નાસમ્બન્ધાત્ । કુતો જિજ્ઞાસા ભવતીત્યેવં
ચોદકેન પૂર્વમકારિ પ્રશ્નસ્તસ્યાશ્ચ સાક્ષાત્ કારણમભિધાતઃ
કારણાન્તરાણામનભિધાનાદિત્યસ્યૈવ નિર્દેશઃ કૃતઃ । યત્તુ ખલ્વિદાનીં
કારણકારણમપિ પૃચ્છ્યતે તદનવસ્થાપ્રસઙ્ગભયાન્નોચ્યતે । અથ
નિર્બન્ધઃ ક્રિયતે તેન પૂરવધર્માનુગ્રહસ્ય કુશલમૂલાભ્યાસપરિપાકસ્ય
કારણકારણત્વમસ્માભિર્ન પ્રતિષિધ્યત ઇતિ તદેવ કિં ન
ગૃહ્યતે ? એતેન પ્રાક્પ્રસઙ્ગઃ પ્રત્યુક્તઃ । યત્તૂક્તં તદભિઘાતે
ચાનિર્મોક્ષોऽકૃત્સ્નત્વાદિત્યેતદપ્યયુક્તમ્ । કસ્માત્ ? શાસ્ત્રાર્થાનવબોધાત્ ।
અષ્ટવિકલ્પો દૈવસ્તૈર્યગ્યોનિશ્ચ પઞ્ચધા ભવતિ, માનુષ્યશ્ચૈકવિધ
(kA0 53) ઇત્યેતાવાનસ્માકં સંસારઃ । ન તુ તદ્વ્યતિરિક્તાઃ કામરૂપારૂપ્યધાતવઃ
ક્વચિદપિ સિદ્ધાઃ । ચતુર્દશવિધે ચ સંસારે યા સુખમાત્રા સા
દુઃખભૂયસ્ત્વાત્તચ્છબ્દવાચ્યા ભવતીતિ । તથા ચોક્તમ્-
અત્ર જન્મજરામરણકૃતં દુઃખં પ્રાપ્નોતિ ચેતનઃ પુરુષઃ ।
લિઙ્ગસ્યાવિનિવૃત્તેસ્તસ્માદ્દુઃખં સમાસેન ॥

(kA0 55)
દૃશ્યતે ચ લોકે ભૂયસા ગ્રહણમ્ । તદ્યથાऽમ્રવનમિતિ ।
તસ્માત્ કૃત્સ્નવિકલ્પપ્રતિષેધોऽયમ્ । યત્પુનરેતદુક્તં
દિવ્યકામધ્યાનસુખાનપેક્ષસ્યાપિ વિવિદિષાસમ્ભવાન્નિમિત્તમયુક્તમિતિ
તદપ્યનુપપન્નમ્ । કસ્માત્ ? ઉત્તરત્ર પ્રતિષેધાત્ ।
ઇષ્ટમેવૈતત્સઙ્ગૃહીતમ્ । તથા ચોત્તરસૂત્રેણ પ્રતિષેત્સ્યત્યાચાર્યઃ
"દૃષ્ટવદાનુશ્રવિકઃ સ હ્યવિશુદ્ધિક્ષયાતિશયયુક્તઃ" (kA0 2) ।
તસ્માદ્દિવ્યસુખાનપેક્ષસ્યાપિ યુક્તા વિવિદિષા । ધ્યાનસુખમપિ
ક્ષયાતિશયૌ નાતિવર્તતે । તદપ્યત્રૈવ સઙ્ગૃહીતમ્ ।
તસ્માત્પ્રતિષેધ્ય એવાયં પક્ષ ઇતિ ન કિઞ્ચિદભિધીયતે ।
યદપ્યુક્તમુભયથાऽસમ્ભવાજ્જિજ્ઞાસાऽનુપપત્તિરિતિ અસ્તુ
ગુણાનાં જિજ્ઞાસા । યત્તૂક્તમાચેતન્યાદસમ્ભવ ઇતિ સત્યાચેતન્યે
બુદ્ધેરિચ્છાદિસદ્ભાવમુત્તરત્ર પ્રતિપાદયિષ્યામઃ । તસ્માદુપપન્ના
જિજ્ઞાસા ।
આહ- તચ્છબ્દાનર્થક્યં પ્રતિપદસમ્બન્ધાત્ । યોऽયમાચાર્યેણ તચ્છબ્દઃ
સૂત્રે પઠિતોऽસ્ય ખલુ પ્રતિપદમસમ્બન્ધાત્ સ્વલ્પામપ્યર્થવત્તાં
નોપલભામહે । તસ્માન્નૈનમપુષ્કલાર્થમધ્યેષ્યામહ ઇતિ ।

ઉચ્યતે- કથં હિ નામ પ્રયોક્તૃપારતન્ત્ર્યાચ્છબ્દસ્ય શબ્દાન્તરેણ
સમ્બન્ધો ન સ્યાદિતિ ?
આહ, ન બ્રૂમોऽવિદ્યમાનસમ્બન્ધોऽસમ્બન્ધઃ કિન્તર્હ્યયુક્તસમ્બન્ધો
યઃ સ ખલ્વસમ્બન્ધઃ । તદ્યથા અનાચારો માણવક ઇતિ દ્રવ્યેણ
ક્રિયાશક્તિત્વાન્ન શક્યં કિઞ્ચિદનાચારવતા ક્ષણમપ્યવસ્થાતુમ્ ।
અયુક્તં ત્વાચરન્નનાચાર ઇત્યુચ્યતે । તથા ચાસ્ય તચ્છબ્દસ્ય પ્રતિપદં
સમ્બન્ધો ન યુક્તસ્તસ્માદનર્થકસ્તચ્છબ્દઃ ।
આનન્તર્યાજ્જિજ્ઞાસાશબ્દસ્યેતિ ચેત્, સ્યાન્મતમ્ । અનન્તરસ્ય વિધિર્વા ભવતિ
પ્રતિષેધો વેત્યનયા યુક્ત્યા જિજ્ઞાસાશબ્દસ્ય તચ્છબ્દેનાભિસમ્બન્ધઃ
શક્ય ઇતિ । તચ્ચ નૈવમ્ । કસ્માત્ ? તદપઘાતે પ્રયોજનાસદ્ભાવાત્ ।
ન હિ જિજ્ઞાસાऽપઘાતે કિઞ્ચિત્ પ્રયોજનમસ્તીતિ સત્યપિ સમ્બન્ધે ન
તચ્છબ્દેનાર્થઃ ।
અભિઘાતસ્યેતિ ચેત્ ? અથાપિ સ્યાદ્યદિ જિજ્ઞાસાપઘાતેન કિંચિત્પ્રયોજનમસ્તીતિ ।
અતસ્તત્સમ્બન્ધો નેષ્યતે । તેન તર્હ્યભિઘાતશબ્દેનાસ્યાભિસમ્બન્ધઃ
કરિષ્યતે । તથા ચાપિ તચ્છબ્દોર્થવાન્ ભવિષ્યતીતિ । એતદનુપપન્નમ્ ।
કસ્માત્ ? નિમિત્તાવસ્થાને પુનઃ પુનરુત્પત્તેઃ । નૈમિત્તિકોऽયમભિઘાતસ્તસ્ય
નિમિત્તવત્ત્વાદાત્યન્તિકોऽપઘાતો ન સ્યાત્ । ઇતરથા જ્વરનિમિત્તકો દાહ ઇવ
શીતદ્રવ્યસંસ્પર્શાત્પ્રશાન્તોऽપિ નિમિત્તાવસ્થાનાત્પુનઃ પુનઃ પ્રવર્તતે
ઇત્યફલત્વમસ્ય વ્યાયામસ્ય ।
ત્રયશબ્દસ્યેતિ ચેત્ ન, પારતન્ત્ર્યાત્ । આશ્રયપરતન્ત્રા હિ સંખ્યા,
તસ્યા નાન્તરેણાશ્રયેણોપઘાતમપઘાતઃ શક્યઃ કર્તુમ્ । આનર્થક્યઞ્ચ
સમાનમિતિ સુતરાં તચ્છબ્દેન નાર્થઃ ।
દુઃખશબ્દસ્યેતિ ચેત્સામાન્યમ્ - યદ્યેતેષામ્પદાનામભિસમ્બન્ધે
યથોક્તદોષોપપત્તિઃ, દુઃખશબ્દં તર્હિ તત્-શબ્દેનાભિસંભન્ત્સ્યામઃ ।
તસ્મિન્નેષ નિષેધો વિશતીતિ । તચ્ચ નૈવમ્ । કસ્માત્ ? અનેકપદવ્યવધાનાત્ ।
કથમનન્તરવૃત્તિના સર્વનામ્નાऽનેકપદવ્યવહિતસ્ય
દુઃખશબ્દસ્યાભિસમ્બન્ધઃ શક્યેત્ પ્રતિપાદયિતુમ્ ? તસ્માન્ન કિઞ્ચિદેતત્ ।
કિઞ્ચાન્યત્ । ઉપસર્જનત્વાત્ । અયં ખલ્વપિ દુઃખશબ્દઃ સમાસ
ઉપસર્જનીભૂતઃ । ન ચૈકસ્મિન્કાલે શબ્દસ્ય પ્રધાનત્વમુપસર્જનત્વં
ચ યુક્તિતઃ સમ્ભવતિ । પ્રધાનસ્ય ચ પદાન્તરેણાભિસમ્બન્ધઃ ।
તસ્માદ્વિવાદાસ્પદમેવૈતત્સૂત્રમ્ । કિઞ્ચાન્યત્ । નિત્યાનામપઘાતાનુપપત્તેઃ ।
ઇહ નિત્યાનામપઘાતઃ કર્તું ન શક્યતે । તદ્યથા પુરુષાણામ્ ।

અનિત્યાનાઞ્ચાપઘાતો દૃષ્ટઃ । તદ્યથા, જ્વરાદીનામ્ । નિત્યઞ્ચ
દુઃખમ્ । તસ્માત્તદપઘાતેઽભ્યુત્થાનાનર્થક્યમ્ । વૃત્ત્યપઘાતે
તદપઘાત ઇતિ ચેત્, સ્યાત્પુનરેષા બુદ્ધિઃ । સત્યં નિત્યાનામપઘાતો
ન યુક્તિતઃ સમ્ભવતિ । ન તુ વયં ગુણલક્ષણસ્ય દુઃખસ્યાપઘાતં
બ્રૂમઃ, કિન્તર્હિ વૃત્તિરસ્યાભિભૂયત ઇતિ । તચ્ચ નૈવમ્ । કસ્માત્
? ઉક્તોત્તરત્વાત્ । ઉક્તમત્રોત્તરં નિમિત્તાવસ્થાને પુનઃ પુનરુત્પત્તેરિતિ ।
તસ્માદયમપ્યમાર્ગઃ । કિઞ્ચાન્યત્ । અવિશેષાત્કલ્પયિત્વાઽપિ વૃત્ત્યપઘાતં
વૃત્તિવૃત્તિમતોરનન્યત્વાદ્ વૃત્ત્યપઘાતે વૃત્તિમદપઘાતઃ પ્રાપ્ત ઇતિ
નાસ્તિ કશ્ચિદ્વિશેષઃ । તસ્માત્ કૃશોઽયં પરિહાર ઇતિ નાર્થસ્તચ્છબ્દેન
।
ઉચ્યતે- યદુક્તં તચ્છબ્દાનર્થક્યમ્,
પ્રતિપદમસમ્બન્ધાદિત્યસ્તુ દુઃખશબ્દેનાભિસમ્બન્ધઃ । તત્સમ્બન્ધે
યથોક્તદોષોપપત્તિરિતિ ચેત્ સ્યાન્મતમ્ । યદિ તર્હિ તચ્છબ્દસ્ય
દુઃખશબ્દેનૈવાભિસમ્બન્ધોઽભ્યુપગમ્યતે તેન યેઽસ્માભિઃ પૂર્વમભિહિતા
દોષાસ્તે પ્રસજ્યન્તે । તસ્માત્ પ્રતિષિદ્ધસ્ય પક્ષસ્ય પરિગ્રહે
સાહસમાત્રમિતિ । એતચ્ચ નૈવં, કસ્માત્ ? પ્રતિવિધાનાત્ । સત્યમસતિ
પ્રતિવિધાને સાહસમાત્રં સ્યાત્ । પ્રતિવિધીયતે તુ, તસ્માદદોષોઽયમિતિ ।
કિન્તદિતિ ચેત્ સ્યાન્મતમ્ । ઉચ્યતાન્તર્હિ કિન્તત્ પ્રતિવિધાનં
યસ્યાવષ્ટમ્ભેનાનેકદોષવ્યાહતોઽપ્યયં પક્ષ આશ્રીયતે । ન
હ્યનુક્તમસ્માભિરાકારમાત્રેણ શક્યં પ્રતિપત્તુમિતિ ।
ઉચ્યતે- બાઢમ્ । યત્તાવદુક્તમનેકપદવ્યવધાનાન્ન દુઃખશબ્દસ્ય
તચ્છબ્દેનાભિસમ્બન્ધ ઇત્યત્ર બ્રૂમઃ ન, અનભ્યુપગમાત્ । યો
હ્યનન્તરકૃતં શબ્દસ્ય શબ્દાન્તરેણ સહ સમ્બન્ધમાચષ્ટે
તમ્પ્રત્યયમુપાલમ્ભઃ સ્યાત્ । વયન્ત્વર્થકૃતં સમ્બન્ધમાચક્ષ્મહે ।
તથા ચોક્તમ્-
યસ્ય યેનાભિસમ્બન્ધો દૂરસ્થસ્યાપિ તસ્ય સઃ ।
અર્થતસ્ત્વસમાનામાનન્તર્યેઽપ્યસમ્ભવઃ ॥

કિઞ્ચાન્યત્- શાસ્ત્રે દર્શનાત્ । શાસ્ત્રે ચ વ્યવહિતાનામપિ
સર્વનામ્નામભિસમ્બન્ધો દૃશ્યતે"યસ્ય ગુણસ્ય હિ ભાવાદ્દ્રવ્યે
શબ્દનિવેશસ્તદભિધાને ત્વતલાવિ"ત્યત્રાર્થકૃતશ્ચ
સમ્બન્ધઃ શબ્દાનામભ્યુપગતઃ । ઙ્યાપ્પ્રાતિપદિકાત્, બહુષુ

બહુવચનમ્, સુપો ધાતુપ્રાતિપદિકયોઃ, અલુગુત્તરપદે ઇત્યેવમાદીનાં
સમ્બન્ધાભ્યુપગમઃ । તથા અનડ્વાહમુદહારિણિ ભગિનિ વહસિ યા ત્વં
શિરસિ કુમ્ભમવાચીનમભિધાવન્તમદ્રાક્ષીરિતિ વાર્તિકે દૃષ્ટાન્તઃ । ન
હ્યત્ર સત્યાનન્તર્યે શિરસાઽનડુહો વહનં કુમ્ભસ્ય વા સરણમુપપદ્યતે ।
યથા ચાત્ર વ્યવહિતાનામભિસમ્બન્ધસ્તથેહાપિ દ્રષ્ટવ્યઃ ।
યત્પુનરેતદુક્તમુપસર્જનત્વાત્પદાન્તરેણાનભિસમ્બન્ધ ઇતિ એતદનુપપન્નમ્ ।
કસ્માત્ ? સમાસાદપોદ્ધારે બુદ્ધ્યા વ્યવસ્થિતસ્ય સ્વાતન્ત્ર્યોપપત્તેઃ ।
સત્યમુપસર્જનસ્ય પદાન્તરેણાભિસમ્બન્ધો નોપપદ્યતે । ન તુ વયં
સમાસવૃત્તેરેવ તચ્છબ્દેનાભિસમ્બન્ધ ઇતિ પ્રતિપદ્યામહે, કિન્તર્હિ
સમાસાદપોદ્ધૃતસ્ય બુદ્ધિવ્યવસ્થિતસ્યોપજનિતસ્વાતન્ત્ર્યસ્ય શબ્દાન્તરેણ
સમ્બન્ધમિચ્છામ ઇતિ । અથૈતદનિષ્ટમ્ યોગપ્રમાણે ચ તદભાવે દર્શનં
સ્યાત્ અથ શબ્દાનુશાસનં, કેષાં શબ્દાનામ્ ઇતિ ચૈવમાદીનામ્પ્રયોગાણાં
વિરોધઃ પ્રાપ્નોતિ । અનિષ્ટઞ્ચૈતત્ । યત્પુનરેતદુક્તમ્-
નિત્યાનામપઘાતાનુપપત્તેર્વૃત્ત્યપઘાતે ચ તદપઘાતપ્રસઙ્ગાદિતિ,
એતદપ્યનુપપન્નમ્ । કસ્માત્ ? ગુણશક્તેઃ પ્રયોજનોપરમે સત્યાત્મકલ્પેન
વ્યવસ્થાનાભ્યુપગમાત્ । નૈતદભ્યુપગમ્યતે ગુણસ્યોચ્છિત્તિર્ભવતિ,
વૃત્તિર્વાઽસ્યાભિભૂયતે । કિન્તર્હિ પુરુષાર્થનિબન્ધના ચરિતાર્થ
શક્તિરસ્ય પુરુષાર્થપ્રવૃત્તૌ પ્રયોજનાસદ્ભાવાદાત્મકલ્પેન વ્યવતિષ્ઠત
ઇત્યેતદ્વિવક્ષિતમ્ । તસ્માદ્યુક્તમેતત્તદપઘાતકે હેતૌ જિજ્ઞાસા પ્રવર્તત
ઇતિ ।

॥ દૃષ્ટે સાઽપાર્થા ચેત્ ॥

સ્યાદેતત્ પ્રત્યક્ષો દુઃકપ્રતીકારહેતુરસ્તિ । તસ્ય સમતિક્રમે કિં પ્રયોજનમ્
? તદ્યથા શારીરસ્ય તાવદયમપગમહેતુરનેકદ્રવ્યરસાયનોપભોગઃ ।
માનસસ્યાપિ મનોજ્ઞસ્ત્રીપાનવિલેપનભોજનવસ્ત્રાલઙ્કારાદિવિષયસમ્પ્રાપ્તિઃ ।
આધિભૌતિકસ્ય નીતિશાસ્ત્રાભ્યાસઃ, શસ્ત્રાસ્ત્રકુશલતા,
વિષમસ્થાનાનધ્યાસનં ચ । આધિદૈવિકસ્યાપિ યથાકાલં
વિવિધનિવસનાસ્તરણગર્ભગૃહપ્રાસાદજાલાન્તરચન્દનવ્યજનમણિહારાદિસેવા
વિવિધૌષધમંગલસ્તુતિમન્ત્રપ્રયોગાનુષ્ઠાનમિતિ દૃષ્ટે હેતૌ સા
જિજ્ઞાસાઽપાર્થેતિ ચેત્ -

॥ નૈકાન્તાત્યતતોઽભાવાત્ ॥ ૧ ॥

એતચ્ચ નૈવમ્ । કસ્માત્ ? એકાન્તાત્યન્તતોऽભાવાત્ । એકાન્તો નામ નિયમેન ભાવઃ । અત્યન્તં ભૂતસ્યાવિનાશઃ । એકાન્તશ્ચ અત્યન્તં ચ તે એકાન્તાત્યન્તે તયોરભાવ એકાન્તાત્યન્તતોऽભાવઃ તસ્માત્ । ષષ્ઠીસ્થાને પઞ્ચમી । ષષ્ઠ્યા એવ વા તસિઃ ષષ્ઠ્યા વ્યાશ્રય ઇતિ યોગવિભાગાત્ । અસમાસકરણં વૃત્તપૂરણાર્થમ્, માનસસ્ય ચ દુઃખસ્ય પ્રતીકારે દોષાન્તરોપસંગ્રહાર્થમ્ । તથા હિ, સ્ત્ર્યાદીનાં સત્યેતસ્મિન્ દોષદ્વયેऽશક્યમર્જનં કર્તુમસ્વાભાવિકત્વાત્ । સત્યર્જને રક્ષણમશક્યં, સાધારણત્વાત્ । સતિ ચ રક્ષણે ક્ષયઃ, કૃતકત્વાત્ । સઙ્ગાચ્ચાનુપશમો ભૂતોપઘાતમન્તરેણ ચાસમ્ભવ ઇત્યેતે દોષાઃ ।
આહ, કથમેતદવગમ્યતે યદ્દૃષ્ટસ્ય હેતોરનૈકાન્તિકત્વમનાત્યન્તિકત્વં ચેતિ ?
ઉચ્યતે- પ્રત્યક્ષ એવૈતદુપલભ્યતે । યદાયુર્વેદવિહિતસ્ય ક્રિયાક્રમસ્યાભિયુક્તમાત્મવન્તં ભેષજભિષક્પરિચારકસમ્પન્નં પ્રત્યાનર્થક્યમ્ । આહ ચ -
સર્વેષાં વ્યાધિરૂપાણાં નિદાનં ત્રિવિધં સ્મૃતમ્ ।
આહારશ્ચ વિહારશ્ચ કર્મ પૂર્વકૃતં તથા ॥

તત્રાહારવિહારોત્થાન્ રોગાન્ દ્રવ્યમપોહતિ ।
યસ્તુ કર્મકૃતો વ્યાધિર્મરણાત્સ નિવર્તતે ॥

પુનરપ્યાહ-
સોપદ્રવઃ સર્વરૂપો બલમાંસેન્દ્રિયાપહઃ ।
સારિષ્ટશ્ચૈવ યો વ્યાધિસ્તં ભિષક્ પરિવર્જયેત્ ॥

ઇત્યેવમનૈકાન્તિકત્વમ્ । અનાત્યન્તિકત્વં તુ નિવૃત્તાનામપિ વ્યાધીનામ્પુનરુત્પત્તિદર્શનાત્ । મહતા ખલ્વપિ પ્રયત્નેન નિવર્તિતા વ્યાધયઃ પુનરુત્પદ્યન્તે । તથા ચોક્તમ્ -
પુનર્જ્વરે સમુત્પન્ને ક્રિયા પૂર્વજ્વરાનુગા । ઇતિ
તસ્માદ્યથૈવાસ્યાયુર્વેદાદેઃ પ્રતીકારહેતુત્વં પ્રત્યક્ષસિદ્ધમેવમેકાન્તાત્યન્તતોऽભાવોऽપિ । તથા માનસસ્ય ચ । યથા ચ શારીરદુઃખપ્રતીકારહેતવોऽનૈકાન્તિકાઃ તથા સ્ત્ર્યાદયોऽપિ । કસ્માત્ ? તત્સન્નિધાને વિષયાન્તરાભિલાષદર્શનાત્ । યદિ હિ સ્ત્ર્યાદયો વિષયાઃ સર્વદા દુઃખપ્રતીકારસમર્થા ભવેયુઃ, કિમતિ તેષુ સન્નિહિતેષુ વિષયિણો વિષયાન્તરજિઘૃક્ષા સ્યાત્ ? એવમનૈકાન્તિકત્વમ્ ।

અનાત્યન્તિકત્વમપિ । નિવૃત્તેચ્છાનામપિ ભૂયઃ પ્રાર્થનાસમ્ભવાત્ । યદિ હિ વિષયોપભોગોઽત્યન્તમેવ માનસં દુઃખમપહન્યાત્ કિં પ્રાપ્તં યેન ભૂયસ્તં પ્રતિ વિષયિણોઽભિલાષઃ સ્યાત્ ? કિં કારણમ્ ? યસ્માન્ન હ્યવિદ્યમાને તમસિ દેવદત્તસ્ય પ્રદીપં પ્રત્યપેક્ષા ભવતિ । દૃશ્યતે ચ નિવૃત્તેચ્છાનામપિ વિષયોપભોગાદ્વિષયિણાં ભૂયો વિષયાભિલાષઃ । તેન મન્યામહે નાયં દૃષ્ટો હેતુર્દુઃખમહપન્તિ । કિન્તર્હિ સુતરાં વૃદ્ધિં કરોતિ । આહ ચ -
ન જાતુ કામઃ કામાનામુપભોગેન શામ્યતિ ।
હવિષા કૃષ્ણવર્ત્મેવ ભૂય એવાભિવર્ધતે ॥

અપર આહ-
સંવેદ્યત્વાદ્ ગુરુત્વાચ્ચ નિન્દિતત્વાચ્ચ સાધુભિઃ ।
સર્વત્રાસન્નિધાનાચ્ચ ન દૃષ્ટો હેતુરિષ્યતે ॥

સંવેદ્યત્વાત્ । ભોગસાધનવિકલાનામર્થિનાં મધ્યે વિષયિણોપયુજ્યમાનાસ્તૈસ્સંવેદ્યન્તે । તેષામપ્રદાયોપયુજ્યમાનં નૈર્ઘૃણ્યમાવિષ્કુર્યાત્ । વિષયિણા પ્રદીયમાનો વાઽર્થિભ્યઃ પરિમિતત્વાદવચ્છિદ્યેતેત્યનુપાયોઽયં દુઃખાપઘાતે બુદ્ધિમતામ્ । કિં ચ ગુરુત્વાત્ । ભોગાનાં વિવિધનિવસનસ્ત્રીપાનભોજનવિલેપનાલંકારાદીનાં સમગ્ર્યે સુખમુત્પદ્યતે । નાન્યતરવૈકલ્યે । સામગ્ર્યં ચૈષાં સ્વાભાવિકત્વાદનુપપન્નમ્ । આહ ચ -
નાભિજાતિં ન વિજ્ઞાનં ન ચ શૌર્યમપેક્ષતે ।
લક્ષ્મી સંસ્કારયોગાચ્ચ ક્વચિદેવાવતિષ્ઠતે ॥

ઇત્યેવમનેકાર્થાશ્રયત્વાદ્ ગુરુર્વિષયોપભોગઃ । કિં ચ નિન્દિતત્વાચ્ચ સાધુભિઃ । નિન્દિતઃ ખલ્વપિ સાધુભિર્વિષયોપભોગઃ । યસ્માદાહ-
આયાસાશ્ચ વિઘાતશ્ચ વિપ્રલમ્ભભયાનિ ચ ।
યચ્ચાન્યદશિવં લોકે તત્કામેભ્યઃ પ્રવર્તતે ॥

પુનરપ્યાહ-
અયં સક્ષેત્રિયો વ્યાધિરયમાત્યન્તિકો જ્વરઃ ।
ઇદમાસ્પદમીતીનામેષ યોનિઃ સપાપ્મનામ્ ॥

અગાધમેતત્પાતાલમેષ પઙ્કો દુરુત્તરઃ ।
ક્લેશવ્યાધિભયાકીર્ણમેતચ્છ્વભ્રં ભયાવહમ્ ॥

વિવિધાયાસશોકાનામેતદાયતનં મહત્ ।
દૈન્યશ્રમવિષાદાનામેતત્ક્ષેત્રમપાવૃતમ્ ॥

યસ્માદ્વિષયસમ્ભોગાદ્વિહગઃ પઞ્જરાવિવ ।
ગતો વનેષુ રમતે સ સુખાનિ સમશ્નુતે ॥

તસ્માત્ સાધુભિરપાકૃતત્વાદસાધુર્વિષયોપભોગઃ । કિં ચ
સર્વત્રાસન્નિધાનાત્ । ન હિ સુપ્રતિનિવિષ્ટસ્યાપિ કામિનઃ સર્વત્ર
વિષયસન્નિધાનેન ભવિતવ્યમ્ । નો ખલ્વપિ એકસ્મિન્ દેશેઽવસ્થાનં
સમ્ભવતિ, વિષયાભાવપ્રસઙ્ગાત્ । તસ્માદવશ્યં વિયોગેન ભવિતવ્યમ્ ।
વિયોગે ચ સતિ ધ્રુવોઽનિષ્ટાનુબન્ધ ઇતિ કોઽર્થો વિષયપરિગ્રહેણ ? તત્ર
યદુક્તં દૃષ્ટસ્ય હેતોઃ સદ્ભાવાદપાર્થકા જિજ્ઞાસેતિ એતદયુક્તમ્ ॥ ૧॥

———————-

કારિકા ૨

———————-

આહ- યદ્યેકાન્તાત્યન્તતોઽભાવાદ્દૃષ્ટે હેતાવપરિતોષસ્તેન તર્હ્યસ્ત્યયમન્યો
હેતુરુભયદોષવર્જિતઃ સ કસ્માન્ન પરિગૃહ્યતે ? કોઽસાવિતિ ચેત્
ઉચ્યતે, શાસ્ત્રોક્તઃ કર્મવિધિઃ । સ હ્યૈકાન્તિકઃ । કથમ્ ? એવં
હ્યાહ - પશુબન્ધેન સર્વાંલ્લોકાન્ જયતિ । ન તૂક્તં કદાચિજ્જયતિ,
કદાચિન્નેતિ । ફલસ્ય પ્રત્યક્ષાનુપલબ્ધેરનૈકાન્તિકત્વમિતિ ચેત્,
સ્યાન્મતમ્ પ્રત્યક્ષત એવેદં વિહિતસ્ય કર્મણઃ ફલં નોપલભ્યતે ।
તથા હિ પુત્રકામ ઇષ્ટિં નિરૂપ્ય દુહિતરમપિ ન પ્રાપ્નોતિ । અર્થકામશ્ચ
કર્મ કૃત્વા માષકમપિ ન લભતે । તસ્માન્નાયમનૈકાન્તિક ઇતિ । એતચ્ચ
નૈવમ્ । કસ્માત્ ? સાધનવૈકલ્યાત્તદનુપપત્તેઃ । અનેકસાધનસાધ્યો હિ
કર્મવિધિઃ । યત્ર ફલં નોપલભ્યતે તત્ર સાધનવૈકલ્યમનુમાતવ્યમ્ ।
કસ્માત્ ? ન હ્યેતદિષ્ટં, સતિ કારણે કાર્યં ન ભવતિ । કિં ચાન્યત્,
સંસારાભાવપ્રસઙ્ગાત્ । યદિ ખલ્વપિ કર્મણઃ ફલવત્ત્વં નેષ્યતે
તેન તન્નિમિત્તસ્ય સંસાસરસ્યાભાવપ્રસઙ્ગઃ । અનિષ્ટં ચૈતત્ ।
તસ્માત્સિદ્ધમસ્યૈકાન્તિકત્વમ્ ।
આત્યન્તિકત્વમપિ સિદ્ધમેવ । યસ્માદાહ અપામ સોમમમૃતા અભૂમેતિ । અત્ર
સોમપાનાદમૃતત્વાવાપ્તિઃ શ્રૂયતે । તસ્માત્તદેવાનુષ્ઠાતવ્યમ્ । કિમન્યેન
હેતુના પરિકલ્પિતેનેતિ જિજ્ઞાસાઽપાર્થૈવેતિ ।

ઉચ્યતે

॥ દૃષ્ટવદાનુશ્રવિકઃ ॥

અનુશ્રૂયતે ઇત્યનુશ્રવઃ । અનુશ્રવે ભવ આનુશ્રવિકઃ । દૃષ્ટેન તુલ્યં
વર્તતે દૃષ્ટવત્ । કિમસાવનભિપ્રેત ઇતિ વાક્યશેષઃ ।
આહ કઃ પુનરયમનુશ્રવઃ ?
ઉચ્યતે- મન્ત્રબ્રાહ્મણં યાવદ્વા પુરાતનમનુશ્રૂયમાણં
પ્રામાણ્યેનાભ્યુપગમ્યતે તત્રભવદ્ભિઃ । યથાશ્રુતિનિબન્ધનાઃ સ્મૃતયઃ ।
અઙ્ગાનિ વેદાસ્તર્કા વા । યથાહ
વેદવેદાઙ્ગતર્કેષુ વેદસંજ્ઞા નિરુચ્યતે । ઇતિ ।
આહ, કિં પૂર્વસ્માદેવ હેતોરયમાનુશ્રવિકો હેતુરનભિપ્રેત ઇતિ ?
નેત્યુચ્યતે । કિન્તર્હિ

॥ સ હ્યવિશુદ્ધિક્ષયાતિશયયુક્તઃ ॥

ઇતિ । સ ઇત્યાનુશ્રવિકસ્ય હેતોઃ પ્રતિનિર્દેશઃ । હિશબ્દો યસ્માદર્થે ।
અવિશુદ્ધિશ્ચ ક્ષયશ્ચાતિશયશ્ચ તૈર્યુક્તઃ । એતદુક્તં ભવતિ ।
યસ્માદયમાનુશ્રવિકો હેતુરવિશુદ્ધોઽનિત્યસ્તારતમ્યવાંશ્ચાતો દૃષ્ટ
ઇવાનભિપ્રેતઃ ।
તત્રાવિશુદ્ધિયુક્તસ્તાવત્ હિંસાવિધાનાત્ । યદાહ બ્રાહ્મણે-
બ્રાહ્મણમાલભેતેત્યાદિ । તથા-
ષટ્શતાનિ નિયુજ્યન્તે પશૂનાં મધ્યમેઽહનિ ।
અશ્વમેધસ્ય વચનાદૂનાનિ પશુભિસ્ત્રિભિઃ ॥

ઇતિ હિંસા ચાવિશુદ્ધિઃ । પ્રાણિનામિષ્ટશરીરવ્યાપાદનાત્ ।
આહ, તદનુપપત્તિઃ । શાસ્ત્રચોદિતત્વાત્ । યદિ શાસ્ત્રેણ ચોદિતેયં હિંસા
ન સ્યાત્ મુક્તસંશયમવિશુદ્ધિત્વમસ્યાઃ પ્રતિપદ્યામહે, શાસ્ત્રચોદિતા તુ ।
તસ્માન્નેયમવિશુદ્ધિઃ ।
તત્પ્રામાણ્યાનભ્યુપગમાદવિશુદ્ધિરિતિ ચેત્ સ્યાન્મતમ્,
વેદપ્રામાણ્યમભ્યુપગચ્છતામસંશયમેતદેવં સ્યાત્ । હેતુવાદકુશલાસ્તુ
વયમ્ । તસ્માદધીયતાં યદિ કશ્ચિદસ્ત્યુભયપક્ષપ્રસિદ્ધો હેતુઃ યતો
નિસ્સંશયઃ પ્રત્યયઃ સ્યાદિતિ । એતચ્ચાયુક્તમ્ । કસ્માત્ ? અભ્યુપગમવિરોધાત્ ।
દૃષ્ટમનુમાનમાપ્તવચનં ચેતિ પ્રામાણ્યત્રયમભ્યુપગતં ભવદ્ભિઃ ।
ઇદાનીં વેદસ્યાપ્તવચનત્વે સત્યપ્રામાણ્યં બ્રુવતઃ સ્વમતવ્યાઘાતઃ ।

તસ્માદયુક્તમેતત્ ।
વેદસ્યાપ્તવચનત્વાનુપપત્તેરદોષ ઇતિ ચેત્સ્યાન્મતમ્ । આપ્તવચનત્વં પ્રાક્પ્રસાધ્યાસ્ય વેદસ્ય પશ્ચાત્ અયમુપાલમ્ભો યુક્તમભિધાતું સ્યાત્ । તત્ત્વસિદ્ધમ્ । તસ્માદનુપાલમ્ભોઽયમિતિ । એતદપ્યુક્તમ્ । કસ્માત્ ? પુરુષબુદ્ધિપૂર્વકત્વે સતિ રાગાદિયોગાચ્છબ્દો વિચારાર્હઃ સ્યાત્ કિમાપ્તવચનં ન વેતિ । અપુરુષબુદ્ધિપૂર્વકસ્ત્વામ્નાયઃ સ્વતન્ત્રઃ પુરુષનિશ્શ્રેયસાર્થં પ્રવર્તતે । તસ્માન્નૈવંવિધમનિષ્ટં વિચારમર્હતિ । કિં ચાન્યત્ અવિશુદ્ધિત્વાનુપપત્તિપ્રસઙ્ગાત્ । યદિ ચૈતસ્મિન્નર્થે ભવાનપિ પર્યનુપયુજ્યેત - કથમિદં નિશ્ચીયતે યદુત પ્રાણિનામિષ્ટશરીરવ્યાપાદનાદવિશુદ્ધિર્હિંસેતિ ? અવશ્યમભિધાનીયં શાસ્ત્રત ઇતિ । તદેવ ચ શાસ્ત્રં ક્રતૌ હિંસામાહ । તસ્માત્ કોઽત્ર હેતુઃ અન્યત્ર પ્રમાણમિહૈવૈતદપ્રમાણં ભવિતુમર્હતિ હિંસાતો ધર્મ ઇતિ ? અનુગ્રહોપઘાતલક્ષણત્વાદહિંસાહિંસયોઃ પ્રત્યક્ષસિદ્ધિરિતિ ચેત્ - અથાપિ સ્યાત્ અહિંસાતશ્ચાનુગ્રહો ભવતીષ્ટશરીરવ્યાપાદનલક્ષણઃ, હિંસાતશ્ચોપઘાતો ભવતિ અભિપ્રેતશરીરવ્યાપાદનલક્ષણઃ । ક્રિયાનુરૂપં ચ ફલમનુમાતું યુક્તમિતિ પ્રત્યક્ષસિદ્ધમનયોરિષ્ટાનિષ્ટફલહેતુત્વમ્ । તસ્માત્ કોઽત્ર શાસ્ત્રવ્યાપાર ઇતિ ? એતચ્ચાનુપપન્નમ્ । કસ્માત્ ? અનિષ્ટપ્રસંગાત્ । એવં હિ પરિકલ્પ્યમાને ગુરુભાર્યાગમનેઽપિ સત્ત્વાન્તરાનુગ્રહસામર્થ્યાદિષ્ટફલસમ્બન્ધઃ સ્યાત્ । માણવકં ચોપનીય વ્રતાદેશશૌચબ્રહ્મચર્ય્યસ્વાધ્યાયાભ્યાસભૈક્ષાગ્નિપરિચરણગુરુશુશ્રૂષાદિષુ પ્રવર્તયતોઽનિષ્ટફલસમ્બન્ધઃ સ્યાત્ । તસ્માલ્લોકશાસ્ત્રવિરુદ્ધોઽસત્તર્કો નેષ્ટ ઇતિ ।
ઉભયાભિધાનાચ્છાસ્ત્રવિરોધપ્રસઙ્ગ ઇતિ ચેત્ સ્યાન્મતમ્ તદેવ શાસ્ત્રમહિંસામાહ, તદેવ હિંસામ્ । એવં સતિ પરસ્પરવિરુદ્ધયોરર્થયોશ્ચોદિતત્વાદુભયાનુગ્રહાસમ્ભવે શાસ્ત્રવિરોધપ્રસઙ્ગ ઇતિ । તચ્ચ નૈવમ્ । કસ્માત્ ? ઉત્સર્ગાપવાદયોર્વિષયભેદાત્ । સામાન્યે હિ શાસ્ત્રમહિંસામુત્સૃજ્ય વિશેષે ક્રતુલક્ષણેઽપવાદં શાસ્તિ । સામાન્યવિહિતં ચ વિશેષવિહિતેન બાધ્યતે । તદ્યથા - દધિ બ્રાહ્મણેભ્યો દીયતાં તક્રં કૌણ્ડિન્યાયેતિ । તસ્માદુત્સર્ગાપવાદયોર્વિષયભેદાન્નાસ્તિ શાસ્ત્રવિરોધ ઇતિ । કિં ચાન્યત્ । કન્યાગમનવત્ પુનર્વિધાને દોષાભાવાત્ । યથા ખલ્વપિ શાસ્ત્રે પ્રતિષિદ્ધં કન્યાગમનમિતિ નેદાનીમભિરૂપઃ પ્રતિગૃહ્ય, તામભિગમ્યાધર્મભાગ્ભવતિ ।

ગૃહસ્થઃ સદૃશીં ભાર્યાં વિન્દેતાનન્યપૂર્વિકામ્ ।
ઇતિ શાસ્ત્રાન્તરસદ્ભાવાત્ । એવં શાસ્ત્રે પ્રતિષિદ્ધા હિંસા ।
નેદાનીં ક્રતૌ હિંસાયાં પ્રવર્તમાનોઽનિષ્ટફલભાક્
સ્યાત્ । પૂર્વોક્તાદેવ શાસ્ત્રાન્તરસદ્ભાવાત્ । તર યદુક્તં
પ્રાણિનામિષ્ટશરીરવ્યાપાદનાદવિશુદ્ધિર્હિંસેત્યેતદયુક્તમ્ ।
ઉચ્યતે - ન, અભિપ્રાયાનવબોધાત્ । ચિત્રમપિ બહ્વેતદભિધીયમાનો
નાભિપ્રાયં વેદ ભવાન્ । કિં કારણમ્ ? યસ્માન્ન વયં વેદસ્ય
પ્રામાણ્યં પ્રત્યાચક્ષ્મહે । નો ખલ્વપિ બ્રૂમઃ શાસ્ત્રચોદિતાયાં
હિંસાયાં પ્રવર્તમાનસ્યાનિષ્ટફલસમ્બન્ધો ભવતિ । કિન્તર્હિ
સતિ સ્વર્ગપ્રાપ્તિનિમિત્તત્વે વેદવિહિતસ્ય કર્મણઃ સમનુષ્ઠાનં
પ્રાણિજમુપઘાતમન્તરેણ ન સમ્ભવતિ ઇતિ હિતકામૈરભ્યુપેક્ષ્યતે ।
યસ્માત્ ન હ્યેતદુક્તં યદન્યેષામુપઘાતેનાત્માનુગ્રહઃ કાર્ય ઇતિ । આહ -
ન તત્પરસ્ય સન્દધ્યાત્પ્રતિકૂલં યદાત્મનઃ ।
એષ સઙ્ક્ષેપતો ધર્મઃ કામાદન્યઃ પ્રવર્તતે ॥

આહ યદ્યેતન્નાભ્યુપગમ્યતે કથં પૂર્વમુક્તં
પ્રાણિનામિષ્ટશરીરવ્યાપાદનાદવિશુદ્ધિર્હિંસેતિ ?
ઉચ્યતે કાર્યે કારણોપચારાત્ । યોઽસૌ હિંસાનિમિત્તકઃ કારુણ્યાન્
મનસિ નઃ પરિતાપ ઉત્પદ્યતે સા ખલ્વવિશુદ્ધિરભિપ્રેતા । તસ્યાં
કારણમુપચર્યોક્તમવિશુદ્ધિર્હિંસેતિ । યથા મુદ્રૈસ્તૃપ્માઃ ગોભિઃ સુખિન
ઇતિ ।
આહ કથમેતદવગમ્યતે હિંસાકાર્યં
પરિતાપમાત્રમવિશુદ્ધિરાચાર્યસ્યાભિપ્રેતા, ન પુનર્હિંસૈવેતિ ?
ઉચ્યતે, પ્રકર્ષપ્રત્યયોપલબ્ધેઃ । વક્ષ્યત્યુપદિષ્ટાત્ તદ્વિપરીતઃ
શ્રેયાનિતિ (kA0 2) । સમાનજાતીયં ચ પ્રતિયોગિનમપેક્ષ્ય પ્રકર્ષપ્રત્યય
ઉત્પદ્યતે । યદિ ચાનુશ્રવિકસ્ય પ્રશસ્યતા નાભિપ્રેતા સ્યાત્
પ્રકર્ષપ્રત્યયાનુપપત્તિપ્રસઙ્ગઃ । તસ્માન્નોત્સૂત્રમેતત્ ।
આહ, સન્ન્યાસાનુપપત્તિઃ । અવિયોગશ્રવણાત્ । ન હિ
કર્મણોઽત્યાગસન્ન્યાસયોસ્ત્વમીશિષે । કિન્તર્હિ શાસ્ત્રં યદાહ તદવશ્યં
કર્તવ્યમ્ । તચ્ચામરણાત્ કર્મભિરવિયોગં શાસ્તિ । કસ્માત્ ? એવં હ્યાહ-
"જરામર્યમેતત્ સત્રં યદગ્નિહોત્રદાર્શપૌર્ણમાસૌ, જરયા હ એતસ્માત્
સત્રાદ્વિમુચ્યતે, મૃત્યુના ચ ।" પુનરપ્યાહ "કુર્વન્નેવેહ કર્માણિ

જિજીવિષેચ્છતં સમાઃ ॥ તસ્માદામરણાત્ કર્મણામત્યાગઃ । તસ્મિન્ સતિ હેત્વન્તરકર્મણામાનર્થક્યમ્ ।

ઉચ્યતે, ન, સાધનાનામસ્વભાવિકત્વાત્ । પત્નીસંયોગાદિભિરનેકૈઃ સાધનૈરયં કર્મવિધિઃ પ્રસાધ્યતે । તેષાં ચાસ્વાભાવિકત્વાત્ અશક્યમર્જનં પ્રયોગતઃ પૂર્વં કર્તુમિતિ પ્રતિપાદિતમ્ । તસ્માદનિત્યાનિ કર્માણિ ।

હેતુશાસ્ત્રવિપ્રતિપત્તૌ શાસ્ત્રબલીયસ્ત્વમિતિ ચેત્ સ્યાન્મતમ્ । યત્ર હેતુશાસ્ત્રયોર્વિપ્રતિપત્તિર્ભવતિ તત્ર વિપ્રલમ્ભભૂયિષ્ઠત્વાદનુમાનસ્ય બલીયઃ શાસ્ત્રમિત્યવશયમભ્યુપગન્તવ્યમિતિ । તચ્ચાનુપપન્નમ્ । કસ્માત્ ? શક્તિતો વિનિયોગાત્ । શક્તિમપેક્ષ્ય શાસ્ત્રમગ્નિહોત્રાદીનિ કર્માણિ વિદધત્તેષામનિત્યતાં જ્ઞાપયતિ । કથમ્ ? એવં હ્યાહ, યોઽલં સન્નગ્નિહોત્રાયાગ્નિહોત્રં ન જુહોતિ તમેષા દેવતાઽપરુણદ્ધ્યસ્માલ્લોકાદમુષ્માચ્ચોભાભ્યામ્ ॥ તસ્માદનિત્યાનિ કર્માણિ । કિં ચાન્યત્ । જરાગ્રહણસામર્થ્યાત્ । ત્વદીય એવ જ્ઞાપકે જરાગ્રહણમસ્તિ । અતોઽનુમીયતે શક્ત્યપેક્ષમનિત્યં ચ કર્મ । કિં ચાન્યત્ શાસ્ત્રહાનેઃ । ઉભયં હિ શાસ્ત્રે નિર્દિષ્ટમ્ । કર્માણિ સન્ન્યાસશ્ચ । યદિ પુનઃ કર્માણિ નિત્યકર્તવ્યતયેષ્યન્તે તેન સન્ન્યાસશાસ્ત્રં હીયતે । તસ્માદ્વિષયરાગાવિષ્કરણમેતદ્વઃ ।

આહ, ન, શ્રુતિબલીયસ્ત્વાત્ । તુલ્યબલયોર્હિ શાસ્ત્રયોરેકવિષયસન્નિપાતે દ્વયોર્યુગપદનુગ્રહાસમ્ભવે વિકલ્પપર્યાયૌ ભવતઃ । શ્રુતિસ્મૃતિસન્નિપાતે ચ શ્રુતિર્બલીયસી, સ્મૃતિવિહિતશ્ચ સન્ન્યાસઃ । તસ્માન્નાનયોર્વિકલ્પઃ । ન ખલ્વપિ પર્યાયો ન્યાય્યઃ ।

ઉચ્યતે- તદિતરત્ર તુલ્યમ્ । યથૈવ કર્મણાં સમનુષ્ઠાનં શાસ્તિ શાસ્ત્રં તથા સન્ન્યાસમપિ । કથમ્ ? એવં હ્યાહ-

ન કર્મણા ન પ્રજયા ધનેન ત્યાગેનૈકેનામૃતત્વમાનશુઃ ।<br>
પરેણ નાકં નિહિતં ગુહાયાં વિભ્રાજતે યદ્યતયો વિશન્તિ ॥

તથા-

ન કર્મણા મૃત્યુમૃષયો નિષેદુઃ પ્રજાવન્તો દ્રવિણમિચ્છમાણાઃ ।<br>
અથાપરે ઋષયો મનીષિણઃ પરં કર્મભ્યોઽમૃતત્વમાનશુઃ ॥

બ્રાહ્મણં ચાત્ર ભવતિ- તદ્ય ઇદં વિદુઃ, યે ચેમેઽરણ્યાઃ શ્રદ્ધાતપ ઇત્યુપાસતે તેઽર્ચિષમભિસમ્ભવન્તિ । અર્ચિષો હરહ્ન

આપૂર્યમાણપક્ષમાપૂર્યમાણપક્ષાદ્યાન્ષડુદઙ્ઙેતિ માસાંસ્તાન્માસેભ્યઃ
સંવત્સરં સંવત્સરાદાદિત્યમાદિત્યાચ્ચન્દ્રમસં ચન્દ્રમસો વિદ્યુતં
તત્પુરુષોઽમાણવઃ સ એતાન્ બ્રહ્મ ગમયતિ" । પુનરપ્યાહ- "એતમેવ વિદિત્વા
મુનિર્ભવતિ, એતમેવ પ્રવ્રાજિનો લોકમિચ્છન્તઃ પ્રવ્રજન્તિ । એતદ્ધ
સ્મ વૈ પૂર્વે વિદ્વાંસઃ પ્રજાં નાકામયન્ત, પ્રજયા કિં કરિષ્યામો યેષાં
નાયમાત્મા નાયં લોક ઇતિ તે હ સ્મ પુત્રૈષણાયાશ્ચ વિત્તૈષણાયાશ્ચ
લોકૈષણાયાશ્ચ વ્યુત્થાયાથ ભિક્ષાચર્યં ચરન્તીતિ" । તસ્માદેતે
ત્યાગસન્ન્યાસયોરુભયોર્લિઙ્ગમ્ ।

આહ - યદ્યપ્યેવં શાસ્ત્રં તથાઽપિ સમનુષ્ઠાને વિધિરસ્તિ । વિહિતં
ચાવશ્યં કર્તવ્યમ્ । સન્ન્યાસે ત્વર્થવાદમાત્રમિત્યનયોરયં વિશેષઃ ।
તસ્મિન્ સતિ સમનુષ્ઠાનં જ્યાયો ન ત્યાગઃ ।

ઉચ્યતે- કોઽયં વિધિઃ, કોઽયમર્થવાદઃ ?

આહ- વિધિસ્તદર્થત્વેનાપૂર્વોપદેશઃ । યો હિ વિધ્યર્થેન લિઙા લોટા
કૃત્યૈર્વાઽપૂર્વોપદેશઃ ક્રિયતે સ વિધિઃ । યથા- અગ્નિહોત્રં જુહુયાત્
સ્વર્ગકામઃ । વાયવ્યં શ્વેતમજમાલભેત ભૂતિકામ ઇતિ । સ્તુતિરર્થવાદઃ ।
તસ્ય તુ વિહિતસ્ય પ્રરોચનાર્થં યા સ્તુતિઃ સોઽર્થવાદઃ । તદ્યથા-
"વાયુર્વૈ ક્ષેપિષ્ઠા દેવતા વાયુમેવ તેન ભાગધેયેનોપધાવતિ, સ એવૈનં
ભૂતિં ગમયતિ" ઇતિ । એવંવિધાં હિ સ્તુતિમુપશ્રુત્ય ફલાર્થિને હિ યજમાનાય
વિધિઃ પ્રરોચતે । એતસ્મિન્ હિતકામઃ પ્રવર્તતે ઇતિ ।

ઉચ્યતે- ન, અત એવ સન્ન્યાસસિદ્ધિઃ । એવં ચેન્મન્યસે યમામ્નાયઃ
શ્રેયાંસમર્થં મન્યતે, તં પ્રરોચનાય સ્તૌતિ તથા સન્ન્યાસસિદ્ધિઃ ।
કસ્માત્ ? સ્તુતત્વાત્ । બહુલાર્થિનાં સન્ન્યાસમામ્નાયઃ સ્તૌતિ । સ કસ્માન્ન
પ્રરોચતે ? ઇતરથા હ્યાનર્થક્યમ્ । યદિ ખલ્વપ્યર્થવાદઃ સ્તુવન્નપિ ન
પ્રરોચયેત્ યદુક્તં પ્રરોચનાર્થોઽર્થવાદ ઇતિ તદ્ભવદ્ભિર્હાપિતવ્યં
સ્યાત્ । અનર્થકો હ્યેવં સત્યર્થવાદો ન પ્રરોચનાર્થઃ । અર્થાન્તરવચનં
વા । યદિ પ્રરોચનાર્થત્વમસ્ય નેષ્યતે તેન તર્હ્યર્થાન્તરં વક્તવ્યમ્ ।
મા ભૂદનર્થકત્વં વેદૈકદેશસ્યેતિ । તસ્માન્નાનયા વિભીષિકયા વયં
શક્યાઃ સન્માર્ગાદપનેતુમ્ । કિંચાન્યત્ । ઉભયથા વિકલ્પેઽનિષ્ટપ્રસઙ્ગાત્ ।
ઇહાયમામ્નાયો વિધેયત્વેન વા સન્ન્યાસં સ્તૂયાત્ અવિધેયત્વેન વા । કિંચાતઃ
? તદ્યદિ તાવદ્વિધેયત્વેન સ્તૌતિ કિમન્યદ્વિચાર્યતે ? સિદ્ધઃ સન્ન્યાસઃ ।
અથ વિધેયત્વેન, સ્તુતાવસ્ય પ્રયોજનં કર્તવ્યમ્ । યદ્વિ કર્તવ્યતયા

નેષ્ટં તદપુરુષબુદ્ધિપૂર્વકઃ સ્વતન્ત્રઃ પુરુષનિશ્શ્રેયસાર્થં
પ્રવર્તમાન આમ્નાયઃ કિમિતિ પ્રરોચયેત ? તસ્માદેતામપિ કલ્પનાં
કૃત્વા કૃશમેવૈતત્ । અથવોભથા વિકલ્પ ઇત્યસ્યાયમન્યોઽર્થઃ ।
ઇહાયમામ્નાયો ભૂતાર્થેન વા સન્યાસં પ્રરોચયેત્ । અભૂતાર્થેન વા ? કિં
ચાતઃ ? તદ્યદિ તાવદ્ભૂતાર્થેન પ્રરોચયતિ તથા સત્યમૃતત્વપ્રાપકસ્ય
સન્યાસસ્યાપરિગ્રહે વિષયારાગાદન્યો હેતુર્વક્તવ્યઃ । અથાભૂતાર્થેન, પુરુષો
નિઃશ્રેયસાદ્ધીયતે । કસ્માત્ ? ન હ્યેતદ્યુક્તં યદશ્રેયસિ માર્ગે પ્રમાણભૂત
આમ્નાયો માતૃમોદકન્યાયેનેહિતાર્થિનઃ પ્રાણિનઃ પ્રતારયેત્ । તસ્માદયુક્તમેતત્ ।
કિઞ્ચાન્યત્ અનેકાન્તાત્ । નચાયમેકાન્તો યદ્વિહિતમેવ કર્તવ્યમ્ । તથા
ચ શાબરાઃ પઠન્તિ ગ્રામગમનં ભવતઃ શોભનમિત્યત્રાન્તરેણ
વિધિં સ્તુતિરેવ દેવદત્તં ગ્રામગમનાય પ્રરોચયતીતિ । કિઞ્ચાન્યત્,
આશઙ્કાપ્રસઙ્ગાત્ । યદિ ખલ્વપિ કિઞ્ચિત્ સત્યં કિઞ્ચિદનૃતં બ્રૂયાદ્વેદઃ
તથા સતિ પૌરુષેયવાક્યવદ્વેદવાક્યેઽપિ આશંકા પ્રસજ્યેત । તથા ચ
સતિ યદુક્તમેવ પ્રસંગઃ । અનિષ્ટં ચૈતત્ । કિં ચ વિધ્યનુમાનં વા
તત્, એવમેકદેશભૂતત્વાત્ । અથવા વિધ્યેકદેશોઽર્થવાદ ઇત્યતિસૃષ્ટં
ભવતા । તત્ર સન્યાસેઽર્થવાદમુપલભ્ય વિધિરપ્યસ્તીતિ અનુમાતવ્યમ્ ।
અનુપલમ્ભાદદોષ ઇતિ ચેત્ સ્યાચ્ચૈવં યદ્યસૌ વિધિરુપલભ્યતે ।
તસ્માદનુપલમ્ભાદયં દોષાન્નિવર્તિષ્યત ઇતિ । એતચ્ચાનુપપન્નમ્ । કસ્માત્
? અનેકભેદત્વાત્ । ઉપલબ્ધૌ યત્નઃ ક્રિયતામ્ । અનેકભેદો હિ પ્રતિવેદમામ્નાયઃ ।
તત્ર યદુક્તં વિધિસદ્ભાવાત્ ક્રિયાપ્રાધાન્યમિત્યેતદપ્યયુક્તમ્ ।
ઇતિકર્તવ્યતાનુપદેશાત્ સન્યાસાનુપપત્તિરિતિ ચેત્- અથાપિ સ્યાદ્યદિ
સન્યાસમપ્યામ્નાયો વિધેયં મન્યેત । તેન યથા ગાર્હસ્થ્યસ્યેતિકર્તવ્યતાં
ભાર્યોદ્વહનાદિકાં મન્ત્રવદુપદિશતિ તથા સન્યાસમપ્યુપદિશેત્ । ન
તૂપદિષ્ટવાન્ । તસ્માન્નાસ્તિ સન્યાસ ઇતિ । એતદપ્યયુક્તમ્ । કસ્માત્ ? અભાવાત્ ।
ઇતિકર્તવ્યતાનાં હિ સર્વાસામભાવઃ સન્યાસઃ । તત્ર કિં શાસ્ત્રમુપદેક્ષ્યતિ
? યાવતી ખલ્વિતિકર્તવ્યતા સન્યાસાઙ્ગં તામુપદિશતિ શાસ્ત્રમ્ । કથમ્
? એવં હ્યાહ- "તપઃશ્રદ્ધે યે હ્યુપવસન્તિ અરણ્યે શાન્તા વિદ્વાંસો
ભૈક્ષચર્યાં ચરન્તઃ સૂર્યદ્વારેણ તે વિરજસઃ પ્રયાન્તિ યત્રામૃતઃ સ
પુરુષોઽવ્યયાત્મા ।" તત્ર તપઃશ્રદ્ધે યે હ્યપવસન્તીત્યેનં શ્રદ્ધયોપેતં
યમનિયમલક્ષણં ધર્મમાહ । અરણ્ય ઇતિ ગૃહેભ્યો વિનિસ્સૃતિમ્ ।
શાન્તા ઇતીન્દ્રિયાણામન્તઃકરણસ્ય ચ વિષયાભિલાષાદ્વિનિવર્તનમ્ ।
વિદ્વાંસ ઇતિ પૂર્વરાત્રાપરરાત્રાદિષુ કાલેષ્વનિર્વિણ્ણસ્ય યોગિનો

જ્ઞાનાભ્યાસમ્ । ભૈક્ષચર્યાં ચરન્ત ઇતિ શરીરસ્થિતિનિમિત્તં
પરિમિતમભ્યવહારનિયોગમ્ । ઉત્તરાર્ધેન ચ ફલમાચષ્ટે ।
તન્નિબન્ધનશ્ચ વિસ્તરઃ સન્યાસેતિકર્તવ્યતાયાં મન્વાદિભિરભિહિતઃ ।
શ્રુતિનિર્વચનાશ્ચ સ્મૃતયો ભવતાં પ્રમાણમિતિ પક્ષઃ । તત્ર
યદુક્તમિતિકર્તવ્યતાઽનુપદેશાન્નાસ્તિ સન્ન્યાસ ઇત્યેદયુક્તમ્ । એવં ચ નિત્યાનિ
કર્માણિ । યત્ત્વનેનૈતદુક્તમાનુશ્રવિકો હેતુરનૈકાન્તિક ઇતિ સત્યમેતત્ ।
અવશ્યં હિ કર્મણઃ ફલમભ્યુપગન્તવ્યમ્ । ઇતરથા હિ તન્નિમિત્તસ્ય
સંસારસ્યાભાવાદનિષ્ટપ્રસઙ્ગઃ । તસ્માદનિષ્ટામેવૈતદાચાર્યસ્ય ।
આહ, કથમેતદનુમાતવ્યમિતિ ?
ઉચ્યતે, ક્ષયગ્રહણસામર્થ્યાત્ । યદિ પૂર્વસૂત્રોક્તમિહાનુવર્તતે
ક્ષયગ્રહણમનર્થકં સ્યાત્ । કસ્માત્ ? અત્યન્તાભાવપર્યાયો હિ ક્ષય ઇતિ
કૃત્વા । એવં સિદ્ધોઽવિશુદ્ધિયોગઃ ।
આહ, ક્ષયયોગ ઇદાનીં કથમનુમાતવ્ય ઇતિ ?
ઉચ્યતે - ક્ષયયોગોઽઙ્ગપરિમાણાત્ । ક્ષયયોગઃ પુનરસ્ય
હેતોરઙ્ગપરિમાણાદ્વેદિતવ્યઃ । યાનિ હિ યજેરઙ્ગાનિ પશુપુરોડાશાદીનિ
તાનિ પરિમિતાનિ । પરિમિતાનાં સાધનાનાં તન્ત્વાદીનાં પરિમિતં
કાર્યં પટાદિ દૃષ્ટમ્ । પરિમિતં ક્ષયધર્મિ દૃષ્ટમ્ ।
તદ્વદેવ । કિઞ્ચાન્યત્ । સંસારોપલમ્ભાત્ । દૃશ્યતે ચાયં
વાગ્બુદ્ધિસ્વભાવાહારવિહારભેદભિન્નકર્મવિહારવૈચિત્ર્યનિમિત્તઃ સંસારઃ ।
યદિ પુનઃ સાક્ષાત્ કૃતં કર્માક્ષયફલં સ્યાત્ સ પુનરાવૃત્ત્યભાવાત્
પ્રાણિનાં નોપલભ્યેત ।
શબ્દસામર્થ્યાન્નિત્યત્વમિતિ ચેત્ સ્યાદેતત્ ।"શબ્દપ્રમાણકા વયં,યચ્છબ્દ
આહ તદસ્માકં પ્રમાણમ્ ।" સ ચાસ્ય હેતોરમૃતત્વમાહ"તરતિ મૃત્યું,
તરતિ પાપ્માનમિત્યાદિ" । તસ્માદનિચ્છતાઽપ્યેતદવશ્યમભ્યુપગન્તવ્યમ્ ।
અનભ્યુપગમે વા પ્રતિજ્ઞાહાનિર્વેદઃ પ્રમાણમિતિ । એતચ્ચ નૈવમ્ । કસ્માત્
? શબ્દાન્તરેણ વિરોધાત્ । અનિત્યત્વમસ્ય હેતોઃ શબ્દોઽનુમન્યતે । તસ્યૈવં
સતિ વિરોધઃ પ્રાપ્નોતિ । કથમ્ ? એવં હ્યાહ-"અથ યે ઇમે ગ્રામે ઇષ્ટાપૂર્તે
દત્તમિત્યુપાસતે, અથૈતમેવાધ્વાનં પુનર્નિવર્તન્તે । યથૈતમાકાશં
આકાશાદ્વાયુમ્ । તે ધૂમમભિસમ્ભવન્તિ । ધૂમો ભૂત્વાઽભ્રં ભવતિ ।
મેઘો ભૂત્વા પ્રવર્ષતિ । ત ઇહ વ્રીહિયવા ઓષધિવનસ્પતયસ્તિલા માષા
ઇતિ જાયન્તે । તતો વૈ યોઽન્નમતિ યો રેતઃ સિઞ્ચતિ સ ભૂય એવ ભવતીતિ

"। તત્ર યદુક્તં શબ્દસામર્થ્યાન્નિત્યત્વમિત્યેદયુક્તમ્ ।
ઉભયથાભિધાનાચ્છાસ્ત્રવિરોધપ્રસઙ્ગ ઇતિ ચેત્ સ્યાન્મતમ્ ।
તદેવ શાસ્ત્રં નિત્યત્વમાહ તદેવાનિત્યત્વમ્ । એવં સતિ
પરસ્પરવિરોધિનોરર્થયોશ્ચોદિતત્વાત્ ઉભયાનુગ્રહાસમ્ભવે સતિ
શાસ્ત્રવિરોધપ્રસઙ્ગ ઇતિ । તચ્ચ નૈવમ્ । કસ્માત્ ? અસમ્ભવે
સત્યર્થાન્તરક્લૃપ્તેઃ । યત્ર હિ પ્રમાણભૂતા શ્રુતિરસમ્ભવિનમર્થં
ચોદયતિ, તત્રાર્થાન્તરં કલ્પયતિ । તદ્યથા- "સ આત્મનો વપામુદખિદત્"
"સ્તેનં મનઃ" "અનૃતવાદિનો વાગ્" ઇત્યેવમાદિષુ । એવમિહાપિ નાસ્તિ સમ્ભવઃ
યદેકોઽર્થો નિત્યશ્ચ સ્યાદનિત્યશ્ચેતિ । તસ્માન્નિત્યત્વવાચકસ્ય
શાસ્ત્રાન્તરસ્ય ભક્ત્યાર્થાન્તરં પરિકલ્પયિષ્યામઃ । તદ્વદિતરત્રાપીતિ
ચેત્ સ્યાન્મતમ્- યથૈવ ભવતા નિત્યાનિત્યયોરેકત્રાસમ્ભવાન્નિત્યત્વસ્ય
ભક્ત્યા કલ્પના કૃતા તથૈવાનિત્યત્વસ્યાપિ કરિષ્યત ઇતિ । એતચ્ચાયુક્તમ્ ।
કસ્માત્ ? સર્વપ્રમાણવિરોધપ્રસઙ્ગાત્ । વિનાશે હિ ભક્ત્યા કલ્પ્યમાને
સર્વપ્રમાણવિરોધઃ પ્રસજ્યેત । કથમ્ ? પ્રત્યક્ષવિરોધસ્તાવત્
સંસારોપલમ્ભાત્ । અનુમાનવિરોધઃ અઙ્ગપરિમાણે સત્યઙ્ગિનો નિત્યત્વાનુપપત્તેઃ ।
શબ્દવિરોધઃ તે ધૂમમભિસમ્ભવન્તીતિ વચનાત્ । ન તુ નિત્યત્વે ભક્ત્યા
કલ્પ્યમાને દોષોઽયમુપદ્યતે । તસ્માદ્વિષમેતત્ ।
આહ, કથમિદાનીં ભક્ત્યા કલ્પયિતવ્યં શાસ્ત્રમિતિ ?
ઉચ્યતે, પ્રકૃષ્ટાર્થતયા । યથા ખલ્વપ્યમૃતં વા મૃતમતિજીવો
મા તે હાસિષુરસવઃ શરીરમિત્યભિધીયતે । ન ચ પ્રાણિનામત્યન્તાયાસવો
જહતિ, કિન્તર્હિ પ્રકૃષ્ટં કાલમ્ । એવમિહાપ્યુચ્યતે તરતિ મૃત્યુમિતિ ।
નાત્યન્તાય મૃત્યું તરતિ, કિન્તર્હિ પ્રકૃષ્ટં કાલમ્ । ઉપચર્યતે હિ
લોકે પ્રકૃષ્ટે નિત્યશબ્દઃ । તદ્યથા નિત્યપ્રહસિતો નિત્યપ્રજલ્પિત ઇતિ ।
એવં સિદ્ધઃ ક્ષયયોગઃ ।
આહ, અતિશયયોગ ઇદાનીમસ્ય હેતોઃ કથમનુમાતવ્ય ઇતિ ।
ઉચ્યતે- અતિશયયોગઃ ક્રિયાભ્યાસાત્ । યત્ર હિ ક્રિયા સકૃત્ પ્રવર્તતે
યત્ર ચાસકૃદાવર્તતે તત્રાતિશયો દૃષ્ટઃ । તદ્યથા કૃષ્યાદિષુ ।
યજ્ઞે ચ દ્રવ્યોપાદાનશક્ત્યપેક્ષા । ક્વચિત્ સકૃદેવ પ્રવૃત્તિઃ,
ક્વચિત્ પુનઃપુનરાવૃત્તિઃ । તસ્માદતિશયેન ભવિતવ્યમ્ । કિં ચાન્યત્
અઙ્ગાતિશયાત્ । ઇહાઙ્ગાનામતિશયાદઙ્ગિનોઽપિ ઘટાદેરતિશયો દૃષ્ટઃ ।
અસ્તિ ચાયં પ્રતિયજ્ઞમઙ્ગાનાં દક્ષિણાદીનામતિશયઃ ।

તસ્માદત્રાપ્યતિશયેન ભવિતવ્યમ્ ।
દેવતાઙ્ગભાવગમનાત્ ક્ષયાતિશયાનુપપત્તિરિતિ ચેત્- અથાપિ
સ્યાત્ યો હિ યજ્ઞે દ્રવ્યમાત્રસ્ય સાધનભાવમનુમન્યતે
તં પ્રતિ ક્ષયાતિશયદોષાવપરિહાર્યૌ સ્યાતામ્ । વયન્તુ
દ્રવ્યસમવાયિનીં દેવતાં ક્રતાવઙ્ગભાવમુપગચ્છન્તીં વિદ્મઃ ।
તસ્માદદોષોઽયમિતિ । તચ્ચાનુપપન્નમ્ । કસ્માત્ ? સાધ્યત્વાત્ ।
દેવતાનામપરિમિતત્વં સાધ્યમ્ । તદઙ્ગભાવગમનાચ્ચ દોષાભાવઃ ।
ન ચાત્મક્રિયાઙ્ગત્વમુદાસીનત્વાત્ ઇતિ નઃ સિદ્ધાન્તઃ । તસ્માદયુક્તમેતત્ ।
ઉપેત્ય વા । ક્રતુસમનુષ્ઠાનાનર્થક્યપ્રસઙ્ગાત્ । યદિ દ્રવ્યસમવાયિનીં
દેવતામુપલભ્ય તદઙ્ગભાવગમનાદક્ષયો નિરતિશયશ્ચ
હેતુરવાપ્યતે ઇતીષ્ટં વઃ, તેન તર્હિ યદ્વા તદ્વા વેદોક્તં કર્મ કૃત્વા
શક્યોઽવાપ્તુમર્થઃ । કિં પ્રાણિવિનાશહેતુભિઃ ક્રતુભિઃ ? કથમ્ ? ન હિ
કિંચિત્કર્મ વિદ્યતે યત્ર શરીરસ્યાઙ્ગભાવો ન સ્યાત્ । સર્વદેવતામયં
ચ શરીરં યસ્માદાહ તસ્માદ્વૈ વિદ્વાન્પુરુષમિદં બ્રહ્મેતિ મન્યતે । સર્વા
હ્યસ્મિન્ દેવતાઃ શરીરેઽધિ સમાહિતાઃ । તત્ર યદુક્તં દેવતાઙ્ગભાવગમનાત્
ક્ષયાતિશયાનુપપત્તિરિત્યેતદયુક્તમ્ । એવમયં હેતુસ્ત્રિદોષઃ । તેન યઃ
ફલવિશેષોઽભિનિર્વર્ત્યતે સોઽપિ તથાજાતીયક ઇતિ શક્યમનુમાતુમ્ ।
તસ્માન્નાસ્ય જિજ્ઞાસોરત્ર સમાધિઃ ।
આહ, યદિ નાયં શ્રેયાનિતિ કૃત્વાઽસ્ય જિજ્ઞાસોર્નાત્ર સમાધિઃ તેન તર્હિ
યઃ શ્રેયાન્ ફલવિશેષઃ સ ઉપદેષ્ટવ્ય ઇતિ ।
ઉચ્યતે-

॥ તદ્વિપરીતઃ શ્રેયાન્ ॥

તદિત્યનેન કર્મવિધિનિષ્પાદિતસ્ય સ્વર્ગપ્રાપ્તિલક્ષણસ્ય
ફલસ્યાભિસમ્બન્ધઃ । તસ્માદ્વિપરીતઃ શુદ્ધોઽક્ષયો નિરતિશય ઇત્યર્થઃ ।
કોઽસાવિત્યુચ્યતે મોક્ષઃ શ્રેયાન્ । એતદુક્તં ભવતિ । ઉભાવપ્યેતૌ
પ્રશસ્યૌ સ્વર્ગાપવર્ગૌ, આમ્નાયવિહિતત્વાત્ । મોક્ષસ્તુ પ્રશસ્યતરઃ ।
કસ્માત્ ? યથોક્તદોષાનુપપત્તેઃ । સ હ્યવશ્યંભાવિત્વાદૈકાન્તિકઃ ।
અતીન્દ્રિયત્વાદસંવેદ્યઃ । સ્વાત્મન્યવસ્થિત્વાલ્લઘુઃ સર્વત્ર
સન્નિહિતશ્ચ । આમ્નાયસ્તુતત્વાત્પ્રશસ્તઃ । સદ્ભિરાસેવિતત્વાદનિન્દિતઃ ।
યમનિયમવૈરાગ્યજ્ઞાનાભ્યુપાયશુદ્ધેર્વિશુદ્ધઃ । અદ્રવ્યત્વાદક્ષયો
નિરતિશયશ્ચ ।

આહ, કથં પુનરયમપવર્ગઃ પ્રાપ્યત ઇતિ ?
ઉચ્યતે, સંયોગાભાવાત્ । દુઃખં ચ પ્રધાનમ્ । તથા ચ
તન્ત્રાન્તરેષ્વપ્યુક્તમ્- દુઃખહેતુઃ કાર્યકરણશક્તિરિતિ । તેન યદા
પુરુષસ્ય સંયોગસ્તદાऽવિશુદ્ધિત્વમસ્ય । સ્વશક્તિવિશેષયોગાત્તેષુ
તેષુ જાત્યન્તરપરિવર્તેષુ ધર્માદિનિમિત્તસામર્થ્યાદાયાસમનુભવતિ ।
યદા તુ પ્રધાનસંયોગો વિનિવર્તતે તદા નિમિત્તાભાવે નૈમિત્તિકસ્યાપ્યભાવ
ઇતિ કૃત્વા ન પુનર્દ્વન્દ્વાન્યનુભવતિ ।
આહ, કિમર્થઃ પુનરયં પ્રધાનસ્ય પુરુષેણ સહ સંયોગઃ ?
ઉચ્યતે, નૈતદિહાભિધાનીયમ્ । વક્ષ્યત્યયમુપરિષ્ટાદાચાર્યઃ "પુરુષસ્ય
દર્શનાર્થઃ, કૈવલ્યાર્થસ્તથા પ્રધાનસ્ય । પઙ્ગ્વન્ધવદુભયોરપિ
સંયોગ ઇતિ" (kA0 21) ।
આહ, વિયોગસ્તર્હિ કસ્માન્નિમિત્તાદ્ ભવતીતિ ?
ઉચ્યતે -

॥ વ્યક્તાવ્યક્તજ્ઞવિજ્ઞાનાત્ ॥ ૨ ॥

વ્યક્તં ચાવ્યક્તં ચ જ્ઞશ્ચ વ્યક્તાવ્યક્તજ્ઞાઃ । તેષાં વિજ્ઞાનં
વ્યક્તાવ્યક્તજ્ઞવિજ્ઞાનં તસ્માત્ । બહુષ્વનિયમાદલ્પાચોऽપિ
જ્ઞશબ્દસ્ય ન પૂર્વનિપાતઃ । અથવા જ્ઞાનસ્ય સાધકતમં વ્યક્તમ્ ।
તત્પૂર્વકત્વાદવ્યક્તસમધિગમસ્યેત્યભિહિતમ્ । યદ્વા વ્યક્તં ચ અવ્યક્તં
ચ તે વ્યક્તાવ્યક્તે, તે વિજાનાતિ ઇતિ વ્યક્તાવ્યક્તજ્ઞઃ, તદ્વિજ્ઞાનાત્
સંયોગો નિવર્તતે । વક્ષ્યતિ ચૈતત્, "દૃષ્ટા મયેત્યુપેક્ષત એકો
દૃષ્ટાऽહમિત્યુપરમત્યન્યા" ઇતિ (kA0 66) ।
તત્ર રૂપપ્રવૃત્તિફલલક્ષણં વ્યક્તમ્ । રૂપં પુનઃ મહાનહંકારઃ
પઞ્ચ તન્માત્રાણિ એકાદશેન્દ્રિયાણિ પઞ્ચ મહાભૂતાનિ । સામાન્યતઃ
પ્રવૃત્તિર્દ્વિવિધા । હિતકામપ્રયોજના ચ, અહિતપ્રતિષેધપ્રયોજના
ચ । વિશેષતઃ પંચ કર્મયોનયો વૃત્ત્યાદ્યાઃ પ્રાણાદ્યાશ્ચ
પઞ્ચ વાયવઃ । ફલં દ્વિવિધમ્ । દૃષ્ટમદૃષ્ટં ચ ।
તત્ર દૃષ્ટં સિદ્ધિતુષ્ટ્યશક્તિવિપર્યયલક્ષણમ્ । અદૃષ્ટં
બ્રહ્માદૌ સ્તમ્બપર્યન્તે સંસારે શરીરપ્રતિલમ્ભ ઇત્યેતદ્ વ્યક્તમ્ ।
એષાં ગુણાનાં સત્ત્વરજસ્તમસામઙ્ગાઙ્ગિભાવગમનાદ્વિશેષગૃહીતિઃ ।
યદા ત્વઙ્ગભાવમગચ્છન્તો નિર્લિખિતવિશેષા વ્યવતિષ્ઠન્તે
તદાऽવ્યક્તમિત્યુચ્યન્તે । ચેતનાશક્તિરૂપત્વાચ્ચિત્રં ગુણવૃત્તં જાનાતીતિ

જ્ઞઃ ।
એષાં ત્રયાણાં ભેદમભેદં ચ વિજ્ઞાય સંયોગનિવૃત્તિં લભતે ।
કસ્માત્ ? સંયોગનિમિત્તપ્રતિદ્વન્દ્વિભૂતત્વાદ્યોગનિમિત્તસ્ય ।
ઇહ યદાઽદર્શનનિમિત્તઃ પ્રધાનપુરુષયોઃ સંયોગઃ તસ્માદસ્ય
પ્રતિદ્વન્દ્વિભૂતેન જ્ઞાનેન વિયોગહેતુના ભવિતવ્યમ્ । કો દૃષ્ટાન્તઃ
? તમઃપ્રકાશવત્ । યથા તમસા તિરોહિતાનિ દ્રવ્યાણિ ઘટાદીનિ નોપલભ્યન્તે,
તત્પ્રતિદ્વન્દ્વિભૂતેન તુ પ્રદીપેન પ્રકશિતાનામેષામુપલબ્ધિર્ભવતિ ।
તદ્વદિહાપિ દ્રષ્ટવ્યમિતિ સિદ્ધં જ્ઞાનાન્મોક્ષઃ । ઉક્તં ચ-
વૃક્ષાગ્રાચ્ચ્યુતપાદો યદ્વદનિચ્છન્નરઃ પતત્યેવ ।
તદ્વદ્ ગુણપુરુષજ્ઞોઽનિચ્છન્નપિ કેવલી ભવતિ ॥

કિં ચાન્યત્ । આમ્નાયાભિહિતત્વાત્ । આમ્નાયનિબન્ધનો હ્યયમર્થો જ્ઞાનાન્મોક્ષ
ઇતિ, ન યાદૃચ્છિકઃ । કથમ્ ? એવં હ્યાહ- "સત્યં જ્ઞાનમનન્તં બ્રહ્મ
યો વેદ નિહિતં ગુહાયાં પરમે વ્યોમન્ સોઽશ્નુતે સર્વાન્ કામાન્ સહ બ્રહ્મણા
વિપશ્ચિતા "।
"યતો વાચો નિવર્તન્તે અપ્રાપ્ય મનસા સહ ।
આનન્દં બ્રહ્મણો વિદ્વાન્ ન બિભેતિ કુતશ્ચન ॥"
"તમેવ વિદિત્વાઽમૃતત્વમેતિ નાન્યઃ પન્થા અયનાય વિદ્યતે "। તથા
બ્રાહ્મણેઽપ્યુક્તમ્ । "તરતિ શોકમાત્મવિત્ "। "બ્રહ્મવિદ્ બ્રહ્મૈવ ભવતીતિ
"। તસ્માદામ્નાયપ્રામાણ્યાદપિ મન્યામહે જ્ઞાનાન્મોક્ષ ઇતિ ।
આહ, જ્ઞાનવાચિનોઽમૃતત્વનિમિત્તાભ્યુપગમાન્મહત આમ્નાયાન્તરસ્યાનર્થક્યમ્ ।
યદિ જ્ઞાનવાચિન આમ્નાયખણ્ડકાદમૃતત્વમવાપ્યત ઇત્યેતદભ્યુપગમ્યતે,
તેન ક્રિયાવાચિનો મહત આમ્નાયાન્તરસ્યાનર્થક્યં પ્રાપ્તમ્ । કિં કારણમ્ ? ન
હ્યનાયાસેનેષ્ટાવાપ્તૌ સત્યામ્ આયાસભૂયિષ્ઠે કર્મણિ પ્રવર્તમાનઃ કૃતી
ભવતીતિ । આહ ચ -
અક્કે ચેન્મધુ વિન્દેત કિમર્થં પર્વતં વ્રજેત્ ।
ઇષ્ટસ્યાર્થસ્ય સમ્પ્રાપ્તૌ કો વિદ્વાન્ યત્નમાચરેત્ ॥

ઉચ્યતે- યદિ પુનઃ કર્માણ્યત્યન્તકર્તવ્યતયેષ્યન્તે, જ્ઞાનવાચિન
આમ્નાયસ્ય કથમર્થવત્તા સિદ્ધા ભવતિ ?
આહ, સમુચ્ચયે તૂભયાર્થવત્ત્વમ્ । જ્ઞાનકર્મણોસ્તુ
સમુચ્ચયેઽભ્યુપગમ્યમાને દ્વયોરપ્યામ્નાયાર્થવત્તા સિદ્ધા ભવતિ ।
વિદ્વાન્ યજેત વિદ્વાન્ યાજયેદિતિ વચનાત્, તથા સર્વપુરુષાણાં

ક્રતાવધિકારઃ અશ્રોત્રિયષણ્ઢશૂદ્રવર્જમિતિન્યાયાત્ । તસ્માજ્જ્ઞાનકર્મણોઃ સમુચ્ચયાદિષ્ટપ્રસિદ્ધિઃ ।

ઉચ્યતે- ન, પૂર્વદોષાપરિહારાત્ । યદિ નિયમતો વિદુષૈવ કર્માણિ કર્તવ્યાનીત્યભ્યુપગમ્યતે તેન યઃ પૂર્વોક્તો દોષઃ સંસારાભાવપ્રસઙ્ગઃ, તસ્યાપરિહારઃ । કિં ચ શાસ્ત્રહાનેશ્ચ । યશ્ચ શાસ્ત્રમિષ્ટાપૂર્તે સમુપાસ્યતે તે ધૂમમભિસંભવન્તીતિ તદેતસ્યાં કલ્પનાયાં હીયતે । કિં ચાન્યત્- ભિન્નફલત્વાત્ । ઇહાભિન્નફલાનિ દ્રવ્યાણિ સમુચ્ચીયન્તે । તદ્યથા ભુજ્યઙ્ગાનિ સૂપાદીનિ । અભિન્નં તેષાં તૃપ્તિલક્ષણં ફલમિતિ । ન ચૈતજ્જ્ઞાનકર્મણોરભિન્નં ફલમ્ । સ્વર્ગાપવર્ગહેતુત્વાત્ । જ્ઞાનસામર્થ્યાત્કૈવલ્યમભિન્નં ફલમિતિ ચેત્ પૂર્વેણાવિશેષઃ । યદુક્તં સંસારાભાવપ્રસંગ ઇતિ તદનપહૃતમેવ ભવતિ । કિંચાન્યત્- શ્રૂયમાણફલવિરોધશ્ચ । યચ્ચ ક્રિયાયાઃ ફલં શ્રૂયતે અગ્નિહોત્રં જુહુયાત્ સ્વર્ગકામો, રાષ્ટ્રમગ્નિષ્ટોમેન જયતીતિ તદ્વિરુધ્યતે । કર્મણશ્ચ શેષભાવઃ । સ્વાર્થોપસર્જનત્વે સત્યર્થાન્તરનિષ્પાદકત્વાત્ । યથાઽવહન્તીત્યેવમાદ્યાઃ ક્રિયાઃ સ્વં ફલમુપસર્જનીકૃત્ય તદ્દ્વારેણ યજેરુપકુર્વન્ત્યસ્તચ્છેષભૂતા ભવન્તિ એવં ક્રિયાપિ જ્ઞાનફલભૂતત્વાત્તચ્છેષભૂતા સ્યાત્ ।

વિધિસદ્ભાવાત્ ક્રિયાપ્રાધાન્યમિતિ ચેન્ન- ઉક્તત્વાત્ । કથમેતત્ ? નાસ્તિ વિધિકૃતો વિશેષઃ । ઉપેત્ય વા । તત્રાપિ તદુત્પત્તેઃ । અસ્તિ હિ જ્ઞાનસ્યાપિ વિધાયકં શાસ્ત્રમ્ । કથમ્ ? એવં હ્યાહ-" ય આત્માપહતપાપ્મા વિજિઘત્સો વિપિપાસો વિજરો વિમૃત્યુર્વિશોકઃ સન્ન્યસ્તસંકલ્પઃ સોઽન્વેષ્ટવ્યઃ સ જિજ્ઞાસિતવ્યઃ । સર્વાંશ્ચ કામાનવાપ્નોતિ ય આત્માનમનુવિદ્ય વિજાનાતીતિ" પ્રજાપતેર્વચનં શ્રૂયતે । પુનરપ્યાહ-" દ્વે વિદ્યે વેદિતવ્યે પરા ચૈવાપરા ચ" યા । તસ્માદ્વિધિસદ્ભાવાત્ક્રિયાપ્રાધાન્યમિતિ સ્વપક્ષાનુરાગમાત્રમેતત્ । દૃષ્ટાર્થત્વાદિત્યેકે ।

એકે પુનરાચાર્યા મન્યન્તે દૃષ્ટમેવ જ્ઞાનસ્યાજ્ઞાનનિવૃત્તિલક્ષણં ફલં તસ્માન્ન શાસ્ત્રેણ વિધીયતે । કિં કારણમ્ ? દૃષ્ટાર્થસ્ય હિ કર્મણો ન શાસ્ત્રં પ્રયોજકમ્ । સ્વયમેવાર્થિતત્વાત્તત્ર પ્રવૃત્તેર્ભુજ્યાદિવત્ । તેષાં જ્ઞાનવિધાયકાનિ વાક્યાનિ તાન્યુપાયગુણવિધાનાર્થમનુવાદભૂતાન્યાશ્રીયન્તે । તદ્યથા દધ્ના જુહોતિ, પયસા જુહોતીતિ ।

યત્તુ ખલ્વિદમુચ્યતે વિદ્વાન્યજેત, વિદ્વાન્ યાજયેત્, શ્રોત્રિયસ્ય ચ

કર્મણ્યધિકાર ઇતિ તસ્યામયમર્થઃ- અધીત્ય વેદં ક્રિયાઽનુપૂર્વો ચ જ્ઞાત્વા કર્મણિ પ્રવર્તિતવ્યમ્ । એવં ચ સતિ ન કશ્ચિદ્દોષઃ । યદિ પુનર્નિયમત એવાત્મવિધાં કર્મણ્યધિકારસ્તેન સંસારાભાવપ્રસંગઃ । સ્વાભાવિકત્વાત્ । વિજ્ઞાનસ્ય શાસ્રસ્ય સર્વાધિકારવિરોધઃ । તસ્માન્નાસ્તિ સમુચ્ચયો જ્ઞાનકર્મણોઃ ।

અપર આહ- સત્યમ્ । નાસ્ત્યનયોઃ સમુચ્ચયઃ કિન્તર્હિ સર્વાર્થા ક્રિયા જ્ઞાનં પ્રતિષિદ્ધાર્થમ્ । યે હિ ષણ્ઢાન્ધવબધિરાદયઃ કર્મણોઽત્યન્તં નિરાકૃતાસ્તેષાં જ્ઞાનાદાશ્રમાન્તરેઽમૃતત્વાવાપ્તિઃ । ઇતરેષાં તૂ મૂલાશ્રમે કર્મણ એવેતિ તસ્ય નાયં વાદિનઃ પરિહાર ઇતિ ।

ઉચ્યતે- ન, સ્વસમયવિરોધાત્ । એવં બ્રુવાણસ્યાસ્ય વાદિનઃ સ્વસમય એવ વિરુધ્યતે । યદુક્તમ્- વિદ્વાંસઃ પ્રજાં નાકામયન્ત, કિં પ્રજયા કરિષ્યામઃ ? અથ યદુક્તં પુત્રૈષણાયાશ્ચ વિત્તૈષણાયાશ્ચ વ્યુત્થાય ભૈક્ષચર્યાં ચરન્તીતિ । ન ચ ષણ્ડાનાં પુત્રૈષણાવ્યુત્થાનમથવદ્ ભવતિ, દેવકૃતત્વાત્ । કિં ચાન્યત્ - રહસ્યભૂતત્વાત્ । રહસ્યભૂતં હિ વેદાનાં જ્ઞાનમ્ । યસ્માદાહ- તદ્ધ સ્મૈતદારુણિરૌદ્દાલકિર્જ્યેષ્ઠાય પુત્રાય પ્રોવાચ । ઇદં જ્યેષ્ઠપુત્રાય પિતા બ્રહ્મ પ્રબ્રૂયાત્ । પ્રણાય્યાન્તેવાસિને નાન્યસ્મૈ યસ્મૈ કસ્મૈચન । ય ઇમામદ્ભિઃ પરિગૃહીતાં વસુના વસુમતીં પૂર્ણાં દદ્યાદેતદેવ તતો ભૂય ઇતિ ।

ભવતિ ચાત્ર -

પરં રહસ્યં વેદાનામવસાનેષુ પઠ્યતે ।
ષણ્ડાદ્યર્થં તદિષ્ટં ચેદ્વિષ્ટ્યા સફલતા શ્રુતે ॥

વિદ્વાન્ કર્માણિ કુર્વીતિત્યેતદુક્તં કિલ શ્રુતૌ ।
સ ચ પણ્ડાદિરેવસ્યાદ્યોઽત્યન્તં કર્મણશ્ચ્યુતઃ ॥

સ એવ વર્ત્યતાં પ્રાજ્ઞૈઃ કિં ન્યાય્યોઽથ મતિભ્રમઃ ?
ઇન્દ્રિયાર્થાનુરાગો વા દ્વેષો વા મોક્ષવર્ત્મનિ ॥

કૈવલ્યપ્રાપ્તિહેતુત્વાદ્યા વેદવિહિતા સ્તુતિઃ ।
પ્રશસ્તા યાજ્ઞવલ્ક્યાદ્યૈર્વિશિષ્ટૈસ્તત્ત્વનિશ્ચયાત્ ॥

સેયં વિષયરાગાન્ધૈર્વિપરીતાર્થવાદિભિઃ ।
વિદ્યા કન્યેવ ષણ્ડાય દીયમાના ન શોભતે ॥

તસ્માદ્રાગાનુગૈરુક્તાં કુહેતુપૃતનામિમામ્ ।

અપોહ્ય મતિમાન્યુવત્યા હ્યાશ્રમાદાશ્રમં વ્રજેત્ ॥

ઇતિ શ્રીમદાચાર્યેશ્વરકૃષ્ણવિરચિતાયાં સાંખ્યસપ્તતૌ યુક્તિદીપિકાનામ્નિ
વિવરણે પ્રથમમાહ્નિકમ્ ॥

---

કારિકા ૩

---

આહ- સમ્યગુપદિષ્ટં ભવતા વ્યક્તાવ્યક્તજ્ઞવિજ્ઞાનાન્મોક્ષોઽવાપ્યતે ।
ઇદાનીમુપદેષ્ટવ્યમ્ કથમેતત્ત્રયં પ્રતિપત્તવ્યમિતિ ।
ઉચ્યતે - ત્રયસ્યાસ્ય પ્રતિપત્તિં દ્વેધા સમામનન્તિ । સમાસતો
વિસ્તરતશ્ચ । તદેવ ત્રયં પંચભિરધિકરણૈર્ભિદ્યતે । કાનિ
પુનરધિકરણાનીતિ ? ઉચ્યતે- પ્રકૃતિવિકારવૃત્તં, કાર્યકારણવૃત્તં,
અતિશયાનતિશયવૃત્તં, નિમિત્તનૈમિત્તિકવૃત્તં, વિષયવિષયિવૃત્તમિતિ ।
તત્ર પ્રકૃતિવિકારવૃત્તપૂર્વકત્વાદિતરેષામધિકરણાનાં
તદ્ભેદાન્વક્ષ્યામઃ । તત્પુનશ્ચતુર્ધા ભિદ્યતે । કિંચિત્કારણમેવ ન
કાર્યમ્ । કિંચિત્કારણં ચ કાર્યં ચ । કિંચિત્કાર્યમેવ ન કારણમ્ ।
કિંચિન્નૈવ કારણં ન ચાપિ કાર્યમિતિ ।
આહ- અતિસામાન્યોપદિષ્ટમેતન્નાસ્માકં બુદ્ધાવવતિષ્ઠતે ।
તસ્માદ્વિભજ્યોપદિશ્યતાં કસ્ય પદાર્થસ્ય કિં વૃત્તમિતિ ?
ઉચ્યતે- બાઢમ્ । ઉપદિશ્યતે-

॥ મૂલપ્રકૃતિરવિકૃતિઃ ॥

મૂલમાધારઃ પ્રતિષ્ઠેત્યનર્થાન્તરમ્ । પ્રકરોતીતિ । પ્રકૃતિઃ ।
મૂલં ચાસૌ પ્રકૃતિર્મૂલપ્રકૃતિઃ । મૂલપ્રકૃતિઃ કસ્ય મૂલમ્
? મહદાદીનામ્ । સંજ્ઞા ખલ્વિયં પ્રધાનસ્ય મૂલપ્રકૃતિરિતિ । સા
ચાવિકૃતિરવિકારાનુત્પાદ્યેત્યર્થઃ ।
આહ- સમાસાનુપપત્તિઃ વિશેષણાન્તરોપાદાનાત્ । મૂલમિત્યયં શબ્દઃ
પ્રકૃતિવિશેષણાર્થમુપાત્તો મહદાદિવિશેષણાન્તરમુપાદત્તે ।
તત્ર સવિશેષણાનાં વૃત્તિર્નેતિ સમાસપ્રતિષેધઃ પ્રાપ્નોતિ ।
સમાસાન્તરવિધાનાદદોષ ઇતિ ચેત્સ્યાન્મતમ્- યદ્યેતસ્મિન્ સમાસે
દોષોઽયમુપપદ્યતે સમાસાન્તરમત્ર વિધાસ્યતે મૂલં પ્રકૃતીનાં
મૂલપ્રકૃતિરિતિ । એતચ્ચાનુપપન્નમ્ । કસ્માત્ ? દોષાન્તરોપપત્તેઃ ।

એવમપ્યુપસર્જનં પૂર્વં નિપતતીતિ ષષ્ઠ્યોક્તસ્યોપસર્જનત્વાત્પૂર્વનિપાતઃ ।
તત્રૈવં ભવિતવ્યં મૂલં પ્રકૃતીનાં પ્રકૃતિમૂલમિતિ ।
તસ્માદિદમપ્યસારમિતિ ।
ઉચ્યતે- પૂર્વ એવ સમાસોઽસ્તુ, સમ્બન્ધિશબ્દઃ સાપેક્ષો નિત્યં વૃત્તૌ સમસ્યતે । યત્તૂક્તં વિશેષણાન્તરોપાદાનાત્સમાસાનુપપત્તિરિતિ- તત્ર બ્રૂમઃ સમ્બન્ધિશબ્દાનાં સમ્બન્ધ્યન્તરમનપેક્ષ્ય સ્વરૂપપ્રતિલમ્ભ એવ નાસ્તીત્યાકાંક્ષાવતામેવ વૃત્ત્યા ભવિતવ્યમ્ । તદ્યથા દેવદત્તસ્ય ગુરુકુલમિતિ સમ્બન્ધિશબ્દત્વાદ્દેવદત્તશબ્દમપેક્ષમાણોઽપિ ગુરુશબ્દઃ કુલશબ્દેન સહ વૃત્તિં પ્રતિપદ્યતે । એવમિહાપિ મૂલમિત્યયં શબ્દઃ સમ્બન્ધિશબ્દત્વાન્મહદાદ્યપેક્ષોઽપિ પ્રકૃતિશબ્દેન સહ વૃત્તિં પ્રતિપદ્યત ઇતિ । કિઞ્ચાન્યત્ । વાક્યપ્રતિપાદ્યસ્યાર્થસ્ય વૃત્તાવુપલબ્ધેઃ । યત્ર હિ વાક્યપ્રતિપાદ્યોઽર્થો વૃત્ત્યા ન લભ્યતે યથા ઋદ્ધસ્ય રાજ્ઞસ્ય પુરુષઃ ઇતિ તત્ર સવિશેષણાનાં વૃત્તિર્નેતિ વ્યવસ્થિતં શાસ્ત્રે । ગમ્યતે ચેહ વાક્યપ્રતિપાદ્યોઽર્થો વૃત્તાવપિ સત્યામ્ । તસ્માદદોષોઽયમિતિ ।
કિં ચ જ્ઞાપકાત્ । જ્ઞાપકં ખલ્વપિ "કર્મવત્કર્મણા તુલ્યક્રિયઃ" । તથા "અકારસ્ય વિવૃત્તોપદેશ" ઇત્યાદિ । તસ્માન્નાત્રાસૂયા કર્તવ્યેતિ ।
આહ- અવયવસ્ય પ્રત્યવમર્શાનુપપત્તિઃ સંજ્ઞાશબ્દત્વાત્ । સંજ્ઞાશબ્દેષુ હિ નાવયવસ્ય પરામર્શો ભવતિ । તદ્યથા ગજકર્ણોઽશ્વકર્ણઃ । કસ્ય ગજસ્ય કસ્યાશ્વસ્યેતિ ।
ઉચ્યતે ન, અર્થોપપત્તેઃ । યત્ર હ્યર્થ ઉપપદ્યતે ભવત્યેવ તત્ર સંજ્ઞાશબ્દેષ્વવયવપરામર્શઃ । તદ્યથા સપ્તપર્ણાન્યસ્ય પર્વણિ પર્વણિ, અષ્ટૌ પદાન્યસ્ય પઙ્ક્તૌ પઙ્ક્તૌ સપ્તપર્ણોઽષ્ટાપદમિતિ । ઉપપદ્યતે ચેહાયમર્થઃ, તસ્માદદોષોઽયમ્ ।
આહ- મૂલપ્રકૃતિરવિકૃતિઃ, પ્રકૃતિરિતિ વક્તવ્યમ્ । યદાહ મહદાદ્યાઃ પ્રકૃતિવિકૃતયઃ સપ્તેતિ ।
ઉચ્યતે- પ્રકૃતિત્વાવચનમ્ । પ્રકૃતિત્વં ચ મૂલપ્રકૃતેર્ન વક્તવ્યમ્ । કિં કારણમ્ ? અર્થાદાપત્તેઃ । મૂલપ્રકૃતિરવિકૃતિરિત્યેવ સિદ્ધમ્ । ઉચ્યમાનં હિ તદનર્થકં સ્યાત્ ।
આહ- પ્રકૃતિત્વાનુપપત્તિઃ । સત્કાર્યવાદાભ્યુપગમાત્ । પ્રકરોતીતિ પ્રકૃતિઃ, તદ્ભાવઃ પ્રકૃતિત્વમ્ । તચ્ચ સતિ કાર્યે ન ઘટતે । કસ્માત્ ? ન હિ સતામાત્માદીનાં કારણમુપપદ્યત ઇતિ ।
ઉચ્યતે- તદિતરત્રાપિ તુલ્યમ્ । યથૈવ હિ સતામાત્માદીનાં કારણં

નોપપન્નમેવમસતાં શશવિષાણાદીનામપીતિ નાસ્તિ કશ્ચિદ્વિશેષઃ । તૃતીયા તુ વિષાદાવલ્યૈવ કોટિઃ । એવમુભયપક્ષવ્યુદાસાત્સ્વપક્ષસિદ્ધિરિતિ ચેત્ અથાપિ સ્યાત્- સદસતોઃ ક્રિયાસમ્બન્ધં પ્રત્યવિશેષ ઉપદર્શ્યતે ભવતા । તેનોભયોરપિ પક્ષયોર્વ્યુદાસઃ કૃતો ભવતિ । ન ચોભયપક્ષવ્યુદાસાત્સ્વપક્ષસિદ્ધિરિતિ । એતચ્ચાયુક્તમ્ । કસ્માત્ ? ઉત્તરત્ર પ્રતિષેધાત્ । સ ખલ્વેષ વાદી સત્કાર્યવાદં પ્રત્યાચષ્ટે તસ્માત્સ્વક એવૈનમધિકારે નિવર્તયિષ્યામઃ ।
આહ- અવિકૃત્યભિધાનાનર્થક્યમ્ । મૂલપ્રકૃતિત્વાત્તત્સિદ્ધેઃ । યદિ મૂલં સર્વાસાં પ્રકૃતીનામ્ અવિકૃત્યૈવ તયા ભવિતવ્યમ્ । ઇતરથા હિ મૂલપ્રકૃતિત્વાનુપપત્તિઃ । યદિ ખલ્વપિ પ્રધાનસ્યાપિ પ્રકૃત્યન્તરં સ્યાન્મૂલપ્રકૃતિત્વં નોપપન્નં ભવેત્ । તસ્માન્મૂલપ્રકૃતિત્વવચનાદેવ તત્સિદ્ધેરવિકૃતિગ્રહણમનર્થકમિતિ ।
ઉચ્યતે- ન । અનવસ્થાપ્રસંગનિવૃત્ત્યર્થત્વાત્ । યથા હિ મૂલાદીનાં બીજં પ્રકૃતિસ્તસ્યાપ્યન્યત્તસ્યાપ્યન્યદિત્યનવસ્થા એવં મહદાદીનાં પ્રધાનં મૂલપ્રકૃતિઃ તસ્યાપ્યન્યદિત્યનવસ્થા પ્રસજ્યેત । સા મા ભૂદિત્યતસ્તન્નિવૃત્ત્યર્થં તદભિધાનમ્ ।
આહ, ન । હેત્વનુપદેશાત્ । અસંશયમેતદેવં સ્યાત્, ન તુ હેતુરત્રોપદિષ્ટો ભવદ્ભિઃ । ન ચાનુપદિષ્ટહેતુકં વિપશ્ચિદ્ભિઃ પ્રતિપત્તું ન્યાય્યમ્ । તસ્માદયુક્તમેતત્ ।
ઉચ્યતે, કારણાન્તરપ્રતિષેધાત્ । પુરુષાકર્તૃત્વાત્પ્રધાનાખ્યાનાં ગુણાનાં ચાવસ્થાન્તરાનુપપત્તેરવિકૃતિત્વસિદ્ધિઃ । ઇહારભ્યમાણા પ્રકૃતિઃ કારણાન્તરૈરીશ્વરાદિભિરારભ્યતે, પુરુષેણ વા, ગુણૈર્વા । કિઞ્ચાતઃ ? તન્ન તાવત્કારણાન્તરૈરીશ્વરાદિભિરારભ્યતે । કસ્માત્ ? પ્રતિષેધાત્ । યથા કારણાન્તરાણિ ન સન્તિ તથોત્તરત્ર પ્રતિષેધઃ કરિષ્યતે ।
ઇદાનીં સત્ત્વં રજસ્તમઃ પુરુષ ઇતિ પદાર્થચતુષ્ટયં પ્રતિજ્ઞાયતે । તત્રાપિ પુરુષકર્તૃત્વં પ્રત્યાખ્યાયતે । તસ્મિન્પ્રત્યાખ્યાતે ગુણાનામેવાવસ્થાન્તરાપેક્ષઃ કાર્યકારણભાવઃ । સૂક્ષ્માણાં મૂર્તિલાભઃ કાર્યમ્ । નિવૃતવિશેષાણામવિભાગાત્મનાવસ્થાનં કારણમિત્યયં સિદ્ધાન્તઃ । તત્રાસ્તઙ્ગતવિશેષાણાં નિવૃત્તપરિણામવ્યાપારાણામઙ્ગાઙ્ગિભાવમનુપગચ્છતામુપસંહૃતશક્તીનાં સર્વવિકારસામ્યં સર્વશક્તિપ્રલયં નિસ્સત્તાસત્તં નિસ્સદસદવ્યક્તલક્ષણમવસ્થાન્તરમુપસમ્પ્રાપ્તાનાં

નાસ્ત્યન્યત્સૂક્ષ્મતરમવસ્થાન્તરમ્, યસ્યેદં પ્રધાનલક્ષણમવસ્થાન્તરં કાર્યં સ્યાત્ । તસ્માત્સુષ્ઠૂચ્યતે મૂલપ્રકૃતિરવિકૃતિરિતિ ।

॥ મહદાદ્યાઃ પ્રકૃતિવિકૃતયઃ સપ્ત ॥

મહાનાદ્યો યાસાં તા મહદાદ્યાઃ । અવયવેન વિગ્રહઃ, સમુદાયઃ સમાસાર્થઃ । અન્યથા મહાનેવાત્રાપરિગૃહીતઃ સ્યાત્ । પ્રકૃતયશ્ચ વિકૃતયશ્ચ પ્રકૃતિવિકૃતયઃ । કારણાનિ કાર્યાણિ ચેત્યર્થઃ ।
તત્ર મહાનહંકારસ્ય પ્રકૃતિઃ પ્રધાનસ્ય વિકૃતિઃ । અહંકારોઽપિ તન્માત્રેન્દ્રિયપર્વણોઃ પ્રકૃતિર્વિકૃતિર્મહતઃ । તન્માત્રાણિ ચ ભૂતપર્વણઃ પ્રકૃતિરહંકારસ્ય વિકૃતિઃ ।
આહ- સપ્તગ્રહણં કિમર્થમ્ ?
ઉચ્યતે- સપ્તગ્રહણમવધિપરિચ્છેદાર્થમ્ । અક્રિયમાણે હિ સપ્તગ્રહણે ન જ્ઞાયતે ક્રિયાન્પ્રકૃતિગણઃ પ્રકૃતિવિકૃતિસંજ્ઞો ભવતિ । તત્ર મહાભૂતેન્દ્રિયપર્વણોરપિ પ્રકૃતિત્વં પ્રસજ્યેત ।
આહ- નૈતદસ્તિ પ્રયોજનમ્ । પરિશેષસિદ્ધેઃ । ઇહ ભવતાં પઞ્ચશિખાનાં પઞ્ચવિંશતિસ્તત્ત્વાનિ । તત્ર મૂલપ્રકૃતિરવિકૃતિરિત્યુક્તમ્, ષોડશકસ્તુ વિકારો ન પ્રકૃતિર્ન વિકૃતિઃ પુરુષ ઇતિ વક્ષ્યતિ । પરિશેષતઃ સપ્તૈવાવશિષ્યન્તે । તસ્માન્નાર્થસ્તદર્થેન સપ્તગ્રહણેન ।
ઉચ્યતે- અહંકારપરિગ્રહાર્થમ્ । એવં તર્હિ નૈવાહંકારો વિદ્યત ઇતિ પતઞ્જલિઃ । મહતોઽસ્મિ પ્રત્યયરૂપત્વાભ્યુપગમાત્ । તત્પરિહારાર્થમેતદ્ ભવિષ્યતિ ।
આહ, ન । ઉત્તરત્ર પરિગ્રહાત્ । એતદસ્તિ નાસ્તિ પ્રયોજનમ્ । વક્ષ્યતિ હિ મહતા કણ્ઠેનોપરિષ્ટાદાચાર્યઃ "પ્રકૃતેર્મહાંસ્તતોઽહઙ્કાર" (kA0 22) ઇતિ તેનૈવેદં સિદ્ધમ્ । નાર્થસ્તદર્થેનાપિ સપ્તગ્રહણેન ।
ઉચ્યતે- રૂપભેદેઽપિ તત્ત્વાભેદજ્ઞાપનાર્થમ્ । એવં તર્હિ ધર્માદીન્યષ્ટૌ રૂપાણિ બુદ્ધેર્વક્ષ્યમાણાનિ, અહંકારશ્ચ વૈકારિકતૈજસભૂતાદિરૂપત્વાત્ ત્રિલક્ષણો વક્ષ્યમાણઃ । તત્ર રૂપભેદાત્તત્ત્વભેદો મા ભૂદિત્યેવમર્થં સપ્તગ્રહણં ક્રિયતે ।
આહ, હેતુમન્તરેણાપ્રતિપત્તેઃ । કણ્ઠોક્તમપિ યુક્તિમન્તરેણ ન તર્કશીલાઃ પ્રતિપદ્યન્તે કિમ્પુનઃ ક્લેશોપપાદિતમ્ । તસ્માદત્ર સમાધિર્વાચ્યઃ કથમનેકરૂપા બુદ્ધિરેકૈવેતિ ?
ઉચ્યતે ન, ઉત્તરત્ર વિચારણાત્ । ઉત્તરત્રૈતદ્વિચારયિષ્યામઃ

કિમનેકરૂપાવિર્ભાવેઽપિ તદેવ તદ્વસ્તુ ભવતિ આહોસ્વિદ્રૂપભેદાત્તત્ત્વભેદઃ ? તસ્માદિહ તાવદ્દૃશ્યતામિતિ સિદ્ધં મહદાદ્યાઃ પ્રકૃતિવિકૃતયઃ સપ્તેતિ ।

॥ ષોડશકસ્તુ વિકારઃ ॥

ષોડશપરિમાણસ્ય સોઽયં ષોડશકઃ સંઘઃ । તસ્ય પરિમાણં સંખ્યાયાઃ સંજ્ઞાસંઘસૂત્રાધ્યયનેષ્વિતિ કન્પ્રત્યયઃ ।
આહ- કઃ પુનરયં ષોડશક ઇતિ ?
ઉચ્યતે - પઞ્ચ મહાભૂતાનિ, એકાદશેન્દ્રિયાણિ ।
તુશબ્દોઽવધારણાર્થઃ ।
આહ- શક્યઃ પુનરયમર્થોઽન્તરેણાપિ તુશબ્દમવાપ્તુમ્ । કથમ્ ? મહદાદ્યાઃ પ્રકૃતિવિકૃતયઃ સપ્તેતિ હ્યુપદિષ્ટં પુરસ્તાત્ । તતોઽહઙ્કારતમાત્રપૂર્વકત્વે સિદ્ધે સતિ ઇન્દ્રિયમહાભૂતપર્વણોઃ પુનઃ શ્રુતેર્નિયમો ભવિષ્યતિ । તદ્યથા પઞ્ચ પઞ્ચનખા ભક્ષ્યા ઇત્યત્ર ક્ષુત્પ્રતીકારસમર્થાનાં દ્રવ્યાણામર્થાદેવ સર્વેષાં ભક્ષણે સમ્પ્રાપ્તે પુનઃ શ્રુતેર્નિયમો ભવતિ, તદ્વદિદં દ્રષ્ટવ્યમ્ । ઇષ્ટતોઽવધારણાર્થં ઇતિ ચેત્ સ્યાન્મતમ્ । ઇષ્ટતોઽવધારણાર્થસ્તર્હિ તુશબ્દો ભવિષ્યતિ । કથં નામ ષોડશકો વિકાર એવેતિ યથા વિજ્ઞાયતે, ષોડશકસ્તુ વિકાર ઇત્યેવં મા જ્ઞાયીતિ । યદ્યેવમસ્થાને તર્હિ તુશબ્દઃ પઠિતઃ । ષોડશકો વિકારસ્ત્વિવતિ વક્તવ્યમ્ । અથ મતં વૃત્તપરિપૂરનાર્થમયમસ્મિન્પ્રદેશે પઠિતસ્તુશબ્દો યત્ર નિર્દોષસ્તત્રૈવાયં દ્રષ્ટવ્ય ઇતિ । એતદનુપપન્નમ્ । કસ્માત્ ? અસન્દેહાત્ । મહદાદ્યાઃ પ્રકૃતિવિકૃતયઃ સપ્તેત્યપદિષ્ટે કિમિતિ સાંશયિકા ભવિષ્યામઃ । તસ્માત્પેલવમસ્ય પાઠે પ્રયોજનં પશ્યામઃ । અથાયમભિપ્રાયઃ સ્યાત્ યદ્યપ્યેતદર્થતઃ સિદ્ધં તથાપ્યયમાચાર્યઃ સ્ફુટપ્રતિપત્ત્યર્થમવધારણં પ્રત્યાદ્રિયતે । કિં કારણમ્ ? યસ્માત્ વિચિત્રાઃ સૂત્રકારાણામભિપ્રાયગતયઃ । તદ્યથા ભગવાન્ પાણિનિઃ ન ક્યે, રાત્સસ્યેત્યેવમાદિષ્વન્તરેણ પ્રયત્નમિષ્ટતોઽવધારણે સિદ્ધે અન્યત્ર અજાદી ગુણવચનાદેવ સ્તૌતિણ્યોરેવ ષણ્યભાસાદિત્યેવમાદિષુ યત્નં કરોતિ । તદ્વદિહાપિ દ્રષ્ટવ્યમિતિ । એતદનુપપન્નમ્ । કસ્માત્ ? અશક્યત્વાત્ । સતિ વા પુનરવધારણાર્થત્વે તુશબ્દસ્ય કથમિવાત્ર શક્યમવધારણં પ્રતિપત્તુમ્ ? યાવતા મહાભૂતાનામપિ શરીરાદિલક્ષણં કાર્યમુપલભ્યત ઇતિ । તત્ર કેચિત્ સમાધિમાહુઃ ।

શરીરાદીનામનર્થાન્તરભાવાત્પૃથિવ્યાદીનામપ્રકૃતિત્વમ્ ।
યસ્માત્ કિલ પૃથિવ્યાદીનાં સન્નિવેશવિશેષમાત્રં કાર્યં
મુષ્ટિગ્રન્થિકુણ્ડલાદિવન્નાર્થાન્તરભૂતમ્ । અત એષામપ્રકૃતિત્વમિતિ ।
એતચ્ચાનુપપન્નમ્ । કસ્માત્ ? અવિશેષાત્ । સર્વમેવ હિ સાંખ્યાનાં
કાર્યમનર્થાન્તરભૂતમ્ । તત્રૈતસ્યાં કલ્પનાયાં સર્વતત્ત્વાનામપ્રકૃતિત્વં
પ્રસજ્યેત । અથૈતદનિષ્ટં, સત્કાર્યવ્યાઘાતઃ । અન્યે પુનરાહુઃ-
અપરિણામિત્વાન્મહાભૂતાનાં વિઅકરિત્વાનવધારણમિતિ । તદપ્યનુપપન્નમ્ ।
કસ્માત્ ? પ્રત્યક્ષોપલબ્ધેઃ । પ્રત્યક્ષત એવોપલભ્યતે મહાભૂતાનાં
કલિલાઙ્કુરક્ષીરાદિપરિણામઃ । અનુમાનગ્રાહ્યસ્તુ તત્ત્વાન્તરાણામ્ ।
તદેતદધરોત્તરં ભવતિ । તસ્માદયુક્તમેતત્ ।
આહ - ન તર્હિ ઇદં પ્રતિપત્તવ્યં ષોડશકો વિકાર એવેતિ ?
ઉચ્યતે- પ્રતિપત્તવ્યમ્ । કિં કારણમ્ । તત્ત્વાન્તરાનુપપત્તેઃ । ઇહ
પુરુષાર્થેન હેતુના સામ્યાત્પ્રચ્યુતાનાં ગુણાનાં યોઽયં મહદાદિર્વિશેષાન્તો
વિપરિણામઃ સ તત્ત્વાન્તરોત્પત્તિનિયમેન વ્યવતિષ્ઠતે । ન તુ
પૃથિવ્યાદિભ્યસ્તત્ત્વાન્તરોત્પત્તિરસ્તિ । તસ્માદેતેષાં વિકારત્વમેવેતિ ।
કિં ચાન્યત્ । ગ્રાહકાન્તરાભાવાત્ । યથા તન્માત્રૈરારબ્ધેષુ
પૃથિવ્યાદિષુ અહંકારાત્તદ્યોગ્યં ગ્રાહકાન્તરમિન્દ્રિયલક્ષણમુત્પદ્યતે,
નૈવં પૃથિવ્યાદિવિકારાણાં ઘટાદીનાં ગ્રાહકાન્તરમસ્તિ । તસ્માન્ન
તત્ત્વાન્તરમ્ । અતશ્ચ પૃથિવ્યાદયો વિકારા એવેતિ । કિં ચાન્યત્ ।
પ્રધાને પ્રકૃતિભાવપ્રત્યસ્તમયવત્તેષુ વિકારભાવપ્રત્યસ્તમયાત્ ।
યથા પ્રધાનાત્સૂક્ષ્મતરમવસ્થાન્તરં નાસ્તીતિ તત્ર પ્રકૃતિભાવસ્ય
પ્રત્યસ્તમયસ્તથા તેષુ વિકારભાવપ્રત્યસ્તમયઃ । તસ્માદ્યુક્તમુચ્યતે
ષોડશકોઽયં વિકાર એવેતિ ।
આહ- પુરુષે તર્હિ કા પ્રતિપત્તિરિતિ ?
ઉચ્યતે-

॥ ન પ્રકૃતિર્ન વિકૃતિઃ પુરુષઃ ॥ ૩ ॥

પુરુષો ન હ્યયમવસ્થાન્તરં પ્રતિપદ્યતે । નો
ખલ્વપ્યવસ્થાન્તરસ્યાવસ્થાન્તરં ભવતીતિ ।
આહ- નૈતદ્યુક્તિમન્તરેણ શ્રદ્ધીયતે, તસ્માદુપપાદ્યતાં
કથમસ્યાપ્રકૃતિત્વમવિકૃતિત્વં ચેતિ ।
ઉચ્યતે- પ્રકૃતિત્વાનુપપત્તિઃ । ઉત્તરત્ર પ્રતિવિધાનાત્ । તસ્માચ્ચ

વિપર્યાસાદિત્યત્ર (kA0 19) યુક્તિમુપદેક્ષ્યામઃ । તસ્માત્તાવદસ્યાપ્રકૃતિત્વમ્ ।
અવિકૃતિત્વં પ્રધાનવત્ । યથા પ્રધાનમેવમયમપિ પુરુષઃ
ક્રિયમાણઃ કારણાન્તરૈરીશ્વરાદિભિર્નારભ્યતે । કસ્માત્ ? પ્રતિષેધાત્ ।
યથા કારણાન્તરાણિ ન સન્તિ તથોત્તરત્ર પ્રતિષેધઃ કરિષ્યતે ।
પુરુષાન્તરૈઃ સમત્વાત્ । સમાઃ સર્વે પુરુષાઃ । ન ચ સમાનાં
કાર્યકારણભાવો દૃષ્ટઃ । કિં ચ નિષ્ક્રિયત્વાત્ શુદ્ધત્વાચ્ચૈષાં
વિપરિણામલક્ષણા પરિસ્પન્દલક્ષણા વા ક્રિયા વિભુત્વાદનુપપન્ના । કસ્માત્
? એષામિતરેતરાનારમ્ભકત્વાત્ । ન ગુણૈર્ભિન્નજાતીયકત્વાત્ । ઇહાચેતના ગુણા
ઇત્યેતત્પ્રતિપાદયિષ્યામઃ । યચ્ચ યેનારભ્યતે તચ્ચ તન્મયં ભવતિ ।
યદિ ગુણૈઃ પુરુષાણામારમ્ભઃ તદા તેષામપ્યચેતનત્વં સ્યાત્, ચેતનાસ્તુ
તે । તસ્માન્ન ગુણૈરારભ્યન્ત ઇતિ સિદ્ધમેતત્ ।
કિંચિત્કારણમેવ ન કાર્યમ્ । કિંચિત્કારણં કાર્યં ચ । કિંચિત્કાર્યમેવ ।
કિંચિન્નૈવ કારણં નૈવ કાર્યમિતિ ચતુર્વિધં કારણવૃત્તં પ્રતિપાદિતમ્ ।
એતેત્પ્રતિજ્ઞાપિણ્ડસૂત્રમ્ । અત્ર યદપદિષ્ટં ભવદ્ભિરસ્મિન્ શાસ્ત્રે
પ્રમેયમિત્યવગન્તવ્યમ્ ॥ ૩॥

---

કારિકા ૪

———————-

આહ- અથાસ્ય પ્રમેયસ્ય કુતઃ સિદ્ધિરિતિ ?
ઉચ્યતે-

॥ પ્રમેયસિદ્ધિઃ પ્રમાણાદ્ધિ ॥

પ્રમીયતે તદિતિ પ્રમેયમ્ । પ્રમેયસ્ય સિદ્ધિઃ પ્રમેયસિદ્ધિઃ ।
સિદ્ધિરધિગમોઽવબોધ ઇત્યર્થઃ । પ્રમીયતેઽનેનેતિ પ્રમાણમ્ । કરણસાધનો
લ્યુટ્ । તદેકમેવ, બુદ્ધેરેકત્વાભ્યુપગમાત્; ઉપાધિવશાત્તુ ભિન્નમાશ્રીયતે
પ્રત્યક્ષમનુમાનમિત્યાદિ । તસ્ય યોઽસાવુપાધિકૃતો ભેદસ્તમનાશ્રિત્ય
પ્રમેયપરિચ્છેદકત્વસામાન્યમઙ્ગીકૃત્યૈકવચનનિર્દેશઃ ક્રિયતે
પ્રમાણાદિતિ । એતસ્માત્પ્રમેયસિદ્ધિરિત્યવગન્તવ્યમ્ । કથમ્ ? વ્રીહ્યાદિવત્ ।
યથા વ્રીહ્યાતિ પ્રમેયં પ્રસ્થાદિના પ્રમાણેન પરિચ્છિદ્યતે એવમિહાપિ
વ્યક્તાદિપ્રમેયં પ્રત્યક્ષાદિપ્રમાણેન પરિચ્છિદ્યતે ઇતિ ।
ઇહ હિશબ્દ ઇદાનીં કિમર્થઃ સ્યાત્ ?

અવધારણાર્થ ઇતિ ।

આહ- યદ્યેવં હિશબ્દાવચનમ્ । અવધારણાનુપપત્તેઃ । ન હ્યેતસ્મિન્ સૂત્રે કથંચિદવધારણમુપપદ્યતે । તસ્માદવચનમેવ હિશબ્દસ્ય ન્યાય્યમ્ । પ્રમેયસ્યૈવેતિ ચેત્- ન । અન્યસ્યાસમ્ભવાત્ । સતિ હિ વ્યભિચારસમ્ભવે વસ્ત્વવધાર્યતે - તદ્યથા ગૌરેવાયં નાશ્વઃ, દેવદત્ત એવાયં ન યજ્ઞદત્ત ઇતિ । ન ચ પ્રમેયાપ્રમેયયોઃ પ્રમાણપરિચ્છેદ્યત્વેઽસ્તિ પ્રસંગઃ યન્નિવૃત્ત્યર્થં પ્રમેયસ્યૈવેત્યવધાર્યતે । પ્રમાણેભ્ય એવેતિ ચેન્ન- આર્ષજ્ઞાનવિરોધપ્રસંગાત્ । પરમર્ષેર્હિ ભગવતઃ જ્ઞાનં સાંસિદ્ધિકમપ્રમાણપૂર્વકમિતિ વઃ પક્ષઃ । સાંસિદ્ધિકાશ્ચ ભાવાઃ પ્રાકૃતિકા વૈકૃતાશ્ચ ધર્માદ્યા (kA0 43) ઇતિ વચનાત્ । ઉભયાવધારણે સતિ ઉભયોરપિ પક્ષયોર્યે દોષાસ્તે પ્રસજ્યન્તે । તસ્માદયુક્તમેતત્ । સિદ્ધિરેવેતિ ચેન્ન અનેકાન્તાત્ । કદાચિદ્ધ્યયં પ્રમાતા સન્નિહિતેઽપ્યાદિત્યાદૌ લિઙ્ગે દિઙ્નિશ્ચયાદિષ્વર્થેષુ પ્રતિહન્યતે । તસ્માદનેકાન્તાત્ સિદ્ધિરેવેત્યેતદયુક્તમવધારણમ્ ।

ઉચ્યતે- યદુક્તં હિશબ્દાવચનમવધારણાનુપપત્તેરિતિ અસ્તુ પ્રમાણેભ્ય એવેત્યવધારણમ્ । યત્તૂક્તમાર્ષજ્ઞાનવિરોધપ્રસંગ ઇતિ અયમદોષઃ । કસ્માત્ ? સિદ્ધરૂપત્વાત્ । સાધ્યમાનરૂપાણિ હિ વસ્તૂનિ નાન્તરીયકત્વાત્ સ્વરૂપનિષ્પત્તયે સાધનસમ્બન્ધં પ્રત્યાકાંક્ષાવન્તિ ભવન્તિ, સિદ્ધરૂપં તુ ભગવતઃ પરમર્ષેર્જ્ઞાનમ્ । તસ્માદસ્ય સાધનસમ્બન્ધં પ્રત્યાકાઙ્ક્ષા નોપપદ્યત ઇતિ । અથવા પુનરસ્તુ સિદ્ધિરેવેત્યવધારણમ્ । યત્તૂક્તમનેકાન્તાદિતિ તદનુપપન્નમ્ । કસ્માત્ ? સત્ત્વાદીનામઙ્ગાઙ્ગિભાવાનિયમાત્ । તમઃપ્રકર્ષસામગ્ર્યાત્પ્રમાણવૈકલ્યોપપત્તેઃ । ઇહ સત્ત્વાદીનામનિયતોઽઙ્ગાઙ્ગિભાવઃ । દેશકાલનિમિત્તસામર્થ્યાદ્ધિ કદાચિત્સત્ત્વં પ્રકૃષ્યતે, કદાચિદ્રજઃ, કદાચિત્તમઃ । સત્ત્વપ્રકર્ષશ્ચ પ્રકાશરૂપત્વાત્પ્રમાણમ્ । તત્ર યદા તમઃ પ્રકૃષ્યતે તદા તેનાભિભૂતત્વાત્ સત્ત્વસ્ય તત્કાર્યમનુમાનં ત્રિકાલાઙ્ગમુત્તિષ્ઠતે । ઇત્યતઃ સત્યામપ્યાદિત્યાદિલિઙ્ગપ્રવૃત્તૌ દિઙ્નિશ્ચયાદિષ્વર્થેષુ પ્રતિહન્યતે । ઇતરથા તુ ન સ્વરૂપહાનમ્ । યસ્ય તુ નિષ્પત્તિવૈકલ્યાત્પ્રમાણપ્રતિબન્ધો નેષ્ટઃ તસ્ય સ્વરૂપહાનં પ્રમાણાનાં પ્રાપ્તમ્ । કથમ્ ? એતાવદ્ધિ તેષાં સ્વરૂપં યદુત પ્રમેયપરિચ્છેદઃ । તસ્માદ્યુક્તમેતદવધારણાર્થો હિશબ્દઃ ।

આહ- બહૂનિ પ્રમાણાન્યાચાર્યૈરભ્યુપગમ્યન્તે તાનિ સર્વાણિ કિં ભવાનનુમન્યતે ?
ઉચ્યતે-

॥ ત્રિવિધં પ્રમાણમિષ્ટમ્ ॥

કિન્તર્હિ વિધાનં વિધા, તિસ્રો વિધા અસ્ય તત્ત્રિવિધં ત્રિપ્રકારમિત્યર્થઃ । અનેનૈતદાચષ્ટે- એકમેવ બુદ્ધિલક્ષણં સત્ત્વં નિમિત્તાન્તરાનુગ્રહોપજનિતાભિઃ કાર્યવિશેષપરિચ્છિન્નરૂપભેદાભિઃ શક્તિભિરુપકારાદ્ભિન્નમિવ પ્રત્યવભાસમાનં દૃષ્ટાદિશબ્દવાચ્યં ભવતિ । ન તુ યથા તન્ત્રાન્તરીયાણાં વિષયોપનિપાતિભિરિન્દ્રિયૈરુપજનિતાવધ્યો બુદ્ધયસ્તથેહ વિદ્યન્તે યાઃ પરિકલ્પ્યમાનાઃ સ્વતન્ત્રાણિ ત્રીણિ પ્રમાણાનિ સ્યુઃ ।
સ્યાન્મતમ્, કથં પુનઃ પ્રમાણલક્ષણાનાં શક્તીનામકવસ્તુસન્નિવેશરૂપભેદા ભવન્તીતિ ?
ઉચ્યતે- સત્ત્વાદિવત્ । યથા સત્ત્વાદીનાં ગુણાનામેકશબ્દાદિવસ્તુસન્નિવેશેઽપિ પ્રકાશાદિકાર્યભેદાદ્રૂપસંકરો ન ભવતિ, યથા વા શબ્દસ્પર્શરૂપરસગન્ધાનામેકદ્રવ્યસન્નિવેશેઽપિ ગ્રાહકાન્તરગમ્યકત્વાત્, યથા વા કર્તૃકરણાધિકરણસમ્પ્રદાનાપાદાનકર્મલક્ષણાનાં શક્તીનામેકદ્રવ્યસન્નિવેશેઽપિ કાર્યવિશેષપરિચ્છિન્નાનિ સ્વરૂપાણિ ન સંકીર્યન્તે, તદ્વદિદં દ્રષ્ટવ્યમ્ । શક્ત્યન્તરોપજનને વસ્ત્વન્તરોપપત્તિરિતિ ચેન્ન, અનભ્યુપગમાત્ । ન હિ ક્ષણભઙ્ગસાહસં યુક્તિમન્તરેણ દણ્ડભયાદપિ પ્રતિપદ્યામહે, ન તુ તસ્યામવસર ઇતિ સ્થીયતાં તાવત્ ।
આહ, કથં પુનરેતદ્ ગમ્યતે યથા ત્રિવિધમેવ પ્રમાણં ન પુનરનેકવિધમપીતિ ?
ઉચ્યતે-

॥ સર્વપ્રમાણસિદ્ધત્વાત્ ॥

સર્વાણિ ચ તાનિ પ્રમાણાનિ સર્વપ્રમાણાનિ । સિદ્ધસ્ય ભાવઃ સિદ્ધત્વમ્ । સર્વપ્રમાણાનાં સિદ્ધત્વં સર્વપ્રમાણસિદ્ધત્વમ્ । સિદ્ધત્વમન્તર્ભાવ ઇત્યર્થઃ । તસ્માત્ સર્વપ્રમાણસિદ્ધત્વાત્ । તસ્મિન્નેવ ત્રિવિધે પ્રમાણ ઇતિ વાક્યશેષઃ । સર્વેષાં પરપરિકલ્પિતાનાં પ્રમાણાનામસ્મિન્નેવ

ત્રિવિધે પ્રમાણેઽન્તર્ભાવાદિતિ યાવદુક્તં સ્યાત્તાવદિદમુચ્યતે
સર્વપ્રમાણસિદ્ધત્વાદિતિ । અથવા સર્વપ્રમાણેષુ સિદ્ધં
સર્વપ્રમાણસિદ્ધં- સપ્તમી સિદ્ધશુષ્કપક્વબન્ધૈરિતિ સમાસઃ, યથા
સાંકાશ્યસિદ્ધઃ પાટલિપુત્રસિદ્ધ ઇતિ । તદ્ભાવઃ પ્રમાણસિદ્ધત્વં તસ્માત્
સર્વપ્રમાણસિદ્ધત્વાત્ । કસ્ય ત્રિવિધસ્ય પ્રમાણસ્યેતિ વાક્યશેષઃ ।
કેન પુનરાકારેણ ત્રિવિધં પ્રમાણં સિદ્ધમિતિ ?
ઉચ્યતે- પરસ્પરવિશેષાત્ । અન્યાનિ પુનરસ્માત્ ત્રયાત્ યથાઽભિન્નાનિ
તથા પ્રતિપાદયિષ્યામઃ ।
આહ, કિમ્પુનસ્તત્ ત્રિવિધં પ્રમાણમિતિ ?
ઉચ્યતે-

॥ દૃષ્ટમનુમાનમાપ્તવચનં ચ ॥

ઇતિ । તત્ર દૃષ્ટં નામ ઉપાત્તવિષયેન્દ્રિયવૃત્ત્યુપનિપાતી
યોઽધ્યવસાયઃ । અનુમાનં દ્વયોરવિનાભાવિનોરેકં પ્રત્યક્ષેણ પ્રમાય
તત્પૂર્વકં સમ્બન્ધન્તરે યત્ પશ્ચાન્માનં ભવતિ । આપ્તવચનં તુ
પ્રમાણભૂતદ્વારકોઽત્યન્તપરોક્ષેઽર્થે નિશ્ચયઃ । ઇત્યુદ્દેશમાત્રમિદમ્ ।
મૂલલક્ષણં તુ આચાર્યો વક્ષ્યતિ સ્વયમેવ પ્રતિવિષયાધ્યવસાયો
દૃષ્ટમિત્યાદિ ।
આહ, ત્રૈવિધ્યાનુપપત્તિઃ, ન્યૂનાધિકશ્રવણાત્ । તન્ત્રાન્તરીયાઃ કેચિત્ ચત્વારિ
પ્રમાણાનીચ્છન્તિ । પ્રત્યક્ષાનુમાનોપમાનશબ્દાઃ પ્રમાણાનીતિ વચનાત્ ।
તથા ષડિત્યન્યે ।
પ્રત્યક્ષમનુમાનં ચ શબ્દં ચોપમયા સહ ।
અર્થાપત્તિરભાવશ્ચ હેતવઃ સધ્યસાધકાઃ ॥

ઇત્યભિધાનાત્ । એતાનિ સમ્ભવૈતિહ્યચેષ્ટાસહિતાનિ નવેત્યપરે ।
પ્રત્યક્ષાનુમાને એવેતિ વૈશેષિકબૌદ્ધાઃ । તત્ર કથમિદં નિશ્ચીયતે
ત્રિવિધમેવ પ્રમાણં, ન પુનર્ન્યૂનમધિકં વેતિ ?
ઉચ્યતે- કિમ્પુનરિદમુપમાનં નામ ?
આહ, પ્રસિદ્ધસાધર્મ્યાત્ સાધ્યસાધનમુપમાનમ્ । પ્રસિદ્ધઃ પ્રજ્ઞાતઃ,
તેન સાધર્મ્યાત્, સાધ્યસ્યાપ્રસિદ્ધસ્ય સાધનમધિગમો યસ્તદુપમાનમ્ ।
અવબોધવિધિસ્તુ યેનાનુપલબ્ધો ગવયઃ સ તસ્યોપલબ્ધ્યર્થમધિગતગવયં
પર્યનુયુઙ્ક્તે કિંરૂપો ગવય ઇતિ । સ તસ્મા આચષ્ટે- યથા ગૌરેવં
ગવય ઇતિ । તત્ર પ્રતિપત્ત્યાઽત્યન્તાનુપલક્ષિતગવયસ્વરૂપો

વ્યાખ્યાતૃપ્રતિપાદિતપ્રસિદ્ધવસ્તુસાધર્મ્યજ્ઞાનાહિતસંસ્કારઃ
પ્રતિપદ્યતે- નૂનમેવંરૂપો ગવય ઇતિ । અપર આહ-
પ્રતિરાપ્તવચનોપજનિતપ્રસિદ્ધવસ્તુસાધર્મ્યજ્ઞાનાહિતસંસ્કારસ્યોત્તરકાલં
પ્રત્યક્ષેણ તમુપલભ્ય યા સમાખ્યાસમ્બન્ધપ્રતિપત્તિઃ- અયમસાવર્થોઽસ્ય
શબ્દસ્ય સમાખ્યા ઇતિ- તદુપમાનમુચ્યતે ।
યદ્યેવમુપમૈતિહ્યાવચનમ્, આપ્તોપદેશસિદ્ધેઃ । યથા ગૌરેવં ગવય
ઇતિ ચાપ્તોપદેશબલાત્ પ્રતિપત્તા અપ્રસિદ્ધં ગવયમુપલભતે ન
સાધર્મ્યમાત્રાત્ । તસ્માન્ન શબ્દાત્ પૃથગુપમા । યત્તુ ખલ્વિતિ હ
ઉવાચ યાજ્ઞવલ્ક્યસ્ય ઇત્યેતદૈતિહ્યં નામ પ્રમાણાન્તરમુપકલ્પ્યતે તદપિ
વક્તૃવિશેષાપેક્ષત્વાન્ન શબ્દાદર્થાન્તરમ્ ।
આહ, ન । સાધર્મ્યાપેક્ષત્વાત્ । યદિ હ્યાપ્તોપદેશ ઉપમા સ્યાત્તેન યથા
સ્વર્ગેઽપ્સરસઃ, ઉત્તરાઃ કુરવ ઇત્યેવમાદિષ્વન્તરેણ સાધર્મ્યોપાદાનં
પ્રતિપત્તિર્ભવતિ એવમિહાપિ સ્યાત્ । ગવયન્તુ અયમાખ્યાતા પ્રતિપાદયિષ્યન્
પ્રસિદ્ધસાધર્મ્યગર્ભં શબ્દમુપાદત્તે ન કેવલમ્ । પ્રતિપત્તાપિ તસ્માદેવ
પ્રતિપદ્યતે ન શબ્દમાત્રાત્, તસ્માત્પૃથગેવાસ્યોપદેશઃ કર્તવ્યઃ ।
શબ્દવ્યાપારાત્તદન્તર્ભાવ ઇતિ ચેત્ સ્યાન્મતમ્ શબ્દવ્યાપારસહિતોઽયં
પ્રસિદ્ધસાધર્મ્યલક્ષણાર્થો ગવયપ્રતિપત્તૌ ન કેવલઃ, તસ્માદસ્ય
તત્રાન્તર્ભાવ ઇતિ તદપ્યનુપપન્નમ્ । કસ્માત્ ? વીતાવીતયોરપિ
તત્પ્રસઙ્ગાત્ । વીતાવીતાવપિ હેતૂ પરપ્રતિપાદનાર્થમુપાદીયમાનૌ
શબ્દવ્યાપારમપેક્ષેતે । તયોરપ્યાપ્તવચનત્વપ્રસંગઃ । અનિષ્ટં ચૈતત્ ।
તસ્માન્નોપમાનમાપ્તોપદેશઃ ।
ઉચ્યતે, સાધર્મ્યાવ્યતિરેક, ઉપાયભૂતત્વાત્ ।
આખ્યાતૃપ્રામાણ્યાદેવ પ્રતિપત્તુર્ગવયવિજ્ઞાનમુપપદ્યતે । સ તુ
કૌશલાદ્દુરુપપાદોઽયમર્થ ઇતિ કૃત્વા પ્રસિદ્ધસાધર્મ્યમુપાદત્તે ।
તસ્માદાખ્યાતુર્ગવયપ્રતિપાદનાર્થમુપાયભૂતં સાધર્મ્યમુપાદદાનસ્ય
શબ્દાદર્થાન્તરમુદ્ભવતિ । અથૈવંજાતીયકાનામપિ
પ્રમાણાન્તરત્વમિષ્યતે તેનાત્યલ્પમિદમુચ્યતે ચત્વારિ પ્રમાણાનીતિ । કિં
તર્હિ પાણિવિહારાક્ષિનિકોચપ્રભૃતીનામપ્યુપસંખ્યાનં કર્તવ્યમ્ । કિંચ
વક્તૃવિશેષાપેક્ષત્વાત્ । યત્ર હ્યર્થવશાત્પ્રતિપત્તિરુત્પદ્યતે ન તત્ર
પ્રતિપત્તા વક્તૃવિશેષમપેક્ષતે દૃષ્ટાર્થોઽયમદૃષ્ટાર્થોઽયમિતિ ।
તદ્યથાઽનુમાને । અસ્તિ ચોપમાને વક્તૃવિશેષાપેક્ષા ।
તસ્માન્ન શબ્દાદર્થાન્તરં તત્ । અવશ્યં ચૈતદેવં વિજ્ઞેયમ્ ।

યો હિ મન્યતે પ્રસિદ્ધસાધર્મ્યાદેવ ગવયપ્રતિપત્તિરિતિ
યથાશ્વસ્તથા ગવય ઇત્યેતસ્માદપિ તસ્ય સમ્પ્રતિપત્તિઃ સ્યાત્ ।
ન ચાર્હતિ ભવિતું, મિથ્યાજ્ઞાનત્વાત્ । યત્તુ ખલ્વિદમુચ્યતે યતઃ
સમાખ્યાસમ્બન્ધપ્રતિપત્તિરિતિ તદુપમાનમિતિ । એતદનુપપન્નમ્ । કસ્માત્
? અનવસ્થાપ્રસંગાત્ । તદ્યથા બહુષુ નિષણ્ણેષુ કોઽત્ર દેવદત્ત
ઇત્યુક્તે યો મુકુટી કુંડલી વ્યૂઢોરસ્કસ્તામ્રાયતાક્ષ ઇતિ પ્રત્યાહ । તતશ્ચ
સમાખ્યાસમ્બન્ધપ્રતિપત્તિરિતિ પ્રમાણાન્તરત્વપ્રસઙ્ગ ઇત્યેવમનવસ્થા
પ્રમાણાનાં સ્યાત્ । અનિષ્ટં ચૈતત્ । એવં હિ ન તાવત્ પરત ઉપમાનં
પ્રમાણાન્તરમ્ । યદા સ્વયમેવ ગાં ગવયં ચોપલભ્ય વિકલ્પયતિ યથાઽયં
તથાઽયમિતિ તદા તસ્યાર્થસ્ય પ્રમાણાન્તરેણાધિગતત્વાત્ પ્રમાણમેવ તન્ન
ભવતીતિ । તસ્માત્ સુષ્ઠૂક્તમયમૈતિહ્યાપ્તવચનમાપ્તોપદેશાત્ સિદ્ધેરિતિ ।
કિઞ્ચાન્યત્- અર્થાપત્તિસંભવાભાવચેષ્ટાનામનુમાનસિદ્ધેઃ ।
અવચનમિત્યનુવર્તતે । તત્રાર્થાપત્તિર્નામ
યત્રાર્થયોઃ પૂર્વમવ્યભિચારમુપલભ્ય પશ્ચાદન્યતરસ્ય
દર્શનાચ્છ્રવણાદ્વાન્યતરસ્મિપ્રતિપત્તિર્ભવતિ । દર્શનાદ્યથા ગુડમુપલભ્ય
માધુર્યમિન્દ્રિયાન્તરવિષયં પ્રતિપદ્યતે । શ્રવણાદ્યથા ગુડશબ્દં
શ્રુત્વા માધુર્યમશબ્દકં પ્રતિપદ્યત ઇતિ । અપરા ખલ્વાર્થાપત્તિઃ । યત્ર
ધર્મયોરવ્યભિચારમુપલભ્ય તત્પ્રતિદ્વન્દ્વિનોરપિ સાહચર્યકલ્પના ।
સા તુ દ્વિવિધા, વ્યભિચારિણી ચાવ્યભિચારિણી ચ । તત્ર વ્યભિચારિણી
યથા સાવયવમનિત્યમિત્યુક્તેઽર્થાદાપન્નં નિરવયવં નિત્યમિતિ । તચ્ચ
કર્માદિષ્વદૃષ્ટમિત્યેષાઽનૈકાન્તિકત્વાત્પ્રમાણમેવ ન ભવતીતિ ।
યા ત્વવિનાભાવિની અવ્યભિચારિણી યથા કેસરિવરાહયોરુપગહ્વરે
સન્નિપાતમુપલભ્યોત્તરકાલં કેવલં કેસરિણં વરાહવ્રણાંકિતશરીરં
પ્રયાન્તમુપલભ્ય પ્રતિપદ્યતે જિતો વરાહ ઇતિ તદનુમાનમ્ । કથમ્
? યસ્માત્કેસરિવરાહયોર્યૌ જયપરાજયૌ તયોરવ્યભિચારી સમ્બન્ધઃ । તત્ર
યદા કેસરિણો જયમુપલભ્યાવ્યભિચારિણમિતરસ્ય પરાજયં પ્રતિપદ્યતે
કિમન્યત્સ્યાદૃતેઽનુમાનાત્ ? અધિગતોભયસમ્બન્ધિસમુદાયસ્ય હિ પ્રતિપત્તુઃ
પ્રત્યક્ષીભૂતાન્યતરસમ્બન્ધિનો યા સમ્બન્ધ્યન્તરપ્રતિપત્તિસ્તદનુમાનમ્ ।
ઇત્થં ચાર્થાપત્તિરતો ન તસ્માત્પૃથગ્ભવિતુમર્હતિ ।
સમ્ભવો નામ દ્રોણઃ પ્રસ્થ ઇત્યુક્તેઽર્ધદ્રોણાદીનાં સન્નિધાનમવસીયતે ।
ઇત્યયમપિ સાહચર્યકલ્પનયાઽર્થાપત્તિરેવ । કથમ્ ? યસ્માદુક્તપરિમાણે
દ્રવ્યે દ્રોણશબ્દો વર્તતે, ન ન્યૂને નાધિકે । તત્ર દ્રોણ ઇત્યુક્તે

યદત્યન્તસહભુવાં તદવયવાનામન્યશબ્દવાચ્યાનામપિ સન્નિધાનમ્
તદર્થાપત્તિરેવ । સ ચાનુમાનમિત્યુક્તમ્ ।
અભાવો નામ તદ્યથા ધૂમસ્ય ભાવાદગ્નેર્ભાવઃ
પ્રતીયતે એવં ધૂમાભાવાદગ્ન્યભાવ ઇત્યયં
પ્રતિદ્વન્દ્વિસાહચર્યકલ્પનયાર્થાપત્તિરભિહિતઃ । તત્ર
યદા વ્યભિચારસાહચર્યકલ્પના તદા પ્રમાણાભાવ એવ ।
તદ્યથાઽયોગુણાઙ્ગારાદિષુ ધૂમાભાવો નાગ્ન્યભાવઃ । યત્ર તુ ક્વચિદેકાન્તઃ
સ્યાત્ યથાઽકૃતકત્વાન્નિત્ય ઇતિ તત્રાનુમાનમ્ । કથમ્ ? સાહચર્યોપપત્તેઃ ।
કૃતકત્વાનિત્યત્વવત્ ।
અન્યે તુ અભાવમન્યથા વર્ણયન્તિ । તદ્યથા ગેહે નાસ્તિ
ચૈત્ર ઇત્યુક્તે બહિરસ્તીતિ સમ્પ્રત્યયો ભવતિ, તત્ર
ગેહાભાવો બહિર્ભાવસમ્પ્રતિપત્તિહેતુરર્થાન્તરાપત્તિરેવ
પ્રતિદ્વન્દ્વિસાહચર્યકલ્પનયા । કથમ્ ? યથૈવ હિ દિવા ન ભુઙ્ક્તે
દેવદત્તઃ પીન ઇત્યત્રાભોજનપ્રતિયોગિનો મેદુરત્વસ્યોપલમ્ભાદ્દિવાપ્રતિયોગિનિ
કાલે રાત્રૌ ભુજિરવસીયતે એવમિહાપિ ગેહાભાવાભિધાનસામર્થ્યાત્તત્પ્રતિયોગિનિ
વિપર્યયઃ કલ્પ્યતે । અન્યથા તુ યદ્યભાવ એવાભિપ્રેતઃ સ્યાન્નાસ્તિ ચૈત્ર
એવેતિ બ્રૂયાત્ । અર્થાપત્તિશ્ચાનુમાનમ્ ।
ચેષ્ટા નામ અભિપ્રાયસૂચકઃ કશ્ચિદેવોદરતાડનાઞ્જલિકરણાદિઃ
શરીરવ્યાપારઃ । સ હિ બુભુક્ષાદીન્યપ્રતીયમાનાનિ પ્રતિપાદયતીતિ
પ્રમાણમિત્યુચ્યતે । સ ચાનુમાનમેવ । કસ્માત્ ? યસ્માદ્ ભોજનેચ્છાદિસહચરો
હિ વ્યાપારોઽનુષ્ઠીયમાનો યદિ સહચારિણં ગમયતિ તદા નાનુમાનાત્પૃથગિતિ
શક્યં પ્રતિજ્ઞાતુમ્ ।
આહ- પ્રતિભા તર્હિ પ્રમાણાન્તરં ભવિષ્યતિ ।
ઉચ્યતે- કેયં પ્રતિભા નામ ?
આહ, યોઽયમનાદૌ સંસારે દેવમનુષ્યતિરશ્ચામભિન્નેઽર્થે
બાહ્યે સ્ત્ર્યાદૌ પ્રત્યયે પૂર્વાભ્યાસવાસનાપેક્ષઃ
કુણપકામિનીભક્ષ્યાદ્યાકારભેદભિન્નપ્રત્યય ઇતિકર્તવ્યતાઙ્ગમુત્પદ્યતે
સા હિ પ્રતિભા । તથા ચોક્તમ્-
યથાભ્યાસં હિ વાક્યેભ્યો વિનાપ્યર્થેન જાયતે ।
સ્વપ્રત્યયાનુકારેણ પ્રતિપત્તિરનેકધા ॥

યેન હિ યોઽર્થોઽભ્યસ્તસ્સુખાદિત્વેન તસ્ય વિનાઽપિ તેનાર્થેન શબ્દમાત્રાત્

પ્રતિપત્તિરુત્પદ્યતે । તદ્યથા વ્યાઘ્રોઽત્ર પ્રતિવસતીત્યુક્તે વિનાઽપિ
બાહ્યેનાર્થેનાભ્યાસવશાદેવ સ્વેદવેપથુપ્રભૃતયો ભવન્તિ । તસ્માત્
પ્રતિભૈવ દેવમનુષ્યતિરશ્ચામિતિકર્તવ્યતાઙ્ગત્વાત્પ્રમાણમિતિ । આહ ચ-
પ્રમાણત્વેન તાં લોકઃ સર્વઃ સમનુગચ્છતિ ।
વ્યવહારાઃ પ્રવર્તન્તે તિરશ્ચામપિ તદ્વશાત્ ॥

ઉચ્યતે પ્રતિભાયા દૃષ્ટાદિવ્યતિરેકેન રૂપાન્તરાનુપપત્તેઃ ।
અવચનમિત્યનુવર્તતે । યદિ પૂર્વાભ્યાસવાસનાપેક્ષઃ પ્રત્યયઃ
પ્રતિભેત્યુપગમ્યતે તેન તર્હિ અસૌ પ્રત્યક્ષમનુમાનમાપ્તવચનં
ચેત્યેતદાપન્નમ્ । કસ્માત્ ? યતો ન દૃષ્ટાદિવ્યતિરેકેણ પ્રત્યક્ષરૂપં
કદાચિદપ્યુપલભામહે । તસ્માન્ન તેભ્યોઽર્થાન્તરં પ્રતિભા ।
આર્ષપ્રત્યયસમ્ભવાદયુક્તમિતિ ચેત્- સ્યાદેતત્, અસ્ત્યાર્ષો હિ
દૃષ્ટાદિવ્યતિરેકેણ સર્વપદાર્થેષુ સાંસિદ્ધિકઃ પ્રત્યયઃ । સ
પ્રાતિભો ભવિષ્યતીતિ । એતચ્ચાપ્યયુક્તમ્ । કસ્માત્ ? ઉક્તત્વાત્ । ઉક્તમેતત્
સિદ્ધરૂપં ભગવતઃ પરમર્ષેર્જ્ઞાનમ્ । અતો ન પ્રમાણાપેક્ષમિતિ ।
યોગિનામિતિ ચેન્ન, અનભ્યુપગમાત્ । ન હિ યોગિનામપ્રમાણપૂર્વકં
જ્ઞાનમિતિ યથા તથા વક્ષ્યામઃ । સ લૌકિક ઇતિ ચેત્ ન । અનિશ્ચિતત્વાત્ ।
સ્યાદેતત્- અસ્તિ લૌકિકઃ પ્રત્યયો દૃષ્ટાદિવ્યતિરેકેણ । તદ્યથા
સન્તમસે વ્રજતો દ્રાગિતિ વિજ્ઞાનમુત્પદ્યતે - અસ્તિ મે પ્રતીઘાતિ દ્રવ્યં
પુરસ્તાદૂર્ધ્વમવસ્થિતમિતિ । તચ્ચ નૈવમ્ । કસ્માત્ ? અનિશ્ચિતત્વાત્ । ન
હિ તત્ર નિશ્ચય ઉત્પદ્યતે ઇદં તદ્દ્રવ્યમસ્તિ પુરતો વા વ્યક્તમસ્તીતિ । ન
ચાનિશ્ચિતં પ્રમાણજ્ઞાનમિષ્યતે । કિંચાન્યત્- અનવસ્થાપ્રસંગાત્ । યદિ
ચૈવંજાતીયતોઽપિ પ્રત્યયઃ પ્રમાણમભ્યુપગમ્યતે તેનાનવસ્થા પ્રાપ્નોતિ ।
કિં કારણમ્ ? અનવસ્થાનાદ્વિકરણસ્ય । કામક્રોધલોભભયવિષાદદ્વારકો
વિકલ્પઃ સમ્યઙ્મિથ્યા વા યસ્માદનેક ઉત્પદ્યતે તસ્માન્ન લૌકિકઃ પ્રત્યયઃ
પ્રતિભા । યત્તુ ખલ્વિદમુચ્યતે- અભ્યાસવાસનાપેક્ષાઽસત્સ્વપિ વ્યાઘ્રાદિષુ
પ્રતિપત્તિરુત્પદ્યતે । ઇતિ । સત્યમેતત્ । સા તુ મિથ્યાજ્ઞાનત્વાત્પ્રમાણત્વેન
ન પરિગૃહ્યતે ઇત્યયમદોષઃ । તસ્માત્ સિદ્ધં દૃષ્ટાદિવ્યતિરેકેણ
રૂપાન્તરનુપપત્તેઃ પ્રતિભાયાઃ પૃથગનભિધાનમ્ । તતશ્ચ
સર્વપ્રમાણસિદ્ધત્વાત્ ત્રિવિધં પ્રમાણમિષ્ટમિતિ સ્થિતમેતત્ ॥ ૪॥

---

કારિકા ૫

આહ- અસ્ત્વેવમેતત્ । લક્ષણાનભિધાનાત્તદપ્રતિપત્તિઃ ।
તસ્માત્તદભિધાનમ્ । અનવસ્થિતં હિ દૃષ્ટાદીનાં
લક્ષણમ્, દૃષ્ટિવૈચિત્ર્યાત્ । ઇન્દ્રિયાર્થસન્નિકર્ષોત્પન્નં
જ્ઞાનમવ્યપદેશ્યમવ્યભિચારિ વ્યવસાયાત્મકં પ્રત્યક્ષમિતિ કેચિત્ ।
તથાऽऽત્મેન્દ્રિયમનોऽર્થસન્નિકર્ષાદ્યન્નિષ્પદ્યતે તદન્યદિત્યેકે ।
સત્સમ્પ્રયોગે પુરુષસ્યેન્દ્રિયાણાં બુદ્ધિજન્મ તત્પ્રત્યક્ષમિત્યપરે ।
શ્રોત્રાદિવૃત્તિરિતિ વાર્ષગણાઃ । કલ્પનાપોઢમિત્યન્યે । ઇત્થમનવસ્થિતં
લક્ષણમ્ । ઇતિ દૃષ્ટાદીનામપ્રતિપત્તિઃ । તસ્માલ્લક્ષણમભિધાનીયમ્ ।
ઉચ્યતે-

॥ પ્રતિવિષયાધ્યવસાયો દૃષ્ટમ્ ॥

વિષિણ્વન્તીતિ વિષયાઃ શબ્દાદયઃ । અથવા વિષીયન્તે ઉપલભ્યન્તે
ઇત્યર્થઃ । તે ચ દ્વિવિધાઃ । વિશિષ્ટા અવિશિષ્ટાશ્ચ । વિશિષ્ટાઃ
પૃથિવ્યાદિલક્ષણા અસ્મદાદિગમ્યાઃ । અવિશિષ્ટાશ્ચ તન્માત્રલક્ષણા
યોગિનામૂર્ધ્વસ્રોતસાં ચ ગમ્યાઃ । વક્ષ્યતિ ચૈતદુપરિષ્ટાત્ "બુદ્ધીન્દ્રિયાણિ
તેષાં પઞ્ચ વિશેષાવિશેષવિષયાણિ" (kA0 34) અધ્યવસાયો બુદ્ધિરિતિ
(kA0 23) ચ વક્ષ્યતિ । વિષયં પ્રતિ વર્તત ઇતિ પ્રતિવિષયમ્ ।
કિન્તત્ ? ઇન્દ્રિયમ્ । તસ્મિન્ યોऽધ્યવસાયઃ સ પ્રતિવિષયાધ્યવસાયઃ ।
ઉપાત્તવિષયાણામિન્દ્રિયાણાં વૃત્ત્યુપનિપાતિ સત્ત્વોદ્રેકાદરજસ્તમસ્કં
યત્પ્રકાશરૂપં તદ્ દૃષ્ટમિતિ યાવત્ । તદ્ દૃષ્ટં પ્રત્યક્ષમિત્યર્થઃ ।
એતત્પ્રમાણમ્ । અનેન યશ્ચેતનાશક્તેરનુગ્રહસ્તત્ફલમ્ । પ્રમેયાઃ
શબ્દાદયઃ । એવમુત્તરત્રાપિ પ્રમાણફલભાવો દ્રષ્ટવ્યઃ ।
આહ- કિં પુનરિદં પ્રમાણાત્ફલમર્થાન્તરમાહોસ્વિદનર્થાન્તરમ્ ?
કથં તાવત્ ભવિતુમર્હતિ અનર્થાન્તરમિતિ ?
આહ- કસ્માત્ ? અધિગમરૂપત્વાત્ । અધિગમરૂપં હિ જ્ઞાનં,
તસ્યોત્પત્ત્યૈવાધિગતોऽર્થ ઇતિ કુતઃ ફલભેદ ઇતિ ?
ઉચ્યતે- કરણભાવ ઇદાનીં કથં સ્યાત્ ?
આહ- કરણભાવસ્તુ પ્રસિદ્ધિવશાત્ । વિષયનિર્ભાસા હિ જ્ઞાનસ્યોત્પત્તિઃ
અધિગમરૂપાપિ લોકે સવ્યાપારેવ પ્રતીતેતિ કલ્પનયા કરણભાવોऽભ્યુપગમ્યતે
ન પરમાર્થતઃ ।
ઉચ્યતે- ફલસ્યાર્થાન્તરભાવઃ । અધિકરણભેદાત્ । બુદ્ધ્યાશ્રયં હિ

પ્રમાણમધ્યવસાયાખ્યમ્, પુરુષાશ્રયં ફલમનુગ્રહલક્ષણમ્ । ન ચ ભિન્નાધિકરણયોરેકત્વમર્હતિ ભવિતુમ્ । યત્તૂક્તમધિગમરૂપત્વાત્ જ્ઞાનમેવ ફલમિતિ તદનુપપન્નમ્ । કસ્માત્ ? અસિદ્ધત્વાત્ । યથૈવ હિ ઘટાદયોઽર્થા જ્ઞાનમન્તરેણ ન તદ્રૂપા નાતદ્રૂપા ઇતિ ન શક્યં પ્રતિપત્તુમ્, એવં જ્ઞાનમપિ પુરુષપ્રત્યયમન્તરેણ ન વિષયરૂપં નાવિષયરૂપમ્ । તથા ચ શાસ્ત્રમ્- "તત્સંયોગાદચેતનં ચેતનાવદિવ લિઙ્ગમિતિ" (kA0 20) વચનાત્ । અતઃ પુરુષપ્રત્યયમન્તરેણ જ્ઞાનમધિગમરૂપમિતિ સાંખ્યં પ્રત્યસિદ્ધમેતત્ । ઉભયપક્ષપ્રસિદ્ધેન ચ વ્યવહારઃ । પુરુષાભાવાદયુક્તમિતિ ચેન્ન ઉત્તરત્ર પ્રતિપાદનાત્ । સંઘાતપરાર્થત્વાદિત્યત્ર પુરુષાસ્તિત્વં પ્રતિપાદયિષ્યામઃ । તસ્માત્ સિદ્ધમધ્યવસાયપ્રમાણવાદિનઃ પ્રમાણાત્ફલમર્થાન્તરમિતિ ।

આહ- યદિ હ્યધ્યવસાયઃ પ્રમાણં કથં લૌકિકઃ પ્રયોગોઽર્થવાન્ ભવતિ પ્રત્યક્ષં વસ્તુ ઇતિ ?

ઉચ્યતે- વિષયે પ્રત્યક્ષશબ્દઃ તત્પ્રમિતત્વાત્ તત્કારણાત્વાચ્ચ । યથા પ્રસ્થપ્રમિતો વ્રીહિરાશિઃ પ્રસ્થશબ્દવાચ્યો ભવતિ એવં પ્રત્યક્ષપ્રમિતોઽર્થઃ પ્રત્યક્ષશબ્દવાચ્યઃ સ્યાત્ ।

આહ, ન । અન્યત્રાપિ તત્પ્રસઙ્ગાત્ । યદિ પ્રત્યક્ષપ્રમિતત્વાદ્વિષયે પ્રત્યક્ષશબ્દસ્તેન તર્હિ અનુમામપ્રમિતોઽર્થોઽનુમાનમિતિ સ્યાત્ । શબ્દપ્રમિતોઽર્થઃ શબ્દ ઇતિ । ન ચાગ્નિસ્વર્ગાદયઃ પ્રમાણશબ્દવાચ્યા ભવન્તિ । તસ્માદ્વિષમલિઙ્ગલિઙ્ગિપૂર્વકમ્, યોગિનાં ચ ધ્યાનભૂમિકાસુ વિહરતામનુમાનાગમાતીતં પ્રાતિભં યદ્વિજ્ઞાનમુત્પદ્યતે તદુપસંખ્યેયં સ્યાત્ । કુતઃ ? ન હિ સુખાદયઃ શ્રોત્રાદિવૃત્તિગ્રાહ્યાઃ, યોગિનાં ચાતિન્દ્રિયં જ્ઞાનમિતિ । યથાન્યાસં તુ ક્રિયમાણે તેઽપિ વિષયાઃ, તેષાં યોઽધ્યવસાયસ્તસ્ય પ્રત્યક્ષત્વં કેન વાર્યતે ?

ઉચ્યતે- તદભાવાદિતરત્રાપ્રવૃત્તિઃ । પ્રમાણાન્તરે તુ નાસ્તિ સામાન્યં નિમિત્તમ્ । કથમ્ ? અનુમીયતેઽનેનેત્યનુમાનમ્ । ન ચાગ્ન્યાદિભિઃ કશ્ચિદનુમીયત ઇત્યતસ્તુલ્યશબ્દવાચ્યતા ન ભવતિ ।

આહ- અધ્યવસાયગ્રહણં કિમર્થમ્ ?

ઉચ્યતે- અતિપ્રસંગનિવૃત્ત્યર્થમ્ । પ્રતિવિષયં દૃષ્ટમિતીયત્યુચ્યમાને યાવત્કિંચિત્ પ્રતિવિષયં વર્તતેઽનુગ્રાહકત્વેનોપઘાતત્વેન વા તત્ સર્વં દૃષ્ટમિત્યેતદાપદ્યતે । અધ્યવસાયગ્રહણે પુનઃ ક્રિયમાણે ન

દોષો ભવતિ ।

આહ- ન, પ્રમાણાધિકારાત્ । નાધ્યવસાયશબ્દસ્ય પ્રયોજનમ્ ।

કુતઃ ? પ્રમાણાધિકારોઽયમ્ । ન ચાધ્યવસાયાદૃતે

યત્કિંચિદ્વિષયં પ્રતિપદ્યતે તેન કિંચિત્ પ્રમીયતે । તેન વયં

સામર્થ્યાદધ્યવસાયમેવાભિસંભન્ત્યસ્યામઃ । તદ્યથા- અધ્યયનાધિકારે

બ્રાહ્મણા આનીયન્તામિત્યુક્તે ય એવાધીયન્તે ત એવાનીયન્તે ।

ઉચ્યતે- કરણાન્તરાણાં તુ સન્દેહનિવૃત્ત્યર્થમ્ । એવં તર્હિ

શ્રોત્રાદીનામન્યતમમન્તઃકરણં ચેત્યેતદ્ દ્વારદ્વારિભાવેન ચતુષ્ટયં

વિષયં પ્રતિ વર્તતે । તસ્માદધ્યવસાયગ્રહણં ક્રિયતે સન્દેહો મા ભૂદિતિ ।

આહ- અસ્ત્વત્ર સન્દેહઃ, નૈકેન કેનચિત્ કશ્ચિદ્વિષય ઉપાદીયતે । તેન

વયં સર્વેષાં પ્રત્યક્ષત્વં પ્રતિપત્સ્યામહે ।

ઉચ્યતે- સર્વાભ્યુપગમે હિ શાસ્ત્રહાનિઃ । યદિ પુનઃ સર્વેષામેવ

પ્રમાણત્વમભ્યુપગમ્યતે તેન યચ્છાસ્ત્રમેકમેવ દર્શનં ખ્યાતિરેવ

દર્શનમિતિ તદ્ધીયતે । વક્ષ્યતિ ચાચાર્યઃ "એતે પ્રદીપકલ્પાઃ" (kA0 36),

"સર્વં પ્રત્યુપભોગં યસ્માત્ પુરુષસ્ય સાધયતિ બુદ્ધિરિતિ" (kA0 37)

તદ્વિરુધ્યતે । તસ્માદધ્યવસાયગ્રહણં કર્તવ્યમ્ । સન્દેહો મા ભૂદિતિ ।

આહ- ન, સન્દેહમાત્રમેતદ્ ભવતિ । સર્વસન્દેહેષુ ચૈતદુપતિષ્ઠતે-

વ્યાખ્યાનતો વિશેષપ્રતિપત્તિર્ન હિ સંદેહાદલક્ષણમ્ । તત્રાધ્યવસાયો

દૃષ્ટમિતિ વ્યાખ્યાસ્યામઃ ।

ઉચ્યતે- મુક્તસંશયં ચેન્દ્રિયવૃત્તિપ્રતિપત્તેઃ । સ્યાદેતત્, યદ્યત્ર

સન્દેહઃ સ્યાત્ । નૈવાત્ર સન્દેહઃ પ્રાપ્તઃ, કિન્તર્હિ શ્રોત્રાતિવૃત્તેરેવ

ગ્રહણમ્ ।

આહ- કિં પુનઃ કારણં યેન નિમિત્તાવિશેષેઽપિ શ્રોત્રાદિવૃત્તેરેવાત્ર

ગ્રહણં પ્રાપ્નોતિ, નાન્તઃકરણસ્યૈવ પ્રત્યક્ષત્વમ્ ?

ઉચ્યતે- તત્ર ચ મુખ્યા શ્રોત્રાદિવૃત્તિઃ । કસ્માત્

? સાક્ષાદ્વિષયગ્રહણસામર્થ્યાત્ । નાન્તઃકરણમ્, તદ્દ્વારેણ પ્રતિપત્તેઃ ।

ગૌણમુખ્યયોશ્ચ મુખ્યે સમ્પ્રતિપત્તિઃ । તદ્યથા- ગૌરનુબન્ધ્યઃ

અજોઽગ્નીષોમીય ઇતિ વાહીકો નાનુબધ્યતે ।

આહ- યદીયં શ્રોત્રાદિવૃત્તિરેવ પ્રત્યક્ષમિત્યભુપેયતે ક એવં સતિ

દોષઃ સ્યાત્ ?

ઉચ્યતે- રાગાદિવિષયં યદ્વિજ્ઞાનં લિંગલિંગિપૂર્વકમ્, યોગિનાં ચ

ધ્યાનભૂમિકાસુ વિહરતામનુમાનાગમતીતં પ્રાતિભં યદ્વિજ્ઞાનમુત્પદ્યતે

તદુપસંખ્યેયં સ્યાત્ । કુતઃ ? ન હિ સુખાદયઃ શ્રોત્રાદિવૃત્તિબાહ્યાઃ,
યોગિનાં ચાતીન્દ્રિયં જ્ઞાનમિતિ । યથાન્યાસં તુ ક્રિયમાને તેઽપિ વિષયાઃ,
તેષાં યોઽધ્યવસાયસ્તસ્ય પ્રત્યક્ષત્વં કેન વાર્યતે ?
આહ- પ્રતિવિષયગ્રહણં તર્હિ કિમર્થમ્ ?
ઉચ્યતે - પ્રતિવિષયગ્રહણમસદ્વ્યુદાસાર્થમ્ । અધ્યવસાયો
દૃષ્ટમિતીયત્યુચ્યમાને મૃગતૃષ્ણિકાઽલાતચક્રગન્ધર્વનગરાદિષુ
અપિ યોઽધ્યવસાયસ્તદ્ દૃષ્ટમિતિ । પ્રતિવિષયગ્રહણાત્તુ તેષાં વ્યુદાસઃ
કૃતો ભવતિ ।
આહ- યદ્યેવં વિષયાધ્યવસાય ઇત્યેવ ચોચ્યતામ્ । કિમ્પ્રતિગ્રહણેન ?
ઉચ્યતે- પ્રતિગ્રહણં સન્નિકર્ષાર્થમ્ । વિષયાધ્યવસાયો
દૃષ્ટમિતીયત્યુચ્યમાને વિષયમાત્રે સમ્પ્રત્યયઃ સ્યાત્ । પ્રતિગ્રહણે પુનઃ
ક્રિયમાણે પ્રતિરાભિમુખ્યે વર્તતે । તેન સન્નિકૃષ્ટેન્દ્રિયવૃત્ત્યુપનિપાતી
યોઽધ્યવસાયસ્તદ્ દૃષ્ટમિત્યુપલભ્યતે ।
આહ- કસ્ય પુનરતીન્દ્રિયસન્નિકર્ષે પ્રત્યક્ષત્વં પ્રાપ્નોતિ ?
ઉચ્યતે- અનુમાનસ્ય । કસ્માત્ ? તદ્ધિ લિઙ્ગદર્શનાદસન્નિકૃષ્ટે વિષયે
ભવતિ ।
આહ- અનુમાનસ્યાપ્રસઙ્ગઃ । સામાન્યવિહિતસ્ય વિશેષવિહિતેન બાધનાત્ ।
સામાન્યે હિ વિષયમાત્રેઽધ્યવસાયસ્ય પ્રત્યક્ષત્વં વિધાય વિશેષે
લિઙ્ગલિઙ્ગિપૂર્વકેઽનુમાનં શાસ્તિ । સામાન્યવિહિતં ચ વિશેષવિહિતેન
બાધ્યતે, યથા તદ્ધિ બ્રાહ્મણેભ્યો દીયતાં તક્રં કૌણ્ડિન્યાયેતિ ।
ઉચ્યતે- સ્મૃતેસ્તર્હિ પ્રત્યક્ષત્વં પ્રાપ્નોતિ । તત્રાયમપવાદો
નાભિનિવિશત ઇતિ ।
આહ ન, સ્મૃતેઃ, પ્રમાણાધિકારાત્ । પ્રમાણાધિકારોઽયમ્ । ન ચ સ્મૃત્યા
કિંચિત્ પ્રમીયતે । સ્મૃતેઃ પ્રમિતેઽર્થે પ્રાદુર્ભાવાત્ ।
ઉચ્યતે- સંશયસ્ય તર્હિ પ્રાપ્નોતિ ।
ન સંશયસ્ય, અધ્યવસાયગ્રહણાત્ । અધ્યવસાયો હિ દૃષ્ટમિત્યુચ્યતે ।
ન ચ સંશયોઽધ્યવસાયોઽનિશ્ચિતત્વાત્ ।
ઉચ્યતે- ઇન્દ્રિયાન્તરાકૂતવિષયે તુ પ્રસઙ્ગઃ । એવં
તર્હીન્દ્રિયાર્થસન્નિકૃષ્ટેન્દ્રિયવૃત્ત્યુપનિપાતીતિ દોષો ન ભવતિ ।
આહ- રાગાદ્યુપસંખ્યાનમ્ । યદિ સન્નિકૃષ્ટેન્દ્રિયવૃત્ત્યુપનિપાતી
યોઽધ્યવસાયસ્તદ્ દૃષ્ટમિત્યભ્યુપેયતે, તેન રાગાદિવિષયં
વિજ્ઞાનમતીન્દ્રિયત્વાત્પ્રત્યક્ષં ન પ્રાપ્નોતિ । તસ્યોપસંખ્યાનમ્ કર્તવ્યમ્ ।

ઉચ્યતે- ન તર્હીદં પ્રતિગ્રહણમિન્દ્રિયવિશેષણં વિષયં વિષયં પ્રતિ યો વર્તતે તસ્મિન્ યોઽધ્યવસાયસ્તદ્ દૃષ્ટમિતિ । કિન્તર્હિ- અધ્યવસાયવિશેષણં વિષયં વિષયં પ્રતિ યોઽધ્યવસાય ઇતિ ।
આહ- અધ્યવસાયવિશેષણમિતિ ચેત્, શબ્દાદ્યુપસંખ્યાનમ્ । શબ્દાદીનામેવ તેન પ્રત્યક્ષત્વં પ્રાપ્નોતિ । તેષામુપસંખ્યાનં કર્તવ્યં પ્રાપ્નોતિ । કિં કારણમ્ ? અન્તઃકરણસ્ય તૈઃ સન્નિકર્ષાનુપપત્તેઃ । પ્રતિગ્રહણં સન્નિકર્ષાર્થમિતિ પૂર્વમતિસૃષ્ટં ભવતા । તચ્ચેદાનીમન્તઃકરણવિશેષણમ્ । ન ચાન્તઃકરણસ્ય શબ્દાદિભિઃ સન્નિકર્ષ ઉપપદ્યતે, શ્રોત્રાદિવૈયર્થ્યપ્રસઙ્ગાત્ । દ્વારિદ્વારભાવસ્યાપઘાતપ્રસઙ્ગાચ્ચ । તસ્માત્સુદૂરમપિ ગત્વા પ્રતિગ્રહણં પ્રત્યાખ્યાનાન્ન મુચ્યતે । રાગાદ્યુપસંખ્યાનાદ્વેતિ ।
ઉચ્યતે- અસ્તુ તર્હીન્દ્રિયાણાં પ્રતિ વિષયગ્રહણં વિશેષણમ્ । યત્તૂક્તં રાગાદીનામુપસંખ્યાનં કર્તવ્યમિતિ તત્ર બ્રૂમઃ । એકશેષનિર્દેશાત્ સિદ્ધમ્ । એવં તર્હિ પ્રતિવિષયાધ્યવસાયશ્ચ પ્રતિવિષયાધ્યવસાયશ્ચ પ્રતિવિષયાધ્યવસાય ઇતિ સરૂપાણામેકશેષઃ કરિષ્યતે । તત્રૈકેન બહિરઙ્ગસ્યૈન્દ્રિયસ્ય પ્રત્યક્ષસ્ય પરિગ્રહઃ । દ્વિતીયેનાન્તરઙ્ગસ્ય પ્રાતિભસ્યેતિ રાગાદિવિષયં યોગિનાં ચ યદ્વિજ્ઞાનં તત્ સંગૃહીતં ભવતીતિ વ્યાખ્યાતં પ્રત્યક્ષમ્ ।
આહ- અનુમાનમિદાનીં વક્તવ્યમ્ ।
ઉચ્યતે-

॥ ત્રિવિધમનુમામમાખ્યાતમ્ ॥

અનુમાનં ત્રિપ્રકારમાચાર્યૈરાખ્યાતમ્ । પૂર્વવત્, શેષવત્, સામાન્યતોદૃષ્ટં ચ । તત્ર પૂર્વમિતિ કારણમુચ્યતે । યસ્ય હિ યત્ કારણં સ લોકે તત્પૂર્વક ઇત્યુચ્યતે । યથા તન્તુપૂર્વકઃ પટો, દેવદત્તપૂર્વકો યજ્ઞદત્ત ઇતિ । પૂર્વમસ્યાસ્તીતિ પૂર્વવત્ । શેષ ઇતિ વિકારનામ, શિષ્યત ઇતિ કૃત્વા । તથા ચોક્તમ્- ન શેષોઽગ્નેરન્યસ્ય જાતમિત્યસ્તિ । નાપત્યમન્યેન જાતં સમ્ભવતીત્યર્થઃ । શેષોઽસ્યાસ્તીતિ શેષવત્ ।
તત્ર પૂર્વવત્ યદા કારણમભ્યુદિતં ભવિષયત્ત્વં કાર્યસ્ય પ્રતિપદ્યતે । તદ્યથા મેઘોદયે ભવિષ્યત્ત્વં વૃષ્ટેઃ ।
આહ- નૈતદસ્ત્યુદાહરણમનેકાન્તાત્ । ન હિ મેઘોદયોઽવશ્યં વૃષ્ટેઃ કારણં ભવતિ, વાય્વાદિનિમિત્તપ્રતિબન્ધસમ્ભવાત્ ।

ઉચ્યતે- યદિ તર્હિ કારણશક્તિં સહકારિશક્ત્યન્તરાનુગૃહીતામપ્રતિયોગિનીં
દૃષ્ટ્વા કાર્યસ્ય વ્યક્તિં પ્રતિપદ્યતે । તદ્યથા યદા
લૌહદણ્ડાદિસાધનસમ્પન્ને વ્યાપારવતા કુમ્ભકારેણાધિષ્ઠિતાં
મૃદમુપલભ્ય ઘટસ્ય, તદા પૂર્વવત્ ।
શેષવત્- યદા કાર્યનિર્વૃતિં દૃષ્ટ્વા કારણસદ્ભાવં પ્રતિપદ્યતે ।
તદ્યથા કુમારકં દૃષ્ટ્વા દ્વયસમાપત્તિમ્ ।
આહ- નૈતદસ્ત્યુદાહરણમ્ । અનેકાન્તાત્ । ન હિ દ્વયસમાપત્તિપૂર્વક એવ
પ્રાણભૃતાં પ્રાદુર્ભાવો, દ્રોણાદીનામન્યથોત્પત્તિવિશેષશ્રવણાત્ ।
ઉચ્યતે- યદા તર્હિ પ્રભાનુરંજિતમન્તરિક્ષં દૃષ્ટ્વા ચન્દ્રાર્કયોરુદયં
પ્રતિપદ્યતે તદા શેષવત્ ।
આહ- એતદપિ નાસ્ત્યુદાહરણમ્ । અનેકાન્તાત્ । ન હિ પ્રભાઽનુરાગોઽન્તરિક્ષે
ચન્દ્રાર્કનિમિત્ત એવ ભવતિ । કિન્તર્હિ દિગ્દાહાદિનિમિત્તોઽપિ ।
ઉચ્યતે - યદા તુ નદીપૂરં દૃષ્ટ્વા વૃષ્ટિં પ્રતિપદ્યતે તદા શેષવત્ ।
એતદપિ નાસ્ત્યુદાહરણમ્ । અનેકાન્તાત્ । નદીપૂરસ્ય હિ નિમિત્તમનેકવિધં
ભવતીતિ હિમિલયનસેતુભંગગજક્રીડાદિ । તસ્માદયુક્તમેતત્ ।
ઉચ્યતે યદા તર્હિ પર્ણં દૃષ્ટ્વા શાલૂકં પ્રતિપદ્યતે, અંકુરં વા
દૃષ્ટ્વા બીજમિતિ તદા શેષવત્ ।
અથવા પુનરસ્તુ પૂર્વકમેવોદાહરણમ્ । યત્તૂક્તં- અનેકાન્તાદિતિ અત્ર બ્રૂમઃ-
વીતાવીતસામર્થ્યાત્ । વીતાવીતાભ્યાં હેતુભૂતાભ્યામભિપ્રેતાર્થસિદ્ધિરિતિ
વક્ષ્યામઃ । પ્રસંગિધર્માન્તરનિવૃત્તિમુખેન ચાવીતપ્રયોગઃ । તત્ર યદા
પ્રસંગિનાં હિમવિલયનાદીનાં દેશકાલલિઙ્ગૈઃ પ્રતિષેધઃ ક્રિયતે તદા
મુક્તસંશયં પ્રતિપત્તિર્ભવતિ । દેશસ્તાવત્તદ્ યથા- દક્ષિણાપથે
નાસ્તિ હિમવિલયનસમ્ભવઃ । કાલતો યથા પ્રાવૃટ્કાલે । લિઙ્ગતોઽપિ
યસ્માન્મુદ્ગવેધુકશ્યામાકકાષ્ઠસૂત્રશકૃત્પ્રભૃતીનામનુપલમ્ભસ્તથોષ્મકલુષત્વાદીનામુપલમ્ભઃ ।
તસ્માત્ પરિશેષતો મેધ્યા એવાપ ઇતિ । તસ્માન્નાનેકાન્તઃ । એવં કૃત્વા
પૂર્વાણ્યપ્યુદાહરણાનિ ઉપપન્નાનિ ભવન્તિ । દેશાદિવિચારસામર્થ્યાત્ ।
સામાન્યતોદૃષ્ટં નામ યત્રૈકદાઽર્થયોરવ્યભિચારમુપલભ્ય
દેશાન્તરે કાલાન્તરે ચ તજ્જાતીયયોરવ્યભિચારં પ્રતિપદ્યતે । તદ્યથા
ક્વચિદ્ધૂમાગ્નિસમ્બન્ધં દૃષ્ટ્વા ક્વચિદ્ધૂમાન્તરેણાગ્ન્યન્તરસ્યાસ્તિત્વં
પ્રતિપદ્યતે ।
આહ- નૈતદસ્ત્યુદાહરણમ્ । અવિશેષપ્રસઙ્ગાત્ । સર્વત્રૈવ
હ્યનુમાને ક્વચિદર્થયોરવ્યભિચારમુપલભ્યાન્યત્ર

તજ્જાતીયયોર્થયોરવ્યભિચારં પ્રતિપદ્યતે । તદ્યથા ક્વચિત્
સાધનવતો મૃત્પિણ્ડાદ્ ઘટનિષ્પત્તિમુપલભ્યાન્યત્ર સાધનવતઃ
પિણ્ડાન્તરાદ્ઘટાન્તરનિષ્પત્તિં પ્રતિપદ્યતે, તથૈકત્ર નદીપૂરાદ્
વૃષ્ટિમુપલભ્યાન્યત્ર નદીપૂરાન્તરાદ્વૃષ્ટ્યન્તરમવસીયતે । તથા ચ
સતિ ત્રયાણામવિશેષપ્રસંગઃ ।
ઉચ્યતે- યદા તર્હિ સહભુવામેકસ્ય વિશિષ્ટગુણમુપલભ્ય શેષાણામપિ
તદ્વત્ત્વમનુમીયતે તદા સામાન્યતોદૃષ્ટમ્ । તદ્યથા વૃક્ષાદેકસ્ય ફલસ્ય
પાકમુપલભ્ય શેષાણાં વૃક્ષાન્તરાણાં ચ પાકોઽનુમીયતે । આહ- એતદપિ
નાસ્ત્યુદાહરણમ્ । અનેકાતન્તાત્ । ન હિ સર્વેષાં ફલાનાં તુલ્યકાલં પાકો
ભવતિ । પૂર્વાપરકાલનિષ્પન્નત્વાત્, નિમિત્તભેદાચ્ચ । ઉચ્યતે- યદા તર્હિ
સમુદ્રાદેકમુદબબિન્દું પ્રાશ્ય શેષસ્ય લવણતાઽનુમીઅતે । સ્થાલ્યાં વૈકં
પુલાકમુપલભ્ય શેષાણાં પાકોઽનુમીયતે તદા સામાન્યતોદૃષ્ટમ્ । આહ-
નૈતદસ્ત્યુદાહરણમ્ । અકૃત્સ્નસઙ્ગ્રહાત્ । વક્ષ્યત્યયમુપરિષ્ટાદાચાર્યઃ
"સામાન્યતસ્તુ દૃષ્ટાદતીન્દ્રિયાણાં પ્રતીતિરનુમાનાદિતિ" (kA0 6) ।
તત્રૈવં પ્રમાણે પરિકલ્પ્યમાને કાર્યકારણયોસ્તત્સંઘાતાનાં ચ
સુખદુઃખમોહસ્વભાવોપલમ્ભાત્તન્માત્રાહઙ્કારપ્રધાનાનાં સમધિગમઃ
સ્યાત્ । ન પુરુષસ્ય, તજ્જાતીયાર્થાનુપલમ્ભાત્ ।
ઉચ્યતે- યદા તર્હિ ક્વચિદ્ધર્મેણ
ધર્માન્તરસ્યાવ્યભિચારમુપલભ્યૈકધર્મોપલમ્ભાદ્ભિન્નજાતીયેઽત્યન્તાનુપલબ્ધસ્ય
ધર્માન્તરસ્ય પ્રતિપત્તિસ્તદા સામાન્યતોદૃષ્ટમ્ । તદ્યથા -
દેવદત્તે ગમનાદ્દેશાન્તરપ્રાપ્તિમુપલભ્યાત્યન્તાદૃષ્ટજ્યોતિષાં
દેશાન્તરપ્રાપ્તેર્ગમનમનુમીયતે । તથા પ્રાસાદાદીનાં વૃદ્ધિપૂર્વકં
દીર્ઘત્વમુપલભ્યૌષધિવનસ્પતીનાં દીર્ઘત્વદર્શનાદ્વૃદ્ધિરનુમીયતે ।
આહ- નૈતદપ્યસ્ત્યુદાહરણમ્ । પૂર્વેણાવિશેષાત્ । કાર્યાત્
કારણસ્યાધિગમઃ શેષવદિતિ પૂર્વમતિસૃષ્ટં ભવતા । અત્રાપિ ચ
દેશાન્તરપ્રાપ્તિલક્ષણાત્ કાર્યાદ્ ગતિલક્ષણસ્ય કારણસ્યાધિગમઃ । તસ્માત્
શેષવત્સામાન્યતોદૃષ્ટયોરભેદપ્રસંગઃ ।
ઉચ્યતે- ન, અનિયમાત્ । યત્ર હિ નિયમતઃ કાર્યેણ કારણમધિગમ્યતે
તચ્છેષવદિતિ અયમસ્મદભિસન્ધિઃ । ન તુ તદસ્તિ સામાન્યતોદૃષ્ટે ।
કસ્માત્ ? સંઘાતત્વસામાન્યાત્ । પારાર્થ્યસામાન્યસાધનમપિ દૃશ્યતે ।
યથાહ- અવ્યભિચારાદ્વિશેષાસ્તુ પ્રતીતાઃ પ્રતિપાદકાઃ ઇતિ ।
સાધ્યસાધનસામાન્યયોરપિ દૃશ્યતે, યથાઽનિત્યઃ શબ્દઃ

કૃતકત્વાદિતિ । તત્રૈવં સતિ નિયમવાદિનઃ પ્રતિજ્ઞાહાનિઃ ।
એતેનાસિદ્ધવિરુદ્ધાનૈકાન્તિકસાધનાભાસાઃ પ્રત્યુક્તાઃ । તે હિ
સંશયવિપર્યયાજ્ઞાનહેતુકત્વાદગમકા ઇતિ વ્યાખ્યાતમનુમાનમ્ ।
આહ- આપ્તવચનસ્ય કિં લક્ષણમિતિ ?
ઉચ્યતે-

॥ આપ્તશ્રુતિરાપ્તવચનન્તુ ॥ ૫ ॥

આપ્તા નામ રાગાદિવિયુક્તસ્યાગૃહ્યમાણકારણપરાર્થાઃ વ્યાહૃતિઃ ।
શ્રવણં શ્રુતિઃ । આપ્તા ચાસૌ શ્રુતિરાપ્તશ્રુતિઃ । અથવા
આપ્તાઽસ્યાસ્તીત્યાપ્તઃ । અકારો મત્વર્થીયઃ । તદ્યથા તુન્દો ઘટ
ઇતિ । આપ્તેભ્યઃ શ્રુતિરાપ્તશ્રુતિઃ । આપ્તશ્રુતિશ્ચાપ્તશ્રુતિઃ ।
સરૂપાણિમિત્યેકશેષઃ । તત્ર પૂર્વેણાપ્તશ્રુતિગ્રહનેન પ્રતિપાદયતિ
અપુરુષબુદ્ધિપૂર્વક આમ્નાયઃ, સ્વતન્ત્રઃ પુરુષનિઃશ્રેયસાર્થં પ્રવર્તમાનો
નિઃસંશયં પ્રમાણમિતિ । દ્વિતીયેન મન્વાદિનિબન્ધનાનાં ચ સ્મૃતીનાં
વેદાઙ્ગતર્કેતિહાસપુરાણાનાં શિષ્ટાનાં નાનાશિલ્પાભિયુક્તાનાં ચાદુષ્ટમનસાં
યદ્વચસ્તત્પ્રમાણમિત્યેતસિદ્ધં ભવતિ । તુશબ્દોઽવધારણાર્થઃ ।
આપ્તશ્રુતિરેવાપ્તવચનં ન શબ્દમાત્રમ્ ।
એવં સતિ યદુક્તં તન્ત્રાન્તરીયૈઃ શિંશપાદિશબ્દાનાં
નિર્વિકલ્પમનુમાનેઽન્તર્ભાવસ્ત્રિલક્ષણત્વાદિતિ તદયત્નતઃ પ્રતિક્ષિપ્તં
ભવતીતિ વ્યાખ્યાતાનિ પ્રમાણાનિ । એતૈઃ પૂર્વોક્તં પ્રમેયં યથાસ્વં
પ્રતિપત્તવ્યમિતિ ॥ ૫॥

---

કારિકા ૬-૭

---

આહ- અસ્તુ તાવદક્ષરાન્નિકર્ષભાજામર્થાનાં પ્રત્યક્ષેણોપલબ્ધિઃ ।
અસન્નિકર્ષભાજામપિ ચોપલબ્ધસમ્બન્ધાનામનુમાનેન । યે ત્વતીન્દ્રિયા
ભાવાસ્તેષામુભયવૈલક્ષણ્યાન્નાસ્તિ પ્રત્યક્ષાનુમાનાભ્યામુપલબ્ધિઃ ।
આગમિકત્વે સર્વવાદસિદ્ધિપ્રસંગઃ । ઇત્યતોઽત્યન્તમેવાગ્રહણં પ્રાપ્તમ્ ।
તત્ર યદુક્તમેતાવદ્ભિઃ પ્રમાણૈઃ સકલપદાર્થાવબોધ ઇતિ એતદયુક્તમ્ ।
ઉચ્યતે- સ્યાદેતદેવં યદ્યેકરૂપમેવાનુમાનમધીતં સ્યાત્, કિં તર્હિ ત્રિવિધમ્ ।
તત્ર સત્યમેવ પૂર્વવચ્છેષવતી પ્રાગનુભૂતસમ્બન્ધવિષયફલે ઇતિ
કૃત્વા ન તાભ્યામશેષપદાર્થાધિગમોઽભ્યુપગમ્યતે ।

॥ સામાન્યતસ્તુ દૃષ્ટાદતીન્દ્રિયાણાં પ્રસિદ્ધિરનુમાનાત્ ॥

યત્ત્વેતત્સામાન્યતોદૃષ્ટમનુમાનમેતસ્માદતીન્દ્રિયાણામર્થાનાં સમધિગમઃ પ્રત્યવગન્તવ્યઃ । કથમ્ ? યથા હિ કૃતકત્વાનિત્યત્વયોર્ઘટે સહભાવમુપલભ્યાન્યત્ર શબ્દાદૌ કૃતકત્વદર્શનાદનિત્યત્વમનુમીયતે । એવં શકલાદીનાં તજ્જાતીયતા ચન્દનાદિપૂર્વકત્વસિદ્ધેઃ, કાર્યકારણસ્ય સુખાદિજાતીયતયા તત્પૂર્વકત્વસિદ્ધેઃ, શયનાદીનાં ચ સંઘાતત્વાત્પારાર્થ્યસિદ્ધેઃ, કાર્યકારણસ્યાપિ સંઘાતત્વાત્પારાર્થ્યસિદ્ધિરિતિ સર્વમિષ્ટં સઙ્ગૃહીતં ભવતીતિ । યેષાં તુ શેષવદેવ સામાન્યતોદૃષ્ટં તેષાં તસ્ય કાર્યદ્વારેણ સમધિગમહેતુત્વાત્ પુરુષસ્યાગ્રહણપ્રસંગઃ । વૃત્તૌ કાર્યોપચારાદદોષ ઇતિ ચેત્ સ્યાન્મતમ્, યદ્યપિ પુરુષસ્ય કાર્યાભાવસ્તથાપિ પુરુષાવ્યક્તમહદહઙ્કારવિશેષાણાં સામ્પ્રતે કાલે સ્વવૃત્તિભ્યસ્તેષાં ગ્રહણમિત્યુક્તમ્ । કસ્માત્ ? વૃત્તિશક્તિરેષાં કાર્યત્વેનોપચરિતા સ્વમાત્માનં યુનક્તીતિ । તચ્ચાયુક્તમ્ । કસ્માત્ ? હેત્વન્તરાભિધાનાત્ । યદિ વૃત્ત્યા ગ્રહણં પુરુષસ્ય સૂપપાદમભવિષ્યત્ સંહતપારાર્થ્યમાચાર્યો હેતુત્વેન નાવક્ષ્યત્ । તચ્ચાવૃત્તિભૂતમિત્યવશ્યં શેષવત્સામાન્યતોદૃષ્ટયોરર્થાન્તરભાવોઽભ્યુપગન્તવ્યઃ । તસ્માત્ સિદ્ધં સામાન્યતોદૃષ્ટાદતીન્દ્રિયાણામર્થાનાં સમધિગમઃ । તસ્ય પ્રયોગમાત્રભેદાદ્દ્વૈવિધ્યમ્ । વીતઃ અવીત ઇતિ ।
તયોર્લક્ષણમામનન્તિ-
યદા હેતુઃ સ્વરૂપેણ સાધ્યસિદ્ધૌ પ્રયુજ્યતે ।
સ વીતોઽર્થાનરાક્ષેપાદિતરઃ પરિશેષિતઃ ॥

સ્વરૂપં હિ સાધનસ્ય દ્વિવિધમ્- સાધારણમસાધારણં ચ । તત્ર સાધારણં સાધ્યસહભાવી તત્પ્રતિપત્તિહેતુત્વેન યથાવદાશ્રીયમાણોઽર્થાત્મા । અસાધારણં પુનઃ પરિમાણમન્વયઃ સંઘાતપરાર્થત્વમિત્યાદિ । તત્ર યદા હેતુઃ પરપક્ષમપેક્ષ્ય યથાર્થેન સ્વરૂપેણ સાધ્યસિદ્ધાવુપદિશ્યતે તદા વીતાખ્યો ભવતિ । યદા તુ સ્વસાધ્યાદર્થાન્તરભૂતાનાં પ્રસંગિનાં ક્ષેપમપોહં કૃત્વા પરિશેષતઃ સાધ્યસિદ્ધાવપદિશ્યતે તદાઽવીતાખ્યો ભવતિ । તદ્યથા ન ચેત્ પરમાણુપુરુષેશ્વરકર્મદૈવકાલસ્વભાવયદૃચ્છાભ્યો જગદુત્પત્તિઃ

સમ્ભવતિ પરિશેષતઃ પ્રધાનાદિતિ તદા પુનરવીતાખ્યો ભવતિ । તત્ર
યદા વીતો હેતુઃ સ્વબુદ્ધાવવહિતવિજ્ઞાનસરૂપં વિજ્ઞાનાન્તરમાદધાનેન
વક્ત્રા પ્રતિપાદ્યાદૌ વાક્યભાવમુપનીયતે ।વાક્યમન્તરેણાર્થસ્ય બુદ્ધ્યન્તરે
સંક્રામયિતુમશક્યત્વાત્, તદાઽવયવિવાક્યં પરિકલ્પ્યતે ।
તસ્ય પુનરવયવાઃ
જિજ્ઞાસાસંશયપ્રયોજનશક્યપ્રાપ્તિસંશયવ્યુદાસલક્ષણાશ્ચ વ્યાખ્યાઙ્ગમ્ ।
પ્રતિજ્ઞાહેતુદૃષ્ટાન્તોપસંહારનિગમનાનિ પરપ્રતિપાદનાઙ્ગમિતિ ।
તત્ર જ્ઞાતુમિચ્છા જિજ્ઞાસા । કશ્ચિત્ કંચિદુપસદ્યાહ-
પુરુષં જ્ઞાતુમિચ્છામિ । કિમસ્તિ નાસ્તીતિ ? કુતઃ સંશય ઇતિ
પર્યનુયુક્તઃ પ્રત્યાહ- અનુપલભ્યમાનસ્યોભયથા દૃષ્ટત્વાત્ ।
ઇહાનુપલભ્યમાનમુભયથા દૃષ્ટમ્- સદ્ભૂતમસદ્ભૂતં ચેતિ । સદ્ભૂતં
ચાર્કેન્દુમણ્ડલાપરભાગાદિ, અસદ્ભૂતં ચ શશવિષાણાદિ । અયમપિ
ચાત્મા નોપલભ્યતે । અતઃ સંશયઃ કિમસ્તિ નાસ્તીતિ ? કિમસ્યાશ્ચિન્તાયાઃ
પ્રયોજનમિતિ પૃષ્ટો વ્યાચષ્ટે - શાસ્ત્રતત્ત્વાધિગમઃ,
તતશ્ચ મોક્ષાવાપ્તિઃ । કથમિતિ ? યદિ તાવદયમાત્માઽસ્તિ તતોઽસ્ય
અપ્રકૃતિત્વૌદાસીન્યવિભુત્વાદિસત્ત્વવિજ્ઞાનાન્નૈરાત્મ્યભ્રાન્તિવિપક્ષભૂતાદપવર્ગપ્રાપ્તિરવશ્યંભાવિનીતિ
યદુક્તમ્ વ્યક્તાવ્યક્તજ્ઞવિજ્ઞાનાન્મોક્ષોઽવાપ્યત
ઇતિ તચ્છાસ્ત્રમર્થવદ્ ભવતીતિ । અથ નાસ્તીતિ
નિશ્ચીયતે તેન સામાન્યતોદૃષ્ટાદનુમાનાત્તદ્વદન્યેઽપિ
પદાર્થા ન સન્તીતિ વિપ્રલમ્ભભૂયિષ્ઠમાર્ષં
દર્શનમપહાયાત્મગ્રહદૃષ્ટિવિગમાલ્લોકોત્તર્મવલમ્બનં શૂન્યં
ધ્યાનવિષયમુપસમ્પ્રાપ્તસ્ત્રૈધાતુકક્લેશનિરોધલક્ષણમાત્યન્તિકં
નિર્વાણમવાપ્સ્યતીતિ । શક્યશ્ચાયમર્થો નિશ્ચેતુમ્, પ્રમાણત્રયપરિગ્રહાદિતિ
વ્યવસ્થિતે, વ્યુદાસ્ય સંશયં સાધ્યાવધારણં પ્રતિજ્ઞા । સાધ્યસ્ય
યદવધારણમસ્તિ પુરુષ ઇતિ સા પ્રતિજ્ઞા ।
સાધનસમાસવચનં હેતુઃ । સાધ્યતેઽનેનેતિ સાધનં લિઙ્ગમ્ । સમાસઃ
સંક્ષેપઃ । સાધનસ્ય સમાસવચનં સાધનસમાસવચનમ્ । સાધનગ્રહણં
તદાભાસપ્રતિષેધાર્થમ્ । ન હિ તાનિ સાધનં, સંશયવિપર્યયહેતુત્વાત્ ।
સમાસગ્રહણમવયવાન્તરાવકાશપ્રદાનાર્થમ્ । લિઙ્ગનિર્દેશમાત્રં હેતુઃ ।
યસ્તુ તસ્ય સાધ્યસહભાવિત્વલક્ષણઃ પ્રપઞ્ચઃ સોઽવયવાન્તરાણીત્યુક્તં
ભવતિ ।
ઉદાહરણન્ત્વત્ર નિદર્શનં દૃષ્ટાન્તઃ । તસ્ય સાધનસ્ય સાધ્યેન

સહભાવિત્વનિદર્શનં યદસૌ દૃષ્ટાન્તઃ । તદ્યથા સંહત્યકારિણાં પરાર્થત્વં દૃષ્ટં, યથા શયનાસનરથશરણાનામ્ । વ્યતિરેકસ્ત્વવીતસ્ય પ્રસઙ્ગિધર્માન્તરનિવૃત્તિરૂપત્વાત્તદન્તર્ભૂત ઇતિ તદર્થં વૈધર્મ્યદૃષ્ટાન્ત ઉચ્યતે ।

સાધ્યદદૃષ્ટાન્તયોરેકક્રિયોપસંહારઃ ઉપનયઃ ।

સાધ્યસ્ય ચક્ષુરાદિપારાર્થ્યલક્ષણસ્ય, દૃષ્ટાન્તસ્ય ચ શયનાદેરેકક્રિયોપસંહારઃ । તત્રાર્થાન્તરભૂતત્વાત્ સાધ્યદૃષ્ટાન્તયોરઞ્જસા નૈકક્રિયોપપદ્યતે । તેનૈવ તસ્યાનિદર્શનાદિત્યતો ધર્મસામાન્યાદ્યથેદં તથેદમિત્યેકક્રિયોપચર્યતે । યથા શયનાદયઃ સંહતત્વાત્પરાર્થા એવં ચક્ષુરાદિભિરપિ પરાર્થૈર્ભવિતવ્યમ્ । યોઽસૌ પરઃ સ પુરુષઃ ।

તદ્વશાત્પ્રતિજ્ઞાભ્યાસો નિગમનમ્ । હેતુદૃષ્ટાન્તોપસંહારાપેક્ષયા યઃ પુનરભ્યાસઃ તન્નિગમનમ્ । તદ્યથા- તસ્માદસ્તિ પુરુષ ઇત્યેષામવયવાનાં પરસ્પરસમ્બન્ધાદ્વિશિષ્ટાર્થઃ સમુદાયો વાક્યમિત્યુપદિશ્યતે । વાક્યમપ્યનેકં યદા ગુણીભૂતસ્વાર્થમર્થાન્તરોપકારિત્વાદિતરેણ સંસૃજ્યતે તદા શાસ્ત્રમપ્યેકં વાક્યમિત્યવસીયતે ।

આહ- જિજ્ઞાસાદ્યનભિધાનમ્ । તદ્વ્યતિરેકેણાપિ સ્વયમર્થગતેઃ । સ્વનિશ્ચયવચ્ચ પરપ્રતિપાદનાત્ । યથા હિ સ્વયમુત્પદ્યતે નિશ્ચેતુઃ પ્રત્યયસ્તથૈવાન્યઃ પ્રત્યાય્ય ઇત્યેતન્ન્યાય્યમ્ । ન ચ સ્વયમેવાર્થં પ્રતિપદ્યમાનસ્ય જિજ્ઞાસાદીનાં તત્ર વ્યાપારઃ । તસ્માત્ પરાર્થમપ્યેષામુપાદાનં ન કલ્પ્યતે । સંશયવચનાનર્થક્યમ્ ચ, પ્રતીતાર્થત્વાત્ । નિશ્ચિતૌ હિ વાદિપ્રતિવાદિનૌ સ્વપક્ષયોઃ, તયોરિતરેતરસંશયપર્યનુયોગે નાસ્તિ પ્રયોજનમ્ । કિંચાન્યત્- પ્રયોજનશક્યપ્રાપ્ત્યવચનં ચ । સાધનાભ્યુપગમાદેવ તત્પ્રતીતેઃ । ન હિ મહતાં નિષ્પ્રયોજના પ્રવૃત્તિરુપપદ્યતે । ન ચાશક્યેઽર્થે હિમવત્સમીકરણાદિષુ પ્રવૃત્તેઃ । તસ્માદનર્થકં તદભિધાનમ્ । તદ્ભાવે ભાવાદિતિ ચેત્ સ્યાદેતત્ સત્સુ જિજ્ઞાસાદિષુ તત્ત્વાધિગમં પ્રતિ પ્રવૃત્તિર્ભવતિ, અસત્સુ ન ભવતિ । તસ્માદેતાન્યપિ સાધનં ભવિષ્યન્તીતિ । એતચ્ચાનુપપન્નમ્ । કસ્માત્ ? અતિપ્રસંગાત્ । સત્સ્વાત્માન્તઃકરણેન્દ્રિયાલોકવિષયેષુ પ્રવૃત્તિદર્શનાત્તેષામપિ સાધનત્વં સ્યાત્ । અનિષ્ટં ચૈતત્ । તસ્માજ્જિજ્ઞાસાદયોઽનર્થકાઃ । પ્રતિજ્ઞાદયો દુર્વિહિતાઃ । કથમ્

? સાધ્યાવધારણસ્યાવયવાન્તરેષ્વપ્યુપપત્તેઃ । યદિ સાધ્યાવધારણં પ્રતિજ્ઞેત્યુચ્યતે તેન સાધ્યસ્ય હેતોર્દૃષ્ટાન્તસ્ય વા યદવધારણં તદપિ પ્રતિજ્ઞા પ્રાપ્નોતિ, નિમિત્તાવિશેષાત્ । સાધ્યશબ્દો હ્યયં સામાન્યવૃત્તિઃ । ન યત્નમન્તરેણ વિશેષેઽવસ્થાપયિતું શક્યત ઇતિ । કિં ચ હેતુલક્ષણાનુપપત્તિશ્ચ, સાધનાનુપદેશાત્ । યો હિ સાધનસમાસવચનં હેતુરિત્યેતલ્લક્ષણમાચષ્ટે તેન પ્રાક્સાધનમભિધેયં સ્યાત્ । તતો વક્તવ્યમમુષ્ય સમાસવચનં હેતુરિતિ ન ચૈવમુક્તમ્ । તસ્માદલક્ષણમેતત્ । કિંચાન્યત્, સમાસવચનં ચ વિસ્તરનિષેધપ્રસઙ્ગાત્ । યદિ હિ સમાસગ્રહણં ક્રિયતે કિં પ્રાપ્તં યોઽયમાધ્યાત્મિકાનાં ભેદાનાં કાર્યકારણાત્મકાનાં ચૈકજાતિસમન્વયો દૃષ્ટ ઇત્યેવમાદિઃ સાધનપ્રપઞ્ચઃ સોઽહેતુરિત્યુક્તં ભવતિ । તસ્માત્ સમાસગ્રહણમનિષ્ટમ્ । લિઙ્ગાભિધાનાદદોષ ઇતિ ચેત્ સ્યાન્મતમ્, લિઙ્ગં હિ નઃ સાધનમ્ । તસ્યાત્ર નિર્દેશઃ કૃતઃ । તસ્માત્સ્વમતિજાડ્યાદિદમનિષ્ટમધ્યારોપ્યતે, ન ત્વસ્મત્પ્રમાદાદિતિ । એતદપ્યયુક્તમ્ । કસ્માત્ ? તસ્ય દ્વિધા ભિન્નસ્ય પઞ્ચધા સાધનભાવાત્ । તદ્ધિ લિઙ્ગં વીતાવીતત્વેનેષ્ટમ્ । તેન દ્વિધા ભિન્નમ્ । તત્રાપિ વીતઃ પઞ્ચપ્રભેદઃ ઇત્યતઃ સમુદાયાન્નિષ્કૃષ્ટસ્યૈકસ્ય લિઙ્ગત્વમશક્યં વક્તુમિતિ । કિઞ્ચાન્યત્, દૃષ્ટાન્તલક્ષણાયોગશ્ચ, શબ્દાર્થલક્ષણેઽનિષ્ટપ્રસઙ્ગાત્ । તન્નિદર્શનં દૃષ્ટાન્ત ઇતિ । અત્ર શબ્દો વા યેન સાધ્યસાધને નિદર્શ્યેતે સ દૃષ્ટાન્તઃ સ્યાત્ ? અર્થો વા યત્ર નિદર્શ્યતે ? કિઞ્ચાતઃ ? ન તદ્યદિ તાવચ્છબ્દઃ પરિગૃહ્યતે તત ઉપનયલક્ષણં બાધ્યતે । કસ્માત્ ? ન હિ યથાઽભિધાનં તથા સાધ્યમિત્યેકક્રિયા યુજ્યતે ઇતિ । અથાર્થઃ પરિગૃહ્યતે તેનાભિધેયસ્ય વાક્યાનવયવત્વાત્પઞ્ચાવયવત્વવિરોધઃ । કિઞ્ચાન્યત્- દૃષ્ટાન્તોપનયનિગમનાભેદશ્ચ હેતુપ્રતિજ્ઞાર્થાભિધાનાત્ । સાધનત્વમેવ સાધ્યાવિનાભાવિત્વલક્ષણં દૃષ્ટાન્તોપનયયોઃ પ્રત્યાયય(yya)તે । પ્રતિજ્ઞાર્થં ચ નિગમનસ્ય નાવયવાન્તરત્વં યુજ્યતે । ઉચ્યતે- યદુચ્યતે સ્વનિશ્ચયેનાઙ્ગભાવગમનાત્પરપ્રત્યાયનાર્થં જિજ્ઞાસાધનભિધાનમિતિ અત્ર બ્રૂમઃ- ન, ઉક્તત્વાત્ । ઉક્તમેતત્ પુરસ્તાદ્વ્યાખ્યાઙ્ગં જિજ્ઞાસાદયઃ । સર્વસ્ય ચાનુગ્રહઃ કર્તવ્ય ઇત્યેવમર્થં શાસ્ત્રવ્યાખ્યાનં વિપશ્ચિદ્ભિઃ પ્રતાયતે, ન સ્વાર્થં સ્વસદૃષબુદ્ધ્યર્થં વા । તત્રૈવં કલ્પ્યમાને યે વ્યુત્પાદ્યાસ્તાન્પ્રતિ નૈવૈષામાનર્થક્યમ્ । અથૈતદનિષ્ટમ્- યદુક્તં

સન્દિગ્ધવિપર્યસ્તાવ્યુત્પન્નબુદ્ધ્યનુગ્રહાર્થો હિ સતાં વિનિશ્ચયઃ શાસ્ત્રકથેત્યસ્ય વ્યાઘાતઃ । કિં ચ નિયમાનભ્યુપગમાત્ । ન હિ વયમેષામાવશ્યકમભિધાનમાચક્ષ્મહે, કિન્તર્હિ યદા પ્રતિવાદી પર્યનુયુઙ્ક્તે- કિં જિજ્ઞાસસ ઇતિ અવશ્યમભિધાનીયં શબ્દમિતિ । કેન ધર્મેણ, કિં નિત્યોઽનિત્ય ઇતિ ? કુતઃ સંશયઃ ? મૂર્તત્વાત્ । યસ્તુ ન પર્યનુયુઙ્ક્તે ન તં પ્રત્યેતે વાચ્યાઃ । ક્વચિદાનર્થક્યાત્ સર્વત્ર પ્રસઙ્ગ ઇતિ ચેન્ન ઇતરેષામપિ તત્પ્રસઙ્ગાત્ । પ્રતિજ્ઞાદીનામપિ તર્હિ ક્વચિદનભિધાનમતસ્તેષામપિ સર્વત્રાવચનં પ્રસજ્યતે । તથા ચ ભવતોક્તં કસ્યચિત્તુ કિઞ્ચિત્ પ્રસિદ્ધમેવ ભવતીત્યન્યતરોક્તિરપિ સાધનં ભવતિ, શબ્દ ઇવાર્થદ્વયપ્રતીતત્વાદુભયાનભિધાનમિતિ । યદપ્યુક્તં નિશ્ચિતત્વાત્ સંશયાવચનમિતિ અસદેતત્ । કસ્માત્ ? ઉક્તત્વાત્ । ઉક્તમેતત્ સતિ પર્યનુયોગે તદ્વચનમિતિ । એતેન પ્રયોજનશક્યપ્રાપ્તી પ્રત્યુક્તે । યો હિ પર્યનુયુઞ્જીત કિં પ્રયોજનોઽયં શક્યો વાઽયમર્થ ઇતિ તં પ્રતિ વાચ્યમેતત્ । યદપ્યુક્તં તદ્ભાવે ભાવાદિતિ- ન, અનભ્યુપગમાત્ । ન બ્રૂમો યસ્માત્ સત્સુ જિજ્ઞાસાદિષુ તત્ત્વાધિગમસદ્ભાવસ્તસ્માદેતેષામવયવત્વમિતિ । કિન્તર્હિ યં પ્રત્યેષાં પ્રતિપત્તાવઙ્ગભાવગમનં તં પ્રત્યેતાનિ સાધનમિતિ । યદપ્યુક્તં સાધ્યાભિધાયિનઃ પ્રતિજ્ઞાભ્યુપગમાદ્ધેતુદૃષ્ટાન્તયોરપિ તત્પ્રસઙ્ગ ઇતિ અયુક્તમેતત્ । કસ્માત્ ? જિજ્ઞાસાદેઃ સદ્ભાવે સતિ તત્પ્રતીતેઃ । યદ્યપિ સાધ્યશબ્દોઽયમવિશેષેણ સિદ્ધત્વાદર્થાન્તરમાચષ્ટે તથાપિ યં પ્રતિ જિજ્ઞાસાસંશયપ્રયોજનશક્યપ્રાપ્તયસ્તસ્ય વ્યુદસ્ય સંશયં સાધ્યસ્યાવધારણં પ્રતિજ્ઞા, ન હેતુદૃષ્ટાન્તયોસ્તદસ્તીત્યસદેતત્ । કિંચાન્યત્ તદ્ભાવેઽવિરોધાત્ । યદા તુ જિજ્ઞાસાદયો હેતૌ દૃષ્ટાન્તે વા ભવન્તિ તદા કિં કૃતકઃ શબ્દોઽથ ન કૃતકોઽથ બુદ્ધિર્નિત્યા ક્ષણિકા વેતિ ભવત્યેવ તદવધારણં પ્રતિજ્ઞા । યદપ્યુક્તમ્ સાધનાનુપદેશાદ્ધેતુલક્ષણાયોગ ઇતિ અસદેતત્ । કસ્માત્ ? લોકપ્રસિદ્ધત્વાત્ । યથા સાધ્યવત્વેનેપ્સિતઃ પક્ષ ઇતિ પ્રતિજ્ઞાલક્ષણમાચક્ષાણો ભવાન્ન સાધ્યલક્ષણમાચષ્ટે, કસ્માત્ ? સાધનીયં સાધ્યમિતિ લોકે સિદ્ધત્વાત્, એવં સાધનસમાસવચનં હેતુલક્ષણમાચક્ષાણા વયં ન સાધનમાચક્ષ્મહે । કસ્માત્ ? સાધ્યતેઽનેનેતિ કૃત્વા સાધનમિતિ લોકે સિદ્ધત્વાત્ । ઉપેત્ય વાઽનુમાનનિર્દેશાત્ । લિઙ્ગં હિ નઃ સાધનં, તચ્ચ નિર્દિષ્ટમિતિ । યત્તૂક્તં વીતાવીતભેદે સતિ પઞ્ચધા સાધનભાવાદિતિ, અત્ર બ્રૂમઃ,

અયુક્તમેતત્ । કસ્માત્ ? સમાસગ્રહણસામર્થ્યાત્ । અતએવ સમાસગ્રહણં ક્રિયતે, સાધનસ્વરૂપાભિધાનમાત્રં હેતુરિતિ યથા વિજ્ઞાયતે । પ્રપઞ્ચસ્ત્વવયવાન્તરાણીતિ । એતેન વિસ્તરપ્રતિષેધપ્રસઙ્ગઃ પ્રયુક્તઃ । કથમ્ ? ન હિ સમાસશબ્દસ્યાયમર્થ ઇતિ કૃત્વા । યત્પુનરેતદુક્તં શબ્દાર્થકલ્પનેઽનિષ્ટપ્રસઙ્ગાદ્ દૃષ્ટાન્તલક્ષણાયોગ ઇતિ, અસ્તુ તાવચ્છબ્દો દૃષ્ટાન્તઃ । યત્તૂક્તં ઉપનયલક્ષણં બાધ્યત ઇતિ અનુપપન્નમેતત્ । કસ્માત્ ? અસમ્ભવે સતિ સમ્બન્ધ્યન્તરે કાર્યવિજ્ઞાનાત્ । શબ્દેઽસમ્ભવાદર્થે કાર્યં વિજ્ઞાસ્યામઃ । અથવા પુનરસ્ત્વર્થો દૃષ્ટાન્તઃ । યત્તૂક્તમભિધેયસ્ય વાક્યાનવયવત્વાત્પઞ્ચાવયવત્વવિરોધ ઇતિ અર્થેઽસમ્ભવાચ્છબ્દે કાર્યં વિજ્ઞાસ્યામઃ । યદપ્યુક્તમ્ પ્રતિજ્ઞાહેત્વર્થાભિધાનાદ્ દૃષ્ટાન્તોપનયનિગમનાનાં નાવયવાન્તરત્વમિતિ અયમદોષઃ । કસ્માત્ ? અપ્રતિજ્ઞાનાત્ । ન હ્યેતદસ્માભિઃ પ્રતિજ્ઞાયતે । કિં તર્હિ પ્રમેયવચનં પ્રતિજ્ઞા । પ્રમાણરૂપમાત્રવચનં હેતુઃ । તસ્ય પ્રમેયસહભાવિત્વનિદર્શનં દૃષ્ટાન્તઃ । સાધ્યદૃષ્ટાન્તયોર્ધર્મસામાન્યાદેકક્રિયોપસંહાર ઉપનયઃ । સમુદાયસ્ય સાધ્યસિદ્ધયે વ્યાપારનિર્દેશો નિગમનમ્ । તસ્માદયુક્તમેતત્ । કિંચાન્યત્ । એકસ્ય સાધનભાવપરિકલ્પનાવત્તત્પરિકલ્પને દોષાભાવાત્ । યથા વાક્યમ્ એવં ચ તદર્થશ્ચ મુખ્યૌ શબ્દાર્થૌ, તયોરભિન્નાર્થત્વાદિત્યભ્યુપગમાદેકમેવાર્થમભાગમક્રમં ચ બુદ્ધાવવસ્થાપ્ય શ્રોત્રગ્રાહ્યત્વાનિત્યત્વકૃતકત્વપ્રમેયત્વાદિલક્ષણાનાં શક્તીનામપોદ્ધારાત્સાધ્યસાધનસંશયરૂપાપન્નં વક્તારો ભિન્નમાચક્ષતે, ન ચૈકાર્થધર્મત્વાત્સાધ્યસાધનસંશયાભિધાનાનામેકત્વમનુષજ્યતે । તથૈકસ્ય સાધનસ્ય સાધ્યધર્મતત્સહભાવિત્વલક્ષણાનાં શક્તીનામભિધાનં હેતુદૃષ્ટાન્તાદિનાઽવયવાન્તરં નઃ સ્યાત્ । તત્ર યદુક્તં પ્રતિજ્ઞાહેત્વર્થાભિધાનાદ્ દૃષ્ટાન્તોપનયનિગમનાનાં નાવયવાન્તરત્વમિતિ એતદયુક્તમ્ । તસ્માત્સૂક્તં દશાવયવો વીતઃ ।

તસ્ય પુરસ્તાત્પ્રયોગં ન્યાય્યમાચાર્યા મન્યન્તે । કિં કારણમ્ ? અવીતલક્ષણાવિરોધાત્ । અવીતસ્ય હિ લક્ષણં પરિશેષતઃ સાધ્યાનુગ્રહઃ । તત્રાન્વયદિના સ્વરૂપેણાધિગતે પ્રધાનલક્ષણે ધર્મિણિ પરપક્ષપ્રતિષેધમાત્રેણોપસંહારે ક્રિયમાણે પરિશેષલક્ષણં બાધ્યતે । કસ્માત્ ? ઇહ પ્રતિષેધમાત્રમાદાવુચ્યતે । તેન યથા હેતુવિરોધાત્પરમાણ્વદિભ્યો ન વ્યક્તમુત્પદ્યતે તથા હેત્વભાવાત્

પ્રધાનાદપિ નોત્પદ્યતે ઇતિ શક્યં કલ્પયિતુમ્ । અતસ્તદ્વ્યવચ્છેદોઽપિ ચાવીતાદ્ગમ્યતે । તથા સતિ કઃ પરિશેષઃ સ્યાત્ ? સ્વરૂપેણ તુ પરિચ્છિન્ને ધર્મિણિ ઉપસંહારો યથાવદવકલ્પ્યતે । ન ચેત્પરમાણ્વાદિભ્યો વ્યક્તમુત્પદ્યતે પરિશેષતઃ પ્રધાનાદેવ વ્યક્તમુત્પદ્યતે ઇતિ યથોક્તેભ્યોઽન્વયાદિભ્ય ઇત્યુક્તં ભવતિ । તસ્માત્પ્રાગ્વીતપ્રયોગ ઇતિ સિદ્ધં સામાન્યતોદૃષ્ટાદનુમાનાદતીન્દ્રિયાણામર્થાનાં સમધિગમ ઇતિ ।
આહ- ન, કારણાન્તરતોઽનુપલભ્યમાનાનામગ્રહણાત્ । યદિ સામાન્યતોદૃષ્ટાદનુમાનાત્સર્વં પરોક્ષમધિગમ્યતે ઇત્યભ્યુપગમ્યતે પ્રાપ્તમિદં યેષામપ્યર્થાનાં કારણાન્તરતોઽનુપલબ્ધિસ્તેષામપિ તસ્માદેવ ગ્રહણમ્ । તદ્યથા-

॥ અતિદૂરાત્સામીપ્યાદિન્દ્રિયઘાતાન્મનોઽનવસ્થાનાત્ ।
સૌક્ષ્મ્યાદ્વ્યવધાનાદભિભવાત્સમાનાભિહારાચ્ચ ॥ ૭ ॥

તત્રાતિદૂરાત્તાવત્ તદ્યથા પ્રોડ્ડીનસ્ય શકુનેઃ ।
અતિસામીપ્યાદઞ્જનપ્રભૃતીનામ્ । ઇન્દ્રિયઘાતાચ્છબ્દાદીનામ્ ।
મનોઽનવસ્થાનાચ્છકટાદીનામ્ । સૌક્ષ્મ્યાત્ત્રુટ્યાદીનામ્ ।
વ્યવધાનાદ્ધિરણ્યાદીનામ્ । અભિભવાત્સૂર્યપ્રકાશાદ્ગ્રહાદીનામ્ ।
સમાનાભિહારાદનેકપ્રદીપપ્રભાણામ્ । ચશબ્દાદૈશ્વર્યયોગાદ્દેવાદીનામ્ ।
ન ચાર્હતિ ભવિતું ધર્મસામાન્યાનુપપત્તેઃ । તસ્માદયુક્તં સર્વમતીન્દ્રિયમનુમાનગ્રાહ્યમિતિ ।
ઉચ્યતે- શક્યં તાવત્કારણાન્તરતોઽનુપલભ્યમાનં કિંચિત્સામાન્યતોદૃષ્ટાદનુમાનાદધિગન્તુમ્ । તદ્યથા સમીપાવસ્થિતસ્ય શકુનેરયત્નેન ચક્ષુષા ગ્રહણં, યથા યથા તુ વિપ્રકર્ષં પ્રતિપદ્યતે પ્રણિધાય ચક્ષુર્ગૃહ્યતે તાવદ્યાવત્ક્રમેણાદર્શનમુપસમ્પ્રાપ્તઃ । તત્ર દેશવિપ્રકર્ષે પ્રચીયમાનેઽદર્શનમુપચીયમાનમવગમ્યાત્યન્તાદર્શનમપિ પશ્ચાત્તદ્ધેતુકમનુમીયતે । તથા નાતિસમીપાવસ્થિતસ્ય દ્રવ્યસ્યાસ્ફુટમાકારમવધાર્ય પશ્ચાદ્યથા યથારાદુપસમ્પદ્યતે તથા તથા પ્રતિપદ્યમાનદર્શનશક્તયોઽનુમાતારઃ કૃષ્ણસારાઞ્જનપ્રભૃતીનામગ્રહણમતિસામીપ્યાદનુમીયતે । તથા ગિરિસરિત્સમુદ્રસમીપવર્તિનં શ્રવણપ્રતિઘાતિનં પ્રાક્ શબ્દમુપલભ્ય પશ્ચાત્તસ્મિન્નેવ દેશે શબ્દમગૃહ્ણાનાઃ શ્રવણોપઘાતમનુમિમતે ।

॥ તસ્માદપિ ચાસિદ્ધં પરોક્ષમાપ્તાગમાત્સાધ્યમ્ ॥ ૬ ॥

તસ્માદપિ ચાસિદ્ધમિત્યનેનાગમવિષયે સામાન્યતોદૃષ્ટસ્યાનવતારમાચષ્ટે ।
પરોક્ષમિતિ વિષયં પ્રતિ નિર્દિશતિ । આપ્તાગમાત્સાધ્યમિતિ વિષયિણમાહ ।
એતદુક્તં ભવતિ- તસ્માદપિ સામાન્યતોદૃષ્ટાદનુમાનાદ્યન્ન
સિદ્ધ્યતિ પ્રત્યક્ષગ્રાહ્યમપિ સ્વયમદૃષ્ટં
કારણાન્તરપ્રતિબદ્ધવિષયભાવમત્યન્તપરોક્ષં વા સ્વર્ગાપવર્ગદેવતાદિ
ધર્મસામાન્યરહિતં તદાપ્તાગમાત્સાધ્યમ્ ।
સર્વવાદસિદ્ધિપ્રસઙ્ગાદપ્રામાણ્યમિતિ ચેત્ સ્યાદેતત્,
યદિ તર્હ્યાગમઃ પ્રમાણીક્રિયતે તેન પ્રતિશાસ્ત્રં
યેઽભિયુક્તાસ્તેષાં પ્રામાણ્યમિત્યવશ્યમભ્યુપગન્તવ્યમ્ ।
એવં સતિ સર્વાચાર્યપ્રામાણ્યાદનેકવિકલ્પવિચિત્રા
તર્કવૃત્તિરિત્યપરિનિશ્ચિતત્વાદ્ભ્રાન્તિઃ પ્રસજ્યેત ।
તથા ચ સતિ જિજ્ઞાસૂનામપવર્ગપ્રાપ્તિવિઘાતઃ સ્યાત્ ।
તસ્માદ્ભિષજેવ ભવતા પરોપદેશઃ પ્રયુક્તો નાસ્માનયં
પ્રીણાતિ । એતચ્ચાયુક્તમ્ । કસ્માત્ ? આપ્તલક્ષણસ્યાનવધારિતત્વાત્ ।
વ્યપગતરાગાદિદોષાણામસન્દિગ્ધમતીનામતીન્દ્રિયાર્થદૃશ્વનામીશ્વરમહર્ષીણામાપ્તત્વમાચક્ષ્મહે,
ન સર્વેષામ્ । યદિ ચાન્યોઽપ્યેવંધર્મોઽસ્તિ ભવતુ પ્રમાણમ્ । કિંચાન્યત્ ।
સ્વવિષયે ચ તત્પ્રામાણ્યસ્યાદોષવત્ત્વાત્ । યસ્ય ખલ્વપિ યો વિષયસ્તસ્ય
તસ્મિન્વિષયે વચોઽન્તરેણાપિ સાધનં પ્રમાણમિત્યવશ્યમભ્યુપગન્તવ્યમ્ ।
ઇતરથા પ્રતિશાસ્ત્રમાચારસ્થિતિનિયમાનામદૃષ્ટાર્થાનામપ્રતિપત્તિઃ સ્યાત્ ।
એતેનાખિલલિઙ્ગાદાગમોઽર્થાન્તરમ્ । યસ્માન્મહતાભિધાનેન યુક્તિરન્વિષ્યતે
તસ્માદ્યુક્ત્યપેક્ષાલ્લિઙ્ગાદાગમોઽર્થાન્તરમિતિ ।
આહ ન, અન્વયવ્યતિરેકાભ્યામધિગમહેતુત્વાત્ । યથા
કૃતકત્વાદિધર્મોઽનિત્યત્વાદૌ વિષયે દૃષ્ટસ્તદભાવે ચાદૃષ્ટ
ઇત્યનિત્યેઽર્થે નિશ્ચયમાદધાતિ એવં શબ્દોઽપિ સ્વાર્થે તજ્જાતીયે ન
દૃષ્ટઃ પ્રતિપત્તિહેતુર્ભવતિ । તસ્માદનુમાનાદભિન્ન એવાયમિતિ ।
ઉચ્યતે- ચન્દ્રાદિષ્વિદાનીમસાધારણવિષયેષુ કા પ્રતિપત્તિઃ સ્યાદિતિ ?
આહ- અવયવાપેક્ષત્વાચ્ચન્દ્રશબ્દો હ્યનેકેષુ વચનેષુ વર્તતે,
જાતિદ્રવ્યગુણક્રિયાસુ ચ, તથા ડિત્થાદિશબ્દઃ, તસ્માદેવંજાતીયકાનામપિ
ચાનુમાનાદભેદઃ ।
ઉચ્યતે- સ્વર્ગાદીનાં તર્હિ કથમનુમાનત્વમિતિ ?
આહ- આપ્તવચોઽવિસંવાદસામર્થ્યાત્ । યથા હૈરણ્યકપ્રભૃતીનામાપ્તાનાં

વાક્યમવ્યભિચારિ એવમીશ્વરમહર્ષયોઽપિ ચાપ્તાઃ । તસ્માદેષામપિ
વાક્યમવ્યભિચારીતિ શક્યમત્રાપિ સામાન્યવિષયત્વં કલ્પયિતુમ્ ।
એવમનુમાનમેવાગમ ઇતિ ।
ઉચ્યતે- યદુક્તમન્વયવ્યતિરેકાભ્યામધિગમહેતુત્વાચ્છબ્દોઽનુમાનમિતિ
અત્ર બ્રૂમઃ ન, અપ્રતિજ્ઞાનાત્ । ન હિ વયં
વ્યવહારાનુપાતિનાં વૃક્ષાદીનામાગમત્વમાચક્ષ્મહે,
કિં તર્હિ સ્વર્ગાદીનામત્યન્તપરોક્ષવિષયાણામ્ ।
તસ્માદપ્રતિજ્ઞાનાદનુપાલમ્ભોઽયમિતિ । ઉપેત્ય વા વક્ત્રપેક્ષત્વાત્ ।
અથવોપેત્યાપિ સર્વશબ્દાનામાગમત્વમનુમાનાદર્થાન્તરભાવં બ્રૂમઃ । તથા હિ
કૃતકત્વાદિતિ લિઙ્ગં ચણ્ડાલકાપાલિકૈરપિ પ્રયુજ્યમાનં સાહચર્યાપેક્ષં
નિશ્ચયમાદધાતિ । ન વક્તૃવિશેષમપેક્ષતે । વક્તૃવિશેષાપેક્ષસ્તુ
શબ્દઃ । તસ્માન્ન લિઙ્ગમ્ । કિં ચાન્યત્ વિપર્યયાત્ । ન હિ લિઙ્ગં દેશાન્તરે
વિપર્યેતિ । શબ્દસ્ય તુ દૃષ્ટો વિપર્યયઃ । સ એવ હિ શબ્દો દેશાન્તરે,
કાલાન્તરે તુ સ્વાર્થં ન પ્રત્યાયયતિ અર્થાન્તરં ચ પ્રશંસતિ ।
સમ્બન્ધાનુપલબ્ધેરિતિ ચેત્ સ્યાદેતત્, સમ્બન્ધાન્તરં
દેશાન્તરેઽનુપલક્ષિતમ્ । તસ્માચ્છબ્દાર્થવિપર્યય ઇતિ । એતદનુપપન્નમ્ ।
લિઙ્ગવૈધર્મ્યાત્ । ન હિ પ્રત્યક્ષાભિમતસ્ય લિઙ્ગિન ઉપલબ્ધૌ
ગવાદેર્લિઙ્ગં નોપલભ્યતે । શબ્દસ્તૂપલભ્યમાનો ગવાદૌ નોપલભ્યતે ।
તસ્માન્ન લિઙ્ગમ્ । કિંચાન્યત્ । દેશનિયમાત્ । ન હિ લિઙ્ગસ્ય દેશનિયમો
દૃષ્ટઃ । અસ્તિ તુ શબ્દસ્ય દેશનિયમઃ । તદ્યથા શવતિર્ગતિકર્મા
કામ્બોજેષ્વેવ ભાષ્યતે । રંહતિઃ પ્રાચ્યેષુ, તથા દાતિર્લવનાર્થઃ,
દાત્રમુદીચ્યેષુ નાન્યત્ર । તસ્માન્ન શબ્દો લિઙ્ગમ્ । કિંચાન્યત્, ઇષ્ટતો
વિનિયોગાત્ । સ્વાભાવિકં લિઙ્ગમ્ । ન હિ ધૂમોગ્નેરપકૃષ્ય શક્યતેઽપ્સુ
વાયાવાકાશેઽન્યત્ર વા નિવેશયિતુમ્ । શબ્દસ્તુ યત્ર વક્તુરભિપ્રાયસ્તત્ર
તત્ર વિનિવેશ્યતે । યથ વૃદ્ધ્યાદયઃ શબ્દાઃ સ્વાર્થાભ્યુચ્ચયાદિષુ
પ્રસિદ્ધા આદૈક્ષુ વિનિવેશ્યન્તે । તસ્માન્ન તે લિઙ્ગમ્ ।
સર્વાભિધાનશક્તિત્વાચ્છબ્દસ્યાદોષ ઇતિ ચેત્ સ્યાન્મતં સર્વાભિધાનશક્તિઃ
શબ્દઃ સર્વાભિધેયશક્તિશ્ચાર્થસ્તયોઃ પુરુષવ્યાપારેણ શક્ત્યવવચ્છેદઃ
ક્રિયતે । કથમ્ ? અયમેવ શબ્દોઽસ્યાર્થસ્ય પ્રત્યાયકો ભવતુ ।
અયમેવ ચાર્થોઽનેન શબ્દેનાભિધીયતામ્ । એતાવતિ પુરુષવ્યાપારઃ ।
તસ્માચ્છબ્દસ્ય સ્વાભાવિકઃ સમ્બન્ધો વક્ત્રપેક્ષયા વ્યજ્યત ઇતિ ।
એતદપ્યન્યુપપન્નમ્ । કસ્માત્ ? સુતરામનુમાનાદર્થાન્તરત્વપ્રસંગાત્ । એવમપિ

કલ્પયિત્વાઽનુમાનાત્સુતરાં શબ્દસ્યાર્થાન્તરત્વમાપદ્યતે । કસ્માત્ ? ન હિ યથા વક્ત્રપેક્ષયા સર્વાર્થસ્ય સતઃ શબ્દસ્ય શક્ત્યવચ્છેદસ્તથા સર્વાર્થં લિઙ્ગં વક્ત્રપેક્ષયાર્થાન્તરાદવચ્છિદ્યતે । યથા ચૈકઃ શબ્દો જગત્યેવમુદિતઃ પુરુષવિનિયોગાપેક્ષઃ સર્વમર્થમભિધાતું સમર્થસ્તથૈકં લિઙ્ગં કયાચિદ્યુક્ત્યા સર્વાર્થપ્રત્યાયનસમર્થમ્ । તસ્માન્ન શબ્દો લિઙ્ગમ્ । યત્પુનરેતદુક્તમ્ ચન્દ્રાદીનામવયવાપેક્ષં સામાન્યમભ્યુપગમ્યતે । તદયુક્તમ્ । અસાધારણત્વાત્ । અનુમાનાભાવે શબ્દપ્રસિદ્ધોઽર્થ ઇતિ વ્યાઘાતઃ । કિં ચાન્યત્ । જાત્યાદિસાધ્યત્વાત્ જાતિગુણદ્રવ્યક્રિયાણાં ચ પરસ્પરતોઽર્થાન્તરત્વં, સમુદાયશ્ચ સાધ્યઃ । તસ્માદયુક્તમેષાં તદપેક્ષયા સામાન્યવિષયત્વમ્ । યદપ્યુક્તમાપ્તવાદાવિસંવાદસામાન્યાત્સ્વર્ગાદિશબ્દાનામનુમાનત્વમિતિ, અત્ર બ્રૂમઃ- એતદપ્યનુપપન્નમ્ । કસ્માત્ ? પ્રમાણવિષયત્વાત્ । સત્યમસ્ત્યેષાં સામાન્યપરિકલ્પના, સા તુ પ્રમાણવિષયા ન તુ પ્રમેયવિષયા । પ્રમેયં તુ સામાન્યમનુમાનમસ્યેત્યયમભ્યુપગમો વઃ  । તચ્ચાસાધારણત્વાત્સ્વર્ગાદીનાં પ્રતિષિદ્ધમ્ । તસ્માત્ત્યજ્યતામિયમાશઙ્કાનુમાનમેવાગમ ઇતિ । અન્યઃ પુનરનુમાનાગમયોરભેદપ્રતિજ્ઞ ઇદમાહ । સ્વર્ગાદયઃ શબ્દા ન પ્રમાણમ્ । કસ્માત્ ? પ્રમાણાન્તરેણ તદર્થાનુપલબ્ધેઃ । યસ્ય હિ શબ્દસ્યાર્થઃ પ્રત્યક્ષતોઽનુમાનતો વા નોપલભ્યતે સ ન પ્રમાણમ્ । ઇતરસ્તુ પ્રમાણમ્ । તદ્યથા નદ્યાસ્તીરે પક્વમામ્રવનં, પથિ ગુડશકટં વિપર્યસ્તમિતિ । ન ચ સ્વર્ગાદિશબ્દાનામર્થઃ પ્રમાણાન્તરેણોપલભ્યતે । તસ્માદ્યથા વિભુરાત્મા સર્વત્ર સુખાદિસમ્ભવાદિત્યેવમાદયો બૌદ્ધં પ્રતિ ધર્મ્યસિદ્ધત્વાદયો યથાર્થાસ્તથા વેદશબ્દા અપિ પ્રાયેણેતિ । એતત્તુ ન યુક્તરૂપમ્ । કસ્માત્ ? અન્યાયેન સર્વશબ્દાપવાદાત્ । કા હ્યત્ર યુક્તિર્યદસ્મદાદિભિરનુપલભ્યમાનાર્થં પ્રમાણભૂતાનામપિ વાક્યમયથાર્થં સ્યાત્ ? સર્વેણ ચાવશ્યં કશ્ચિદાપ્તસ્તસ્ય ચ વાક્યમદૃષ્ટાર્થમિત્યભ્યુપગન્તવ્યમ્ । અતોઽયં તવાત્રાપિ સમાનઃ પ્રસંગઃ । ન ચ પ્રમાણં સ્વાર્થસિદ્ધયે પ્રમાણાન્તરમપેક્ષતે । તત્ર યદિ શબ્દસ્ય પ્રમાણાન્તરાપેક્ષં યથાર્થત્વમાશ્રીયતે તેન ન કેવલં સ્વર્ગાદયઃ કિં તર્હિ શબ્દા એવાપ્રમાણમિતિ પ્રાપ્તમ્ । અનુમાનસ્ય ચ પ્રમાણાન્તરનિરપેક્ષસ્ય ગમકત્વાભ્યુપગમાદાગમસ્ય તતોઽર્થાન્તરત્વં સુતરાં પ્રસજ્યતે । તસ્માદ્યુક્તાગમવિરોધિન એવંવિધા નાસ્તિકવાદાઃ શ્રેયોઽર્થિભિર્દૂરાદપોહ્યા ઇતિ સ્થિતમેતત્- અનુમાનાદસિદ્ધં વસ્તુ યત્તદાપ્તાગમાત્સાધ્યમિતિ ।

એવમસ્ય ત્રિવિધસ્ય પ્રમાણસ્યૈન્દ્રિયિકં કારણાન્તરતોऽનુપલભ્યમાનં ચ પ્રમેયં વ્યાખ્યાતમ્ । એતસ્માત્તુ યદન્યત્તદસદિતિ પ્રત્યવગન્તવ્યમ્ ॥ ૬-૭ ॥

————————-

કારિકા ૮

————————-

આહ, યદ્યેવં પ્રધાનસ્યાસત્ત્વપ્રસઙ્ગઃ । અનુપલબ્દૌ કારણાન્તરત્વાનુપલબ્ધેઃ । તદ્ધિ પ્રત્યક્ષાવિષયત્વે સત્યતિદૂરાદિભિરનુપલબ્ધિકારણૈર્નોપલભ્યતે । તન્ન તાવત્ અતિદૂરાત્સામીપ્યાદ્વ્યવધાનાચ્ચાસ્યાગ્રહણમ્ । કસ્માત્ ? વિભુત્વાત્ । નેન્દ્રિયઘાતાત્, અવિકલેન્દ્રિયૈરગ્રહણાત્ । ન મનોऽનવસ્થાનાત્, અવસ્થિતમનોભિરગ્રહણાત્ । ન સૌક્ષ્મ્યાત્, શશવિષાણાદીનાં સત્ત્વપ્રસઙ્ગાત્ । નાભિભવાત્, અસમ્ભવાત્ । ન સમાનાભિહારાદેકત્વાત્ । તસ્માત્ કારણાન્તરાભાવતોऽનુપલભ્યમાનસ્યાસત્ત્વમિચ્છતઃ પ્રધાનસ્યાપિ શશવિષાણાદીનામપિ સત્ત્વપ્રસઙ્ગઃ । અથૈતન્નેષ્યતે કારણાન્તરં તર્હ્યનુપલબ્ધૌ વક્તવ્યમિતિ ।
ઉચ્યતે- યત્તાવદુક્તં અનુપલબ્ધૌ કારણાન્તરાનુપપત્તેઃ પ્રધાનસ્યાસત્ત્વપ્રસઙ્ગ ઇતિ, અત્રાસ્તુ ।

॥ સૌક્ષ્મ્યાત્તદનુપલબ્ધિર્નાભાવાત્ ॥

યત્તૂક્તં શશવિષાણાદીનામપિ સત્ત્વપ્રસઙ્ગ ઇતિ તદયુક્તમ્ । કસ્માત્ ? સાધનોપપત્તેઃ । અસ્તિ હિ પ્રધાનસ્ય સૌક્ષ્મ્યાત્તદનુપલબ્ધૌ સાધનં, ન શશવિષાણાદીનામ્ । કિં તત્ ? ઉચ્યતે

॥ કાર્યતસ્તદુપલબ્ધિઃ ॥

પ્રધાનસ્ય હિ કાર્યત ઉપલબ્ધિરિત્યેતદુપરિષ્ટાત્પ્રતિપાદયિષ્યામઃ । ન તુ શશવિષાણાદીનાં કાર્યમસ્તિ । તસ્માદ્વિષમોऽયમુપન્યાસઃ ।
આહ- એવમપિ પ્રતિજ્ઞાન્તરાનર્થક્યમ્, એકેન કૃતત્વાત્ । સૌક્ષ્મ્યાત્તદનુપલબ્ધિરિત્યુક્તે ગમ્યત એતન્નાભાવાદિતિ । તસ્માત્તદ્વચનમનર્થકમિતિ ।
ઉચ્યતે- ન, વીતાવીતપરિગ્રહાર્થત્વાત્ । એવં સિદ્ધે યત્પ્રતિજ્ઞાદ્વયં કરોતિ તત્ જ્ઞાપયત્યાચાર્યઃ વીતાવીતાભ્યામભિપ્રેતાર્થસિદ્ધિઃ । પ્રાક્ચ સૌક્ષ્મ્યાતિશયાત્તદનુપલબ્ધિરિત્યાચક્ષાણઃ પ્રતિપાદયતિ

પુરસ્તાદ્વીતઃ પ્રયોક્તવ્યવ ઇતિ । એકસ્મિંશ્ચ વિષયે દ્વૌ પ્રયુંજાનઃ સમુચ્ચયેન સિદ્ધિં દ્યોતયતિ । કિં સિદ્ધં ભવતિ ? યદુક્તં તન્ત્રાન્તરીયૈઃ ન પૃથક્પ્રતિપત્તિહેતૂ વીતાવીતાવિતિ તદિષ્ટમેવં સંગૃહીતં ભવતિ । તત્ર વીતસ્ય પ્રતિજ્ઞા સૌક્ષ્મ્યાત્તદનુપલબ્ધિઃ । તસ્ય ચાવીતસ્ય પ્રસઙ્ગિધર્માન્તરનિવૃત્તિરૂપેણ, નાભાવાત્ હેતુરુભયયોગી । કથમ્ ? યસ્ય પ્રત્યક્ષતોઽનુપલભ્યમાનસ્ય કાર્યસ્તદુપલબ્ધિસ્તસ્ય સૌક્ષ્મ્યાત્તદનુપલબ્ધિર્દૃષ્ટા । તદ્યથેન્દ્રિયાણિ । યદિ પુનરસ્યાભાવાદનુપલબ્ધિસ્સ્યાત્, કાર્યતોઽનુપલબ્ધિપ્રસઙ્ગઃ । અસ્તિ ચેયં કાર્યત ઉપલબ્ધિઃ । તસ્માન્નાભાવાત્ । ન ચેદભાવાત્, પરિશેષતઃ સૌક્ષ્મ્યાત્ તદનુપલબ્ધિરિતિ ॥

આહ, કિં પુનસ્તત્કાર્યં યદ્ભવાન્પ્રધાનસ્યાસ્તિત્વે લિઙ્ગમાચષ્ટ ઇતિ ? ઉચ્યતે-

॥ મહદાદિ તચ્ચ કાર્યં પ્રકૃતિવિરૂપં સરૂપં ચ ॥ ૮ ॥

તદ્ધિ મહદહંકારેન્દ્રિયવિશેષાવિશેષલક્ષણં કાર્યં પ્રધાનેન વિસદૃશં સદૃશં ચેત્યુપરિષ્ટાત્પ્રવેદયિષ્યામઃ ।
આહ- પ્રસ્તાવાભાવાદયુક્તમેતત્ । કિં પુનરધિકૃત્યેદમુચ્યતે પ્રકૃતિવિરૂપં સરૂપં ચ મહદાદિ કાર્યમિતિ ?
ઉચ્યતે- વ્યક્તાવ્યક્તજ્ઞવિજ્ઞાનાન્મોક્ષોઽવાપ્યત ઇત્યેતત્પ્રકૃતમ્ । એતાનિ ચ પરસ્પરવૈધર્મ્યસાધર્મ્યપ્રતિપત્તિમન્તરેણ ન શક્યાનિ વિજ્ઞાતુમિત્યેવમર્થમિદં પ્રસ્તૂયતે । તસ્માન્નાકસ્મિકો વૈરૂપ્યસારૂપ્યોપન્યાસ ઇતિ ॥ ૮॥

॥ ઇતિ શ્રીયુક્તિદીપિકાયાં સપ્તતિપદ્ધતૌ દ્વિતીયમાહ્નિકમ્ ॥

————————-

કારિકા ૯

————————-

આહ- આસ્તાં તાવદ્વૈરૂપ્યસારૂપ્યચિન્તા । કાર્યમિદમેવ તાવન્મહદાદિ પરીક્ષિષ્યામહે । કિં પ્રાગુત્પત્તેરસ્તિ નાસ્તીતિ ? કુતઃ સંશય ઇતિ ચેત્ સ્યાન્મતમ્- અસઙ્ગતાર્થં પ્રકરણાન્તરમુપક્ષિપ્યતે ભવતા । ન ચાવિદ્યમાનસમ્બન્ધસ્ય સંશયસ્ય પ્રકરણાન્તરેઽભિધીયમાનસ્ય નિર્ણીતિં સાધ્વીમાચાર્યા મન્યન્તે । અવકાશાસમ્ભવાદિતિ ।

ઉચ્યતે- અસ્તિ સંશયાવકાશઃ । કસ્માત્ ? આચાર્યવિપ્રતિપત્તેઃ । પ્રાગુત્પત્તેઃ કાર્યમસદિત્યાચાર્યાઃ કણાદાક્ષપાદપ્રભૃતયો મન્યન્તે । સદસદિતિ બૌદ્ધાઃ । નૈવ સન્નાસદિત્યન્યે । તસ્માદુપપન્નઃ સંશયઃ ।

તત્રેદાનીં ભવતઃ કા પ્રતિપત્તિરિતિ ?

ઉચ્યતે ।

નાઽવિદ્યમાનસ્ય મહદાદેર્વિકારસ્ય પ્રધાનાદાવિર્ભાવ ઇતિ પ્રતિજાનીમહે । કસ્માત્ ? સન્નિવેશવિશેષમાત્રાભ્યુપગમાત્ । ન હિ નઃ કારણાદર્થાન્તરભૂતં કાર્યમુત્પદ્યત ઇત્યભ્યુપગમઃ । કિં તર્હિ વિશ્વાત્મકાનાં સત્ત્વરજસ્તમસામપગતવિશેષાવિશેષાઃ સન્માત્રલક્ષણોપચયાઃ પ્રતિનિવૃત્તપરિણામવ્યાપારાઃ પરમવિભાગમુપસમ્પ્રાપ્તાઃ સૂક્ષ્માઃ શક્તયઃ । તાસામધિકારસામર્થ્યાદુપજાતપરિણામવ્યાપારાણાં સન્માત્રાનુક્રમેણ પ્રચયમુપસમ્પદ્યમાનાનાં સન્નિવેશવિશેષમાત્રં વ્યક્તમ્ । એતસ્યાં કલ્પનાયામસત ઉત્પત્તૌ કઃ પ્રસઙ્ગ ઇતિ ? એતેનૈવ બાહ્યાનાં તન્ત્વાદિકાર્યાણાં પટાદીનાં સન્નિવેશવિશેષમાત્રત્વાદસત ઉત્પત્તિઃ પ્રતિષિદ્ધા બોદ્ધવ્યા ।

આહ- અવિદ્યમાનમેતત્ । કસ્માત્ ? અસિદ્ધે, નાર્થાન્તરસિદ્ધેઃ । યદિ હિ સન્નિવેશવિશેષમાત્રત્વં કાર્યસ્ય સિદ્ધં સ્યાદત એતદ્યુજ્યતે વક્તુમ્- તદભ્યુપગમાદસદુત્પત્તેરપ્રસઙ્ગ ઇતિ । તત્ત્વસિદ્ધમ્ । દ્રવ્યાન્તરભૂતસ્યાવયવિનો નિષ્પત્તિપ્રતિજ્ઞાનાત્ । તસ્માત્ કાકવિષાણાત્ શશવિષાણસિદ્ધિવદયુક્તં સન્નિવેશવિશેષમાત્રાભ્યુપગમાત્સત્કાર્યસિદ્ધિરિતિ ।

ઇતશ્ચાસત્ કાર્યમ્, અગ્રહણાત્ । ઇહ શ્રોત્રાદીનાં વિષયભૂતસ્ય તત્સન્નિધાનાદવશ્યં ગ્રહણેન ભવિતવ્યમ્ । યદિ ચ પ્રાગુત્પત્તેઃ સત્કાર્યં સ્યાત્ તદપિ શ્રોત્રાદિસન્નિધાનાત્ ગૃહ્યેત । ન તુ ગૃહ્યતે । તસ્માદસત્કાર્યમ્ ।

અનુપલબ્ધિકારણસદ્ભાવાદિતિ ચેત્, તત્રૈતત્સ્યાત્, અસ્તિ પ્રાગુત્પત્તેઃ કાર્યસ્યાનુપલબ્ધિકારણં તસ્માદસ્ય સતોઽપ્યગ્રહણં ભવતિ । ઉત્તરકાલં તદ્વિગમાત્ ગ્રહણમિતિ । એતચ્ચાનુપપન્નમ્ । કસ્માત્ ? અનુપલબ્ધ્યસમ્ભવાત્ । તદ્ધિ પ્રત્યક્ષાવિષયત્વે સત્યતિદૂરાદિભિરનુપલબ્ધિકારણૈર્નોપલભ્યતે । ન ચૈષાં તત્ર સમ્ભવઃ । તસ્માદસદેતત્ । કારણાન્તરાનભિધાનાત્ । ન ચાતિદૂરાદિવ્યતિરિક્તમનુપલબ્ધૌ કારણાન્તરમધીધ્વે યતોઽસ્યાગ્રહણં સ્યાત્ । અતશ્ચાસદેવ । કિં ચાન્યત્ કારણાનુપલબ્ધિપ્રસઙ્ગાત્ । અનુપલબ્ધિકારણસદ્ભાવાત્કાર્યસ્યાગ્રહણમિચ્છતઃ કારણાગ્રહણપ્રસઙ્ગઃ ।

કસ્માત્ ? અભિન્નદેશત્વાત્ । એકેન્દ્રિયગ્રાહ્યત્વાત્ સ્થૂલત્વાચ્ચ । તત્ત્વનિષ્ટમ્ ।
તસ્માદયુક્તમનુપલબ્ધિકારણસદ્ભાવાત્સતઃ કાર્યસ્યાગ્રહણમિતિ ।
પ્રમાણાન્તરનિવૃત્તિપ્રસઙ્ગાદયુક્તમિતિ ચેત્, સ્યાદેતત્ યદિ
તર્હિ પ્રત્યક્ષવિષયમેવાસ્તિ । તતોઽન્યત્રાસ્તીત્યેતદુપગમ્યતે ।
તેનાતીન્દ્રિયવિષયસ્યાનુમાનસ્ય નિવૃત્તિપ્રસઙ્ગઃ । અનિષ્ટં
ચૈતત્ । તસ્માન્નાનુપલબ્ધેરસત્કાર્યમિતિ । એતદપ્યયુક્તમ્ । કસ્માત્
? ક્રિયાગુણવ્યપદેશાસમ્ભવાત્ । યદ્ધિ પ્રત્યક્ષતો નોપલભ્યતે
તત્ક્રિયયાસ્તીતિ સંસૂચ્યતે । યથા હર્મ્યાવસ્થિતાનાં તૃણાનામુદ્વહનાદ્વાયુઃ
ગુણેન, યથા માલતીલતાગન્ધેન વ્યપદેશેન વા, કાર્યાદિના યથેન્દ્રિયાણિ ।
ન તુ પ્રાગુત્પત્તેઃ કાર્યસ્ય ક્રિયાગુણવ્યપદેશસમ્ભવઃ તસ્માદસત્કાર્યમ્ ।
ઇતશ્ચાસત્કાર્યમ્ । કર્તૃપ્રયાસસાફલ્યાત્ । ઇહ પ્રાગ્વ્યાપારોપક્રમાત્
કર્તારસ્તસ્માત્ફલમુપલિપ્સમાનાઃ કાર્યવિશેષનિયતસામાર્થ્યં
સાધનમુપાદાય વ્યાપ્રિયન્તે । તચ્ચેત્પ્રાગપિ વ્યાપારાત્ સ્યાત્તદર્થસ્ય
પરિસ્પન્દસ્યાનર્થક્યં પ્રાપ્તમ્ । અનિષ્ટં ચૈતત્ । તસ્માત્
કર્તૃપ્રયાસસાફલ્યાત્ અસત્કાર્યમ્ । પરિણામાદ્યુપપત્તેર્ન દોષ ઇતિ ચેત્
સ્યાન્મતં કારણસ્ય પરિણામવ્યૂહસંશ્લેષવ્યક્તિપ્રચયક્ષણાન્ધર્માન્ યસ્માત્
કર્ત્રાદીનિ કુર્વન્તિ નાનર્થકાનિ સ્યુઃ । સત્ત્વં ચ કાર્યસ્ય ન નિરુપ્યતે ।
ક એવં સતિ દોષઃ સ્યાદિતિ ? ઉચ્યતે- ન શક્યમેવં કલ્પયિતુમ્ ।
કસ્માત્ ? માર્ગાન્તરાનુપપત્તેઃ । પરિણામો હિ નામાવસ્થિતસ્ય દ્રવ્યસ્ય
ધર્માન્તરનિવૃત્તિઃ ધર્માન્તરપ્રવૃત્તિશ્ચ । તત્ર સતો ધર્માન્તરસ્ય
નિરોધાભ્યુપગમાદસતશ્ચોત્પત્તિપ્રતિજ્ઞાનાન્નેદમર્થાન્તરમારભ્યતે ।
એવં વ્યૂહાદયોઽપ્યુપસંહર્તવ્યાઃ । તસ્માત્ પરિણામાદિભિરભિભવાત્
કર્ત્રાદીનામર્થવત્ત્વાદસત્કાર્યમ્ । તથા ચોક્તમ્-
જહદ્ધર્માન્તરં પૂર્વમુપાદત્તે યદા પરમ્ ।
તત્ત્વાદપ્રચ્યુતો ધર્મો પરિણામઃ સ ઉચ્યતે ॥

કુતશ્ચ ન સત્કાર્યમ્ ? આરમ્ભોપરમયોરાદ્યન્તાવિશેષપ્રસંગાત્ । યદિ
સત્કાર્યં સ્યાત્ તેન યઃ ક્રિયાર્થઃ સાધનાનામાદૌ પરિસ્પન્દઃ સોઽન્તેઽપિ
સ્યાત્ । વા યોઽન્તે વિરામઃ સ આદાવપિ સ્યાત્ । કસ્માત્ ? સદવિશેષાત્ । ન તુ
તદસ્તિ । તસ્માદસત્કાર્યમ્ ।
ઇતશ્ચાસત્કાર્યમ્ ઉત્પત્તિધર્મસ્યાદ્યન્તયોરવિશેષપ્રસઙ્ગાત્ । યદિ સત્કાર્યં
સ્યાત્ તેન યથા નિષ્પન્નસ્યોત્પત્તિધર્મેણાભિસમ્બન્ધઃ તથા આદાવપિ સ્યાત્ ।

યથૈવાદાવભિસમ્બન્ધઃ તથાऽન્તેऽપિ સ્યાત્ । દૃષ્ટસ્ત્વભિસમ્બન્ધો નાભિસમ્બન્ધશ્ચાદ્યન્તયોઃ । તસ્માદસત્કાર્યમ્ ।

ઇતશ્ચાસત્કાર્યમ્ । જન્મસચ્છબ્દયોર્વિરોધાત્ । ઇહ જન્મશબ્દઃ પ્રાગભૂતસ્યાર્થસ્ય ભાવક્રમમાહ । સચ્છબ્દસ્તુ ક્રિયાન્તરહેતુત્વમાહ । યદિ સતો જન્મ સ્યાદૈકાર્થ્યમનયોઃ સ્યાત્  । ન ત્વેતદસ્તિ । તસ્માદયુક્તં સજ્જાયત ઇતિ ।

ઉચ્યતે- યદુક્તં દ્રવ્યાન્તરભૂતસ્યાવયવિનો નિષ્પત્તિપ્રતિજ્ઞાનાન્ન સન્નિવેશવિશેષમાત્રત્વાત્ સત્કાર્યમિત્યત્ર બ્રૂમહ- તદસિદ્ધિઃ, ભેદેનાગ્રહણાત્ । યદિ તન્ત્વાદિભ્યો દ્રવ્યાન્તરભૂતસ્યાવયવિનો નિષ્પત્તિઃ સ્યાત્ તેન યથા તન્તુકલાપે પટસ્તત્રૈવ વા પટાન્તરમાહિતં ભેદેનોપલભ્યતે તથૈવોપલભ્યેત । ન તૂપલભ્યતે । તસ્માત્ ન દ્રવ્યાન્તરમ્ ।

સમવાયાદગ્રહણમિતિ ચેત્ સ્યાદેતત્, સંયોગિનોર્દ્રવ્યયોઃ સત્યાધારાધેયભાવે ભેદેન ગ્રહણં ભવતિ । સમવાયલક્ષણા તુ પ્રાપ્તિસ્તન્તુપટયોઃ । તસ્માન્નાસ્તિ ભેદેન ગ્રહણમિતિ ।

તચ્ચાનુપપન્નમ્ । કસ્માત્ ? અસિદ્ધત્વાત્ । સિદ્ધે સત્યર્થાન્તરભાવેऽવયવિનસ્તત્પ્રાપ્તૌ ચ સમવાયે સર્વમેતત્સ્યાત્ । તત્ત્વસિદ્ધમુભયમ્ । તસ્માદયુક્તમેતત્ । કિંચાન્યત્ દૃષ્ટાન્તાભાવાત્ । મહાપરિમાણં દ્રવ્યમન્યત્રાહિતં સમવાયાત્ ભેદેન નોપલભ્યતે ઇત્યેતસ્મિન્નર્થે પર્યનુયુક્તસ્ય કસ્તે દૃષ્ટાન્તઃ ? ન ચાસ્ત્યનુદાહૃતો વાદઃ ।

વ્યાપ્તે ન ગ્રહણમિતિ ચેત્ સ્યાન્મતમકાર્યકારણભૂતં દ્રવ્યં સત્યપિ સમ્બન્ધે ન દ્રવ્યાન્તરં વ્યશ્નુત ઇત્યતો ભેદેન ગૃહ્યતે । તન્તુપટયોસ્તુ કાર્યકારણભૂતત્વાત્ વ્યાપ્તિઃ । તસ્માન્નાસ્તિ ભેદેન ગ્રહણમિતિ ।

એતદપ્યયુક્તમ્ । કસ્માત્ ?  સાધ્યત્વાત્ । સત્યર્થાન્તરભાવેऽવયવિદ્રવ્યાન્તરવત્ કાર્યકારણભાવઃ સાધ્યઃ સમવાયશ્ચ । અત ઇયં વ્યાપ્તિઃ સ્યાત્ । સા ચાપ્રસિદ્ધા ઇત્યતો ન સમ્યગેતત્ ।

વેમાદિવત્ ઇતિ ચેત્ સ્યાદેતત્- યથા સત્યર્થાન્તરભાવે વેમાદયોऽવયવિનઃ કારણમ્ એવં તન્તવોऽપિ ।

એતદનુપપન્નમ્ । કસ્માત્ ? અનભ્યુપગમાત્ । કરણં વેમાદયઃ પટસ્ય, ન કારણમિત્યયમભ્યુપગમો નઃ । તસ્માત્ વિષમોऽયં દૃષ્ટાન્તઃ । કિં ચાન્યત્ । તદ્વદવ્યાપ્તિપ્રસઙ્ગાત્ । વેમાદિવદર્થાન્તરં પટાત્તન્તવ ઇત્યેવં બ્રુવતસ્તદ્વદવ્યાપ્તિપ્રસઙ્ગઃ । કિં ચાન્યત્ ।

સ્પર્શક્રિયામૂર્તિગુરુત્વાન્તરવતસ્તદ્વતિ પ્રતિઘાતાદિતિ । ઇહ
સ્પર્શાન્તરવતિ સ્પર્શાન્તરવત્પ્રતીઘાતો દૃષ્ટઃ । તદ્યથા ઘટસ્યાશ્મનિ ।
સ્પર્શાન્તરવાંશ્ચ તે પટસ્તન્તુભ્ય ઇત્યતોઽસ્ય તદ્વ્યાપિત્વમયુક્તમ્ ।
એવં ચ ક્રિયાદયો વક્તવ્યાઃ । તસ્માદ્યુક્તમેતત્ ભેદાનાં ગ્રહણાન્નાવયવી
દ્રવ્યાન્તરમિતિ ।
ઇતશ્ચ નાવયવી દ્રવ્યાન્તરમ્ । કૃત્સ્નૈકદેશવૃત્ત્યનુપપત્તેઃ ।
સ હ્યવયવેષુ વર્તમાનઃ કૃત્સ્નેષુ વા વર્તતે પ્રત્યવયવં વા ? કિં
ચાતઃ ? તન્ન તાવત્ કૃત્સ્નેષુ વર્તતે । કસ્માત્ ? એકદેશગ્રહણે
ગ્રહણાભાવપ્રસઙ્ગાત્ । યદનેકેષુ વર્તતે તસ્ય કૃત્સ્નાધારગ્રહણે
સતિ ગ્રહણં દૃષ્ટમ્ । તદ્યથા દ્વિત્વાદીનામ્ । એવં ચ સતિ
વિષાણાદિગ્રહણે ગોગ્રહણપ્રસઙ્ગઃ । કિં ચાવયવાનવસથાપ્રસઙ્ગાત્ ।
સ હ્યવયવાન્ વ્યાપ્નુવંસ્તદ્વ્યતિરેકેણાવયવાન્તરાભાવાત્
કેન વ્યાપ્નુયાત્ ? અવયવાન્તરાભ્યુપગમે ચાનવસ્થાપ્રસંગઃ ।
કૃત્સ્નૈકદેશવૃત્તિપ્રસઙ્ગશ્ચ સમાનઃ । તસ્માન્ન સર્વેષુ
પરિસમાપ્યતે, ન પ્રત્યેકમનેકત્વપ્રસઙ્ગાત્ । અનેકાધારપરિસમાપ્તં
હ્યનેકં રૂપાદિ દૃષ્ટમિતિ । કિંચાન્યત્ શાસ્ત્રહાનેઃ । પ્રત્યવયવં
પરિસમાપ્તોઽવયવીત્યેતદિચ્છતો મૂર્તિમતાઽવયવેન સમાનદેશઃ
સ્યાત્ । તતશ્ચ યચ્છાસ્ત્રં મૂર્તિમતામસમાનદેશત્વમિતિ તસ્ય
વ્યાઘાતોઽવયવપરિમાણં ચ પ્રાપ્નોતિ । ન મહત્ત્વાદિપરિસમાપ્તત્વાદેકદ્રવ્યં
ચ પ્રાપ્નોતિ । તતશ્ચ યચ્છાસ્ત્રં દ્રવ્યમનેકદ્રવ્યમદ્રવ્યં વા
તસ્ય હાનિરેતાવતા ચાસ્ય વૃત્તિર્ભવન્તી ભવેત્ । સર્વથા ચ દોષઃ ।
તસ્માન્નાવયવી દ્રવ્યાન્તરમ્ ।
અર્થાન્તરાવસ્થાનેઽર્થાન્તરોત્પત્તિવિનાશદર્શનાદન્યત્વમિતિ ચેત્
સ્યાદેતત્ - વિદ્યમાનેષુ તન્તુષુ પટો ન ભવતિ સંયોગલક્ષણસ્ય
કારણાન્તરસ્યાનુત્પત્તેઃ । સંયોગોત્તરકાલં તુ ભવતિ । કારણસામગ્ર્યા
વિદ્યમાનેષ્વેવ ચ તન્તુષુ વિનાશમુપયાતિ । વિભાગાદર્થાન્તરાવસ્થાને
ચાર્થાન્તરોત્પત્તિવિનાશૌ દૃષ્ટૌ । તદ્યથા હિમવદવસ્થાને દવાગ્નેઃ ।
તસ્માદર્થાન્તરં પટસ્તન્તુભ્ય ઇતિ ।
એતદપ્યયુક્તમ્ । કસ્માત્ ? સાધ્યત્વાત્ । સાધ્યં તાવદેતત્-
કિમત્રાર્થાન્તરમુત્પદ્યતે વિનશ્યતિ વા ? આહોસ્વિત્તન્તુષ્વેવ
સમવસ્થાનવિશેષાપેક્ષસ્ય પટાભિધાનસ્ય પ્રવૃતિનિવૃત્તી
સેનાવનવદ્ભવતઃ ? તસ્માદેતદપિ નાવયવિનો દ્રવ્યાન્તરભાવે લિંગમ્ ।

તત્પુરુષબહુવ્રીહિદ્વન્દ્વસમાસોપપત્તેરન્ય ઇતિ ચેત્ સ્યાન્મતમ્,
ઇહાર્થાન્તરત્વે સતિ તત્પુરુષો દૃષ્ટઃ । તદ્યથા રાજ્ઞઃ પુરુષો
રાજપુરુષ ઇતિ । બહુવ્રીહિશ્ચ ચિત્રગુઃ શબલગુઃ । દ્વન્દ્વશ્ચ
પ્લક્ષન્યગ્રોધાવિતિ । અસ્તિ ચેહાપિ તત્પુરુષસ્તન્તૂનાં પટઃ ।
બહુવ્રીહિશ્ચ દૃઢતન્તુઃ શુક્લતન્તુઃ । દ્વન્દ્વશ્ચ તન્તુપટાવિતિ ।
તસ્માચ્ચાવયવ્યર્થાન્તરમ્ ।
એતચ્ચાયુક્તમ્ । કસ્માત્ ? અનેકાન્તાત્ । અનન્યત્વેઽપિ હિ તત્પુરુષો દૃષ્ટઃ ।
તદ્યથા સેનાગજઃ કાનનવૃક્ષ ઇતિ । બહુવ્રીહિશ્ચ વીરપુરુષા
મત્તગજા સેના ઇતિ । દ્વન્દ્વસ્તુ યદિ સ્યાત્સત્યમેવાર્થાન્તરમવયવી
સ્યાત્ । ન તુ કશ્ચિત્પટાવસ્થાયામેવં પ્રયુઙ્ક્તે- તન્તુપટાવાનયેતિ ।
તસ્માન્મનોરથમાત્રમેતત્ । એતેન સમાખ્યાસામર્થ્યભેદાઃ પ્રયુક્તાઃ ।
તે ચાપિ ચાનર્થાનત્વે સતિ સેનાદિષુ દૃષ્ટાઃ । તસ્માન્નાવયવી
દ્રવ્યાન્તરમ્ । દ્રવ્યાન્તરભૂતસ્યાવયવિનો નિષ્પત્તિપ્રતિજ્ઞાનાત્, ન
સન્નિવેશવિશેષમાત્રત્વાત્ સત્કાર્યમિત્યેતદયુક્તમ્ ।
યત્પુનરેતદુક્તમનુપલબ્ધેરસત્કાર્યમિતિ, અત્ર બ્રૂમઃ ।
એતદપ્યયુક્તમ્ । કસ્માત્ ? સંશયકારણત્વાત્ । સ ચ
સદ્વિષયાનુપલબ્ધિઃ । ઇત્યેતસ્માદેવ હેતોસ્સાંશયિકા વયમ્ ।
તામેવ તુ નિશ્ચયાર્થમવલમ્બમાનો ન યુક્તિમાર્ગમનુયાતિ । યત્
પુનરેતદુક્તં કારણાન્તરાનભિધાનાદિતિ- એતદપ્યનુપપન્નમ્ । કસ્માત્
? અભિપ્રાયાનવબોધાત્ । યો હિ યથા કુણ્ડે બદરાણ્યર્થાન્તરભૂતાન્યાહિતાનિ
તથા કારણે કાર્યમસ્તીત્યેતદાચષ્ટે તં પ્રત્યયમુપાલમ્ભઃ સ્યાત્ ।
વયન્તુ અનેકશક્તધર્મિણઃ સહકારિશક્ત્યન્તરાનુગૃહીતસ્ય
પૂર્વસ્યાશ્શક્તેસ્તિરોભાવમુત્તરસ્યાશ્ચાવિર્ભાવમુપાદધાનાઃ
કારણમેવ કાર્યમિત્યનુમન્યામહે । તયોસ્તુ શક્ત્યોર્યુગપદગ્રહણમ્ ।
ઇતરેતરપ્રતિબન્ધહેતુત્વાત્ । વસ્ત્રસ્યાયામવિસ્તારવત્, કૂર્માઙ્ગમિવ
દ્રષ્ટવ્યમ્ । યથા વસ્ત્રસ્યોપસંહારપ્રતિબન્ધાદાયામવિસ્તારૌ ન
ગ્રહણવિષયતાં પ્રતિપદ્યેતે, સત્તાં વા ન જિહીતઃ કૂર્મસ્યેવાઙ્ગાનિ,
તથ તન્ત્વાદીનામપિ ભાવાનાં કારણાભિમતા કાર્યાભિમતા ચાવસ્થા ક્રમેણ
વા સ્થિરશ્ચ ભવત્ તન્નિમિત્તસ્તદ્ગ્રહણાગ્રહણવિકલ્પઃ ।
એતેન કારણગ્રહણં પ્રત્યુક્તમ્ । યદપ્યુક્તં
પ્રમાણાન્તરનિવૃત્તિપ્રસઙ્ગાદિતિ સત્યમેતત્ । યત્તૂક્તં
ક્રિયાગુણવ્યપદેશાસમ્ભવાદનુમાનાભાવ ઇતિ તદનુપપન્નમ્ । કસ્માત્

? પૃથક્ત્વાનભ્યુપગમાત્ । કાર્યકારણપૃથક્ત્વવાદિનસ્તત્ક્રિયાગુણાનાં પૃથક્ત્વમનુમાતું યુક્તમિત્યતસ્તન્ત્વવસ્થાને પટક્રિયાગુણગ્રહણાદનુમાનાભાવ ઇત્યયમુપાલમ્ભઃ સાવકાશઃ સ્યાત્ । અસ્માકન્તુ કારણમાત્રસ્યૈવ સંઘાતાદાકારાન્તરપરિગ્રહાદ્વા ક્રિયાગુણાનાં પ્રચિતિર્વ્યક્તિવિશેષો ભવતીતિ બ્રુવતામદોષઃ । વ્યપદેશસ્તુ કાર્યકારણપર્યાયઃ । સોઽયુક્તઃ । કસ્માત્ ? અનેકાન્તાત્ । દ્રવ્યગુણત્વકર્મત્વાદીનાં ક્રિયાગુણકાર્યકારણભાવોઽથ ચ સત્યમિષ્યતેઽથ લિઙ્ગપર્યાયઃ । ન તર્હિ વયં પર્યનુયોજ્યા વ્યપદેશાભાવાદસત્કાર્યમિતિ । કિં કારણમ્ ? પ્રકરણાત્ । વિપ્રતિપત્તૌ હિ સત્યાં લિઙ્ગતઃ પ્રાગુત્પત્તેઃ કાર્યસ્ય સમધિગમં કરિષ્યામ ઇતિ પ્રકૃતમેવૈતત્ । અનૈકાન્તિકત્વં ચ સમાનમ્ । નિષ્પત્ત્યનન્તરં દ્રવ્યસ્યાસ્તિત્વાભ્યુપગમાદગુણવતો દ્રવ્યસ્ય ગુણારમ્ભઃ । કર્મગુણા અગુણા ઇતિ વચનાદુત્પન્નમાત્રં દ્રવ્યં નિષ્ક્રિયં નિર્ગુણમવતિષ્ઠતે ઇતિ વઃ પક્ષઃ । ન ચાસ્ય તથાભૂતસ્ય લિઙ્ગમસ્તિ । અથ ચાસ્તિત્વં ભવદ્ભિરભ્યુપગમ્યતે । સિદ્ધેર્ગ્રહણાત્સદ્ભાવ ઇતિ ચેન્ન । સર્વવિવાદસિદ્ધિપ્રસઙ્ગાત્ । દૃષ્ટાન્તવિરુદ્ધમર્થં પ્રતિજ્ઞાય પ્રતિષિધ્યમાનેન સિદ્ધબુદ્ધિવિષયતા સ્મર્તવ્યેત્યેતસ્યાં કલ્પનાયાં સર્વવિવાદસિદ્ધિપ્રસંગઃ સ્યાત્ । કિં ચાન્યત્ । પ્રતિપક્ષે સમાનત્વાત્ । અસ્મત્પક્ષેઽપિ તર્હિ ભગવત્પઞ્ચશિખાદીનાં પ્રત્યક્ષત્વાત્સત્કાર્યમભ્યુપગન્તવ્યમ્ । તસ્માન્ન ક્રિયાગુણવ્યપદેશાસમ્ભવાદસત્કાર્યમ્ ।
યત્પુનરેતદુક્તં- કર્તૃપ્રયાસસાફલ્યાદસત્કાર્યમિતિ, અત્ર બ્રૂમઃ- એતદપ્યયુક્તમ્ । કસ્માત્ ?

॥ અસદકરણાત્ ॥

યદ્યુભયપક્ષપ્રસિદ્ધસ્યાસતઃ ક્રિયાયોગઃ સ્યાત્ અત એતદ્યુજ્યતે વક્તુમ્ કાર્યે સતિ કર્તુઃ પ્રયાસોઽનર્થક ઇતિ । તત્ત્વસતઃ કરણમનુપપન્નમ્ । તસ્માદયુક્તમેતત્ । હેત્વભિધાનાદસિદ્ધિરિતિ ચેત્ સ્યાદેતત્- યથા નિષ્પન્નત્વાન્મધ્વાદીનાં ધારણસમર્થો ઘટો ન ક્રિયત ઇત્યયમપદિષ્ટો હેતુરસ્માભિઃ એવમિત્થં કાર્યસ્યાસતઃ કારણં નોપપન્નમિતિ નોક્તં ભવતા । તસ્માદસિદ્ધિરિતિ । એતચ્ચાનુપપન્નમ્ । કસ્માત્ ? સત્યસતિ વા સમ્બન્ધે દોષપ્રસઙ્ગાત્ । તદ્ધિ ક્રિયમાણં સતિ વા સમ્બન્ધે કારકૈઃ ક્રિયતેઽસતિ વા ? સમ્બન્ધશ્ચાસ્ય

ભવન્પ્રવૃત્તિકાલે વા કારણાનાં સ્યાત્, નિષ્પત્તિકાલે વા ? કિં ચાતઃ ? તન્ન તાવત્પ્રવૃત્તિકાલે સમ્બન્ધો યુક્તઃ । કસ્માત્ ? અદ્રવ્યત્વાત્ । પ્રવૃત્તિકાલે કર્ત્રાદીનાં ક્રિયાગુણવ્યપદેશાભાવાદવસ્તુભૂતં શશવિષાણસ્થાનીયં વઃ કાર્યમ્ । ન ચાસ્તિ તથાભૂતસ્ય વસ્તુભૂતેન સમ્બન્ધઃ । અથ નિષ્પત્તિકાલેઽભિસમ્બધ્યતે યદુક્તં સતો નિષ્પન્નત્વાત્ક્રિયાનુત્પત્તિરિતિ તસ્ય વ્યાઘાતઃ । અથ મતમસત્યપિ સમ્બન્ધે નિષ્પત્તિર્ભવતીતિ તેન કારકવ્યાપારવૈયર્થ્યપ્રસંગઃ । પ્રાગપિ ચ કારકોપાદાનાત્કાર્યનિષ્પત્તિપ્રસઙ્ગ ઇતિ । ઉક્તં ચ

અસત્ત્વાન્નાસ્તિ સમ્બન્ધઃ કારકૈઃ સત્ત્વસંગિભિઃ ।
અસમ્બન્ધસ્ય ચોત્પત્તિમિચ્છતો ન વ્યવસ્થિતિઃ ॥

ઇતિ ।
આહ, નનુ ચ મધ્યમે કાલે કર્ત્રાદિભિઃ કાર્યં ક્રિયતે ।
કઃ પુનરસૌ મધ્યમઃ કાલ ઇતિ ?
આહ-
આરમ્ભાય પ્રસૃતા યસ્મિન્કાલે ભવન્તિ કર્ત્તારઃ ।
કાર્યસ્યાનિષ્પાદાત્તં મધ્યમં કાલમિચ્છન્તિ ॥ ઇતિ ।
યદા હેતવઃ પ્રવૃત્તારમ્ભા ભવન્ત્યુદ્દિશ્ય કાર્યં ન ચ તાવન્નૈમિત્તિકસ્યાત્મલાભઃ સંવર્તતે સ મધ્યમઃ કાલઃ । તસ્મિન્ક્રિયતે કારકૈઃ કાર્યમિતિ ।
ઉચ્યતે, ન, અવસ્થાન્તરાનુપત્તેઃ । પ્રાઙ્નિષ્પત્તેરસત્તા । નિષ્પન્નસ્ય સત્તેત્યવસ્થાદ્વયમ્ । સદસદ્રૂપા ચાવસ્થા નાસ્તિ યો મધ્યમઃ સ્યાત્ । અતો ન યુક્તમેતદિતિ । કિંચાન્યત્ । પૂર્વદોષાપરિહારાદુદ્દિશ્ય કાર્યં તસ્યાત્મનો લાભાત્મકેન સહ સમ્બન્ધ ઇતિ ? અત્રાપ્યયં પર્યનુયોગો નૈવ નિવર્તત ઇતિ । તસ્માચ્ચિત્રમપિ વાક્યં પ્રસાર્ય ન કિંચિત્પરિહૃતં ભવતા । તસ્માદ્યુક્તમેતત્ સત્યસતિ વા સમ્બન્ધે દોષપ્રસંગાદસન્ન ક્રિયત ઇતિ । યસ્ય પુનઃ સત્કાર્યં તસ્ય દોષો નાસ્તિ । કસ્માત્ ?

॥ ઉપાદાનગ્રહણાત્ ॥

ઉપાદાનમિતિ કારણં તન્ત્વાદ્યાચક્ષ્મહે । તદ્ધિ તસ્ય કારકૈર્ગૃહ્યતે અભિસમ્બધ્યત ઇત્યર્થઃ । તસ્માચ્ચ નાર્થાન્તરં કાર્યમ્ ઇત્યતઃ કારણેનાભિસમ્બદ્ધાનાં કારકાણાં કાર્યેણૈવ સમ્બન્ધો ભવતીત્યદોષઃ ।
આહ- નનુ ચ યસ્યાપિ સત્કાર્યં તસ્યોપાદાનાદર્થાન્તરં તત્કાર્યં સ્યાત્ ।

કસ્માત્ ? કાર્યાર્થિરુપાદાનાત્ । યદ્યદર્થમુપાદીયતે તત્તસ્માદર્થાન્તર
યથા વેમાદિભ્યઃ પટઃ । તન્તવશ્ચ પટાદિભિરુપાદીયન્તે ।
તસ્માત્તેભ્યોઽપ્યર્થાન્તરં પટ ઇતિ । એતેન સત્ત્વં પ્રયુક્તમ્ ।
યદ્યદર્થમુપાદીયતે તત્તસ્મિન્નસત્ । યથા વેમાદિષુ પટ ઇતિ ।
ઉચ્યતે, ન અવયવિપ્રતિષેધાત્ । પ્રતિષિદ્ધસ્તાવદવયવી
દ્રવ્યાન્તરભૂતસ્તસ્માદનુપપન્નાર્થમેતત્ । કિં ચાન્યત્ ।

॥ સર્વસમ્ભવાભાવાત્ ॥

ઉપાદાનસામાન્યાદ્વેમાદિવદર્થાન્તરં પટસ્તન્તુભ્ય ઇતિ
બ્રૂવતોઽર્થાન્તરત્વસામાન્યાત્તન્તુવત્સર્વસ્માત્કારણાત્કાર્યસ્ય
સમ્ભવઃ સ્યાત્ । ન ત્વેવમસ્તિ । તસ્માત્સર્વસમ્ભવાભાવાદસમ્યગેતત્ ।
કિંચાન્યત્, જાતિભેદપ્રસંગાદર્થાન્તરારમ્ભપ્રસઙ્ગાચ્ચ
ઉપાદાનસામાન્યાદ્વેમાદિવદર્થાન્તરં પટસ્તન્તુભ્ય ઇતિ બ્રૂવતો
યથા વેમાદિભ્યો ભિન્નજાતીયો ભિન્નદેશશ્ચ, તથા તન્તુભ્યઃ
પટઃ સ્યાત્ યથા ચાવસ્થિતે પટે વેમાદયઃ પટાન્તરં કુર્વન્તિ તથા
હ્યવસ્થિતે પટે તન્તવોઽપિ પટાન્તરમારભેરન્ । ન ચૈતદિષ્ટમ્ । ન
તર્હ્યુપાદાનસામાન્યાદ્વેમાદિવત્તન્તુભ્યઃ પટસ્યાર્થાન્તરત્વમ્ ।
યત્પુનરેતદુક્તં યદ્યદર્થમુપાદીયતે ન તત્ તત્રાસ્તીતિ, અત્ર બ્રૂમઃ-
અયુક્તમેતત્ । કસ્માત્ ? આધારાધેયભાવાનભ્યુપગમાત્ । અસકૃદુક્તમસ્માભિર્ન
તન્તુષુ પટો નામ કશ્ચિદસ્તિ । કિં તર્હિ તન્તવ એવ પટઃ । તત્તુ
સન્માર્ગવિદ્વેષાદ્ભવતા ન ગૃહ્યતે । કિં ચાન્યત્ । અનેકાન્તાત્ । ઉપેત્ય
વા બ્રૂમઃ કથં તાવત્તિલાસ્તૈલાર્થમુપાદીયન્તે, ભવતિ ચાત્ર તૈલમ્ ।
મૃદ્વીકા રસાર્થમુપાદીયતે, ભવતિ ચાસ્યાં રસઃ । ગોધુક્ચ પયોઽર્થં
ગામાદત્તે, ભવતિ ચ તસ્યાં ક્ષીરમ્ । શાલિકલાપશ્ચ તણ્ડુલાર્થમુપાદીયતે,
સન્તિ ચાત્ર તણ્ડુલા ઇત્યનૈકાન્તિકો હેતુઃ ।
આહ- આવરણોપલબ્ધેરયુક્તમ્ । તિલાદિષ્વાવરણં પ્રત્યક્ષત ઉપલભ્યતે ।
તત્પ્રતિબન્ધાત્તૈલાદીનામગ્રહણમ્ । વ્યાપારશ્ચ કર્તુસ્તદ્વિગમાર્થો ન તુ
કાર્યસ્યાવરણમસ્તિ । તસ્માદ્વિષમો દૃષ્ટાન્તઃ ।
ઉચ્યતે ન, માર્ગાન્તરત્વાત્ । યદ્યત્રાસ્તિ તત્ર તદર્થમુપાદીયતે
ઇતિ પૂર્વં ભવતાઽતિસૃષ્ટમ્ । ઇદાનીં ત્વવગમવિગમાર્થં
સતોઽપ્યુપાદાનમિતિ બ્રૂવતો માર્ગાન્તરગમનં પૂર્વવાદત્યાગોઽનૈકાન્તિકસ્ય
ચાપરિહાર ઇતિ । યત્પુનરેતદુક્તં પરિણામાદ્યુપપત્તેરદોષ ઇતિ

તથા તદસ્તુ । યત્તૂક્તં માર્ગાન્તરાનુપપત્તેરિતિ અત્ર બ્રૂમઃ-
એતદપ્યયુક્તમ્ । કસ્માત્ ? પરિણામધર્માનવબોધાત્ । સતો ધર્માન્તરસ્ય
નિરોધમસતશ્ચોત્પત્તિં પરિણામમભિદધતો વ્યક્તમયમુપાલમ્ભઃ સ્યાત્ ।
ન ત્વનયાનુસૃત્યા પ્રતિષ્ઠામહે । કિં તર્હિ સાધનાનુગૃહીતસ્ય
ધર્મિણો ધર્માન્તરસ્યાવિર્ભાવઃ પૂર્વસ્ય ચ તિરોભાવઃ પરિણામઃ । ન
ચાવિર્ભાવતિરોભાવાવુત્પત્તિનિરોધૌ । વ્યૂહસંશ્લેષવ્યક્તિપ્રચયાસ્તુ
કિમસતો ધર્મા ઉત સ્વતોઽસન્ત ઇતિ વિચાર્યમ્ । કિં ચાતઃ । યદિ તાવદસતો
ધર્માઃ યથા કસ્યેતિ વાચ્યમ્ । અથ સ્વયમસન્તઃ પશ્ચાદ્ભવન્તિ
તદપ્યયુક્તમ્ । કસ્માત્ ? અનર્થાન્તરત્વાત્ । સત્યર્થાન્તરભાવે પ્રાગસન્તઃ
પશ્ચાદુપલભ્યમાનાઃ સત્કાર્યવાદં નિરાકુર્યુઃ । સ ચૈષામર્થાન્તરભાવો
ન પ્રસિદ્ધઃ । તસ્માત્કિમત્રોપપન્નમ્ ? ગ્રહણાગ્રહણવિકલ્પે ચોક્તઃ
પરિહારઃ । કિં ચાન્યત્ । દ્રવ્યાન્તરોત્પત્તિવ્યાઘાતાત્ । ઉપેત્ય વૈષામુત્પત્તિં
બ્રૂમઃ- યદિ હિ પરિણામવ્યૂહસંશ્લેષવ્યક્તિપ્રચયમાત્રં કાર્યમિષ્યતે
યદુક્તં દ્રવ્યાણિ દ્રવ્યાન્તરમારભન્ત ઇતિ તસ્ય વ્યાઘાતઃ । કસ્માત્
? ન હ્યેતે ભાવા દ્રવ્યાન્તરમ્ । તસ્માદ્દિનકરકિરણપ્રતાપમૂર્છિતસ્યેવ
દાવાગ્ન્યુપસર્પણદોષોનુતાપાયૈવ ભવતઃ પ્રતિપત્તિઃ ।
એતેનારમ્ભોપરમોત્પત્ત્યવિશેષપ્રસઙ્ગો જન્મસચ્છબ્દઃ પ્રત્યુક્તઃ ।
કથમ્ ? આત્મભૂતં હિ તન્તૂનાં પટાખ્યં વ્યૂહસ્થાનીયં સન્નિવેશવિશેષં
યદા કારકાણિ સ્વેન સ્વેન વ્યાપારેણાવિષ્કુર્વન્તિ તદા ક્રિયતે ઉત્પદ્યતે
જાયત ઇત્યેવમાદિર્લોકસ્ય વ્યવહારઃ પ્રવર્તતે । યદા તુ કારકાણિ
શક્ત્યન્તરાવિર્ભાવાત્સંસ્થાનાન્તરેણૌત્સુક્યવર્તિતામવસ્થામુપસંહરન્તિ
તદા પ્રાગુપલબ્ધં સંસ્થાનં વિનાશશબ્દવાચ્યતાં પ્રતિપદ્યતે ।
પરમાર્થતસ્તુ ન કસ્યચિદુત્પાદોઽસ્તિ ન વિનાશઃ । યત્પુનરેતદુક્તં
જન્મશબ્દઃ પ્રાગભૂતસ્યાર્થસ્ય ભાવોપક્રમમાહેતિ તદપીચ્છામાત્રમ્ । કસ્માત્
? વિવાદાત્ । સદસદ્વિષયં જન્મેતિ વિવાદેઽનુષક્તે જન્મશબ્દઃ પ્રાગભૂતસ્ય
સદ્ભાવમાચષ્ટ ઇતિ બ્રૂવતોઽનુક્તસમમ્ । પુરુષાદાવદૃષ્ટત્વાદસિદ્ધિરિતિ
ચેત્ સ્યાદેતત્ યદિ તર્હિ ક્રિયતે ઉત્પદ્યતે જાયત ઇત્યેષોર્થઃ સદ્વિષયઃ
કલ્પ્યતે, પ્રધાનપુરુષયોરપિ તત્પ્રસંગઃ, સદસદવિશેષાદિતિ ।
અતશ્ચ વિવાદાવસ્થમેવૈતત્પ્રકરણમિતિ । એતચ્ચાયુક્તમ્ । કસ્માત્
? સંસ્થાનવિષયત્વાત્ । યદા ભાવઃ સ્વતોઽનર્થાન્તરભૂતં સંસ્થાનં
ભજતે તદૈતે શબ્દાઃ પ્રવર્તન્ત ઇત્યુક્તમ્ । દૃષ્ટં ચ લોકે તદ્યથા
મુષ્ટિગ્રન્થિકુણ્ડલાનિ કરોતિ જનયત્યુત્પાદયતિ, અભિવ્યક્તાત્મસુ

ચ મૂલોદકાદિષુ ભવત્યુત્પન્નં જાતમિતિ । ઉભયપક્ષપ્રસિદ્ધે તુ
શશવિષાણાદૌ નૈતે શબ્દાઃ પ્રવર્તન્તે । તસ્માદ્ભવત એવાનિષ્ટપ્રસઙ્ગ
ઇતિ । ઉક્તં ચ
યદ્યસત્ત્વં ઘટાદીનામુત્પત્તૌ હેતુરિષ્યતે ।
શશશૃઙ્ગેઽપિ તુલ્યત્વાદુત્પત્તિસ્તે પ્રસજ્યતે ॥

ઇતિ સિદ્ધં સત્કાર્યમ્ ।
ઇતશ્ચ સત્કાર્યમ્ ।

॥ શક્તસ્ય શક્યકરણાત્ ॥

શક્યમિદમસ્ય, શક્તશ્ચાયમસ્યેત્યયં નિયમઃ સતાં દૃષ્ટઃ ।
તદ્યથા ચક્ષુષો રૂપસ્ય । આસ્તિ ચાયં પટસ્ય વેમાદીનાં ચ નિયમઃ ।
તસ્માચ્ચ સત્કાર્યમ્ । સહકારિવિત્તન્નિયમ ઇતિ ચેત્ સ્યાન્મતમ્ યથાપો
બીજાઙ્કુરસ્યોત્પત્તૌ સમર્થા ભવન્તિ ન કાષ્ઠાદગ્નેર્વા । ઉભયં
ચ તત્તાસુ ચ વિદ્યતે । બીજાદપાં વિચ્છિન્નત્વાત્ । યથા ચ સૂર્યઃ
સૂર્યકાન્તાદગ્નિમુત્પાદયિતું સમર્થો ન ચન્દ્રકાન્તાચ્ચ પાનીયમ્ । ઉભયં
તત્તત્ર ન વિદ્યતે । તથા ચ તત્ત્વાદીનાં પટસ્યૈવ શક્તિનિયમઃ સ્યાત્ । ન
ચ પટસ્ય તન્તુષુ સત્ત્વં સ્યાદિતિ । એતચ્ચાયુક્તમ્ । કસ્માત્ ? સાધ્યત્વાત્ ।
અંકુરાદયોઽપિ કાર્યમબાદીનામ્ । અતઃ સાધ્યમ્ । કિમઙ્કુરોઽસ્ત્યથ
નાસ્ત્યેવ । તથા સૂર્યકાન્તેઽગ્નિઃ । તદર્થમેવ ચાયં વિવાદોઽનુષક્તઃ ।
યત્તૂક્તમપાં વિચ્છિન્નવાન્ન તાસ્વઙ્કુરોઽસ્તીતિ તત્રાપિ યાસામપાં
બીજાનુપ્રવેશદઙ્કુરભાવેન વિપરિણામસ્તાભ્યસ્તસ્યાનન્યત્વં સાધ્યમ્ ।
અતો ન કિંચિદેતત્ । કિં ચાન્યત્ । રૂપવ્યવસ્થાનાચ્ચ । તદ્યથા
વિજ્ઞાનોત્પત્તિહેતુત્વે સતિ ન રૂપં દૃષ્ટમિતિ નેદાનીં તત્સામાન્યાત્
રૂપમપ્યરૂપં ભવતિ । એવં પટકારણત્વાદ્વેમાદયો ન પટ ઇતિ નેદાનીં
તન્તવોપ્યપટઃ । તસ્માદ્યુક્તમેતચ્છક્તસ્ય શક્યકરણાત્સત્કાર્યમ્ ।

॥ કારણભાવાચ્ચ સત્કાર્યમ્ ॥ ૯ ॥

ઇહાસતિ કાર્યે કારણભાવો નાસ્તિ । તદ્યથા વન્ધ્યાયાઃ ।
અસ્તિ ચેહ કારણભાવસ્તન્તુપટયોસ્તસ્માત્સત્કાર્યમ્ ।
કારણાન્તરાત્કાર્યોત્પત્તિદર્શનાદન્યત્ર તદ્બુદ્ધિરિતિ ચેત્ સ્યાન્મતં
પ્રાક્કારણાન્તરાત્કાર્યાન્તરસ્યાસત ઉત્પત્તિમુપલભ્ય પશ્ચાત્કારણાન્તરે
કારણબુદ્ધિર્ભવતીતિ । એતચ્ચાયુક્તમ્ । કસ્માત્ ? અનભ્યુપગમાત્ ।

અસતઃ કાર્યસ્યોત્પત્તિરેવ ન સિદ્ધા શશવિષાણાદિષ્વસિદ્ધત્વાત્ ।
કુતઃ પુનસ્તન્નિમિત્તાકારબુદ્ધિઃ ? કારણભાવાદિતિ ચેત્ - સ્યાદેતત્,
અસત્ત્વાવિશેષેઽપિ પટસ્ય કારણં સમવાય્યસમવાયિનિમિત્તલક્ષણમસ્તિ ।
તસ્માત્પટ ઉચ્યતે, ન શશવિષાણસ્યેતિ । એતચ્ચાયુક્તમ્ । કુતઃ હેત્વભાવાત્ ।
અસત્ત્વાવિશેષેઽપિ પટસ્ય કારણમસ્તિ ન શશવિષાણસ્યેત્યત્ર
હેતુરનુક્તઃ । પુરુષવદિતિ ચેત્ સ્યાદેતત્, યથા તુલ્યત્વે સત્ત્વે
પટસ્ય કારણમસ્તિ ન પુરુષસ્ય, એવમસત્ત્વે પટસ્ય સંસ્થાનં ન
શશવિષાણસ્યેત્યેતદપ્યયુક્તમ્ । કસ્માત્ ? ઉક્તત્વાત્ । સંસ્થાનં કાર્યં
પટસ્ય । સંસ્થાનં ન પુરુષસ્યેત્યુક્તં પ્રાક્ । સંસ્થાનવત્તદ્વિશેષ
ઇતિ ચેત્ સ્યાન્મતં યથા સત્ત્વાવિશેષે પટઃ સંસ્થાનં ન પુરુષ
એવમસત્ત્વાવિશેષે પટઃ કાર્યં ન શશવિષાણમિતિ । એતદપ્યયુક્તમ્ ।
કસ્માત્ ? સામાન્યવિશેષભાવાત્ । સામાન્યસ્ય હિ વિશેષપરિગ્રહઃ સંસ્થાનમ્ ।
ન ત્વયમસ્તિ ચેતનાશક્તૌ વિકલ્પઃ । તસ્માન્ન પુરુષઃ સંસ્થાનમ્ ।
અસતસ્તુ નિરાત્મકત્વાદ્વિશેષો દુરુપપાદઃ । તદુપપત્તૌ વા સત્ત્વપ્રસંગ
ઇતિ । આહ ચ-

નિરાત્મકત્વાદસતાં સર્વેષામવિશિષ્ટતા ।
વિશેષણં ચેદ્ભિન્નં તે સત્ત્વમભ્યુપગમ્યતામ્ ॥

તસ્માદ્યુક્તમેતત્કારણભાવાચ્ચ સત્કાર્યમ્ । એવં
તાવદ્વૈશેષિકમતેનાસત્કાર્યવાદો ન વિમર્દસહઃ ।
બૌદ્ધપક્ષે તુ ભૂયાન્દોષઃ । કથં તર્હિ દ્રવ્યાન્તરં પટો
નેષ્યતે ? "તન્તુષ્વેવ તથાસ્થેષુ પટ ઇત્યાદિબુદ્ધયઃ" ઇત્યેવમાદિના
ન્યાયેનાવયવિપ્રતિષેધાત્સંયોગોઽપિ ન સંયોગિભ્યસ્તેષામર્થાન્તરમિષ્ટઃ ।
તત્રૈતાવતી પરિકલ્પના સ્યાત્- યદુત તન્તુસંયોગો વા પટઃ, સંયોગકારણં
વા દ્રવ્યાન્તરમ્ ? ઉભયં ચ તેષાં નાર્થાન્તરમ્ । અથોત્પત્તિવિનાશૌ
કસ્યાપીતિ માયાકારચેષ્ટિતમ્ । તદપિ ચિત્રતરોઽયમુપન્યાસઃ । કાણાદાનાં
તુ દ્રવ્યાન્તરોત્પતિવિનાશાભ્યુપગમાન્ન તાર્કિકસદૃશો વિચારઃ ।
તસ્માત્પારમર્ષ એવ પક્ષો જ્યાયાન્ । યથા ચાસત્કાર્યં ન સંભવતિ તથા
ચશબ્દાત્સદસત્કાર્યમપિ ।
પરસ્પરવિરોધાત્ નૈવ સન્નાસદિતિ એકે । એતદપ્યનુપપન્નમ્ । કસ્માત્ ? સત્ત્વે
હેત્વભિધાનાન્નિશ્ચિતઃ પ્રાગુત્પત્તેઃ કાર્યસ્ય સદ્ભાવઃ ॥ ૯॥

કારિકા ૧૦

પ્રકૃતમિદાનીં વક્ષ્યામઃ । કિં ચ પ્રકૃતમ્ ? મહદાદિ તચ્ચ કાર્યં
પ્રકૃતિવિરૂપં સરૂપં ચેતિ વચનાદ્વૈરુપ્યમ્ ।
આહ- પ્રાક્સારૂપ્યગ્રહણં, સુખપ્રતિપત્તિહેતુત્વાત્ । અધિગતસારૂપ્યસ્ય હિ
સુખં વૈરૂપ્યસ્ય પ્રતિપત્તિર્ભવતીતિ પ્રાક્સારૂપ્યગ્રહણં કર્તવ્યમ્ । યથા
તન્ત્રાન્તરીયાણાં સદનિત્યં દ્રવ્યવત્કાર્યં કારણં સામાન્યવિશેષવદિતિ
દ્રવ્યગુણકર્મણામવિશેષસામાન્યમુક્ત્વા દ્રવ્યાણિ દ્રવ્યાન્તરમારભન્તે
ગુણાશ્ચ ગુણાન્તરમિત્યેવમાદિઃ વિશેષોઽભિધીયતે ।
ઉચ્યતે- તદનુપપત્તિઃ । અવિશેષાત્ । યથૈવાધિગતસારૂપ્યસ્ય લઘીયસી
વૈરૂપ્યપ્રતિપત્તિરેવમધિગતવૈરૂપ્યસ્ય લઘીયસી સારૂપ્યપ્રતિપત્તિઃ ।
કસ્માત્ ? પરસ્પરાપેક્ષત્વાત્ । વૈરૂપ્યાપેક્ષં હિ સારૂપ્યં, સારૂપ્યાપેક્ષં
ચ વૈરૂપ્યમિતિ ।
આહ- એવમપિ વૈરૂપ્યસ્ય પ્રાગભિધાને પ્રયોજનવચનમ્ ।
દ્વયોરવિશેષેઽન્યતરસ્ય પ્રાગભિધાને નિયમહેતુર્વક્તવ્ય ઇતિ ।
ઉચ્યતે ન, વૈરૂપ્યસ્ય પ્રકરણાનઙ્ગભાવાત્ । વિચ્છિન્નં
હિ વૈરૂપ્યમતસ્તત્પૂર્વમભિધાય પ્રકરણાઙ્ગં સારૂપ્યં
સુખમભિધાતુમિત્યેવમર્થમાચાર્યેણૈવં ક્રિયતે । કથં સારૂપ્યસ્ય
પ્રકરણાઙ્ગત્વમિતિ ચેત્ ત્રૈગુણ્યાભિધાનદ્વારેણ ગુણલક્ષણોપદેશાત્ ।
તત્સિદ્ધૌ ચાવિવેક્યાદીનાં વ્યક્તસિદ્ધેઃ, કારણગુણાત્મકત્વાચ્ચ
કાર્યસ્ય પ્રધાને ત્રૈગુણ્યાદિપ્રતિપત્તેઃ, કાર્યકારણભાવાસન્દેહાચ્ચ
પ્રધાનાસ્તિત્વપ્રસિદ્ધ્યપદેશાત્તત્સિદ્ધૌ ચ ભોગ્યસ્ય
ભોક્ત્રપેક્ષત્વાત્ પુરુષસિદ્ધેરધિગતભોક્તૃભોગ્યસ્ય તત્સંયોગસ્ય
ચ સુખપ્રતિપાદ્યત્વાત્તાદર્થ્યાચ્ચ તત્ત્વભૂતભાવસર્ગાણામ્ ।
તસ્માદ્યુક્તમેતત્પ્રકરણાઙ્ગત્વાત્સારૂપ્યં પશ્ચાન્નિર્દિશ્યતે ।
તદસમ્બન્ધાદિતરત્પ્રાગિતિ ।
આહ- યદિ તર્હિ ભવાન્પ્રાગ્વૈરૂપ્યાભિધાનં ન્યાય્યં મન્યતે તદ્વક્તવ્યં
કિં પુનરિદં વૈરૂપ્યમિતિ ।
ઉચ્યતે-

॥ હેતુમદનિત્યમવ્યાપિ સક્રિયમનેકમાશ્રિતં લિઙ્ગમ્ ।
સાવયવં પરતન્ત્રં વ્યક્તં વિપરીતમવ્યક્તમ્ ॥ ૧૦ ॥

તત્ર હેતુઃ કારણમિત્યનર્થાન્તરમ્ । તદસ્યાસ્તીતિ હેતુમત્ । નિત્યં ધ્રુવમ્ ।
ન નિત્યમનિત્યમ્ । વ્યાપ્નોતીતિ વ્યાપિ । ન વ્યાપ્યવ્યાપિ । અસર્વગતમિત્યર્થઃ ।
સહ ક્રિયયા સક્રિયમ્ । અનેકં ભિન્નમ્ । આશ્રિતમાધેયમ્ । લિઙ્ગં
તલ્લક્ષણોપપન્નમ્ । અવયૂયન્ત ઇત્યવયવાઃ । પૃથગુપલભ્યન્ત ઇત્યર્થઃ ।
સહાવયવૈઃ સાવયવમ્ । પરતન્ત્રમન્યાધીનમ્ । એતે હેતુમદાદયઃ
પરતન્ત્રાન્તા નિરપવાદાઃ વ્યક્તસ્યાસાધારણા પ્રધાનપુરુષાભ્યાં ધર્માઃ ।
આહ- હેતુમદિત્યવિશેષઃ સર્વત્ર સદ્ભાવાત્ । વ્યક્તાવ્યક્તપુરુષાણાં હિ
સર્વેષાં હેતુરસ્તીતિ અવિશેષ એવાયં પઠિતવ્યઃ ।
ઉચ્યતે ન, કારકપરિગ્રહાત્ । યદ્યપિ વ્યક્તાવ્યક્તપુરુષાણામવિશિષ્ટં
હેતુમત્ત્વં તથાપિ વિશિષ્ટસ્ય કારકસ્ય હેતોઃ પરિગ્રહં કરિષ્યામઃ ।
સ ચ વ્યક્તસ્યૈવ નાન્યસ્યેતિ નાયમવિશેષો ભવિષ્યતિ ।
આહ- તદનુપપત્તિઃ, વિશેષાનુપાદાનાત્ । હેતુરિતિ સામાન્યશબ્દોઽયમ્ ।
સામાન્યશબ્દાશ્ચ નાર્થપ્રકરણશબ્દાન્તરાભિસમ્બન્ધમન્તરેણ
વિશેષેઽવતિષ્ઠન્ત ઇતિ વિશેષ ઉપાદેયઃ સ્યાત્ । સ તુ નોપાદીયતે ।
તસ્માત્તે અવિશેષા એવેતિ ।
ઉચ્યતે ન, સર્વસમ્ભવિનોઽભિધાનસ્ય પ્રકર્ષાર્થત્વાત્ । ઇહ યઃ
સર્વસંભવી ધર્મ એકવિષય ઉપાદીયતે તસ્માત્પ્રકર્ષો વિજ્ઞાયતે ।
તદ્યથા ભોક્તા માણવક ઇત્યુક્તે સર્વેષાં ભોક્તૃત્વસ્ય સંભવાદેવં
વિજ્ઞાયતે પ્રકર્ષેણાયં ભોક્તેતિ, એવમિહાપિ સર્વસમ્ભવીત્યાહાચાર્યો
વ્યક્તં હેતુમદિતિ । તેન વયમસ્માત્પ્રકર્ષં વિજ્ઞાસ્યામઃ । કશ્ચ
પ્રકર્ષઃ ? કારકજ્ઞાપકયોરુભયોરપિ સમ્ભવે કારકસ્યૈવ ગ્રહણમ્ ।
અનિત્યશબ્દસમ્બન્ધાદ્વા । અથવાઽયમાચાર્યો હેતુમદિત્યુક્ત્વાઽનિત્યમિતિ
પઠતિ । શબ્દાન્તરાભિસમ્બન્ધાત્ । યોઽનિત્યસહચરો હેતુસ્તસ્યેહ ગ્રહણં
ગમ્યતે । કશ્ચાનિત્યસહચરો હેતુઃ ? કારકઃ ।
આહ એવમપ્યનુપપન્નમેતત્ । કસ્માત્ ? ઉભયત્ર તત્સંભવાત્ ।
ઉત્પાદ્યવ્યઙ્ગ્યયોર્હિ વિનાશં પટાદિષુ દૃષ્ટત્વાત્ અવ્યભિચારાત્તન્ત્રાન્તરીયા
મન્યન્તે । તસ્ય વા પરિહારો વક્તવ્યઃ । ન વા વક્તવ્યો વિશેષે સ્થિતિરસ્તીતિ
।
ઉચ્યતે ન, એકાન્તવાદપ્રસઙ્ગાત્ । સર્વેણ હિ વાદિનાઽવશ્યં
કિંચિન્નિત્યમભ્યુપગન્તવ્યમ્ । અન્તતો વિનાશેઽપિ ન કશ્ચિદર્થઃ
શબ્દબુદ્ધિભ્યાં ન વ્યજ્યતે । તથા સત્યેકાન્તવાદોઽયં સ્યાત્ । સ ચ
યુક્તિમદ્ભિર્નેષ્યતે । તથા ચ સંસ્કૃતમપ્યેવં કલ્પ્યમાને વિનાશિ સ્યાત્ ।

તસ્માદુત્પાદ્યવ્યઙ્ગ્યયોર્વિનાશં બ્રુવતોઽતિસાહસમ્ ।
આહ- અનિત્યત્વાનુપપત્તિઃ સત્કાર્યવાદાભ્યુપગમાત્ । યથૈવ હિ નાસત ઉત્પત્તિરસ્ત્યેવં સતોઽપિ વિનાશેન ન ભવિતવ્યમ્ । અથ સતોઽપિ વિનાશોઽભ્યુપગમ્યતે તેન પ્રલયકાલે વિનષ્ટાનાં તત્ત્વાદીનાં પ્રશ્નાદસતામુત્પત્તિઃ સત્કાર્યવાદં નિરાકુર્યાત્ । તસ્માદનિત્યં વ્યક્તમિત્યયુક્તમ્ ।
ઉચ્યતે- ન, વ્યક્ત્યપગમપ્રતિજ્ઞાનાત્ । સદા વયં સતોઽવિનાશમાચક્ષાણાઃ (na ?) સત્કાર્યવાદં પ્રત્યાચક્ષીમહિ । કારણાનાં તુ યઃ પરસ્પરં સંસર્ગાત્ સંસ્થાનવિશેષપરિગ્રહસ્તસ્ય વિરોધિશક્ત્યન્તરાવિર્ભાવાદ્વ્યક્તિસ્તિરોધીયત ઇત્યેતદ્ વિનાશશબ્દેન વિવક્ષિતમ્ । તથા ચ વાર્ષગણાઃ પઠન્તિ- "તદેતત્ ત્રૈલોક્યં વ્યક્તેરપૈતિ, ન સત્ત્વાદપેતમપ્યસ્તિ વિનાશપ્રતિષેધાત્ । અસંસર્ગાચ્ચાસ્ય સૌક્ષ્મ્યં સૌક્ષ્મ્યાચ્ચાનુપલબ્ધિસ્તસ્માદ્વ્યક્ત્યપગમો વિનાશઃ । સ તુ દ્વિવિધઃ- આ સર્ગપ્રલયાત્ તત્ત્વાનાં કિઞ્ચિત્કાલાન્તરાવસ્થાનાદિતરેષામ્" ઇતિ ।
આહ- અયુક્તમેતત્ । કસ્માત્ ? વિપ્રતિપત્તેઃ । સર્વમેવ ક્ષણિકં બુદ્ધિબોધ્યમાકાશનિરોધવર્જિતમિતિ શાક્યપુત્રીયાઃ પ્રતિપન્નાઃ । તેષાં પ્રતિષેધો વક્તવ્યો વા ન વક્તવ્યં દ્વિવિધમનિત્યમિતિ । ઉચ્યતે- ન, હેત્વનુપગમાત્ । પ્રતિક્ષણમુચ્છિદ્યતે ત્રૈલોક્યમિત્યત્ર લિઙ્ગમભિયુક્તા અપિ નોપલભામહે । તસ્માત્ નૈતદસ્માકં બુદ્ધાવવતિષ્ઠત ઇતિ ।
આહ- અન્તે ક્ષયદર્શનાત્, ઇહ યસ્યાન્તે ક્ષયસ્તસ્ય ક્ષણિકત્વં દૃષ્ટમ્ । તદ્યથા, પ્રદીપજ્વાલાબુદ્ધિશબ્દાનામ્ । અસ્તિ ચાન્તે ક્ષયઃ સંસ્કારાણાં તસ્માત્ ક્ષણિકાઃ ઉચ્યન્તે । તદનુપપત્તિઃ, સાધ્યત્વાત્ । ઇહ તુ સિદ્ધેનાતિદેશો ભવતિ । તદ્ યથા ગવા ગવયસ્ય । ન તુ પ્રદીપજ્વાલાબુદ્ધિશબ્દાનાં ક્ષણિકત્વં પ્રસિદ્ધમ્ । અતો ન કિઞ્ચિદેતત્ ।
આહ- નૈતદપ્રસિદ્ધમ્ । કસ્માત્ ? વૃદ્ધ્યદર્શનાત્ । યદિ હિ અવિનષ્ટાયાં જ્વાલાયામિન્ધનાન્તરાલે જ્વાલાન્તરમુત્પદ્યેત વૃદ્ધિરપિ સ્યાત્, ન તુ દૃશ્યતે । તસ્માદનવસ્થિતા પ્રદીપજ્વાલા । કિઞ્ચાશ્રયાભાવાત્ । યદાશ્રયા જ્વાલોત્પત્તિસ્તદુત્પદ્યમાનૈવાસૌ નિરુણદ્ધીતિ ન યુક્તમસ્યા વિનાઽઽશ્રયેણાવસ્થાતુમ્ । ઉપયુક્તેન્ધનાયા અપ્યવસ્થાનપ્રસઙ્ગાત્ । કિઞ્ચાવરણોપરિપાતેન પ્રભાભેદપ્રસઙ્ગાત્ । જ્વાલાનામવસ્થાનમિચ્છત ઉપરિષ્ટાદાવરણોપનિપાતાત્ પ્રભાયાસ્તન્તોરિવ દ્વૈધીકરણં સ્યાત્ । અનિષ્ટઞ્ચૈતત્ । તસ્માન્ન દીપે જ્વાલાનામવસ્થિતિરસ્તીતિ । એતેન

શબ્દોऽપિ પ્રત્યુક્તઃ । કથમ્ ? તસ્યાપિ યદિ વિનાશો ન સ્યાત્, દ્રુતપવનામ્બુધારાભિઘાતાત્ પ્રતિક્ષણમપૂર્વશબ્દાવિર્ભાવાત્ પૂર્વશબ્દવિનાશાચ્ચ વૃદ્ધિઃ સ્યાત્ । અદૃષ્ટા ચાસૌ । કિઞ્ચ, પ્રત્યક્ષત ઉપલબ્ધેઃ । પાણ્યુપઘાતજો હિ શબ્દ ઉત્પત્તેરૂર્ધ્વં ન ભવતીતિ પ્રત્યક્ષસિદ્ધમ્ । અભિવ્યક્તિરિતિ ચેન્ન, નિયમાદર્શનાત્ । શબ્દાનાં વાચ્યવક્તૃભેદભિન્નાનાં કારણનિયમો દૃષ્ટઃ । ન ચૈતદસ્તિ સમાનેન્દ્રિયગ્રાહ્યાણામ્ । કિઞ્ચ- પૃથક્ શ્રુતેઃ । અભિવ્યક્તિકારણદેશાચ્ચ પૃથક્ શ્રૂયતે શબ્દઃ । ન ચૈતદભિવ્યઙ્ગ્યાનાં ઘટાદીનાં દૃષ્ટમિતિ । ક્ષણિકબુદ્ધેસ્તુ પ્રાગેવોક્તા નાશહેતવઃ । તત્ર યદુક્તં સાધ્યત્વાત્ પ્રદીપજ્વાલાબુદ્ધિશબ્દાદીનાં ક્ષણિકત્વસ્ય ન સંસ્કારાઃ ક્ષણિકા ઇત્યેતદયુક્તમ્ ।

ઉચ્યતે- યદુક્તં વૃદ્ધ્યદર્શનાદિતિ, અત્ર બ્રૂમઃ- અયુક્તમેતત્ । કસ્માત્ ? વિશેષપ્રતિપત્તેઃ । ક્ષણિકમિત્યુક્તપરિમાણોऽયં કાલનિર્દેશ આશ્રીયતે, વૃદ્ધ્યભાવાદિભ્યશ્ચ કદાચિદ્વિનાશમાત્રં પ્રતીયતે । સ તુ વિનાશ એકક્ષણમવસ્થિતાનાં જ્વાલાનાં ભવતિ ન પુનઃ ક્ષણદ્વયમિત્યેતદપ્રમાણકમાજ્ઞામાત્રઞ્ચ ગૃહીતશિક્ષાકઃ કઃ પ્રતિપત્તુમુત્સહેત ? યત્તૂક્તમાવરણોપનિપાતાત્ પ્રભાભેદપ્રસઙ્ગ ઇતિ, એતદપ્યયુક્તમ્ । કસ્માત્ ? ઉભયથાનુપપત્તેઃ । કિં તાવદ્યસ્ય દ્વૈધીભાવો દૃષ્ટસ્તદક્ષણિકમાહોસ્વિદ્ યસ્ય ન દૃષ્ટસ્તત્ ક્ષણિકમિતિ । કિઞ્ચાતઃ ? તદ્યદિ તાવદેવમભ્યુપગમ્યતે યસ્ય દ્વૈધીભાવસ્તદક્ષણિકમિતિ તન્તોરક્ષણિકત્વપ્રસઙ્ગઃ । અથ મતં યસ્ય દ્વૈધીકરણં ન દૃષ્ટં તત્ ક્ષણિકમિતિ યથા કિમત્રોદાહરણમ્ । કુતઃ ? યસ્માત્ ન હ્યનુદાહૃતો વાદઃ । એતેન શબ્દવૃદ્ધિઃ પ્રત્યુક્તા । યત્પુનરેતદુક્તં પાણ્યુપઘાતજશબ્દાનવસ્થાનાદિતિ, તત્ર ભવતૈવોક્તં વ્યઙ્ગ્યત્વાદિતિ । યત્તૂક્તં નિયમદર્શનાન્ન વ્યઙ્ગ્યઃ શબ્દ ઇતિ તદયુક્તમ્, અનેકાન્તાત્ । યથા શુક્લકૃષ્ણૌ નિયમતઃ શુક્લકૃષ્ણશબ્દાભ્યાં પ્રત્યાય્યેતે, ન ચ તૌ તયોર્ન વ્યઙ્ગ્યૌ । એવં શબ્દસ્યાપિ વક્ત્ર્યવાદિનિયમઃ સ્યાત્, ન ચાવ્યઙ્ગ્યઃ સ્યાત્ । યદપ્યુક્તં વ્યઙ્ગ્યવ્યઞ્જકયોર્દેશભેદાનુપપત્તેર્ન વ્યઙ્ગ્યઃ શબ્દ ઇતિ, તદપ્યયુક્તમ્ । કસ્માત્ ? ચક્ષુર્વત્ તત્સિદ્ધેઃ । તદ્યથા- ચક્ષુષો રૂપસ્ય ચ દેશભેદેऽપિ વ્યઙ્ગ્યવ્યઞ્જકભાવઃ, એવં શબ્દસ્યાપિ સ્યાત્ । તસ્માન્ન શબ્દોऽપિ ક્ષણિકઃ । બુદ્ધેસ્તુ સ્વાધિકાર એવ ક્ષણિકત્વે હેતુરિતિ કરણો (kAraNam ?) વક્ષ્યામઃ । તત્ર યદુક્તમન્તે ક્ષયદર્શનાત્

પ્રદીપજ્વાલાબુદ્ધિશબ્દવત્ ક્ષણિકાઃ સંસ્કારા ઇત્યેતદયુક્તમિતિ ।
આહ- ઇતસ્તર્હિ પ્રદીપાદીનામન્યેષાં ચ ભાવાનાં ક્ષણિકત્વમ્ ।
કુતઃ ? અનવસ્થાનહેત્વભાવાત્ । નષ્ટશ્ચેદર્થોઽભ્યુપગમ્યતે
નનુ પ્રાપ્તમિદમુત્પન્નમાત્રસ્યાસ્ય વિનાશવિઘ્નો નાસ્તીતિ કૌટસ્થ્યં
સર્વભાવાનાં પ્રાપ્તમિતિ । ઉચ્યતે- ન, કારણોપપત્તેઃ । અધિકારો હિ
સર્વભૂતાનાં સંસ્કારવશાદુત્પત્તિસ્તદવસ્થાનમેવ તેષામલં સ્થિતયે ।
સતિ વિનશ્વરત્વે સંસ્કારોપયોગે તુ સ્થિત્યપભ્રંશ ઇત્યતોઽસ્તિ
કિઞ્ચિત્કાલમવસ્થાનં ભાવાનામ્ । ન ચ કૌટસ્થ્યપ્રસઙ્ગઃ । કિઞ્ચાન્યત્-
સન્તતિવિનાશપ્રસઙ્ગાત્ । નંષ્ટુશ્ચેદુત્પત્તિસમનન્તરં વિનાશ ઇષ્યતે,
સન્તતિરપ્યન્તે ક્ષયદર્શનાત્ નંષ્ટ્રી । તસ્યા અપિ તથૈવ વિનાશઃ પ્રાપ્તઃ ।
તતશ્ચ તડિદ્વિલસિતવત્ક્ષણદૃષ્ટનષ્ટસ્ય ત્રૈલોક્યસ્યાભાવે
સંસારોચ્છેદપ્રસઙ્ગઃ । તસ્માદયુક્તં નંષ્ટુરુત્પત્તિસમકાલમેવ
વિનાશ ઇતિ । કારણાવસ્થાનાત્ ન દોષ ઇતિ ચેત્- સ્યાન્મતમ્, અસ્તિ
કારણં પૂર્વોત્પન્નો ભાવ ઉત્તરસ્યોત્પત્તૌ । સ ચાપ્યુત્તરસ્ય, ઇત્યેવં
સન્તતેરનુચ્છેદો વિરોધિભાવાન્તરસંસર્ગાત્ તૂભયતસ્તથોત્પત્તેર્ભ્રંશ
ઇતિ । એતદપ્યયુક્તમ્ । કસ્માત્ ? પૂર્વહેતુત્યાગાત્ । પ્રાગુક્તં યેન
નંષ્ટવ્યમસૌ મન્ત્રૌષધપ્રયોગૈરપિ ક્ષણાદૂર્ધ્વં નાવતિષ્ઠતે ।
સામ્પ્રતં તુ નંષ્ટ્રી સન્તતિઃ કારણવશાદેવ તિષ્ઠતીતિ
સોઽયં પૂર્વહેતુત્યાગઃ । વિનાશહેત્વભાવાત્ ક્ષણિકત્વમિતિ
ચેત્, સ્યાદેતત્ નાસ્તિ ભાવાનાં વિનાશહેતોરુપલમ્ભ ઇતિ । અતઃ
સ્વાભાવિકઃ પ્રધ્વંસઃ । તસ્માદુત્પત્તિસમકાલમસૌ કેન વાર્યતે ।
ઇદમપ્યયુક્તમ્ । કસ્માત્ ? અનભ્યુપગમાત્ । કો હ્યેતદવમંસ્યતિ અહેતુકો
વિનાશઃ । કિં તર્હિ પ્રાગેવોક્તમર્થવશાદ્ભાવાનાં સ્થિતિસ્તદવ
॥ વિરોધિદ્રવ્યાન્તરસમ્બન્ધેનાધ્યાત્મિકાદિના ભવતીતિ । વિનાશસ્ય
વિનાશપ્રસઙ્ગાદયુક્તમિતિ ચેત્, યદિ તર્હ્યભાવોઽપિ હેતુમાન્ પરિકલ્પ્યતે;
પ્રાપ્તમસ્યાપિ ઘટવદ્ વિનાશિત્વમ્ । અનિષ્ટં ચૈતત્ । તસ્માદહેતુકો વિનાશ
ઇત્યેતદયુક્તમ્ । કસ્માત્ ? વ્યક્ત્યપગમપ્રતિજ્ઞાનાત્ । ભાવવિનાશિનં
પ્રતિ સત્યમેવાયમુપાલમ્ભઃ સ્યાત્ । વ્યક્ત્યપગમસ્તુ નો વિનાશઃ । સ તુ
હેતુમત્ત્વેન કથં વિરોત્સ્યત ઇતિ । તસ્માન્ન વિનાશહેત્વભાવાત્ ક્ષણિકં
સંસ્કૃતમિતિ । ઇતશ્ચ ન ક્ષણિકમ્ । કસ્માત્ ? અગ્રહણપ્રસઙ્ગાત્ ।
ઇહાસતોઽગ્રહણં દૃષ્ટમ્ । તદ્યથા દ્વિતીયસ્ય શિરસઃ । ક્ષણાદૂર્ધ્વં
ચ તે ઘટાદયો ન ભવન્તિ । તસ્માત્તેષામપ્યગ્રહણપ્રસઙ્ગઃ ।

તત્સદૃશોત્પત્તેરદોષ ઇતિ ચેત્ સ્યાદેતત્ - ઉત્પત્તિસમકાલં નિરોધેઽપિ ઘટસ્યાન્યસ્ય તાદૃશસ્યોત્પત્તિર્ભવતિ, તન્નિરોધેઽન્યસ્યેત્યેવમવિચ્છેદેન ગ્રહણં ભવતિ, જ્વાલાનદીસ્રોતોઽનુસન્ધાનવદિતિ । એતદપ્યયુક્તમ્ । કુતઃ ? કારણાભાવાત્ । સ્યાદેતદેવં યદિ તદાનીં સદૃશોત્પત્તૌ કારણં સ્યાત્ । ન તુ તદસ્તિ, પ્રાગેવ નિરોધાત્ । તસ્માદસદેતત્ । પૂર્વોત્પન્નસ્ય કારણભાવાત્તત્સિદ્ધિરિતિ ચેન્ન, ઉપાદાનાત્ તન્નિષ્પત્તિપ્રસિદ્ધેઃ । ઇહોપાદાનાન્મૃત્પિણ્ડકસંજ્ઞકાલ્લોકે ઘટનિષ્પત્તિઃ પ્રસિદ્ધા । ન ચ તદાનિમસ્તિ મૃત્પિણ્ડઃ । કિઞ્ચ ક્રમનુપલબ્ધેઃ । ઇહ શિબિકાદીનામનુક્રમેણ ઘટોત્પત્તિરુપલભ્યતે । ન ચાનુક્રમોઽસ્તિ । કિઞ્ચ કારકસામગ્ર્યાભવાત્ । ઇહ કુમ્ભકારદણ્ડચક્રસૂત્રોપલસામગ્ર્યાદ્ ઘટનિષ્પત્તિઃ પ્રસિદ્ધા । ન ચાસ્ત્યેષાં તત્ર સમ્ભવઃ । કિઞ્ચ તદુત્પાદ્યાન્તરોત્પાદ્યસ્યાનિષ્પત્તેઃ । ઇહ ઘટાદ્ ઘટે નિર્વૃત્તિર્ન પ્રસિદ્ધા લોકે । ન ચાપ્રસિદ્ધોઽસ્તિ દૃષ્ટાન્તઃ । બુદ્ધિશબ્દવદિતિ ચેત્ સ્યાદેતત્ યથા બુદ્ધિર્બુદ્ધ્યન્તરં સદૃશં સૂતે, શબ્દશ્ચ શબ્દાન્તરમેવં ઘટાદ્ઘટનિષ્પત્તિર્ભવતિ ઇતિ । એતદપ્યસત્ । કસ્માત્ ? સિદ્ધં હિ બુદ્ધેર્બુદ્ધ્યન્તરં શબ્દાચ્ચ શબ્દાન્તરં જાયત ઇત્યેતદપ્યસ્માકં પ્રસિદ્ધમ્ । તસ્માત્પ્રલાપમાત્રમેતત્ । તત્ર યદુક્તં સદૃશોત્પત્તેઃ સોઽયમિતિ ગ્રહણમવિચ્છિન્નં ક્ષણિકત્વેઽપિ ભાવાનામિત્યેતદયુક્તમ્ । કિઞ્ચાન્યત્ । કાર્યોત્પત્તિકાલે કારણનિવૃત્તેઃ । યદા ન કારણમસ્તિ ન તદા કાર્યમુત્પદ્યતે દ્વયોર્ઘટયોર્યુગપદુપલબ્ધિપ્રસઙ્ગાત્ । યદા તુ કાર્યમુત્પદ્યતે તદા કારણં નિરુદ્ધમિતિ નિર્બીજઃ પ્રદુર્ભાવઃ પ્રાપ્નોતિ । અનિષ્ટં ચૈતત્, સતતોત્પત્તિપ્રસંગાત્ । અનુત્પન્ને હેતુસામર્થ્યાદદોષ ઇતિ ચેત્ સ્યાત્તદનુત્પન્ને કાર્યે કારણેન પ્રયોજનમ્ । ઉત્પન્ને તદ્વ્યાપારાનર્થક્યાત્ । અસ્તિ ચાનુત્પન્ને કાર્યે કારણમ્ । અતો ન નિર્બીજઃ પ્રાદુર્ભાવ ઇતિ । એતદપ્યયુક્તમ્ । કસ્માત્ ? અભાવેઽપિ તદુત્પત્તિપ્રસઙ્ગાત્ । અંગ તાવત્ અણુશો વિભજ્યતામગ્નૌ વા ક્ષિપ્યન્તામ્, તન્તવસ્તદાપિ પ્રસિદ્ધવિનાશાનામભૂવન્નિતિ શક્યમુપદેષ્ટું, યદિ તેભ્યઃ પટ ઉત્પદ્યતે । તસ્માદ્ભ્રાન્તિરિયમ્ । યુગપત્કાર્યકારણયોરુત્પત્તિનિરોધૌ તુલાનતોન્નતવદિતિ ચેત્ સ્યાદેતદ્યથા નામોન્નામૌ તુલાન્તર્યા (?) યૌગપદ્યેન ભવત એવમુત્પત્તિવિનાશૌ કાર્યકારણયોરિતિ । તદપ્યયુક્તમ્ । કસ્માત્ ? કાર્યકારણભાવાદર્શનાત્ । કિમિદમુદકે નિમજ્જદ્ભિઃ ફેનમવલમ્બ્યતે ? તુલ્યા તસ્ય હ્યેકસ્યાવનતિરવસ્થા તદ્ દ્વિતીયસ્યોન્નતયે હેતુર્ભવતિ, ભવતઃ કારણવિનાશઃ કાર્યોત્પત્તિશ્ચ યૌગપદ્યેન ભવતઃ । ન ચ

તયોર્હેતુમદ્ભાવઃ શક્યઃ કલ્પયિતુમ્ । તસ્માદયુક્તમેતત્ । વિશેષગ્રહણાત્
ક્ષણિકત્વસિદ્ધિરિતિ ચેત્ સ્યાન્મતમ્- યદ્યુત્પન્નમાત્રોપરતિર્નાસ્તિ ભાવાનાં,
કિંકૃતઃ શરીરાદીનાં પ્રાણાપાનશ્રમરૂપાદિકૃતોઽબ્જાશ્મપ્રભૃતીનાં ચ
શીતોષ્ણસ્પર્શકૃતો ભેદઃ ? ઘણ્ટાદીનાં ચાશબ્દકાનાં પશ્ચાચ્છબ્દવતાં
ગ્રહણમ્, તસ્માદનિષિદ્ધઃ ક્ષણભઙ્ગ ઇત્યેતચ્ચાયુક્તમ્ । કસ્માત્
? ઉક્તત્વાત્ । ઉક્તમત્રોત્તરં કારણાભાવેઽનુત્પત્તિપ્રસઙ્ગાએદિતિ ।
કિઞ્ચ સંસ્થાનાન્તરાનુપલધેઃ । ન હ્યત્ર પૂર્વસંશાનવિપરીતં
સંસ્થાનાન્તરં ગૃહ્ણીમહે । તસ્માદવિશિષ્ટાસ્ત ઇત્યેવમવગમ્યતામ્ ।
વિશેષગ્રહણન્ત્વવસ્ત્વન્તરાનુગ્રહે શક્ત્યન્તરાવિર્ભાવાત્ । ઊક્તં ચ-
"વ્યક્તેરપગમોઽભીષ્ટઃ પૂર્વસંસ્થાનહાનિતઃ । તદભાવાદસિધોઽસ્ય
વિશે ॥ (Here in the Ms, a considerable portion is left bland and it is
apparent that discussion on the karikas XI and XII has been left out)

——————-

કારિકા ૧૩

——————-

॥ સત્ત્વં લઘુ પ્રકાશકમિષ્ટમુપષ્ટમ્ભકં ચલં ચ રજઃ ।
ગુરુ વરણકમેવ તમઃ ॥

એવશબ્દઃ પ્રત્યેકં પરિશમાપ્યતે । સત્ત્વં લઘુ પ્રકાષકમેવેષ્ટમ્ ।
યત્ કિંચિત્કાર્યકરણે લઘુ પ્રકાશં ચ તત્સત્ત્વરૂપમિતિ
પ્રત્યવગન્તવ્યમ્ । તત્ર કાર્યસ્ય તાવદુદ્ગમહેતુર્ધર્મો લઘુત્વમ્, કરણસ્ય
વૃત્તિપટુત્વહેતુઃ । પ્રકાશસ્તુ પૃથિવીધર્મસ્ય ચ્છાયાલક્ષણસ્ય
તમસસ્તિરસ્કારેણ દ્રવ્યાન્તરપ્રકાશનમ્ । કરણસ્યાપિ ગ્રહણં
સઙ્કલ્પાભિમાનાધ્યવસાયવિષયેષુ યથાસ્વં પ્રવર્તમાનમ્ ।
ઉપષ્ટમ્ભકં ચલમેવ રજઃ । યઃ કશ્ચિદુપસ્તમ્ભશ્ચલતા
ચોપલભ્યતે તદ્રજોરૂપમિત્યવગન્તવ્યમ્ । તત્રોપસ્તમ્ભઃ પ્રયત્નઃ,
ચલતા ક્રિયા । સા ચ દ્વિવિધા, પરિણામલક્ષણા પ્રસ્પન્દલક્ષણા
ચ । તત્ર પરિણામલક્ષણયા સહકારિભાવાન્તરાનુગૃહીતસ્ય ધર્મિણઃ
પૂર્વધર્માત્પ્રચ્યુતિઃ । પ્રસ્પન્દલક્ષણા પ્રાણાદયઃ કર્મેન્દ્રિયવૃત્તયશ્ચ
વચનાદ્યાઃ । બાહ્યાનાં દ્રવ્યાણામુત્પતનનિપતનભ્રમણાદીનિ ।
ગુરુ વરણકમેવ તમઃ । યત્કિંચિદ્ ગૌરવં વરણં
ચોપલભ્યતે તત્તમોરૂપમિતિ પ્રત્યવગન્તવ્યમ્ । તત્ર ગુરુત્વં

કાર્યસ્યાધોગમનહેતુર્ધર્મઃ કરણસ્ય વૃત્તિમન્દતા । વરણમપિ કાર્યગતં
ચ દ્રવ્યાન્તરતિરોધાનમ્ । કરણગતા ચાશુદ્ધિઃ પ્રકાશપ્રતિદ્વન્દ્વિભૂતા ।
ઇત્યેષ સત્ત્વાદીનામવ્યતિકરેણ સ્વભાવોપલમ્ભો યત એષાં નાનાત્વમવસીયતે ।
યત્પુનરેતદુક્તં સ્ત્રીક્ષત્રમેધેષુ સ્વભાવવ્યતિકરોપલમ્ભાદેકો
ગુણસ્ત્રિરૂપઃ, સર્વે વા સર્વરૂપા, રૂપાન્તરસ્ય વા સત ઉત્પત્તિરિતિ અત્ર બ્રૂમઃ
ન, ગુણભૂતસ્ય ભક્તિત ઉપકારાત્પ્રધાનરૂપોપપત્તેઃ । ઇહ ગુણભૂતસ્ય
ભક્તિતઃ પ્રધાનોપકારિત્વે સતિ ભક્તિતસ્તદ્રૂપોપપત્તિર્દૃષ્ટા । તદ્યથા
ક્ષીરાદેઃ । તદ્ધિ મુખાદિષુ દૃષ્ટપ્રતિલબ્ધપ્રવૃત્તિઃ પિત્તસ્ય સ્વેન
રૂપેણાઙ્ગભાવં ગચ્છંસ્તસ્યોપકારાત્તિક્તં સમ્પદ્યતે । ન ચ તથા
સદેવ । સત્ત્વમપિ સ્ત્રૈણગુણભૂતં સપત્નીરજસઃ સ્વેન રૂપેણાઙ્ગભાવં
ગચ્છંસ્તસ્યોપકારાદ્દુઃખં સમ્પદ્યતે । તમસો મોહઃ । એવં ક્ષાત્રં રજઃ
આર્યદારલક્ષણસ્ય સત્ત્વસ્ય દસ્યુલક્ષણસ્ય ચ તમસઃ । એવં મેધ્યં
તમઃ કાર્ષિકે સત્ત્વસ્ય પ્રોષિતદયિતાયાશ્ચ રજસઃ । તસ્માન્નાસ્તિ ગુણાનાં
સ્વાભાવવ્યતિકરઃ । કિં ચાન્યત્ । અગુણભૂતાનાં સ્વભાવગ્રહણાત્ । યદા
ચૈતેऽઙ્ગભાવમપગચ્છન્તો મધ્યસ્થાસ્તુલ્યસંસ્કારાશ્ચ પ્રતિપદ્યન્તે
તદા સ્વરૂપેણૈવ । તસ્માદસંકીર્ણં ગુણરૂપમ્ ।
આહ- ન, સન્દેહાત્ । ઉભયથા હિ રૂપાન્તરગ્રહણં ક્ષીરાદિષુ દૃષ્ટમ્ ।
તાદ્રૂપ્યાત્તૈશ્ચ વિપરિણતાનાં ગુણભાવાચ્ચ । યથોક્તં તત્ર
કથમિદમેકાન્તેન નિશ્ચીયન્તે ગુણભાવાત્સત્ત્વાદીનાં રૂપાન્તરગ્રહણં ન
પુનસ્તાદ્રૂપ્યાદેવેતિ ?
ઉચ્યતે- ગ્રહણવિકલ્પોપલમ્ભાત્ । યદિ સ્ત્રૈણં સત્ત્વં તાદ્રૂપ્યાદેવ
સપત્ન્યા તેન ગૃહ્યતે તેન ભર્તુરપિ તથા ગ્રહણપ્રસંગો
મધ્યસ્થાનાં તુલ્યસંસ્કારાણાં ચ । અનિષ્ટં ચૈતત્ । તસ્માદ્
ભાક્તોऽયં ગુણવિકલ્પોપલમ્ભઃ । કિં ચાન્યત્ । ઉત્તરકાલં
સ્વરૂપગ્રહણાન્નિવૃત્તાનુશયાભિશ્ચૈકાર્થતામુપગતાભિઃ
સપત્નીભિઃ સ્વેનૈવ રૂપેણ સ્ત્રૈણસ્ય સત્ત્વસ્ય ગ્રહણમુપલભ્યતે ।
સ્વગૃહસમવસ્થિતૈશ્ચાર્યદારૈઃ ક્ષત્રિયાણામ્ । નિષ્પન્નશસ્યૈશ્ચ
કૃષીવલૈર્મેધાનામ્ । તસ્માદ્ભાક્તોऽયં ગ્રહણવિકલ્પોપલમ્ભઃ ।
તસ્માદ્યુક્તમેતત્ અન્યોऽન્યજનનવૃત્તયો ગુણાઃ, ન ચ સંકીર્ણસ્વભાવા ઇતિ ।
યત્પુનરેતદુક્તમ્ અન્યોન્યમિથુનત્વાનુપપત્તિઃ, સત્ત્વસ્યેતરવિરોધાત્,
ઇત્યત્ર બ્રૂમઃ - અસ્તિ ચાયં વિરોધો ગુણાનાં

॥ પ્રદીપવચ્ચાર્થતો વૃત્તિઃ ॥ ૧૩ ॥

કિમુત્પદ્યત ઇતિ વાક્યશેષઃ । તદ્યથા વર્તિજ્યોતિસ્તૈલાનાં
પરસ્પરવિરોધેઽપિ પ્રદીપકરણૈકકાર્યસાધનભાવોપગતાનાં વૃત્તય
એકત્ર સંમૂર્છિતાઃ સહભાવઃ પ્રકૃષ્ટમપિ કાલમનુભવન્તિ એવં
સત્ત્વરજસ્તમસાં સતિ વિરોધે મહદાદ્યેકકાર્યસાધનભાવોપગતાનાં
વૃત્તય એકત્ર મૂર્છિતાઃ સહ ભવન્તીતિ ।
યુક્ત્યભાવાદસિદ્ધિરિતિ ચેત્ સ્યાન્મતમ્ - કા પુનરત્ર યુક્તિર્યેન
વિરોધિનામેકકાર્યતા ભવતીતિ ?
ઉચ્યતે- ગુણપ્રધાનભાવાત્ । ગુણભૂતો હિ પ્રતિયોગી પ્રધાનભૂતેન
તદુપકરકત્વાન્ન વિરુધ્યત ઇતિ સંસર્ગેણ વર્ત્તિતુમુત્સહતે । તુલ્યબલયોસ્તુ
દ્વયોઃ સત્યમેવ સહાવસ્થાનસ્ય નાસ્તિ સમ્બન્ધઃ । તથા ચ ભગવાન્
વાર્ષગણ્યઃ પઠતિ રૂપાતિશયા વૃત્ત્યતિશયાશ્ચ વિરુધ્યન્તે । સામાન્યાનિ
ત્વતિશયૈઃ સહ વર્તન્તે । તદ્યથા જલાગ્ની પચનીયસ્વેદનીયેષુ કાર્યેષુ,
છાયાતપૌ ચ સૂક્ષ્મરૂપપ્રકાશને, શીતોષ્ણે ચ પ્રજાવસ્થિતૌ । એવં
તત્સિદ્ધઃ પ્રદીપવત્સત્ત્વરજસ્તમસાં વિરોધેઽપિ સહભાવઃ ।
આહ, યદુક્તં લઘ્વાદિભાવસ્વભાવભેદાદ્ ગુણનાનાત્વમિત્યત્ર બ્રૂમઃ
ભિન્ના લક્ષણભેદાશ્ચેન્મિથઃ સત્ત્વાદયો ગુણાઃ ।
તર્હિ લક્ષણયુક્તત્વાત્ષડ્ગુણાઃ પ્રાપ્નુવન્તિ તે ॥

યદિ લઘ્વાદિલક્ષણભેદાત્સત્ત્વાદીનાં નાનાત્વં મિથોઽભ્યુપગમ્યતે
તેન લઘુત્વપ્રકાશત્વયોરપિ ભેદોઽસ્તિ ગુણદ્વયપ્રસંગઃ ।
એવમુપસ્તમ્ભચલતાભ્યાં ગૌરવવરણાભ્યાં ચ દ્વયં દ્વયમિતિ ષડ્ગુણાઃ
પ્રાપ્નુવન્તિ । અથ મતં લઘુત્વપ્રકાશયોરભેદ ઇતિ પૃથગનભિધાનં
પ્રાપ્તમ્ । તદ્ભેદે વા ગ્રહણભેદમનિચ્છતઃ પ્રાપ્તો લઘુત્વાદિભેદેઽપિ
ગુણાભેદસ્તથા ચૈકો ગુણ ઇતિ પ્રાપ્તમ્ । યત્પુનરેતદુક્તં ગુણભૂતસ્ય
ભક્તિત ઉપકારાત્પ્રધાનરૂપાપત્તિરિતિ,
અઙ્ગભાવં વ્રજત્સત્ત્વં દુઃખં સમ્પદ્યતે યદિ ।
વૈરૂપ્યસ્યોપસંહારાત્પૂર્વદોષાનિવર્તનમ્ ॥

યદિ હિ રજસોઽઙ્ગભાવમુપગચ્છત્સત્ત્વમુપકારાત્તદ્રૂપં ભવતિ તેન
પ્રતિજ્ઞાતસ્ય રૂપાન્તરસ્યોપસંહારાત્ત્રૈરૂપ્યં ગુણાનામેકૈકસ્ય પ્રાપ્તમ્
રૂપાન્તરસ્ય વા સત ઉત્પત્તિઃ । તસ્માત્પૂર્વદોષાપરિહારાત્પ્રતિજ્ઞામાત્રમેવાયં
સમાધિઃ । યદપ્યુક્તં અગુણભૂતાનાં સ્વભાવગ્રહણાદિતિ ।

અઙ્ગભાવાનપેક્ષં તુ ગ્રહણં નાસ્ત્યૃષેરપિ ।
પરમર્ષેરપિ ગુણાનાં કાર્યમેવ પ્રત્યક્ષં ન
શક્તિમાત્રેણાવસ્થાનમસંવેદ્યત્વાત્ । તત્ર ચાઙાઙ્ગિભાવગમનમનિવાર્યમ્ ।
તસ્માદ્દોષમનિચ્છતા ગુણા પરિત્યાજ્યાઃ । નાસ્તિ વા સુદૂરમપિ ગત્વા
તત્સંકરદોષપરિહારઃ ।
ઉચ્યતે- યત્તાવદુક્તં લક્ષણભેદાદ્ ગુણનાનાત્વવાદિનો
લક્ષણદ્વયયોગાદેકૈકસ્ય ગુણષટ્ત્વપ્રસંગ ઇતિ તન્ન । કસ્માત્
? દ્વયોર્ગુણપ્રધાનભાવાનુપપત્તેઃ । ઇહાર્થાન્તરસ્યાર્થાન્તરેણ
ગુણપ્રધાનભાવો ભવતિ । યથા સ્ત્રીક્ષત્રમેઘેષુ વ્યાખ્યાતમ્ । ન
ચ લઘુત્વપ્રકાશયોરુપસ્તમ્ભચલનયોર્ગૌરવવરણયોશ્ચ મિથૌ
ગુણપ્રધાનભાવોઽસ્તિ, તદનર્થાન્તરં ધર્માસ્ત ઇતિ નાસ્તિ ષટ્ત્વપ્રસંગ
ઇતિ । કિં ચ અપ્રસિદ્ધત્વાત્ । ન હ્યેતત્ક્વચિત્પ્રસિદ્ધમ્ યથા યાવન્તો
ધર્માસ્તાવન્તો ધર્મિણ ઇતિ । ન ચાપ્રસિદ્ધેન વ્યવહારઃ । કિંચ
પૃથક્ત્વૈકાન્તપ્રસઙ્ગાત્ । લક્ષણભેદાન્નાનાત્વપ્રતિજ્ઞસ્ય સર્વાર્થાનાં
સ્વસામાન્યલક્ષણયોગાત્સ્વતોઽર્થાન્તરમિતિ પૃથક્ત્વૈકાન્તપ્રસંગઃ ।
અથૈતદનિષ્ટં ન તર્હિ વક્તવ્યં લક્ષણભેદાદ્ ગુણાનાં
ષટ્ત્વમિતિ । યત્પુનરેતદુક્તં અઙ્ગભૂતસ્ય પ્રધાનરૂપાપત્તેઃ
પૂર્વદોષાનિવૃત્તિરિતિ તદપ્યયુક્તમ્ । કસ્માત્ ? ભક્ત્યભિધાનાત્ ।
અસકૃદધીતમસ્માભિર્ભાક્તોઽયં ગુણાનાં ગ્રહણવિકલ્પ ઇતિ । ન ચ
ભક્તિઃ પરમાર્થ ઇત્યસ્થાને યત્નઃ । યત્પુનરેતદુક્તં અગુણભૂતાનાં
સત્ત્વાદીનામૃષેરપ્યવિષયત્વમિતિ સત્યમેતત્ । યત્તૂક્તં કાર્યસ્ય
વિષયભૂતત્વાદઙ્ગાઙ્ગિભાવગમનં ગુણાનાં સકલસત્કાર્યમપેક્ષતે ।
તથા સ્ત્રીક્ષત્રમેઘાઃ પ્રકૃતાસ્તેષ્વઙ્ગભાવમગચ્છત ઇતિ વિજ્ઞાયત
ઇતિ । સામાન્યશબ્દાનાં હિ પ્રકરણાદ્વિશેષેઽવસ્થાનં ભવતિ । તદ્યથા
ભોજનકાલે સૈન્ધવમાનયેત્યુક્તે લવણે સમ્પ્રતિપત્તિર્નાશ્વાદિષુ ।
તસ્માત્પ્રકરણમનપેક્ષ્ય મહતિ તન્ત્રે દોષાભિધાનં બાલવાક્યસ્થાનીયમ્ ।
એવં ગુણલક્ષણોપદેશાત્સિદ્ધં ત્રૈગુણ્યમ્ ॥ ૧૩॥

————————-

કારિકા ૧૪

————————-

આહ- અવિવેક્યાદિરિદાનીં ગણઃ કથં પ્રતિપત્તવ્ય ઇતિ ?

ઉચ્યતે-

॥ અવિવેક્યાદિઃ સિદ્ધસ્ત્રૈગુણ્યાત્ ॥

યત્રિગુણં તદવિવેકિ વિષયઃ સામાન્યમચેતનં પ્રસવધર્મીતિ (kA0 11) ।
કથમવગમ્યત ઇતિ ચેત્

॥ તદ્વિપર્યયાભાવાત્ ॥

યસ્માદ્ગુણવિપર્યયઃ ક્ષેત્રજ્ઞઃ । તત્ર વિષયત્વમચેતનત્વં
પ્રસવધર્મિત્વં ચ ન ભવતીતિ પુરસ્તાત્પ્રતિપાદયિષ્યામઃ ।
તસ્માત્પરિશેષતો વ્યક્તે એતેષાં ધર્માણામવિરોધઃ ।
આહ, તથા પ્રધાનમિતિ પ્રાગુક્તં (ka0 11) ભવતા । તદિદાનીં કથં
પ્રતિપત્તવ્યમ્ પ્રધાનમપિ ત્રિગુણાદિયુક્તમિતિ ?
ઉચ્યતે

॥ કારણગુણાત્મકત્વાત્કાર્યસ્યાવ્યક્તમપિ સિદ્ધમ્ ॥ ૧૪ ॥

ઇહ કારણગુણાત્મકં કાર્યં દૃષ્ટં પટાદિ । વ્યક્તે
ચ ત્રૈગુણ્યાદ્યુપલભ્યતે । તસ્માત્કારણમપ્યસ્ય તથાજાતીયકમિતિ
શક્યમનુમાતુમ્ । સિદ્ધાન્તમાત્રોપદર્શનમેતદાચાર્યઃ કરોતિ । ન્યાયં તુ
યથોક્તેષુ પ્રદેશેષૂપપાદયિષ્યામઃ ॥ ૧૪॥

————————-

કારિકા ૧૫

————————-

આહ, કાર્યધર્મસ્ય કારણોપલબ્ધૌ હેતુમદાદિપ્રસંગઃ, અવિશેષાત્ ।
યદિ કાર્યે દૃષ્ટસ્ય ધર્મસ્ય કારણે સદ્ભાવોઽભ્યુપગમ્યતે પ્રાપ્તૌ
હેતુમદાદીનામપિ ધર્માણાં કાર્યદૃષ્ટત્વાત્પ્રધાને પ્રસંગઃ । અથ
કાર્યોપલબ્ધૌ તુલ્યાયાં હેતુમદાદયો નેષ્યન્તે ન તર્હીતરેષામપિ
કારણાવસ્થિતિરસ્તીતિ ।
ઉચ્યતે ન, સ્વરૂપવિરોધિત્વે તદપવાદવિજ્ઞાનાત્ ।
કારણગુણાત્મકત્વાત્કાર્યસ્યેત્યનેન લિંગેન હેતુમદાદયોઽપિ કારણે
પ્રસજ્યન્તે । તેષાં તુ કાર્યકારણરૂપવિરોધિત્વાદપવાદો વિજ્ઞાયતે ।
કથમ્ ? યદિ તાવદ્ધેતુમદાદયો વ્યક્તે દૃષ્ટત્વાત્પ્રધાને
વ્યઞ્જન્તે, કૃતકત્વાત્કાર્યમેવ તન્ન કારણમિતિ પ્રાપ્તમ્ । અનિત્યત્વાચ્ચ

સ્વયમુચ્છિદ્યમાનમનનુગ્રાહકમવ્યાપિત્વાદિભિશ્ચાનન્તવિકારોત્પાદનશક્તિહીનમ્ ।
અહેતુમદાદયઃ પ્રધાનેઽભ્યુપગમાદ્વ્યક્તેરપિ પ્રાપ્યન્તે
તાદૃશાઃ કારણાસમ્ભવાત્કાર્યમેવ તન્ન ભવતીતિ પ્રાપ્તમ્ ।
અવિવેક્યાદયસ્તૂભયત્રાપિ ભવન્તો નેતરેતરસ્વરૂપવિરોધિનઃ ।
તસ્માત્કાર્યકારણભાવાભ્યુપગમાદ્ધેતુમદાદ્યપવાદઃ, ઇતરેષાં ચ
કારણસદ્ભાવઃ સિદ્ધઃ ।
યદુક્તં કારણગુણાત્મકત્વાત્કાર્યસ્યાવ્યક્તમપિ સિદ્ધમિતિ તદયુક્તમ્ । કસ્માત્
? વ્યક્તાવ્યક્તયોઃ કાર્યકારણભાવાપ્રસિદ્ધેઃ । સિદ્ધે હિ વ્યક્તાવ્યક્તયોઃ
કારણત્વે એતદેવં સ્યાત્ । તત્ત્વસિદ્ધમ્ । તસ્માદયુક્તમેતત્ ।
વિશેષાનભિધાનાદુભયસામ્યમિતિ ચેત્ સ્યાન્મતમ્, યથા ભવાનાહ
વ્યક્તાવ્યક્તયોઃ કાર્યકારણભાવોઽપ્રસિદ્ધઃ, એવં વયં વક્ષ્યામઃ- તયોઃ
કાર્યકારણભાવાપ્રસિદ્ધિરપ્યસિદ્ધા । ન ચ ક્વચિદ્વિશેષોઽસ્ત્યુભયસામ્યં
ભવિષ્યતીતિ । તચ્ચાયુક્તમ્ । કસ્માત્ ? સદ્ભાવાસિદ્ધેઃ । સત્યમ્,
અનભિધીયમાને વિશેષે સ્યાદુભયસામ્યમ્ । અવ્યક્તસ્ય તુ સદ્ભાવ એવાસિદ્ધ
ઇત્યયં વિશેષઃ । તસ્માદયુક્તમેતદપીતિ ।
કાર્યસ્ય કારણપૂર્વકત્વાદ્વ્યક્તસ્ય ચ કાર્યત્વાદવ્યક્તસદ્ભાવે પ્રતિપત્તિરિતિ
ચેત્ સ્યાદેતત્ । કાર્યં કારણપૂર્વકં દૃષ્ટમ્ । ઘટાદિકાર્યં ચેદવ્યક્તં
પ્રમિતત્વાત્તસ્માદિદમપિ કારણપૂર્વકં ભવિતુમર્હતિ । યચ્ચ તસ્ય કારણં
તદવ્યક્તમિતિ । તચ્ચાનુપપન્નમ્ । કસ્માત્ ? અનેકાન્તાત્ । ઇહાકસ્મિકી ચ
કાર્યસ્યોત્પત્તિર્દૃષ્ટા । તદ્યથેન્દ્રધનુષઃ । અસતશ્ચ ભ્રાન્તિમાત્રાત્ ।
તદ્યથા માયાસ્વપ્નેન્દ્રજાલમૃગતૃષ્ણિકાલાતચક્રગન્ધર્વનગરાણામ્ ।
સતશ્ચ કારણાત્ । તદ્યથા મૃદાદિભ્યો ઘટાદીનામ્ । કાર્યં ચેદવ્યક્તમતઃ
સંશયઃ કિમિન્દ્રધનુર્વદકસ્માદસ્ય પ્રાદુર્ભાવોઽથ માયાદિવદસતોઽથ
કારણાત્સતો ઘટવદિતિ ?
ઉચ્યતે- નાકસ્મિકમસત્પૂર્વં વ્યક્તમ્ । કસ્માત્ ?

॥ ભેદાનાં પરિમાણાત્ ॥

યત્પરિમિતં તસ્ય સત ઉત્પત્તિર્દૃષ્ટા । તદ્યથા
મૂલાઙ્કુરપર્ણનાલદણ્ડવુસતુષશૂકપુષ્પક્ષીરતણ્ડુલકણાનામ્ । પરિમિતા
મહદહંકારેન્દ્રિયતન્માત્રમહાભૂતલક્ષણભેદાઃ । તસ્માત્સત્કારણપૂર્વકાઃ ।
યદેષાં કારણં તદવ્યક્તમ્ ।

॥ ઇતિ યુક્તિદીપિકાયાં સાંખ્યસપ્તતિપદ્ધતૌ તૃતીયમાહ્નિકં પ્રથમં

ચ પ્રકરણં સમાપ્તમ્ ॥

આહ- કસ્માદસ્ત્યવ્યક્તમ્ ? અસદ્ભેદાનામપિ પરિમાણદર્શનાત્ । અનેકાન્ત ઇતિ ચેત્ સ્યાન્મતમ્, અસ્તિ હિ માયાસ્વપ્નેન્દ્રજાલાનુવિધાયિનામપિ ભેદાનાં પરિમાણમિતિ । તસ્માદનૈકાન્તિકો હેતુરિતિ ।

તચ્ચ નૈવમ્ । કસ્માત્ ? ન હિ તેષાં નિયમોઽસ્તિ, એતાવદ્ભિરેવોત્પત્તવ્યં નાન્યૈરિતિ । મહદાદયસ્તુ પ્રલયકાલે તિરોભૂતાસ્તાવન્ત એવોત્પદ્યન્તે ।

આહ, પરિમાણાનવસ્થાનં કાલદ્વયાનુપલબ્ધેઃ । સત્યં, સામ્પ્રતે કાલે મહદાદયો યુક્તપરિમાણાઃ પ્રત્યક્ષાનુમાનોપલબ્ધેઃ । અતીતાનાગતયોસ્તુ કાલયોર્નાસ્તિ પ્રસિદ્ધિઃ । તસ્માદયુક્તમેતત્ ।

ઉચ્યતે ન, વિપર્યયે પ્રમાણાનુપલબ્ધેઃ । ઇદાનીમેતાવન્તો ભેદા ઇત્યેતચ્છક્યમનુમાતુમ્ અતીતાનાગતયોસ્તુ કાલયોર્નાસ્તિ પ્રસિદ્ધિઃ । તસ્માન્ન ભેદાનવસ્થાપ્રસંગઃ ।

આહ, ભેદાભેદાનવસ્થાનાત્ । મહદાદીનાં યે ભેદા દેવમનુષ્યતિર્યગ્ચો ઘટાદયશ્ચ તેષામશક્યં પરિમાણં પરિચ્છેત્તુમ્ ।

સામાન્યેઽન્તર્ભાવાદયુક્તમિતિ ચેત્ સ્યાન્મતમ્, અસ્તિ શરીરાણાં મહાભૂતસામાન્યં ઘટાદીનાં ચ પૃથિવીસામાન્યં, તત્પરિમાણાદેતેઽપિ પરિમિતા ઇતિ । તદયુક્તમ્ । કસ્માત્ ? અભાવાત્ । નહિ વઃ સામાન્યં દ્રવ્યાદર્થાન્તરભૂતમસ્તિ । સારૂપ્યમાત્રે સામાન્યપરિકલ્પનાત્ ।

ઉચ્યતે ન, તત્ત્વાન્તરાનુપપત્તેઃ । તત્ત્વભેદેન પરિમિતા ભેદા ઇત્યેતદ્વિવક્ષિતં યથોક્તમસ્માભિરુક્તં ચ યદ્યસ્તિ તત્ત્વાન્તરમુચ્યતામ્ । યત્પુનરેતદુક્તં સામાન્યસ્યાર્થાન્તરભૂતસ્ય ભવત્પક્ષેઽનુપપત્તિરિતિ સત્યમેતત્ । તથાવિધેનાપિ તુ તેન સંવ્યવહારો ન પ્રતિષિધ્યતે ઇતિ વક્ષ્યામઃ । તસ્માત્સિદ્ધં ભેદાનાં પરિમાણાદસ્ત્યવ્યક્તમ્ ।

કિં ચાન્યત્ ।

॥ સમન્વયાત્ ॥

ઇહ યેન ભેદાનાં સમનુપગતિસ્તસ્ય સત્ત્વં દૃષ્ટમ્ । તદ્યથા મૃદા ઘટાદીનામ્ । અસ્તિ ચેયં સુખદુઃખમોહૈઃ શબ્દાદીનાં સમનુગતિઃ । તસ્માત્તેઽપિ સન્તિ યે ચ સુખાદયોઽસ્તમિતવિશેષાસ્તદવ્યક્તમ્ ।

તસ્માદસ્ત્યવ્યક્તમ્ ।

આહ, નાસિદ્ધત્વાત્ । સુખાદિભિઃ શબ્દાદયોઽનુગમ્યન્ત ઇત્યેતદપ્રસિદ્ધમ્ કેન કારણેન પ્રતિપત્તવ્યમિતિ ?

ઉચ્યતે- તદ્બુદ્ધિનિમિત્તત્વાત્ । ઇહ શબ્દસ્પર્શરૂપરસગન્ધાનાં સન્નિધાને સ્વસંસ્કારવિશેષયોગાત્સુખદુઃખમોહાકારાઃ પ્રાણિનાં બુદ્ધય ઉત્પદ્યન્તે । યચ્ચ યાદૃશીં બુદ્ધિમુત્પાદયતિ તત્તેનાન્વિતમ્ । તદ્યથા ચન્દનાદિભિઃ શકલાદયઃ । તસ્માન્નાસિદ્ધિઃ સમન્વયસ્યેતિ ।
આહ, અસિદ્ધ એવાયં સમન્વયઃ । કસ્માત્ ? વિલક્ષણકાર્યોત્પત્તિદર્શનાત્ । ન હ્યયં નિયમઃ કારણસદૃશમેવ કાર્યમુત્પદ્યતે । કિં તર્હિ વિલક્ષણં અગ્નિધૂમશબ્દાદિ । કથમ્ ? ન હ્યગ્નિસ્તૃણાદિસ્વભાવકોઽગ્નિસ્વભાવકો વા ધૂમઃ । ન ચ ભેરીદણ્ડાદિસ્વભાવઃ શબ્દઃ । તસ્માત્સુખાદ્યનુગતાઃ શબ્દાદય ઇતીચ્છામાત્રમ્ ।
ઉચ્યતે ન, વિશેષિતત્વાત્ । સુખાદિસ્વરૂપાઃ શબ્દાદયઃ, તત્સન્નિધાને સુખાદ્યાકારપ્રત્યયોત્પત્તિરિત્યેતદાદિત એવાસ્માભિર્વિશેષિતમ્ । તસ્માન્ન ભિન્નજાતીયાસ્ત ઇતિ । યત્તુ ખલ્વિદમુચ્યતેઽગ્ન્યાદીનાં વિલક્ષણાનામુત્પત્તિદર્શનાત્પ્રધાનભેદાનામતજ્જાતીયપ્રસંગ ઇતિ તદયુક્તમ્ । કસ્માત્ ? અભિપ્રાયાનવબોધાત્ । નૈવ બ્રૂમો યો યસ્ય વિકારઃ સ તજ્જાતીયક ઇતિ । કિં તર્હિ યો યજ્જાતીયકઃ સ તસ્ય વિકાર ઇતિ । તસ્માદયુક્તમેતત્ । કિંચાન્યત્ ઉદાહરણાપ્રસિદ્ધેઃ । ન ચૈતદુદાહરણં પ્રસિદ્ધં અગ્ન્યાદયઃ સ્વકારણજાતિં નાનુવિદધતીત । કસ્માત્ ? બલવીર્યાનુવિધાનાત્ । તદ્યથા અગ્નેર્ધૂમસ્ય ચ ત્વક્ચન્દનનલિકાદિસ્નિગ્ધતાનુવૃત્તેસ્તૈક્ષ્ણ્યાદ્યનુવૃત્તેશ્ચ । ભેરીવિકારઃ શબ્દો ન તુ યથા ભેરીરૂપમવસ્થિતમ્ । પ્રદીપેનેવ તુ દણ્ડાભિઘાતેન વ્યજ્યત ઇતિ સાધ્યમેતત્ । ન ચૈકૈકો રૂપાદીનાં દ્રવ્યાકારઃ સમુદાયધર્મત્વાત્ । તસ્માન્ન ભેરીવિકારઃ શબ્દઃ । તત્ર યદુક્તં વિલક્ષણકાર્યોત્પત્તિદર્શનાદસિદ્ધોઽન્વય ઇત્યેતદયુક્તમ્ । તસ્માદ્યુક્તમેતત્ સમન્વયાદસ્ત્યવ્યક્તમિતિ ।
કિં ચાન્યત્ ।

॥ શક્તિતઃ પ્રવૃત્તેશ્ચ ॥

ઇહ યાવતી કાચિલ્લોકે પ્રવૃત્તિરુપલભ્યતે સા સર્વા શક્તિતઃ । તદ્યથા કુમ્ભકારસ્ય દણ્ડાદિસાધનવિન્યાસલક્ષણાયાશ્ચ શક્તેઃ સન્નિધાનાદ્ ઘટકરણે પ્રવૃત્તિરસ્તિ । વ્યક્તસ્ય ચેયં કાર્યત્વાત્તદ્ભાવે પ્રવૃત્તિરિતિ । અતસ્તસ્યાપિ શક્ત્યા ભવિતવ્યમ્ । યાઽસૌ શક્તિસ્તદવ્યક્તમ્ । તસ્માદસ્ત્યવ્યક્તમિતિ ।

આહ, પ્રાક્પ્રવૃત્તેઃ શક્ત્યભાવઃ, પ્રવૃત્ત્યનુપલબ્ધેઃ । યદિ શક્તિપૂર્વિકા પ્રવૃત્તિરિતિ મન્યધ્વં તેન યાવત્પ્રવૃત્તિર્નોપલભ્યતે તાવચ્છક્તિર્નાસ્તીત્યેતદાપન્નમ્ । કસ્માત્ ? સત્યાં શક્ત્યાં કાર્યાભાવે સ્વરૂપાભાવપ્રસંગાત્ । યદિ ખલ્વપિ વિદ્યમાના શક્તિઃ કેનચિત્પ્રબન્ધેન કાર્યં નોત્પાદયેચ્છક્તિતરશક્તેત્યેતદાપન્નમ્ । તસ્માત્સહકારિભાવાન્તરસન્નિધાનાત્પ્રવુત્તિસમકલામેવાર્થાનાં શક્તય ઉત્પદ્યન્તે । તાશ્ચ તાવદેવ પ્રધ્વંસન્તે ।

તત્ર યદુક્તં પ્રાક્પ્રવૃત્તેઃ શક્તિદર્શનાદ્વ્યક્તસ્યાપિ નિષ્પાદિકા શક્તિરસ્તીત્યેતદયુક્તમ્ । કિં ચાન્યત્ ભેદાભેદકલ્પનાનુપપત્તેઃ । ઇહ પ્રધાનમેવ વા શક્તિઃ સ્યાત્ પ્રધાનાદ્વા ભિન્ના ? કિં ચાતઃ ? તદ્યદિ તાવત્પ્રધાનમેવ શક્તિસ્તેન  કાર્યે ભેદાચ્છક્તિભેદોઽવસીયત ઇતિ શક્તિભેદાત્પ્રધાનનાનાત્વપ્રસંગઃ । પ્રધાનૈકત્વાદ્વા તદવ્યતિરિક્તાનાં શક્તીનામેકત્વપ્રસંગઃ । તતશ્ચ કાર્યનાનાત્વાભાવઃ । અથ મા ભૂદયં દોષ ઇતિ પ્રધાનાદર્થાન્તરભાવઃ શક્તીનામભ્યુપગમ્યતે તેન ભિન્નાનાં શક્તીનાં પ્રવૃત્તિતઃ સિદ્ધૌ પ્રધાનસિદ્ધિર્નાસ્તીત્યેતદાપન્નમ્ । કિં ચાન્યત્ । સ્વરૂપાભિધાનં ચ । પ્રધાનસ્ય શક્તિમાત્રાદપ્યર્થાન્તરત્વમભ્યુપગમ્ય રૂપમીદૃક્પ્રધાનં સ્વાવસ્થાયામિતિ, તચ્ચાશક્યમભિધાતુમ્ । તસ્માદ્ ભેદાભેદકલ્પનાનુપપત્તેરકલ્પનીયા શક્તિરિતિ ।

ઉચ્યતે- યદુક્તં પ્રાક્પ્રવૃત્તેઃ શક્ત્યભાવઃ પ્રવૃત્ત્યનુપલબ્ધેરિતિ, અત્ર બ્રૂમઃ નાપ્રસિદ્ધત્વાત્ । કારણં શક્તિઃ કાર્યં પ્રવૃત્તિઃ । ન ચ કાર્યાનુપલબ્ધૌ કાર્યાભાવ ઇત્યેતલ્લોકે પ્રસિદ્ધમ્ । યત્પુનરુક્તં કાર્યનિષ્પત્તૌ શક્તેઃ સ્વરૂપહાનમિતિ અત્ર બ્રૂમઃ ન, પ્રદીપદૃષ્ટાન્તાત્ । યદ્યથા પ્રદીપસ્ય ઘટાદિપ્રકાશનશક્તિરસ્તિ । અથ ચ કુડ્યાદ્યાવરણસામર્થ્યાન્ન ઘટાદીન્પ્રકાશયિતું શક્નોતિ । ન ચ શક્યતે વક્તું પ્રદીપસ્ય પ્રકાશનશક્તિરશક્તેતિ । એવમન્યેષામપિ ભાવાનાં પ્રાક્પ્રરુત્તેરપિ શક્તિઃ સ્યાત્ । ન ચાપ્રવૃત્તિદર્શનાદસ્યાઃ સ્વરૂપહાનં સ્યાત્ । યત્તૂક્તં સહકારિભાવાન્તરસન્નિધાનાત્પ્રવૃત્તિસમકાલમેવાર્થાનાં શક્તિપ્રાદુર્ભાવ ઇતિ અત્ર બ્રૂમઃ- તદપ્રસિદ્ધિઃ શક્ત્યપેક્ષત્વાત્ । ઇહ સર્વઃ કર્તા સ્વગતાં શક્તિમપેક્ષ્ય તદ્યોગ્યતયા સહકારિભાવાન્તરમુપાદત્તે, સા ચેત્પ્રાક્પ્રવૃત્તેર્ન સ્યાત્સાધનાનાં વિષયસ્વભાવાનવધારણાદનુપાદાનપ્રસંગઃ । અનિષ્ટં ચૈતત્ । તસ્માત્પ્રાક્પ્રવૃત્તેઃ શક્તિઃ । યત્પુનરેતદુક્તં તાવદેવ પ્રધ્વંસં ઇતિ અત્ર

બ્રૂમઃ ન, કાર્યનિષ્ઠાદર્શનાત્ । યદિ પ્રવૃત્તિસમકાલમેવ પ્રધ્વંસઃ
ઇતિ અત્ર બ્રૂમઃ ન, કાર્યનિષ્ઠાદર્શનત્ । યદિ પ્રવૃત્તિસમકાલમેવ
પ્રધ્વંસઃ સ્યાત્કાર્યનિષ્ઠૈવ ન સ્યાત્ । તન્નિમિત્તત્વાત્કાર્યસ્ય અસ્તિ ત્વસૌ ।
તસ્માન્ન પ્રવૃત્તિસમકાલમેવ શતિપ્રધ્વંસઃ । સદૃશસન્ધાનોત્પત્યા
કાર્યનિષ્ઠેતિ ચેન્ન । વિનાશસમકાલોત્પત્ત્યસમ્ભવાત્ ।
અથાપિ સ્યાદેકસ્યાં શક્તૌ ક્ષણસાધ્યમંશમવસાય
વિનષ્ટાયામન્યત્તત્સદૃશં શક્ત્યન્તરમુત્પદ્યતે,
તસ્મિન્વિનષ્ટેઽન્યદિતિ । એવં શક્તિસન્તાનાત્કાર્યનિષ્ઠા ભવતીતિ ।
એતદપ્યયુક્તમ્ । કસ્માત્ ? વિનાશકાલોત્પત્ત્યસમ્ભવાત્ । કો હ્યત્ર
હેતુર્યેન વિનાશસમકાલમન્યચ્છક્તિરૂપં કાર્યમવસીયયતિ ન પુનઃ
પ્રાક્તનમેવાવસ્થિતમિતિ ? કિં ચાન્યત્ । કૌટસ્થ્યદોષપરિહારાત્ ।
ક્ષણોત્તરકાલાવસ્થાને ચ ભાવાનાં યો દોષ ઉપાત્તઃ કૌટસ્થ્યપ્રસંગ
ઇતિ તસ્ય પરિહાર ઉક્તઃ । તસ્માન્નાસ્તિ શક્તીનાં પ્રવૃત્તિકાલે વિનાશઃ ।
પ્રવૃત્ત્યુત્તરકાલમપિ નાસ્તિ । કસ્માત્ ? પુનઃ પ્રવૃત્તિદર્શનાત્ ।
શક્ત્યન્તરોત્પત્તૌ પ્રવૃત્યુત્તરકાલમપિ ઇતિ ચેત્ ન, હેત્વભાવાત્ । કો
હ્યત્ર નિર્બન્ધઃ તસ્યાં વિનષ્ટાયામન્યા પ્રવૃત્ત્યન્તરહેતુર્ભવતિ નૈવ
પુનઃ સૈવેતિ ? કૃતાર્થત્વાદિ ચેત્ ન અનભ્યુપગમાત્ । ન હ્યેકઘટાર્થા
શક્તિરભ્યુપગમ્યતે । તત્ર યેનૈવ હેતુના એકં ઘટમવસાય ન વિનશ્યતિ
તેનૈવ યાવન્તિ કર્તવ્યાનીતિ । તસ્માત્ત્રિષુ કાલેષુ શક્તયોઽવતિષ્ઠન્તે ।
યત્પુનરેતદુક્તં ભેદાભેદકલ્પનાનુપપત્તિરિતિ, અત્ર બ્રૂમઃ- અસ્તુ
પ્રધાનાદભિન્ના શક્તિઃ । ન તસ્ય નાનાત્વં શક્ત્યેકત્વં વા પ્રસજ્યતે ।
કસ્માત્ ? સંખ્યાવ્યવહારસ્ય બુદ્ધ્યપેક્ષત્વાદ્બુદ્ધિનિમિત્તસ્ય ચાસત્કારેણ
પ્રધાનશક્તિસ્વભાવાત્, ઇહાયં સંખ્યાવ્યવહારો બુદ્ધ્યપેક્ષઃ ।
કથમ્ ? યદભિન્નાં બુદ્ધિમુત્પાદયતિ તદેકં, પ્રધાનાવસ્થાયાં
ચ શક્તયોઽસ્તમિતવિશેષત્વાદભિન્નાં બુદ્ધિમુત્પાદયન્તિ ।
તસ્માદેકં તત્પ્રવૃત્તિકાલે વિશેષાવગ્રહણે ભેદં પ્રતિપદ્યતે,
દેવશક્તિર્મનુષ્યશક્તિરિત્યાદિ । તસ્માન્નાસામેકત્વમતો ન
ભેદાભેદકલ્પનાનુપપત્તિરિતિ । વ્યક્તે દર્શનાચ્છક્તીનામવ્યક્તે
પ્રતિપત્તિરિતિ ચેત્ સ્યાદેતત્ । વ્યક્તે શક્તિપ્રવૃત્તી દૃષ્ટે ન ચાવ્યક્તે ।
ક્વચિદન્યતો વ્યક્તમેવૈતસ્માદ્ધેતોઃ સિદ્ધ્યતિ નાવ્યક્તમિત્યેતચ્ચાયુક્તમ્ ।
કસ્માત્ ? સામાન્યતોદૃષ્ટાન્તાત્સિદ્ધેઃ । યથૈવ હિ દેવદત્તાધારયા
ક્રિયયા તસ્ય દેશાન્તરપ્રાપ્તિમુપલભ્યાત્યન્તાદૃષ્ટં જ્યોતિષાં

દેશાન્તરપ્રાપ્તેર્ગમનમનુમીયતે એવં પ્રવૃત્તેઃ શક્તિનિયમિતત્વાદ્વ્યક્તસ્ય
ચ પ્રવૃત્તિભૂતત્વાદવશ્યમત્યન્તાદૃષ્ટા શક્તિરભ્યુપગન્તવ્યેતિ
સિદ્ધં શક્તિતઃ પ્રવૃત્તેરસ્ત્યવ્યક્તમ્ ।
કિં ચાન્યત્ ।

॥ કારણકાર્યવિભાગાત્ ॥

કારણં ચ કાર્યં ચ કારણકાર્યે તયોર્વિભાગઃ કાર્યકારણવિભાગઃ ।
ઇદં કારણમિદં કાર્યમિતિ બુદ્ધ્યા દ્વિધાવસ્થાપનં વિભાગો
યઃ સ કારણકાર્યવિભાગઃ । તદવસ્થિતભાવપૂર્વકં દૃષ્ટમ્ ।
તદ્યથા શયનાસનરથચરણાદિઃ । અસ્તિ ચાયં વ્યક્તસ્ય
કારણકાર્યવિભાગસ્તસ્માદિદમપ્યવસ્થિતભાપૂર્વકં, યોઽસાવવસ્થિતો
ભાવસ્તદવ્યક્તમ્ ।
આહ, તદનુપલબ્ધેરયુક્તમ્ । ન હિ શયનાદીનાં કારણકાર્યવિભાગઃ
કશ્ચિદુપલભ્યતે । તસ્માદયુક્તમેતત્ ।
ઉચ્યતે ન કાર્યકારણયોરુપકારકોપકાર્યપર્યાયત્વાત્કારણં કાર્યમિતિ
નિર્વત્યનિર્વર્તકભાવોઽભિપ્રેતઃ । કિં તર્હ્યુપકારકોપકાર્યભાવઃ ।
સ ચાસ્તિ શયનાદીનાં વ્યક્તસ્ય ચ । અતો ન પ્રમાદાભિધાનનેતત્ ।
આહ, કઃ પુનર્વ્યક્તસ્ય પરસ્પરસ્ય કાર્યકારણભાવ ઇતિ ?
ઉચ્યતે ગુણાનાં તાવત્સત્ત્વરજસ્તમસાં
પ્રકાશપ્રવૃત્તિનિયમલક્ષણૈર્ધર્મૈરિતરેતરોપકારેણ યથા
પ્રવૃત્તિર્ભવતિ, તથ પ્રીત્યપ્રીતિવિષાદાત્મકા ઇત્યેતસ્મિન્સૂત્રે
(kA0 12) વ્યાખ્યાતમ્ । તથા શબ્દાદીનાં પૃથિવ્યાદિષુ
પરસ્પરાર્થમેકાધારત્વમ્ । શ્રોત્રાદીનામિતરેતરાર્જનરક્ષણસંસ્કારાઃ ।
કરણસ્ય કાર્યાત્સ્થાનસાધનપ્રખ્યાપનાદિકાર્યસ્ય
કરણાદ્વૃત્તિક્ષતભંગસંરોહણસંશોષણપરિપાલનાનિ । પૃથિવ્યાદીનાં
વૃત્તિસંગ્રહણપન્થિવ્યૂહાવકાશદાનૈર્ગવાદિભાવો દૈવમાનુષતિરશ્ચાં
યથર્તુવિધાનેજ્યાપોષણાભ્યવહારસંવ્યવહારૈરિતરેતરાધ્યયનં વર્ણાનાં
સ્વધર્મપ્રવૃત્તિવિષયભાવઃ । અન્યશ્ચ લોકાદ્યથાસંભવં દ્રષ્ટવ્યઃ ।
આહ, તદનુપપત્તિઃ । ક્રમયૌગપદ્યાસમ્ભવાત્ ।
યોઽયં ગુણાનાં પ્રકાશપ્રવૃત્તિનિયમૈરિતરેતરોપકારોઽભ્યુપગમ્યતે
સ ખલુ ક્રમેણ વા સ્યાત્ યુગપદ્વા ? કિં ચાતઃ ? તન્ન તાવત્ક્રમેણ
સંભવતિ । કસ્માત્ ? એકસ્ય નિરપેક્ષસ્ય પ્રવૃત્તાવિતરયોરપિ

તત્પ્રસંગાત્ । યદિ તાવત્સત્ત્વં પૂર્વં ગુણાન્તરનિરપેક્ષં
સ્વશક્તિત એવ પ્રકાશતે તયોરુપકારકમિત્યાશ્રીયતે । તેન
યથા સત્ત્વમેવમિતરાવપ્યુપકારનિરપેક્ષૌ સ્વકાર્યં કરિષ્યત
ઇત્યુપકારાનર્થક્યમ્ । અથ મા ભૂદયં દોષ ઇત્યતો યૌગપદ્યમાશ્રીયતે ।
તદપ્યનુપપન્નમ્ । કસ્માત્ ? સહભૂતાનામનુપકારકત્વાદ્,
ગોવિષાણવત્ । કિં ચાન્યત્ । સદસદ્વિકલ્પાનુપપત્તેઃ । ઇહ
સત્ત્વં પ્રકાશમાનં રજસ્તમસોર્વિદ્યમાનં વા પ્રકાશમાવિષ્કુર્યાત્
અવિદ્યમાનં વા ? કિં ચાતઃ ? તદ્યદિ તાવદ્વિદ્યમાનમભિવ્યનક્તિ તેન
સર્વેષામેકસ્વાભાવ્યાદ્ગુણત્વપ્રસંગઃ । કિંચ સત્ત્વવચ્ચેતરયોઃ
સ્વાતંત્ર્યપ્રસંગઃ । યથા સત્ત્વસ્ય પ્રકાશક્તિરસ્તીત્યતસ્તદ્
ગુણાન્તરનિરપેક્ષં પ્રકાશતે તદ્વદિતરાવપીત્યદોષઃ । અથ
વાઽવિદ્યમાના પ્રકાશશક્તિઃ સત્ત્વસમ્બન્ધાદ્રજસ્તમસોરુપજાયતે ।
તેન યદુક્તં પ્રાક્પ્રવૃત્તેરેવ તિષ્ઠન્તે શક્તય ઇતિ તદ્ હીનમ્ ।
તતશ્ચ સત્કાર્યવાદવ્યાઘાતઃ । કિં ચાયમનેકાન્તાત્ । ન હ્યયમેકાન્તઃ
પરસ્પરોપકારિણામવસ્થિતભાવપૂર્વકત્વમિતિ । તથા હિ સત્ત્વાદયઃ
પરસ્પરોપકારિણો ન ચાવસ્થિતભાવપૂર્વકાઃ । તેન યદુક્તં
કારણકાર્યવિભાગાદ્ભેદાનામવ્યક્તમસ્તિ એતદયુક્તમ્ ।
ઉચ્યતે- યદુક્તમુપકારાભાવઃ, ક્રમયૌગપદ્યાસમ્ભવાદિતિ,
અસ્તુ યુગપદુપકારઃ । યત્તૂક્તમ્ સહભૂતાનામનુપકારકત્વં
ગોવિષાણાદિવદિતિ, અત્ર બ્રૂમઃ ન, અન્યથાનુપપત્તેઃ । ન હિ
ગોવિષાણયોઃ સહભૂતત્વાદૌકારાનુપપત્તિઃ । કિં તર્હિ એકકાર્યાભાવાત્ ।
યેષાં તુ કાર્યમેકં સહભાવે તુ તેષામુપકારો ન પ્રતિષિધ્યતે ।
તદ્યથા પૃથિવ્યાદીનાં ધૃતિસંગ્રહશક્તિવ્યૂહાવકાશદાનૈઃ ।
શરીરસ્થિતયોરક્રમભાવિનોરપિ ખુરવિષાણયોર્નાસ્તિ પરસ્પરોપકારઃ ।
તસ્માન્ન સહભાવાસહભાવાવુપકારાનુપકારહેતૂ । કિં ચ દૃષ્ટત્વાત્ ।
દૃષ્ટઃ ખલુ વેગેનોર્ધ્વગમને વાયોરરઘટ્ટાદીનાં યુગપદુપકારઃ
ન કશ્ચિદ્દોષઃ તથા ગુણાનામપિ સ્યાત્ । સંયોગનિમિત્ત ઇતિ
ચેત્ સાધ્યં કિમર્થાન્તરભૂતમુત પ્રાપ્તિમાત્રં સંયોગ ઇતિ ।
યત્પુનરેતદુક્તં સદસદ્વિકલ્પાનુપપત્તેરિતિ અત્ર બ્રૂમઃ અયુક્તમેતત્ ।
કસ્માત્ ? પઙ્ગ્વન્ધવત્તદુપકારે દોષાનુપપત્તેઃ । તદ્યથા
પઙ્ગ્વન્ધયોરિતરેતરસમ્બન્ધાન્ન વિદ્યમાનયોર્દૃગ્ગતિશક્ત્યોરન્યોન્યાત્મનિ
વ્યક્તિઃ ન ચાવિદ્યમાનયોરથ ચૈકકાર્યસિદ્ધિર્યથા ચ

પૃથિવ્યાદીનાં પરસ્પરોપકારિત્વં શક્તયોરભિવ્યજ્યતે ન પરશક્ત્યા એવં ગુણાનામપીતિ । યત્પુનરેતદુક્તમનેકાન્તાદિતિ તદયુક્તમ્ । કસ્માત્ ? શાસ્ત્રાનવબોધાત્ । ઇહાસ્માકં કાર્યકારણયોરર્થાનભ્યુપગમાદ્ગુણાનામવસ્થાન્તરમેવાવસ્થાન્તરાનપેક્ષં કાર્યકારણશબ્દવાચ્યતાં લભતે । તત્ર યે તાવત્પ્રધાનાવસ્થાનુભાવિનો ગુણાસ્તેષાં શક્તિમાત્રરૂપત્વાદનિર્દેશ્યપ્રકાશાદિસ્વભાવાનાં નાસ્તિ તન્નિબન્ધન ઉપકારઃ । યદા વૈષમ્યમાપદ્યન્તે તદાઽનિવારિતપ્રકાશાદિરૂપાસ્તન્નિમિત્તમુપકારં પ્રતિપદ્યન્તે । તસ્માદ્વ્યક્તાનામુપકારાભ્યુપગમાદવસ્થિતભાવપૂર્વકત્વં ન વિરુધ્યત ઇતિ શાસ્ત્રમનવગમ્યૈવમુચ્યતેઽનૈકાન્તિકોઽયં હેતુઃ । પ્રધાનાવસ્થાયામુપકારાનભ્યુપગમાદુત્તરકાલમપિ તત્પ્રસંગ ઇતિ ચેત્ સ્યાન્મતમ્, યદિ ગુણાનામાદ્યે પ્રકોપે સ્વસામર્થ્યાદેવ પૂર્વસ્માત્પ્રચ્યુતિસ્તેનોત્તરકાલમપિ તદ્વદેવ ભવિષ્યતિ । અથ પ્રધાનાવસ્થાયામપિ ચોપકારો ન તર્હિ નાનૈકાન્તિકો હેતુરિતિ । તચ્ચ નૈવમ્ । કસ્માત્ ? અગ્નિવત્સ્વશક્તિનિમિત્તત્વાત્ । તદ્યથા સૂક્ષ્મોઽગ્નિઃ સૂક્ષ્મં પ્રકાશં સ્વયમેવ કરોતિ, ઘટાદિપ્રકાશને તુ તૈલવર્ત્યાદ્યપેક્ષતે । તદ્વદ્ગુણાનામાદ્યઃ પ્રકોપઃ સ્વશક્તિતઃ । મહદાદ્યપેક્ષસ્તૂપકારતઃ । તસ્માદ્યુક્તમેતત્ કારણકાર્યવિભાગાદસ્ત્યવ્યક્તમિતિ ।
કિં ચાન્યત્ ।

॥ અવિભાગાદ્વૈશ્વરૂપ્યસ્ય ॥ ૧૫ ॥

ઇહ યદ્વિશ્વરૂપં તસ્યાવિભાગો દૃષ્ટઃ । તદ્યથા સલિલાદીનામ્ । જલભૂમી વિશ્વરૂપાશ્ચ મહદાદયઃ । તસ્માદેષામપ્યવિભાગેન ભવિતવ્યમ્ । યોઽસાવવિભાગસ્તદવ્યક્તમ્ । તસ્માદસ્ત્યવ્યક્તમ્ ।
આહ, કિં પુનસ્તદ્વૈશ્વરૂપ્યં, કો વા વિશ્વરૂપ ઇતિ ?
ઉચ્યતે- વૈશ્વરૂપ્યમિતિ વિશિષ્ટમવસ્થાનમાચક્ષ્મહે, અસ્તમિતવિશેષત્વમવિભાગ ઇતિ । વિશેષસ્ય સામાન્યપૂર્વકત્વાદિતિ યોઽર્થસ્તદુક્તં ભવતિ અવિભાગાદ્વૈશ્વરૂપ્યસ્યેતિ । એવમેતૈઃ પઞ્ચભિર્વીતૈર્વ્યક્તસ્ય કારણમસ્ત્યવ્યક્તમિતિ સિદ્ધમ્ ।
આહ- વિપ્રતિષેધપ્રસંગઃ । કારણાન્તરપ્રતિષેધાવચનાત્ । યથા ભવાનાહ- પ્રધાનં જગદુત્પત્તિસમર્થં કારણમસ્તિ । એવં તન્ત્રાન્તરીયાઃ પરમાણુપુરુષેશ્વરકર્મદૈવસ્વભાવકાલયદૃચ્છાઽભાવાન્કારણત્વેનાભિદધતિ,

તેષાં ચ પ્રતિષેધો નોચ્યત ઇતિ । અતો વિપ્રતિષેધઃ
પ્રાપ્નોતિ । કિં પ્રધાનમેવ કારણં આહોસ્વિદેતાન્યેવ વોભયમિતિ
? અન્વયદર્શનાત્તદનુપપત્તિરિતિ ચેત્ સ્યાન્મતમ્ પ્રધાનાન્વય એવ
પૃથિવ્યાદિષુ સુખાદિલક્ષણ ઉપલભ્યતે । યચ્ચ યેનાન્વિતં તસ્યાસૌ
વિકાર ઇતિ યુક્તમેતત્પ્રાગપદિષ્ટમ્ । તસ્માત્પ્રધાનવિકાર એવ વ્યક્તમિતિ ।
તચ્ચાનુપપન્નમ્ । કસ્માત્ ? અનેકાન્વયસંભવાત્ । પરમાણ્વન્વયોઽપિ હિ
વ્યક્ત ઉપલભ્યતે રૂપાદિસત્ત્વાત્ । પુરુષાન્વયઃ કરણસ્ય સંવેદકત્વાત્ ।
ઈશ્વરાન્વયઃ શક્તિવિશેષયુક્તાનામુપલબ્ધેઃ । કર્મદૈવાન્વયઃ
જગદ્વૈચિત્ર્યોપલમ્ભાત્ । સ્વભાવાન્વયો દ્રવ્યાન્તરસંસર્ગેઽપિ ભાવાનાં
તસ્માદપ્રચ્યુતેઃ । કાલાન્વયઃ યુગાદ્યનુવિધાનાત્ । યદૃચ્છાન્વયો
નિયમાભાવાત્ । અભાવાન્વયો ગવાદીનાં પરસ્પરાત્મસ્વદર્શનાદિતરેતરાણિ
પ્રયુક્તાનિ । કારણાન્તરપૂર્વકત્વેઽપિ ખલુ વ્યક્તસ્ય શક્ત્યાઃ પરિમાણાદયઃ
પૂર્વમેવ કલ્પયિતુમ્ । તસ્માદયુક્તમન્વયાદિભ્યઃ કારણમસ્ત્યવ્યક્તમિતિ ।
ઉચ્યતે- યત્તાવદુક્તં પરમાણૂનામપ્રતિષેધાત્ વિપ્રતિષેધપ્રસંગ
ઇતિ, અત્ર બ્રૂમઃ- તદનુપપત્તિરસ્તિત્વાનભ્યુપગમાત્ । અસ્તિત્વે
હિ પરમાણૂનામભ્યુપગમ્યમાને સતિ સત્યમેવં સ્યાદિયમાશંકા,
કિં પરમાણુપૂર્વકમિદં વિશ્વમથ પ્રધાનપૂર્વકમિતિ ? ન તુ
તેષાં સદ્ભાવો નિશ્ચિતઃ । તસ્માદયુક્તમેતત્ । યત્તુ ખલ્વિદમુચ્યતે
પૃથિવ્યાદિષુ રૂપાદ્યુપલમ્ભાદન્વયદર્શનાદણૂનાં સદ્ભાવઃ પ્રધાનવદેવ
કલ્પયિતવ્ય ઇત્યેતદપિ ચાનુપપન્નમ્ । કસ્માત્ ? અન્યથાપિ તદુપપત્તેઃ ।
તન્માત્રપૂર્વકત્વેઽપિ હિ પૃથિવ્યાદીનાં કલ્પ્યમાને રૂપાદિસત્ત્વાદતો
ન યુક્તમેતત્ । સુખાદીનામાત્મગુણત્વેનાભ્યુપગમાત્પ્રધાનેઽપિ
તત્પ્રસંગ ઇતિ ચેત્, અથાપિ સ્યાદ્યથા તન્માત્રાણાં રૂપાદિમત્ત્વં
કલ્પ્યતે તત્પૂર્વકત્વં ચ પૃથિવ્યાદીનાં દૃશ્યમપિ તેષુ
રૂપાદિસત્ત્વલિંગેન પરમાણુભ્યો નિષ્કૃષ્યતે, એવમસ્માભિઃ
સુખાદીનામાત્મગુણત્વાભ્યુપગમાત્તદ્બુદ્ધિનિમિત્તત્વે પૃથિવ્યાદીનાં
પ્રધાનપૂર્વત્વાક્ષેપઃ કરિષ્યત ઇતિ । એતચ્ચાનુપપન્નમ્ । કસ્માત્
? આત્મગુણત્વતિષેધાત્ । તસ્માચ્ચ વિપર્યાસાદિત્યત્ર (kA0 19)
સુખાદીનામાત્મગુણત્વપ્રતિષેધં કરિષ્યામઃ તસ્માદસમ્યગેતત્ ।
આહ, યદિ પુનસ્તન્માત્રાણામેવ પરમાણુત્વમભ્યુપગમ્યતે ક એવં સતિ દોષઃ
સ્યાત્ ?
ઉચ્યતે- ન શક્યમેવં ભવિતુમ્ । કિં કારણમ્

? વૃદ્ધિમત્યસ્તન્માત્રલક્ષણાઃ પ્રકૃતયોઽસ્માભિરભ્યુપગમ્યન્તે ।
કસ્માત્ ? સ્વકાર્યાદ્ધિ પ્રથીયસી પ્રકૃતિર્ભવતીતિ ચ નઃ સમયઃ ।
મહાન્તિ ચ પૃથિવ્યાદીનિ મહાભૂતાનિ । તસ્માત્તેષાં તદતિરિક્તતયા
પૃથિવ્યા ભવિતવ્યમ્ । પરિચ્છિન્નદેશાશ્ચ પરમાણવઃ । તસ્માન્ન
તન્માત્રાભ્યુપગમાત્તેષામભ્યુપગમઃ । ઉપેત્ય વા તદસમ્ભવઃ કૃતકત્વાત્ ।
અસ્તુ વા પરમાણૂનાં સદ્ભાવસ્તથાપિ તેભ્યો જગદુત્પત્તેરસમ્ભવં
બ્રૂમઃ । કિં કારણમ્ ? કૃતકત્વાત્ । અકૃતકેન હિ જગત્કારણેન યુક્તં
ભવિતું, કૃતકાશ્ચ પરમાણવઃ । તસ્માત્સત્યપિ સદ્ભાવે ન તેષાં
જગત્કારણમિષ્યતે ઇતિ ? ઉચ્યતે- તસ્યૈવ કારણત્વપ્રસંગાત્ । યદ્ધિ
તત્પરમાણૂનાં કારણં તદેવ જગત્કારણત્વેન યુક્તં કલ્પયિતું સ્યાત્ ન
તન્નિષાદિમતાઃ પરમાણવઃ । કૃતકત્વાસિદ્ધેરયુક્તમિતિ ચેત્ સ્યાન્મતં યદિ
પરમાણૂનાં કૃતકત્વં પ્રસિદ્ધમત એતદ્યુજ્યતે વક્તુમમુષ્માદ્ધેતોરકારણં
પરમાણવ ઇતિ । તત્ત્વસિદ્ધમ્ । તસ્માન્ન કિંચિદેતત્ । ઉચ્યતે-
પરિચ્છિન્નદેશત્વાત્ । ઇહ યત્પરિચ્છિન્નદેશઃ તત્કૃતકં દૃષ્ટમ્ ।
તદ્યથા ઘટઃ, પરિચ્છિન્નદેશશ્ચ । તસ્માત્પરમાણવઃ કૃતકાઃ ।
કિં ચાન્યત્ રૂપાદિમત્ત્વાત્ । ઇહ યદ્રૂપાદિમત્તત્કૃતકં દૃષ્ટમ્ ।
તદ્યથા ઘટાઃ, રૂપાદિમન્તશ્ચ પરમાણવઃ । તસ્માત્કૃતકાઃ । કિં
ચાન્યત્ ઔષ્ણ્યયોગાત્ । યદૌષ્ણ્યયુક્તં તત્કૃતકમ્ । તદ્યથા પ્રદીપઃ,
તદ્વન્તશ્ચાગ્નેયાઃ પરમાણવઃ । તસ્માત્કૃતકાઃ । કિંચ વેગવત્ત્વાત્ । ઇહ
યદ્વેગવત્તત્કૃતકમ્ । તદ્યથા ઇષુર્વેગવાન્, તદ્વન્તો વાયવીયાઃ પરમાણવઃ ।
તસ્માત્કૃતકાઃ । કિંચ સ્નેહદ્રવત્વયોગાત્ । ઇહ યત્સ્નેહદ્રવત્વયુક્તં
તત્કૃતકમ્ । યથા કેદારાદિષ્વાપઃ । ઇત્થં ચાપ્યાઃ પરમાણવઃ ।
તસ્માત્કૃતકાઃ । કિંચાધેયત્વાત્ । ઇહ યદન્યસ્મિન્નાધીયતે તત્કૃતકમ્ ।
તદ્યથા ઠદ્યવમ્ । આધીયન્તે ચ પરમાણવઃ પૃથિવ્યામ્, તસ્માત્કૃતકાઃ ।
કિંચ અર્થાન્તરાધારત્વાત્ । ઇહ યદર્થાન્તરસ્યાધારત્વં પ્રતિપદ્યતે
તત્કૃતકમ્ । તદ્યથા ઘટઃ । અર્થાન્તરસ્ય ચ દ્વ્યણુકાદેરાધારત્વમણવઃ
પ્રતિપદ્યન્તે તસ્માત્કૃતકાઃ । કિંચ પ્રાપ્તિવ્યવધાનાત્ । ઇહ યયોર્મધ્યે
અન્તરા દ્રવ્યમવસ્થિતમ્ પ્રાપ્તેર્વ્યવધાયકં ભવતિ, તૌ કૃતકૌ ।
તદ્યથા, દ્વ્યઙ્ગુલી । તથા ચાણૂ દ્વાવન્તરાણ્વન્તરમવસ્થિતં, યો
યઃ પ્રાપ્તેર્વ્યવધાયકં તૌ કૃતકૌ તસ્માત્તાવપિ કૃતકૌ । કિંચ
દ્રવ્યાન્તરારમ્ભકત્વાત્ । ઇહ યદ્ દ્રવ્યાન્તરારમ્ભકં તત્કૃતકં વઃ ।
તદ્યથા તન્તુઃ, દ્રવ્યારમ્ભકાશ્ચ પરમાણવઃ । તસ્માત્કૃતકાઃ ।

કિંચ પ્રત્યક્ષત્વાત્ । ઇહ યત્પ્રત્યક્ષં તત્કૃતકં દૃષ્ટમ્ ।
તદ્યથા ઘટઃ, પ્રત્યક્ષાશ્ચ યોગિનાં પરમાણવઃ । તત્કૃતકાઃ ।
અતએવ કૃતકત્વમિતિ ચેત્ સ્યાન્મતં યત એવ યોગિનાં પ્રત્યક્ષાઃ
પરમાણવસ્તત એવ કૃતકાઃ । કિં કારણમ્ । અસ્મદાદિપ્રત્યક્ષં
ઘટાદિ હિ કૃતકં દૃષ્ટમિતિ કૃત્વા । એતદપ્યનુપપન્નમ્ । કસ્માત્
? શરીરકૃતકત્વપ્રસઙ્ગાત્ । શરીરમપિ હિ યોગિનાં પ્રત્યક્ષં,
કામં તદપ્યકૃતકમસ્તુ । અથ નૈતદેવ તર્હિ નાકૃતકાઃ પરમાણવઃ ।
પ્રધાનાદિષુ પ્રસંગ ઇતિ ચેન્ન અનભ્યુપગમાત્ । શ્રીકપિલબ્રાહ્મણૈરપિ
પ્રધાનપુરુષાવપ્રત્યક્ષાવિતિ નઃ શાસ્ત્રમ્ । તસ્માદ્યત્કિંચિદેતત્ ।
સત્તાદિવદિતિ ચેત્ સ્યાન્મતમ્, યથા સત્તાગુણત્વરૂપત્વાદીનાં સતિ
પ્રત્યક્ષત્વેઽકૃતકત્વમ્ એવં પરમાણૂનાં ભવિષ્યતીતિ । તદપ્યયુક્તમ્ ।
કસ્માત્ ? સાધ્યત્વાત્ । પરમાણવકૃતકત્વવત્સત્તાદીનાં સદ્ભાવોઽસિદ્ધઃ ।
તસ્માચ્છશવિષાણાત્પુરુષવિષાણસિદ્ધિવદગ્રાહ્યમેતત્ । સૌક્ષ્મ્યાદણૂનાં
કૃતકત્વાપ્રસંગ ઇતિ ચેત્ સ્યાન્મતમ્, ન હિ પરમાણુભ્યઃ સૂક્ષ્મતરમન્યદ્
ભાવાન્તરમસ્તિ યદેષામારમ્ભકં સ્યાત્ । પરા ખલ્વેષા કાષ્ઠા સૌક્ષ્મ્યસ્ય
યત્પરમાણવઃ । તસ્માદેષાં કૃતકત્વમનુપપન્નમિતિ । એતચ્ચાયુક્તમ્ ।
કસ્માત્ ? પાકજેષ્વતિપ્રસંગાત્ । સૌક્ષ્મ્યાદકૃતકત્વપ્રસંગઃ । તેઽપિ
પરમાણવઃ સૂક્ષ્માઃ । યત્તુ ખલ્વતિસૌક્ષ્મ્યાત્પ્રધાનપુરુષયોરકૃતકત્વં
દૃષ્ટં તત્સતિ વિભુત્વે । ન ચ યથા પ્રધાનપુરુષાવેવમણવોઽપિ વિશ્વં
વ્યશ્નુવતે । તસ્માત્સતિ સૌક્ષ્મ્યે પાકજવદેષાં કૃતકત્વમનિવાર્યમ્ ।
યેષાં તુ કાર્યદ્રવ્યં પચ્યત ઇતિ પક્ષસ્તેષામયમનુપાલમ્ભ ઇત્યતઃ
પરમાણુસમવેતં કર્મોદાહાર્યમ્ । તદ્ધિ સૂક્ષ્મમતીન્દ્રિયં કૃતકં ચેતિ
સિદ્ધં કૃતકાઃપરમાણવઃ । કૃતકત્વાચ્ચૈષામનિત્યતાપ્યનપાતિનીતિ
કૃત્વાઽન્તરાલપ્રલયમહાપ્રલયેષુ
પ્રધ્વંસાત્પરમાણૂનાં કારણાભાવાત્કાર્યાભાવ ઇતિ
સ્વશાસ્ત્રસિદ્ધાદનુમાનાજ્જગદુચ્છિત્તિદોષપ્રસંગઃ । તથા
ભોગિનામુપચિતસ્ય સ્વકર્મણોઽનુપભોગાત્કૃતસ્ય વિપ્રણાશઃ । અનિષ્ટં
ચૈતત્ । તસ્માન્ન જગત્કારણં પરમાણવઃ ।
યાઽપિ ખલ્વિયમાશંકા પુરુષાજ્જગદુત્પત્તિર્ભવિષ્યતીતિ સાઽપ્યયુક્તા ।
કસ્માત્ ? પ્રતિષેધાત્ । તસ્માચ્ચ વિપર્યાસાદિત્યત્ર (kA0 19)
પુરુષસ્યાકર્તૃત્વમુપપાદયિષ્યામઃ । ચૈતન્યાવિશેષાદીશ્વરસ્યાપિ સ
એવ વિધિઃ કારણત્વપ્રતિષેધે બોદ્ધવ્યઃ ।

આહ અસ્ત્યેવમીશ્વર ઇતિ પાશુપતવૈશેષિકાઃ । કસ્માત્
? કાર્યવિશેષસ્યાતિશયબુદ્ધિપૂર્વકત્વાત્ । ઇહ કાર્યવિશેષઃ
પ્રાસાદવિમાનાદિરતિશયબુદ્ધિપૂર્વકો દૃષ્ટઃ । અસ્તિ
ચાયં મહાભૂતેન્દ્રિયભુવનવિન્યાસાદિલક્ષણઃ કાર્યવિશેષઃ ।
તસ્માદનેનાપ્યતિશયબુદ્ધિપૂર્વકેણ ભવિતવ્યમ્ । યત્પૂર્વકોઽયં સ ઈશ્વરઃ ।
તસ્માદસ્તીશ્વર ઇતિ । કિં ચાન્યત્ ચેતનાચેતનયોરભિસમ્બન્ધસ્ય
ચેતનકૃતત્વાત્ । ઇહ ચેતનાચેતનયોરભિસમ્બન્ધશ્ચેતનકૃતો
દૃષ્ટઃ, તદ્યથા ગોશકટયોઃ । અસ્તિ ચાયં ચેતનાચેતનયોઃ
શરીરશરીરિણોરભિસમ્બન્ધઃ । તસ્માદનેનાપિ ચેતનકૃતેન ભવિતવ્યમ્ ।
યત્કૃતોઽયં સ ઈશ્વરઃ । તસ્માદસ્તીશ્વરઃ કારણમ્ ।
ઉચ્યતે- યત્તાવદુક્તં
કાર્યવિશેષસ્યાતિશયબુદ્ધિપૂર્વકત્વાદીશ્વરસદ્ભાવસિદ્ધિરિતિ
અત્ર બ્રૂમઃ ન, સાધ્યત્વાત્ । અસ્મદાદિબુદ્ધિપૂર્વિકાઃ પ્રાસાદાદયઃ,
અતિશયબુદ્ધિપૂર્વિકા વા ઇતિ સાધ્યમેતત્ । તસ્માદનુત્તરમ્ । કિંચ
પ્રાક્પ્રધાનપ્રવૃત્તેર્બુદ્ધ્યસમ્ભવાત્કારણાન્તરપ્રતિષેધાત્ પ્રધાનાદયં
બુદ્ધિપૂર્વકં કાર્યવિશેષં કુર્વીત । પ્રાક્ચ પ્રધાનવિપરિણામાદ્
બુદ્ધિરેવ નાસ્તીત્યુપપન્નમેતત્ । શક્તિમત્ત્વાત્સ્વત ઇતિ ચેત્ સ્યાત્પુનરેતત્
સર્વશક્તિપ્રચિત ઈશ્વરઃ । તસ્ય પ્રાગપિ પ્રધાનવિપરિણામાત્સ્વત
એવેચ્છાયોગાદ્ બુદ્ધિસદ્ભાવો ન પ્રતિષિધ્યત ઇતિ । એતદપ્યનુપપન્નમ્ ।
કસ્માત્ ? દૃષ્ટાન્તાભાવાત્ । બુદ્ધિઃ સ્વત એવેત્યત્ર પર્યનુયુક્ત(sya)
કસ્તે દૃષ્ટાન્તઃ ? તસ્માદસદેતત્ । શક્તિવિશેષાદદોષ ઇતિ
ચેત્, અથાપિ સ્યાત્ નાન્યેષાં બુદ્ધિમતામીશ્વરતુલ્યા શક્તિઃ । અત
એષાં પ્રધાનાચ્છરીરવ્યૂહસમકાલમાત્માદિસન્નિકર્ષાદ્વા બુદ્ધ્ય
ઉત્પદ્યન્ત ઇતિ, ઈશ્વરસ્ય તુ સ્વત ઇતિ । એતદપ્યનુપપન્નમ્ । કસ્માત્
? સર્વવાદસિદ્ધિપ્રસંગાત્ । દૃષ્ટાન્તવિરુદ્ધમર્થમાદાય પ્રતિબધ્યમાનેન
શક્તિવિશેષઃ સ્મર્તવ્ય ઇત્યેતસ્યાં કલ્પનાયાં સર્વવાદસિદ્ધિપ્રસંગઃ સ્યાત્ ।
તસ્માદ્ ગ્રહમાત્રમેતત્ । એવં સ્વત ઈશ્વરસ્ય બુદ્ધિસમ્ભવો ન ચેદ્ભવેત્
યુક્તમુચ્યતે પ્રાક્પ્રધાનપ્રવૃત્તેર્બુદ્ધ્યસમ્ભવાન્ન બુદ્ધિમત્પૂર્વકોઽયં
કાર્યવિશેષઃ । કિંચ ફલાનુપપત્તેઃ । દૃષ્ટમદૃષ્ટં વા ફલમુદ્દિશ્ય
બુદ્ધિમન્તઃ કાર્યવિશેષાન્પ્રાસાદવિમાનાદીનારભમાણા દૃશ્યન્તે ।
અનુપહતશ્ચાયમૈશ્વર્યાત્ । કિં ચ પ્રયોજકાનુપપત્તેઃ । કિં ચ
અનેકાન્તાત્ । ન ચ સર્વઃ કાર્યવિશેષો બુદ્ધિપૂર્વકઃ । વૃક્ષાદીનાં

તદ્વ્યતિરેકેણોત્પત્તેઃ । સર્વસ્યેશ્વરબુદ્ધિપૂર્વકત્વાભ્યુપગમે
દૃષ્ટાન્તાભાવઃ । ન ચાસ્ત્યનુદાહૃતો વાદઃ । તસ્માદનેકાન્ન
બુદ્ધિમત્પૂર્વકં વ્યક્તમ્ । કિં ચ દુઃખોત્તરત્વાત્ । બુદ્ધિપૂર્વકશ્ચેદસ્ય
કાર્યવિશેષઃ સ્યાત્કર્તુર્દુઃખોત્તરવિધાને પ્રયોજનં નાસ્તિ ।
શક્તિમાંશ્ચાયમિતિ સુખોત્તરમેવ વિદધ્યાત્ । દુઃખોત્તરશ્ચાયં,
તસ્માન્ન બુદ્ધિપૂર્વકઃ કાર્યવિશેષઃ । કિંચ દુઃખોપાયત્વાત્ ।
બુદ્ધિપૂર્વકશ્ચેદયં કાર્યવિશેષઃ સ્યાદ્ધર્માર્થકામમોક્ષપ્રાપ્તયઃ
સુખોપાયાઃ સ્યુઃ, દુઃખોપાયાશ્ચ, તસ્માદબુદ્ધિપૂર્વકઃ ।
ધર્માધર્મનિમિત્તત્વાદદોષ ઇતિ ચેત્ સ્યાન્મતમ્, યદ્યપીશ્વરપૂર્વકોઽયં
કાર્યવિશેષઃ તથાપ્યાદિસર્ગે સુખોત્તરાણામસ્મદુત્પન્નાનાં પ્રાણિનાં
ધર્માધર્મપરિગ્રહાદ્ હીનમધ્યમોત્કૃષ્ટવયોજાતિસ્વભાવાદિયોગો
ભવતિ । તતશ્ચ નાપરાધોઽયમીશ્વરસ્યેતિ । એતદપ્યયુક્તમ્ । કસ્માત્
? અધર્મોત્પત્તિહેત્વભાવાત્ । ઈશ્વરશ્ચેદ્ધર્માધર્મયોરુત્પત્તાવીષ્ટે
ધર્મમેવ પ્રાણિનાં સુખહેતુત્વાદુત્પાદયેત્ નાધર્મં, પ્રયોજનાભાવાત્ ।
અથ મતમ્ સ્વાભાવિકી ધર્માધર્મયોઃ સ્વકારણાદુત્પત્તિઃ, યદુક્તં
સર્વમીશ્વરબુદ્ધિપૂર્વકં વ્યક્તમિતિ તુ તસ્ય વ્યાઘાતઃ । તસ્માદીશ્વરો
ન કારણમ્ । યત્પુનરેતદુક્તં ચેતનાચેતનયોરભિસમ્બન્ધસ્ય
ચેતનકૃતત્વાદીશ્વરસ્ય સદ્ભાવ ઇતિ, અત્ર બ્રૂમઃ- અયુક્તમેતત્ । કસ્માત્
? સાધ્યત્વાત્ । યોઽયં ચેતનાચેતનયોર્ગોશકટયોરભિસમ્બન્ધઃ સ કેન
ચેતનેન કૃતઃ ? યદિ ચૈત્રેણ, તસ્ય કાર્યકારણસંઘાતત્વાદાચેતન્યમ્ ।
અથ ચૈત્રશબ્દવાચ્યસ્ય પિણ્ડસ્યોપદ્રષ્ટા ક્ષેત્રજ્ઞઃ તત્કૃત
ઇષ્યતે તદયુક્તમ્, સાધ્યત્વાત્ । ન હિ પુરુષકર્તૃત્વમસ્મત્પક્ષે
પ્રસિદ્ધમ્ । ઉભયપક્ષપ્રસિદ્ધેન વ્યવહારઃ । કિં ચાન્યત્
અનવસ્થાપ્રસંગાત્ । ચેતનાચેતનયોરભિસમ્બન્ધસ્ય ચેતનકૃતત્વં
બ્રુવતઃ પ્રાપ્તમીશ્વરકાર્યકારણયોરભિસમ્બન્ધસ્ય ચેતનકૃતત્વમ્ ।
તથા ચાનવસ્થાપ્રસંગઃ । અથ મા ભૂદયં દોષ ઇતિ સ્વાભાવિક
ઈશ્વરસ્ય કાર્યકારણયોરભિસમ્બન્ધ ઇષ્યતે, ન તર્હ્યૈકાન્તિકો હેતુઃ ।
તયોરાચેતન્યાદદોષ ઇતિ ચેત્, સ્યાત્પુનરેતત્ ઈશ્વરસ્ય યત્કાર્યકારણં
તદપિ ચેતનમીશ્વરોઽપિ, તસ્માત્સમ્બન્ધેન પ્રત્યુદાહરણમુપપદ્યત ઇતિ ।
એતદયુક્તમ્ । કસ્માત્ ? અસમ્બન્ધપ્રસંગાત્ । ચૈતન્યાવિશેષાદાત્મન
આત્માન્તરેણાભિસમ્બન્ધો નાસ્તિ । એવમીશ્વરકાર્યકારણયોરપિ ન સ્યાત્ ।
અનિષ્ટં ચૈતત્ । કિં ચ અવિપર્યયપ્રસંગાત્ । ઉભયચૈતન્યપ્રતિજ્ઞાસ્ય

યથેશ્વરસ્ય કરણં બુદ્ધ્યાદયઃ, એવમીશ્વરોઽપિ બુદ્ધ્યાદીનાં કરણં સ્યાત્ । કસ્માત્ ? અવિશેષાત્ । અથૈતદનિષ્ટં, ન તર્હ્યુભયોશ્ચૈતન્યમ્ । કાર્યકારણવત્તાઽનભ્યુપગમાદદોષ ઇતિ ચેત્ વ્યાપી નિરવયવોઽનન્તશક્તિઃ સૂક્ષ્મેભ્યઃ સૂક્ષ્મતમો મહદ્ભ્યો મહત્તમોઽધિકરણધર્માનાદિરિત્યેવમનન્તલક્ષણમીશ્વરપદાર્થ તદ્વિદો વ્યાચક્ષતે । તસ્ય કુતઃ કાર્યકારણમવલમ્બ્યેદમાધ્યારોપિતમિતિ ? એતદપ્યનુપપન્નમ્ । કસ્માત્ ? અનુમાનવિરોધાત્ । ઇત્થં ચેદીશ્વરો યદિદમનુમાનં કાર્યવિશેષસ્યાતિશયબુદ્ધિપૂર્વકત્વાચ્ચ ચેતનાચેતનયોરભિસમ્બન્ધસ્ય ચેતનકૃતત્વાદિતિ તદ્વ્યાહન્યતે । કસ્માત્ ? ન હ્યેતાવદીદૃશાર્થેન સહૈતદ્દૃષ્ટમિતિ । ઉપેત્ય વા, મૂર્તિપરિગ્રહવ્યાઘાતાત્ । યદ્યેકાન્તેનૈવંરૂપ ઈશ્વરઃ, ક્ષિત્યાદિમૂર્તિપરિગ્રહો વ્યાહન્યેત । કિં ચાન્યત્- શ્રુતેઃ । શ્રુતિરપિ ચાસ્ય મૂર્તિમાચષ્ટે કૃત્તિવાસાઃ પિનાકહસ્તો વિતતધન્વા નીલશિખણ્ડીત્યાદિ । તદભ્યુપગમાત્સ્વપક્ષહાનિરિતિ ચેત્, સ્યાન્મતં યદિ તર્હિ શ્રુતિવચનાન્મૂર્તિમાનીશ્વરઃ પરિગૃહ્યતે । તેન સિદ્ધમસ્યાસ્તિત્વમ્ । કસ્માત્ ? ન હ્યસતો મૂર્તિમત્ત્વમુપપદ્યત ઇતિ કૃત્વા । એતદપ્યયુક્તમ્ । અભિપ્રાયાનવબોધાત્ । ન હ્યેકાન્તેન વયં ભગવતઃ શક્તિવિશેષં પ્રત્યાચક્ષ્મહે, માહાત્મ્યશરીરાદિપરિગ્રહાત્ । યથા તુ ભવતોચ્યતે પ્રધાનપુરુષવ્યતિરિક્તઃ તયોઃ પ્રયોક્તા નાસ્તીત્યયમસ્મદભિપ્રાયઃ, તસ્માદેતસ્ય બાધકમ્ । અતો ન પ્રધાનપુરુષયોરભિસમ્બન્ધોઽન્યકૃતઃ । કિં ચાન્યત્ અશક્યત્વાત્ । કુર્વાણઃ ખલ્વપ્યયમભિસમ્બન્ધં શરીરમાત્રેણ વા શરીરિણઃ કુર્યાત્, શરીરકારણેન વા ? કિં ચાતઃ ? તન્ન તાવચ્છરીરમાત્રેણ કરોતિ । કસ્માત્ ? અનપેક્ષસ્ય શરીરોત્પત્તૌ નિમિત્તાભાવાત્ । ન શરીરકારણેન, વિભુત્વાત્ । પરિચ્છિન્નયોર્ગોશકટયોરભિસમ્બન્ધોઽન્યકૃતઃ, વિભૂ ચ પ્રધાનપુરુષૌ । કિં ચ પારાર્થ્યાત્ । ગોશકટયોરભિસમ્બન્ધઃ પરાર્થો દૃષ્ટઃ । ન તુ પ્રધાનપુરુષયોરભિસમ્બન્ધઃ પરાર્થ ઇતિ । ઈશ્વરાર્થ ઇતિ ચેન્ન, ઉક્તત્વાત્ । દૃષ્ટાદૃષ્ટાર્થ ઈશ્વરસ્યાનુપપન્ન ઇત્યાદાવેવોક્તમેતત્ । એવં તાવત્પાશુપતાનામીશ્વરપરિગ્રહે દોષઃ । વૈશેષિકાણાં ચાયં દોષઃ । કિં ચ દ્રવ્યાદિપદાર્થાન્તરભાવાભાવપરિકલ્પનાઽનુપપત્તિશ્ચ । તૈરીશ્વરો દ્રવ્યગુણકર્મસામાન્યવિશેષસમવાયભૂતો વા પરિકલ્પ્યમાનઃ પરિકલ્પ્યતે,

પદાર્થાન્તરભૂતો વા ? કિં ચાતઃ ? તન્ન તાવદ્ દ્રવ્યાદિભૂતઃ । કસ્માત્ ? દ્વિવિધં હિ દ્રવ્યં અનેકદ્રવ્યમદ્રવ્યં ચ । તત્ર નાનેકદ્રવ્યમીશ્વરઃ, કૃતકત્વાદિદોષપ્રસંગાત્ । નાદ્રવ્યં, પરિસંખ્યાનાત્ । પૃથિવ્યાદીનિ મનઃપર્યન્તાનિ નવૈવ દ્રવ્યાણિ વઃ સિદ્ધાન્તઃ । ઇતિકરણસ્ય પરિસમાપ્ત્યર્થત્વાત્ । કિં ચ ગુણકર્મનિર્દેશાત્ । સતિ ચાસ્ય દ્રવ્યત્વે વૈશેષિકગુણનિર્દેશ આચાર્યેણ કૃતઃ સ્યાત્ । કારણાન્તરપ્રયોગસમર્થસ્ય ચ કર્મ નિર્દિષ્ટં સ્યાત્ । ન તુ તથા । તસ્માન્ન દ્રવ્યગુણાદયઃ । આશ્રયપરતન્ત્રા હિ ગુણાદયઃ પરાર્થાઃ । એવં ન દ્રવ્યાદિભૂતો નાપિ પદાર્થાન્તરભૂતઃ । પદાર્થત્વે હિ સતિ દ્રવ્યાદિવલ્લક્ષણમુક્તમભવિષ્યત્ । આચાર્યેણ તુ નોક્તમ્ । તસ્માસૂત્રકારમતે નાસ્તીશ્વરઃ । લિંગાદિતિ ચેત્, સ્યાન્મતમ્- સંજ્ઞાકર્મત્વમસ્મદ્વિશિષ્ટાનાં લિઙ્ગમ્ । પ્રત્યક્ષપૂર્વકત્વાદ્વા સંજ્ઞાકર્મણ ઇત્યેતસ્માલ્લિંગાદીશ્વરપરિગ્રહ આચાર્યસ્ય સિદ્ધ ઇતિ । તદપ્યયુક્તમ્ । કસ્માત્ ? અભિપ્રેતાસિદ્ધેઃ । સત્યમનેન લિઙ્ગેનાસ્મદાદિભ્યો વિશિષ્ટશક્તેઃ કસ્યચિદેવ માહાત્મ્યશરીરસ્યાન્યસ્ય વા પ્રતિપત્તિઃ સ્યાત્ । સંજ્ઞામાત્રં તુ યથા ભવદ્ભિઃ સર્વકારણાનાં સૃષ્ટ્યુપસંહારપ્રવૃત્તિહેતુરેકઃ સ્વતન્ત્ર ઇષ્યતે । તથા ચાસ્માલ્લિઙ્ગાત્પ્રતિપત્તિઃ । કિં ચાન્યત્ । પ્રાગનુપદેશેઽકૌશલપ્રસંગાત્ । ઈશ્વરપરતન્ત્રે ચેદણૂનાં પ્રવૃત્તિનિવૃત્તી સ્યાતાં તમેવ પ્રાગુપદિશેત્ । ધર્મવત્પ્રધાનપદાર્થસ્ય વા પ્રાગનુપદેશાદકુશલઃ સૂત્રકાર ઇત્યેતદાપદ્યતે । ન ચૈતદિષ્ટમુભયમ્ । કિં ચાન્યત્ અસંકીર્તનાત્ । શાસ્ત્રપ્રદેશે ચાયમીશ્વરો ન કસ્મિંશ્ચિદપ્યાચાર્યેણ સંકીર્તિતઃ । ન ચાસ્ય વધ્વા ઇવ શ્વશુરનામસંકીર્તને દોષોપપત્તિઃ સ્યાત્ । દોષસંવિભાગાર્થમિદમાચાર્યસ્યાનિષ્ટમધ્યારોપ્યતે, ન તુ મતમસ્યૈતત્ । એવં કાણાદાનામીશ્વરોઽસ્તીતિ પાશુપતોપજ્ઞમેતત્ । તસ્માદીશ્વરોઽપ્યકારણમ્ । કર્માણુભિર્વ્યાખ્યાતમ્ । કથમ્ ? યથા કૃતકત્વાન્ન જગત્કારણમણવઃ, એવં કર્માપિ ન શરીરનિમિત્તં, તસ્માત્તદપ્યકારણમ્ । ઇતરેતરનિમિત્તત્વાદદોષ ઇતિ ચેત્ સ્યાન્મતમ્, યથાઽન્તરેણ શરીરં કર્મ નોત્પદ્યમાનં દૃષ્ટમેવમન્તરેણ કર્મ શરીરસ્યાપિ કારણાન્તરમશક્યં કલ્પયિતુમિતિ પરસ્પરનિમિત્તત્વાન્નાસ્ય પરિવર્તસ્ય પૂર્વકોટિઃ પ્રજ્ઞાયતે । તસ્માન્નાસ્ત્યનયોઃ કારણાન્તરમિતિ । એતચ્ચાયુક્તમ્ । કસ્માત્ ? અનવસ્થાનામવસ્થાનપૂર્વકત્વદર્શનાત્ । તદ્યથા શુક્રશોણિતાચ્છરીરં શરીરાચ્છુક્રશોણિતમિત્યસ્ય પરિવર્તસ્ય પૂર્વકોટિરદૃષ્ટા,

પ્રતિજ્ઞાયતે ચાયોનિજત્વમીશ્વરશરીરાણામાદિસર્ગે ચ । તથા ચ
બીજાઙ્કુરાદયોઽઙ્કુરાદિભ્યો બીજમિત્યનવસ્થા । ભાતિ ચાત્રાદિસર્ગે
પરમાણુમાત્રાદપિ બીજપ્રાદુર્ભાવસ્તથા શરીરકર્મણોરનવસ્થા ।
ઇદાનીમપિ ચાદિસર્ગે ચાધિકારમાત્રવશાચ્છરીરોત્પત્તિઃ સ્યાત્ ।
સાધારણવિગ્રહત્વપ્રસંગ ઇતિ ચેત્ સ્યાદેતત્, યદ્યધિકારનિમિત્તા
શરીરોત્પત્તિરાદિસર્ગેઽભ્યુપગમ્યતે પ્રાપ્તમેકેન શરીરેણ
સર્વપુરુષાણામભિસમ્બન્ધો નિયમહેત્વભાવાત્ । તતશ્ચ
શરીરાન્તરાનર્થક્યમ્ । તેનૈવ સર્વેષામુપભોગસામર્થ્યાદિતિ ।
એતદનુપપન્નમ્ । કસ્માત્ ? પ્રત્યક્ષવિરોધાત્ ।
સત્યમેતદનુમાનતઃ । પ્રત્યક્ષતસ્તુ શરીરાણિ પ્રતિપુરુષમ્,
તસ્માન્નાયં પ્રસંગઃ । અપવર્ગનિયમપ્રસંગ ઇતિ ચેત્ સ્યાન્મતં
યદ્યધિકારમાત્રવશાચ્છરીરોત્પત્તિઃ પરમર્ષેરેવાપવર્ગસાધનં
શરીરાદુત્પદ્યેતેતિ । ઉચ્યતે- ન તસ્યૈવ, કિં તર્હિ સર્વેષાં ગુણાનાં
પ્રાધાન્યાત્તન્નિમિત્તાનિ શરીરાણ્યાદિસર્ગે સાંસિદ્ધિકાન્યુત્પદ્યન્તે । તત્ર યસ્ય
સત્ત્વપ્રધાનં કાર્યકરણં સ પરમર્ષિઃ । યસ્ય સત્ત્વં રજોબહુલં
સ માહાત્મ્યશરીરઃ । એવં ગુણસમ્પર્કાદ્ ગુણપ્રધાનાપ્રધાનભાવેન
યાવત્સ્થાવરશરીરપ્રાદુર્ભાવ ઇત્યતો નાસ્તિ ગુણાનાં શરીરવિનિયોગપક્ષપાતઃ ।
તસ્માદ્યુક્તમેતત્કૃતકત્વાન્ન કર્મ જગત્કારણમિતિ । એતેન ચૈવં
વ્યાખ્યામ્ । તદપિ હિ કર્મણામેવ પ્રાપ્તપરિપાકાણામભિધાનમર્થાન્તરમેવેતિ
ચેત્સાધ્યમ્ । તસ્માદપ્યકલ્પનીયમિતિ ।
યદપ્યુક્તં કાલાજ્જગદુત્પત્તિર્ભવિષ્યતીતિ તદનુપપન્નમ્ । કસ્માત્
? કારણપરિસ્પન્દસ્યૈવ તદભિધાનસન્નિવેશાત્ । ન હિ નઃ કાલો નામ
કશ્ચિદસ્તિ, કિં તર્હિ ક્રિયમાણક્રિયાણામેવાદિત્યગતિગોદોહઘટાસ્તનિતાદીનાં
વિશિષ્ટાવધિસરૂપપ્રત્યયનિમિત્તત્વત્ ।
પરાપરાદિલિઙ્ગસદ્ભાવાત્પ્રતિપત્તિરિતિ ચેન્ન, અકૃતકેષુ તદનુપપત્તેઃ ।
યદેવ કૃતકં તત્રૈવ પરમપરમિત્યાદિઃ પ્રત્યયો દૃષ્ટઃ ।
સ યદિ ક્રિયાવ્યતિરિક્તનિમિત્તઃ સ્યાદવિશેષાન્નિત્યાનિત્યેષુ સ્યાત્ ।
ક્વચિત્સામર્થાદપાકજવદદોષ ઇતિ ચેત્ સ્યાન્મતમ્- યથાઽગ્નિસંયોગઃ
પાકજહેતુઃ તથા ચાવિશેષેઽપિ પૃથિવ્યામેવ પાકજોત્પત્તિનિમિત્તં
ભવતિ નાકાશાદિષુ । એવં કાલોઽપિ પરાપરાદિહેતુરથ ચાનિત્યેષ્વેવ
સ્યાન્ન નિત્યેષ્વિતિ । તચ્ચાયુક્તમ્ । કસ્માત્ ? વિશેષોપપત્તેઃ ।
રૂપાદિવિક્રિયાહેતુરગ્નિસ્તદ્યુક્તં યદસૌ તદ્વતિ દ્રવ્યે પાકજાનાદધાત્,

(nA) તદ્વત્યાકાશાદૌ । કાલસ્તુ સમ્બન્ધમાત્રોપકારી ન વિક્રિયાહેતુઃ ।
તસ્માદસદેતત્ । એવં યદિ ક્રિયાભ્યોઽન્યઃ કાલ ઇષ્યતે કારણપરિસ્પન્દસ્ય
જગત્કારણત્વમથાન્યત્સાધ્યમ્ ।
યદૃચ્છાઽપિ ન કારણં કર્મવત્ કાર્યકારણભાવાત્ । કાર્યકારણભૂતં હીદં
વ્યક્તમિતિ પ્રાગ્વ્યાખ્યાતમ્ । સ ચ કાર્યકારણભાવઃ પ્રેક્ષાપૂર્વકૃતાનાં
શયનાદીનામુપલબ્ધૌ યાદૃચ્છિકેષુ ચાનુપલબ્ધૌ ન તસ્યા લિઙ્ગમિતિ
શક્યં વક્તુમ્ ।
અભાવોઽપ્યકારણમ્, પરિમાણાદિદર્શનાત્ । ન હિ તત ઉત્પન્નાનાં
પરિમાણમુપપદ્યત ઇત્યતો નાપ્યન્વયઃ । સાત્મકનિરાત્મકયોરત્યન્તજાતિભેદાત્ ।
નાપિ શક્તિસ્તદભાવાત્ । નોપકારોઽનવસ્થાનાત્ । ન વિભાગો નિરાત્મકત્વાત્ ।
તસ્માન્ન પરમાણુપુરુષેશ્વરકર્મદૈવકાલસ્વભાવયદૃચ્છાઽભાવેભ્યો
વ્યક્તમુત્પદ્યતે । ન ચેદેભ્યઃ, પરિશેષતઃ પ્રધાનસ્યૈવાસ્તિત્વલિઙ્ગમિદમ્ ।
તસ્માદ્યુક્તમેતત્ ભેદાનાં પરિમાણાદિભ્યઃ કારણમસ્ત્યવ્યક્તમિતિ ॥ ૧૫॥

## કારિકા ૧૬

આહ એવમપ્યસ્ય વ્યક્તહેતુત્વમનુપપન્નમ્, એકત્વાત્ । બહૂનાં કાર્યારમ્ભો
દૃષ્ટસ્તન્ત્વાદીનામ્ । એકં પ્રધાનં, તસ્માન્ન તદારમ્ભશક્તિયુક્તમિતિ ।
ઉચ્યતે- યદ્યપિ ગુણાનાં
પ્રધાનલક્ષણમવસ્થાન્તરમભિન્નબુદ્ધિનિમિત્તત્વાદેકમપિ કાર્યકાલે
કિંચિદ્વૈષમ્યોપજનિતવ્યપદેશ્યરૂપાભિરિતરેતરોપકારિણીભિઃ શક્તિભિઃ
સમુદાયત્વમાપદ્યતે । તસ્માદિદાનીં

॥ પ્રવર્તતે ત્રિગુણતઃ સમુદયાચ્ચ ॥

પ્રવર્તતે ઇત્યનેનોત્પત્તિમાચષ્ટે । ત્રિગુણત ઇત્યવ્યપદેશ્યરૂપાણાં
પ્રધાનાપ્રધાનભાવેન ગુણશક્તીનાં વૈષમ્યાદ્વ્યપદેશ્યરૂપાન્તરમાહ ।
યત્રૈતચ્છક્યતે વક્તું ત્રયઃ સત્ત્વાદય ઇતિ તદવસ્થાનં કાર્યારમ્ભકમિતિ ।
સમુદયાદિત્યનેન પરસ્પરાપેક્ષાણામારમ્ભશક્તિમવદ્યોતયતિ ।
એતદુક્તં ભવતિ- કાર્યકાલે ગુણાઃ પરિત્યક્તપૂર્વાવસ્થા ભેદં
પ્રતિલભ્ય પરસ્પરોપકારેણ સંહન્યતે । સંહતાશ્ચ વ્યક્તમુત્પાદયન્તિ ।
તસ્માન્નાવસ્થાન્તરસ્યાભિન્નબુદ્ધિનિમિત્તત્વાત્પ્રધાનૈકત્વદોષઃ
ગુણભેદાન્નૈકસ્ય કાર્યારમ્ભ ઇતિ ।

આહ, નિષ્ક્રિયત્વાત્તર્હિ પ્રકૃતેઃ કાર્યારમ્ભોઽનુપપન્નઃ ।
ક્રિયાત્વાનભ્યુપગમે વા વ્યક્તવૈધર્મ્યવિરોધ ઇતિ ।
ઉચ્યતે- ન, ક્રિયાવૈધર્મ્યભેદાત્ । દ્વિવિધા હિ ક્રિયા પ્રસ્પન્દલક્ષણા
પરિણામલક્ષણા ચ । તત્ર પ્રસ્પન્દઃ પ્રધાનસ્ય સૌક્ષ્મ્યાત્પ્રતિષિધ્યતે ।

॥ પરિણામતઃ ॥

તુ તત્કાર્યમારભતે ઇતિ ।
આહ- નનુ ચ પરિણામોઽપિ સૌક્ષ્મ્યાત્પ્રધાનસ્ય નોપપદ્યતે । કસ્માત્ ? ન
હિ સૌક્ષ્મ્યાત્સૂક્ષ્મસ્યાકાશાદેર્વિપરિણામો દૃષ્ટ ઇતિ ।
ઉચ્યતે-
સંસ્કારસ્ય સૌક્ષ્મ્યેઽપિ પરિણામોઽભ્યુપગન્તવ્યઃ । તસ્માદ્ યુક્તઃ
સૂક્ષ્મપરિણામીતિ ॥

આહ, કઃ પુનરયં પરિણામો નામ ?
ઉચ્યતે-
જહદ્ધર્માન્તરં પૂર્વમાદત્તે યદા પરમ્ ।
તત્ત્વાદપ્રચ્યુતો ધર્મી પરિણામઃ સ ઉચ્યતે ॥ ઇતિ ।
યદા શક્ત્યન્તરાનુગ્રહાત્પૂર્વધર્માન્ તિરોભાવ્ય સ્વરૂપાદપ્રચ્યુતો ધર્મી
ધર્માન્તરેણાવિર્ભવતિ તદવસ્થાનમસ્માકં પરિણામ ઇત્યુચ્યતે ।
આહ, નૈતદભિધાનમાત્રં દૃષ્ટાન્તમન્તરેણ પ્રતિપદ્યામહે । તસ્માદ્યથા
કિમિતિ વક્તવ્યમ્ ।
ઉચ્યતે- યથા પાલાશં
પલાશાદપ્રચ્યુતનિમિત્તાન્તરસ્યાતપાદેરનુગ્રહાચ્છ્યામતાં તિરોભાવ્ય
પીતતાં વ્રજતિ તથેદં દ્રષ્ટવ્યમ્ ।
આહ ન, અન્યથોત્પત્તેરપ્રતિષેધાત્ । કથં પુનરેતવગમ્યતે પાલાશં
સ્વરૂપાદપ્રચ્યુતં ધર્માન્તરસ્ય પરિત્યાગમુપાદાનં ચ કરોતિ, ન
પુનરન્યથા ચાન્યથા ચોપપદ્યત ઇતિ ?
ઉચ્યતે- ક્ષણભઙ્ગપ્રતિષેધાત્ પ્રાગેવ ક્ષણભઙ્ગનિર્દિષ્ટં વિનષ્ટાનાં
ભાવાનાં પુનરુત્પત્તૌ નાસ્તિ કારણમ્ । તદભાવે ચોત્પત્તિરયુક્તેતિ ।
આહ, ધર્મધર્મિણોરનન્યત્વાભ્યુપગમાદ્ધર્મોત્પત્તિવિનાશે
ધર્મ્યુત્પત્તિવિનાશપ્રસંગઃ । ન હિ વો ધર્મેભ્યોઽન્યો ધર્મી । તત્ર યદિ
ધર્મસ્ય નિવૃત્તિરભ્યુપગમ્યતે ધર્મિણોઽપિ નિવૃત્તિરનન્યત્વાત્પ્રાપ્તા ।
ધર્મોત્પત્તૌ તદુત્પત્તિઃ । તત્ર યદુક્તં ધર્મોત્પત્તિવિરોધે

ધર્મીસ્વરૂપાવસ્થાનમિતિ એતદયુક્તમ્ ।
ઉચ્યતે ન, સેનાદિવદ્વ્યવસ્થાનોપપત્તેઃ । તદ્યથા સેનાઙ્ગેભ્યોઽનન્યત્વં સેનાયાઃ । ન ચ સેનાઙ્ગાનાં વિનાશે સેનાવિનાશઃ । તદ્યથા નાન્યઃ પટઃ । બૌદ્ધાનાં સંયોગાવયવિપ્રતિષેધાત્ । ન ચ પટવિનાશે તન્તુવિનાશઃ ।
તત્ર યદુક્તં ધર્મિવિનાશે ધર્મવિનાશ ઇતિ એતદયુક્તમ્ ।
આહ, એવમપ્યયુક્તમ્ । તત્કસ્માત્
? સામાન્યવિશેષયોર્ધર્મિસ્વરૂપપરિકલ્પનાનુપપત્તેઃ । ઇહ રૂપાદિસામાન્યં વા ધર્મિરૂપત્વેન પરિકલ્પ્યમાનં પરિકલ્પ્યેત રૂપાદિવિશેષો વા ? કિં ચાતઃ । તત્ર તાવદ્રૂપાદિસામાન્યં ધર્મિસ્વરૂપમિતિ શક્યં કલ્પયિતુમ્ । કસ્માત્ ? અસમ્ભવાત્ । યદિ તાવત્પૃથિવી સામાન્યં ઘટાદિર્વિશેષસ્તેન પૃથિવ્યપિ તન્માત્રાપેક્ષયા વિશેષઃ । યાવત્પ્રધાનમિતિ નાસ્તિ સામાન્યમ્ । તદભાવાદ્ ધર્મિસ્વરૂપાભાવઃ । અથ વિશેષા ઘટાદયસ્તેષાં વિશેષાન્તરેણ સહાઽવસ્થાનાદ્ધર્મિસ્વરૂપાનવસ્થાનાત્ । તતશ્ચ યદુક્તં સ્વરૂપાદપ્રચ્યુતો ધર્મી ધર્માન્તરં વિજહાતિ, ધર્માન્તરમુપાદત્તે ઇતિ તદ્વ્યાહન્યત ઇતિ ।
ઉચ્યતે- યદુક્તં
રૂપાદિસામાન્યવિશેષયોર્ધર્મિસ્વરૂપપરિકલ્પનાનુપપત્તિરિતિ, અસ્તુ સામાન્યમ્ । યત્તૂક્તં સામાન્યં સામાન્યાન્તરાપેક્ષં વિશેષત્વમિતિ ન પ્રત્યયનિવૃત્તૌ સામાન્યાભાવાવસ્થિતેસ્તતશ્ચ ધર્મિસ્વરૂપસિદ્ધેઃ, યાવત્પૃથિવીત્યયં પ્રત્યયો ન નિવર્તતે સામાન્યં ઘટાદિર્વિશેષઃ, દ્રવ્યત્વં ચાસૌ, ધર્માન્તરપરિવર્તેષુ તદાકારપ્રત્યયોત્પત્તિતઃ સ્વરૂપાવસ્થાનસિદ્ધેર્ધર્મા ઘટાદયઃ । યદા તુ પૃથિવીપ્રત્યયનિવૃત્તિસ્તદા તન્માત્રાણાં સામાન્યભાવો દ્રવ્યત્વં ચ વિશેષો ધર્મ ઇતિ યાવત્પ્રધાનં તસ્ય તુ સામાન્યાન્તરાનુપપત્તેઃ કૌટસ્થ્યમેવ । યત્ર સર્વવિશેષાભાવસ્તત્પ્રધાનમ્ । યદિ તુ પૃથિવ્યાદીનાં નિત્યમવ્યાવૃતં સતિ કૌટસ્થ્યમેષાં પ્રાપ્તમ્ । તસ્માન્ન ધર્મિસ્વરૂપાભાવઃ । શક્તેર્વા સામાન્યભાવાભ્યુપગમાત્ । અથવા સુખદુઃખમોહશક્તય એવેહ મહદાદિના વિશેષાન્તેન લિઙ્ગેન પરિણામં પ્રતિપદ્યન્તે । તાસાં ચ સતતં સામાન્યપ્રત્યયનિમિત્તત્વાત્સ્વરૂપાદપ્રચ્યુતે તદ્દ્રવ્યત્વં લિઙ્ગસ્ય ધર્મત્વમ્ । અપ્રસિદ્ધેરયુક્તમિતિ ચેન્નોક્તત્વાત્ । પ્રાગુક્તમેતત્સુખાદિપૂર્વકં વિશ્વમિતિ ।
આહ- એવમપિ વૈશ્વરૂપ્યાનુપપત્તિઃ । કારણવિશેષાત્ । યદિ સુખાદિશક્તય એવ પરિણામિન્યો યદિદં બ્રહ્માદિ સ્થાવરાન્તં વૈશ્વરૂપ્યં તન્નોપપદ્યતે । કસ્માત્ ? ન હ્યભિન્નં કાર્યમુત્પદ્યત ઇતિ ।

ઉચ્યતે- શક્તિતશ્ચ પરિણામિનિ, ભવતિ તેન વૈશ્વરૂપ્યમ્ । કથમ્ ?

॥ સલિલવત્પ્રતિ પ્રતિગુણાશ્રયવિશેષાત્ ॥ ૧૬ ॥

યથાન્તરિક્ષાવિશિષ્ટસ્યામ્ભસઃ પ્રચ્યુતિરાશ્રયેણ ગોભુજઙ્ગમોષ્ટ્રાદીનાં, વિશેષાત્ક્ષીરમૂત્રવિષાદિવૈશ્વરૂપ્યં ચોપપદ્યતે । તથા ગુણશક્તયો વિશિષ્ટાઃ પરસ્પરાશ્રયવિશેષાદ્ બ્રહ્માદિ સ્તમ્બાન્તં જાત્યાકૃતિવાગ્બુદ્ધિસ્વભાવાહારવિહારરૂપં વૈશ્વરૂપ્યં પ્રતિપદ્યન્તે । તસ્માત્સિદ્ધમેતત્ પ્રકૃતિરેવ સર્વભાવનાં પ્રસવિત્રી । ન ચ કશ્ચિદ્દોષ ઇતિ ॥ ૧૬॥

॥ યુક્તિદીપિકાયાં સાંખ્યસપ્તતિપદ્ધતૌ ચતુર્થમાહ્નિકમ્ ॥

---

કારિકા ૧૭

---

આહ, સમધિગતં પ્રધાનમ્ । પુરુષ ઇદાનીં કાર્યકારણવ્યતિરિક્તોઽસ્તીત્યેતત્પ્રતિપાદ્યમ્ । કુતઃ સંશય ઇતિ ચેત્ અનુપલભ્યમાનસ્યોભયથા દૃષ્ટત્વાદિત્યુક્તમ્ । કિં ચાન્યત્ । આચાર્યવિપ્રતિપત્તેઃ । વિજ્ઞાનસ્કન્ધવ્યતિરિક્તો નાસ્તિ કશ્ચિદર્થ ઇતિ શાક્યપુત્રીયાઃ પ્રતિપન્નાઃ । કસ્માત્ ? સર્વપ્રમાણાનુપલબ્ધેઃ । ઇહ યદસ્તિ તત્પ્રત્યક્ષાદિના પ્રમાણેનોપલભ્યતે, તદ્યથા રૂપાદિ । તતશ્ચ તાવદયમાત્મા ન પ્રત્યક્ષત ઉપલભ્યતે । કસ્માત્ ? અશબ્દાદિલક્ષણાત્ । નાન્તઃપ્રત્યક્ષતઃ । કસ્માત્ ? ત્રિગુણાદિવિપરીતસ્ય તદવિષયત્વાત્ । ન પૂર્વવચ્છેષવદ્ભ્યામ્ । કાર્યકારણાનુપપત્તેઃ । ન ચ સામાન્યતોદૃષ્ટાત્ । ધર્મસામાન્યાભાવાત્ । નાપ્તવચનાત્ । અનભ્યુપગમાત્ । ન હિ બૌદ્ધાનાં શ્રુતિસ્મૃતિપુરાણેતિહાસાઃ પ્રમાણમ્ । યશ્ચૈષામાગમઃ, સ એવમાહ

"આત્મૈવ હ્યાત્મનો નાસ્તિ વિપરીતેન કલ્પ્યતે ।
નૈવેહ સત્ત્વમાત્માસ્તિ ધર્માસ્ત્વેતે સહેતુકાઃ ॥

દ્વાદશૈવ તવાઙ્ગાનિ સ્કન્ધાયતનધાતવઃ ।
વિચિન્ત્ય સર્વાણ્યેતાનિ પુદ્ગલો નોપલભ્યતે ॥

શૂન્યમાધ્યાત્મિકં વિદ્ધિ શૂન્યં પશ્ય બહિર્ગતમ્ ।
ન દૃશ્યતે સોઽપિ કશ્ચિદ્યો ભાવયતિ શૂન્યતામ્ ॥

પુનરપ્યાહ" અસ્તિ કર્માસ્તિ વિપાકઃ, કારકસ્તુ નોપલભ્યતે ય
ઇમાન્સ્વાન્ધર્માનાક્ષિપતિ । અન્યાંશ્ચ પ્રતિ સન્દધાતિ, અન્યત્ર ધર્મસંકેતાત્ ।
તસ્માત્સર્વપ્રમાણાનુપલબ્ધેર્નાસ્ત્યાત્મેતિ ।
ઉચ્યતે- યત્તાવદુક્તં પ્રત્યક્ષતઃ પૂર્વવચ્છેષવદ્ભ્યાં
ચાત્મનો નોપલબ્ધિરિતિ, સત્યમેતત્ । યત્તૂક્તં
સામાન્યતોદૃષ્ટાદનુપલબ્ધિરાત્મસામાન્યાનુપપત્તેરિતિ, તદયુક્તમ્ ।
કસ્માત્ ?

॥ સંઘાતપરાર્થત્વાત્ ॥

ઇહ સંઘાતાઃ પરાર્થા દૃષ્ટાઃ । તદ્યથા શયનાસનરથચરણાદયઃ ।
અસ્તિ ચાયં શરીરલક્ષણઃ સંઘાતઃ । તસ્માદનેનાપિ પરાર્થેન ભવિતવ્યમ્ ।
યોऽસૌ પરઃ સ પુરુષઃ । તસ્માદસ્તિ પુરુષઃ ।
આહ, સંઘાતપરાર્થત્વોપલબ્ધેઃ । શયનાદયો હિ સત્યપિ પરાર્થત્વે
સંઘાતાર્થાઃ । યદિ ચ તૈરતિદેશઃ કાર્યકારણસંઘાતસ્ય ક્રિયતે
પ્રાપ્તમસ્ય તદ્વત્સંઘાતાર્થત્વમ્ । એવં પુરુષવિપરીતાર્થસિદ્ધિપ્રસંગઃ ।
અથૈતદનિષ્ટં, ન તર્હિ ચક્ષુરાદયઃ પરાર્થાઃ ।
ઉચ્યતે- ન શક્યમેતદાપાદયિતુમ્ । કસ્માત્ ? અસંહતત્વસિદ્ધૌ
વાદપ્રવૃત્તેઃ । સિદ્ધે સત્યસંહતત્વે પુરુષસ્યાયં વાદઃ પ્રવૃત્તઃ ।
તસ્માન્ન પારાર્થ્યમનેન બાધ્યતે । કથમવગમ્યત ઇતિ ચેત્,
પ્રત્યક્ષતોऽનુપલબ્ધેઃ । સતિ હિ સંઘાતત્વે દેવદત્તાદિવદયં પુરુષઃ
પ્રત્યક્ષત એવોપલભ્યેત । તથા ચ સતિ સંશયાભાવાત્પ્રવૃત્તિરેવાસ્ય
વાદસ્ય ન સ્યાત્ । તસ્માદયુક્તં સંહતાર્થાઃ શયનાદિવચ્ચક્ષુરાદયઃ ।
આહ, પરસ્પરોપકારિત્વાત્પારાર્થ્યસિદ્ધિઃ । ઇહ ક્ષેત્રોદકસૂર્યાદયઃ
શસ્યાદીનામુપકારકાઃ । તથા કાર્યકારણત્વાત્સંઘાતશ્ચ । યથોક્તં
તસ્માદયુક્તમેતેષાં પારતન્ત્ર્યમિતિ ।
ઉચ્યતે- ન શયનાદિવત્તતોऽન્યેનાર્થવત્ત્વાત્ । તદ્યથા શયનાદ્યઙ્ગાનાં
સતિ પરસ્પરોપકારિત્વે તતોऽન્યેનાર્થવત્ત્વાત્તદભાવે ચાર્થાનર્થક્યમ્ ।
એવં ચક્ષુરાદીનાં સતિ પરસ્પરોપકારિત્વે તતોऽન્યેનાર્થવત્ત્વં
ભવિતુમર્હતિ । તદભાવે ચાર્થાનર્થક્યમિતિ ।
આહ, શયનાદીનાં દેવદત્તાર્થત્વાત્તસ્ય ચ ભેદા
બહિર્ભાવાત્પરસ્પરાર્થત્વપ્રસંગઃ । એવં શયનાદયો દેવદત્તાર્થાઃ,
કાર્યકારણસંઘાતશ્ચ દેવદત્તશબ્દવાચ્યસ્તત્ર ભેદાનામેવ

ભેદાર્થત્વાત્પુરુષાર્થસિદ્ધિઃ । દૃષ્ટાન્તાભાવો વા । અથ મતં શયનાદયો
ન દેવદત્તાર્થાઃ, કિં તર્હિ ક્ષેત્રજ્ઞાર્થાઃ । તથા સતિ સાધ્યસમો
દૃષ્ટાન્ત ઇતિ ।
ઉચ્યતે- ન, પ્રસિદ્ધ્યનુરોધાત્ । સત્યં કાર્યકારણસંઘાતસ્ય પારાર્થ્યમ્ ।
ભોક્તૃત્વં નોપપદ્યતે । લોકે તુ દેવદત્તાર્થત્વં શયનાદીનાં પ્રસિદ્ધમ્ ।
અતસ્તદનુગચ્છન્તો વયમપ્યેવં બ્રૂમઃ । કસ્માત્ ? પ્રસિદ્ધેઃ ।
પ્રસિદ્ધેન હ્યપ્રસિદ્ધં તદ્ધર્મતામાપદ્યતે ભવદ્ભિરપ્યુક્તં
"યસ્ય હિ પ્રતિક્ષણમન્યથાત્વં નાસ્તિ તસ્ય બાહ્યપ્રત્યયયોઃ ભેદઃ,
પશ્ચાદ્વિશેષગ્રહણે નાસ્તિ । તદ્યથા ભૂમેરપચ્યમાનાયાઃ પાકજાનામ્
।" ન ચ ભૂમેઃ પ્રતિક્ષણમન્યથાત્વં નાસ્તિ, અક્ષણિકત્વપ્રસંગાત્ ।
સૌક્ષ્મ્યાદ્દુરધિગમો ભેદ ઇતિ દૃષ્ટાન્તઃ પ્રયુક્તઃ । તસ્માત્સિદ્ધં
સંઘાતપરાર્થત્વાદસ્તિ પુરુષઃ ।
ઇતશ્ચ-

॥ ત્રિગુણાદિવિપર્યયાત્ ॥

ત્રિગુણમવિવેકિ વિષયઃ સામાન્યમચેતનં પ્રસવધર્મિ ચ
બાહ્યાધ્યાત્મિકં તથા પ્રધાનમ્ । તત્ર યદ્યેતાવદેતત્સ્યાત્ કિમપેક્ષ્ય
વ્યક્તાવ્યક્તયોસ્ત્રૈગુણ્યાદિતિ ?
કિં ચાન્યત્ ।

॥ અધિષ્ઠાનાત્ ॥

ઇહાકસ્મિક્યાં પ્રધાનપ્રવૃત્તાવર્થવશઃ સન્નિવેશનિયમો
ન સ્યાત્ । શ્રોત્રાદિ પૃથિવ્યાદીનાં દેવમાનુષતિર્યક્ષુ
હિતયોગાર્થશ્ચાપ્રતિષેધાર્થશ્ચ સઃ । તસ્માદસ્તિ તદ્વ્યતિરિક્તો
યદધિષ્ઠિતાનાં ગુણાનામયં ચિત્રરૂપો વિપરિણામઃ ।
કર્તૃત્વપ્રસંગાદધિષ્ઠાનાનુપપત્તિરિતિ ચેત્, સ્યાન્મતં યદિ ગુણાનાં
પુરુષાધિષ્ઠિતાનાં પ્રવૃત્તિરભ્યુપગમ્યતે, કર્તૃત્વમસ્ય પ્રાપ્તમ્ ।
અથાકર્તા ન તર્હ્યસ્ત્યધિષ્ઠાતૃત્વમિતિ । એતચ્ચાયુક્તમ્ । કસ્માત્ ? અર્થે
તદુપચારાત્ । યથાઽપુરુષાર્થઃ સિદ્ધ્યતિ તથા ગુણા કાર્યકારણભાવેન
વ્યૂહ્યન્ત ઇત્યતસ્તત્પારતન્ત્ર્યાદેષામધિષ્ઠિતત્વમુપપદ્યતે, પુરુષસ્ય
ચાધિષ્ઠિતૃત્વમ્ । અતો નાસ્ય કર્તૃત્વપ્રસંગઃ । તસ્માદ્યુક્તમેતત્
અધિષ્ઠાનાત્પુરુષઃ ।

કિઞ્ચાન્યત્ ।

॥ પુરુષોઽસ્તિ ભોક્તૃભાવાત્ ॥

ઇહ સુખદુઃખમોહાત્મકત્વાદચેતનં વ્યક્તમવ્યક્તં ચ, તસ્માદસ્ય પરસ્પરેણ ભોગો નોપપદ્યતે, ઇત્યવશ્યં ભોક્ત્રા ભવિતવ્યમ્ । યોઽસૌ ભોક્તા સ પુરુષઃ ।

આહ, કઃ પુનરયં ભોગો નામ ?

ઉચ્યતે- ભોગ ઉપલબ્ધિસદ્ભાવાત્ ।

વિજ્ઞાનમેવ હિ વિષયોપલબ્ધિસમર્થમિત્યતસ્તાવન્માત્રમેવાસ્તુ કિં પુરુષેણ પરિકલ્પિતેનેતિ ?

ઉચ્યતે- કિં પુનરિદં વિજ્ઞાનં નામેતિ ?

આહ, ચિત્તં મનો વિજ્ઞાનમિતિ । તચ્ચ ષડ્વિધં જ્ઞાનં- ચક્ષુર્વિજ્ઞાનં, શ્રોત્રવિજ્ઞાનં, ઘ્રાણવિજ્ઞાનં, જિહ્વાવિજ્ઞાનં, કાયવિજ્ઞાનં, મનોવિજ્ઞાનમિતિ । તત્ર રૂપં પ્રતીત્ય ચક્ષુશ્ચોત્પદ્યતે ચક્ષુર્વિજ્ઞાનમ્ । એવં શ્રોત્રશબ્દઘ્રાણગન્ધજિહ્વારસમનોધર્માશ્ચિત્તમુત્પાદયન્તિ ।

તસ્ય ધર્માઃ - વેદના, સંજ્ઞા, સ્પર્શો, મનઃ, સંસ્કાર એવમાદયઃ તસ્માદ્વિજ્ઞાનસ્કન્ધસ્યૈવોપભોગસામર્થ્યાન્નાસ્ત્યાત્મેતિ ।

ઉચ્યતે- ન, અચેતનવિકારસ્ય ચેતનાનુપપત્તેઃ । તત્તુ ખલ્વિદમિષ્યતે રૂપં પ્રતીત્ય ચક્ષુશ્ચોત્પદ્યતે ચક્ષુર્વિજ્ઞાનમિત્યાદિ, તેનાચેતનવિકારત્વાત્તદચેતનં ઘટાદિવદિત્યાપન્નમ્ । તસ્માન્મનોધર્મશ્ચેતનેતિ મનોરથમાત્રમેતત્ ।

વિલક્ષણકાર્યોત્પત્તિદર્શનાત્તત્સિદ્ધિરિતિ ચેત્, સ્યાન્મતં નાયં નિયમઃ યદુત યજ્જાતીયં કારણં તજ્જાતીયકેન કાર્યેણ ભવિતવ્યમ્ ।

કિં તર્હિ વિલક્ષણકાર્યોત્પત્તિરિતિ ભાવાનામુપલભ્યતે ।

તદ્યથા- શ◌ૃઙ્ગાચ્છરો જાયતે, ગોલોમાઽવિલોમભ્યો દૂર્વા । વત્સતરાન્મુક.યશ્ચન્દ્રકાન્તેન્દુસંયોગાત્સલિલમ્ । સૂર્યકાન્તગોમયાર્કસમ્પર્કાત્ સુધોદકસમ્પર્કાદરણીનિર્મથનાચ્ચાગ્નિઃ ।

એવમચેતનેભ્યો રૂપાદિભ્યશ્ચેતનમુત્પદ્યત ઇતિ ।

એતચ્ચાયુક્તમ્, ચેતનાચેતનોત્પત્તિનિયમવત્તન્નિયમાત્ । યથા સત્યેતસ્મિન્વિલક્ષણકાર્યપ્રાદુર્ભાવે ભવતશ્ચેતનાચ્ચિત્તાન્નાચેતનં ઘટાદ્યુત્પદ્યત ઇતિ નિયમઃ, તથા સત્યેતસ્મિન્વિલક્ષણકાર્યપ્રાદુર્ભાવે

નાચેતનેભ્યો રૂપાદિભ્યશ્ચેતનં ચિત્તમુત્પદ્યત
ઇત્યયં નિયમો નઃ । તસ્માદેષાં દૃષ્ટાનાં સતિ બહુત્વે
માયાકારનગરવિન્યાસવદયથાર્થજ્ઞાનવિષયત્વાદસાધીયસ્ત્વમ્ ।
પ્રદીપવત્તદ્વ્યવસ્થેતિ ચેત્, સ્યાદેતત્ યથાઽચેતનેભ્યઃ
સત્ત્વાદિભ્યોઽવ્યવસાયકં ઘટાદ્યુત્પદ્યત ઇતિ નેદાનીં વ્યવસાયકો
મહાન્નોત્પદ્યતે । એવં રૂપાદિભ્યોઽચેતનં ઘટાદ્યુત્પદ્યત ઇતિ
નેદાનીં ચેતનં ચિત્તં નોત્પદ્યત ઇતિ । એતદપ્યનુપપન્નમ્ । કસ્માત્
? શક્તિભેદાત્ । પ્રકાશસ્વાભાવ્યાદ્વ્યવસાયાત્મકં સત્ત્વમ્ । તદ્યુક્તં
યદિ તત્પ્રાન્યાદ્વ્યવસાયાત્મકો મહાનુત્પદ્યતે । તમઃ પ્રાધાન્યાદ્વ્યવસાયકા
ઘટાદયઃ । ભવતસ્ત્વેકાકારાઃ રૂપાદયઃ તસ્માદાયમસમઃ સમાધિરિતિ ।
આહ, કિં વ્યવસાયચૈતન્યયોઃ કશ્ચિદ્રૂપભેદોઽસ્તિ ન વેતિ ?
ઉચ્યતે- કિં તર્હિ ત્રૈગુણ્યાત્સતિ પ્રત્યયરૂપત્વે સંવેદ્યા બુદ્ધિર્યથા તુ
વ્યવસાયરૂપં તથા ચૈતન્યરૂપમિતિ । તથા ચ વાર્ષગણાઃ પઠન્તિ-
બુદ્ધિવૃત્ત્યાવિષ્ટો હિ પ્રત્યયત્વેનાનુવર્તમાનામનુયાતિ પુરુષ ઇતિ । આહ ચ
અર્થાકાર ઇવાભાતિ યથા બુદ્ધિસ્તથા પુમાન્ ।
આભાસમાનો બુદ્ધ્યાઽતો બોદ્ધા મણિવદુચ્યતે ॥

યથા યથા મનોવૃત્તિઃ પુરુષોઽસ્તિ તથા તથા ।
બુદ્ધિરૂપમવાપ્નોતિ ચેતનત્વાત્પરાશ્રયમ્ ॥

આહ, રૂપાભેદાત્પુરુષાન્તઃકરણયોરન્યતરપરિકલ્પનાઽનર્થક્યમ્ । યદિ
તર્હિ યથા વ્યવસાયરૂપં તથા ચૈતન્યરૂપમ્, એવં સતિ વ્યવસાયમાત્રં
પરિકલ્પનીયં ચૈતન્યમાત્રં વા ? કસ્માત્ ? ન હ્યેકાન્તકારિણોર્યુગપત્
કલ્પને સામર્થ્યમસ્તિ । રૂપાન્તરાભિધાનં વા । અથ વ્યવસાયચૈતન્યયોઃ
પદાર્થાનામન્તરમેવેતિ નિત્યતો વિશેષ્યતે, તર્હિ વક્તવ્યમિદમમુષ્યૈવ
રૂપં નામુષ્યેતિ ।
ઉચ્યતે- ય એવમાહ રૂપાભેદાદર્થાભેદ ઇતિ સ તાવદિદં પ્રષ્ટવ્યઃ-
અથ કિમ્ ? ભવતઃ કિં વિજ્ઞાનવિષયયોરાકારહેદોઽસ્તિ ઉત નાસ્તીતિ ?
નેત્યાહ । કસ્માત્ ? આકારાન્તરે સતિ વિષયપરિચ્છેદાનુપપત્તેઃ ।
ન હિ વિષયસ્ય વિજ્ઞાનપ્રત્યવભાસમન્તરેણ શક્યં સ્વરૂપં
પરિચ્છેત્તુમ્ । તત્ર યદન્યાકારો ગૌરન્યાકારં ગોવિજ્ઞાનં
સ્યાત્તેન યથાઽન્યાકારેણાશ્વવિજ્ઞાનેનાન્યાકારસ્ય ગોરપરિચ્છેદઃ,
એવમન્યાકારેણ ગોવિજ્ઞાનેનાન્યાકારસ્ય ગોપરિચ્છેદઃ સ્યાત્ । તસ્માન્નાસ્તિ

વિષયવિજ્ઞાનયોરાકારભેદ ઇતિ ।
ઉચ્યતે- તયોરિદાનીં વિષયવિષયવિજ્ઞાનયોઃ કિમુભયત્વમુતાભેદ ઇતિ ?
આહ, કસ્માત્ ? જ્ઞાપ્યજ્ઞાપકભાવાદિતિ ।
ઉચ્યતે-
જ્ઞાનવિજ્ઞેયયોર્યદ્વદ્રૂપાભેદેઽપિ ભિન્નતા ।
ગ્રાહ્યગ્રાહકભાવેન તથૈવાત્મપ્રકાશયોઃ ॥

યથૈવ તર્હિ ભવતઃ સત્યપ્યાકારભેદે
જ્ઞાનવિજ્ઞેયયોર્ગ્રાહ્યગ્રાહકભાવપરિકલ્પનાદ્ભેદ એવં
પુરુષાન્તઃકરણયોરપીતિ । ગ્રાહ્યગ્રાહકભાવાસિદ્ધેરયુક્તમિતિ
ચેત્ સ્યાદેતત્, યથા ગોતદ્વિજ્ઞાનયોર્ગ્રાહ્યગ્રાહકભાવો નિશ્ચિતો
નૈવં પુરુષાન્તઃકરણયોઃ । તસ્માદ્વૈષમ્યમિતિ । એતદનુપપન્નમ્ ।
કસ્માત્ ? માર્ગાન્તરગમનાત્ । પ્રાગુક્તં યેષામાકારભેદો નાસ્તિ
તેષામેકત્વમ્ । ઇદાનીં તુ રૂપાભેદેઽપિ ગ્રાહ્યગ્રાહકભાવાદેવં બ્રુવતો
માર્ગાન્તરમ્ । જ્ઞાનમાત્રાભ્યુપગમાદશાક્યીયમિતિ ચેત્ સ્યાન્મતમ્,
જ્ઞાનમેવાન્તરાસદ્વિષયભૂતાનુરઞ્જિતં વિષયવિષયિરૂપેણ
પ્રત્યવભાસતે । ન તુ કિંચિદ્ગ્રાહ્યં કિંચિદ્ ગ્રાહ્યરૂપાપન્નમસ્તિ ।
તસ્માજ્જ્ઞાનવિજ્ઞેયયોર્ગ્રાહ્યગ્રાહકભેદાદ્ભેદ ઇત્યશાક્યીયમેતત્ ઇતિ ।
તદપ્યયુક્તમ્ । કસ્માત્ ? સિદ્ધાન્તભેદાત્ । યેષાં બાહ્યો વિષયોઽસ્તિ
તત્પક્ષેઽયં દોષઃ । ઇતરેષાં તુ જ્ઞાનમાત્રસ્ય વિષયવિષયિભાવં
પ્રતિષેત્સ્યામ ઇતિ ।
આહ, એવમપિ વિષયાનવસ્થાપ્રસંગઃ । વિષયિણો વિષયત્વપ્રતિજ્ઞાનાત્ ।
યદિ વિષયિણોઽપ્યધ્યવસાયસ્ય વિષયભાવઃ પ્રતિજ્ઞાયતે, તેન
પુરુષસ્યાપિ વિષયિણોઽન્યો વિષયીતિ પ્રાપ્તમ્, તસ્યાપ્યન્ય ઇત્યનવસ્થાઃ ।
અથ મા ભૂદયં દોષ ઇતિ પુરુષો નિશ્ચયરૂપત્વાન્ન વિષયો ન
તર્હ્યધ્યવસાયાદપિ નિશ્ચેતુરર્થાન્તરં કલ્પયિતવ્યમિતિ ।
ઉચ્યતે- ચેતનાત્વાત્પુરુષે તદનુપપત્તિઃ ।
ઇન્દ્રિયાણિ તાવદ્ગ્રહણમાત્રરૂપત્વાદપ્રત્યયાનીતિ
પ્રત્યયવદન્તસ્તાવત્કરણં પરિકલ્પ્યતે ।
અનઃકરણમપ્યુપાત્તવિષયેન્દ્રિયવૃત્ત્યુપનિપાતાત્તદ્રૂપાપત્તાવપિ
સત્યામચેતનત્વાત્સ્વયમુપલબ્ધુમસમર્થમેવ વિષયમિત્યતો ભોક્તારં
ચેતનં પુરુષમપેક્ષતે । પુરુષસ્ય તુ ચેતનત્વાદ્ દ્રષ્ટ્રન્તરમશક્યં

કલ્પયિતુમ્ । તસ્માન્નાનવસ્થાપ્રસંગઃ ।
આહ, પુરુષસ્યાધ્યવસાયકર્તૃત્વપ્રસંગઃ, ચૈતન્યાત્ । યદ્યચેતના બુદ્ધિસ્તેન તસ્યા અધ્યવસાયો વૃત્તિર્ઘટાદિવન્ન પ્રાપ્નોતિ । અતઃ પુરુષસ્યાધ્યવસાયઃ પ્રાપ્તઃ । તતશ્ચ બુદ્ધ્યભાવ ઇતિ ।
ઉચ્યતે- ન, કૈવલ્યાદપ્રતિબન્ધપ્રસંગાત્ । અનામિશ્રરૂપં પુરુષતત્ત્વમિતિ એતદુપરિષ્ટાદ્વક્ષ્યામઃ । સ યદિ વ્યવસાયાત્મકઃ સ્યાત્, અપ્રતિબન્ધેન દિઙ્નિશ્ચયાદિષુ સુપ્તમત્તમૂર્ચ્છિતાનાં ચ વ્યવસાયઃ સ્યાત્ । દૃષ્ટસ્ત્વેવમવસ્થસ્ય વ્યવસાયપ્રતિબન્ધઃ । તસ્માન્ન પુરુષસ્ય વ્યવસાયહ । યસ્ય પુનરન્તઃકરણં વ્યવસાયકં તસ્યૈવં દોષો નાસ્તિ । કસ્માત્ ? ત્રૈગુણ્યાત્ । સત્ત્વાદિસંસ્થાનવિશેષો હિ બુદ્ધિઃ, કરણાન્તરપ્રતિષેધાત્ । તત્ર યદાધ્યવસાયલક્ષણં સત્ત્વં ગુણાભાવાત્પ્રધાનભૂતેન તમસા તિરસ્કૃતશક્તિ ભવતિ તદાऽધ્યવસાયપ્રતિબન્ધઃ ।
આહ, કથં પુનરેતદ્ ગમ્યતે સર્વમિદમચેતનમિતિ ?
ઉચ્યતે- પ્રકૃતિવિકારભૂતત્વાત્ । ઇહ યત્પ્રકૃતિવિકારભૂતં તદચેતનમ્ । તદ્યથા તન્તુપટાદયઃ પ્રકૃતિવિકારભૂતં તસ્માદચેતનમ્ । આકાશે દર્શનાન્નૈકાન્ત ઇતિ ચેન્ન, અસિદ્ધત્વાત્ । ન હ્યાકાશસ્યાત્મપક્ષે પ્રકૃતિવિકારત્વાભાવઃ સિદ્ધઃ । તસ્માદ્યુક્તમેતત્પ્રકૃતિવિકારભૂતત્વાદચેતનં સર્વમ્ । અત એવ ચ ચેતનસ્યાપ્રકૃતિવિકારભૂતત્વં પરસ્પરવૈધર્મ્યાત્ । તસ્માન્નાન્યસ્ય પરમાર્થસ્ય ભોક્તૃત્વમાચેતન્યાદુપપદ્યતે, ન ચેત્ સૂક્તં ભોક્તૃભાવાદસ્તિ પુરુષઃ ।

॥ કૈવલ્યાર્થં પ્રવૃત્તેશ્ચ ॥ ૧૭ ॥

ઇહ પ્રવૃત્તિમતાં નિમિત્તમન્તરેણ નિવૃત્તિર્નોપપદ્યતે । પ્રધાનમપિ ચ પ્રવૃત્તિમદ્, વ્યક્તદર્શનાત્ । તસ્માદ્યસ્ય કૈવલ્યં પ્રધાનપ્રવૃત્તિહેતુઃ સ પુરુષઃ । પ્રધાનાનભ્યુપગમાદુભયાપ્રસિદ્ધિરિતિ ચેત્ સ્યાદેતત્, પ્રધાનં ચેતનવદસ્માકમપ્રસિદ્ધમ્ । યાવત્તસ્ય કૈવલ્યાર્થં પ્રવૃત્તિર્ભવતા પુરુષાસ્તિત્વે લિઙ્ગમપદિશ્યતે તદિદમસિદ્ધં પ્રદિપાદ્યત ઇતિ । એતચ્ચાયુક્તમ્ । કસ્માત્ ? પૂર્વં તત્પ્રતિપાદનાત્ । પ્રાક્પ્રધાનમપ્રતિપાદ્યૈવમાચક્ષાણઃ સત્યમેવં પર્યનુયોગાર્હઃ સ્યાત્, સાધિતં તુ પ્રધાનં પરિમાણાદિભિરિત્યતો ન કિંચિદેતત્ ।

સર્વાચાર્યવિપ્રતિપત્તેઃ પુરુષાર્થસિદ્ધિરિતિ ચેત્ સ્યાન્મતમ્, યદિ પુરુષસ્ય સત્ત્વમેવ સ્યાત્તેન તં પ્રત્યાચાર્યાણાં ન ધર્મવિવાદઃ સ્યાત્ । અસ્તિ ચાસૌ । તથા હિ કેષાંચિન્નિર્ગુણઃ, કેષાંચિત્પરવાન્ । અતઃ સર્વેષાં વિભુઃ, પરિમિતોઽન્યેષાં, તથૈકો નૈક ઇતિ । તસ્માદ્ભ્રાન્તિમાત્રં પુરુષકલ્પનેતિ । એતદનુપપન્નમ્ । કસ્માત્ ? સર્વપદાર્થાભાવપ્રસંગાત્ । રૂપાદિષ્વપિ વિપ્રતિપત્તેઃ । કેષાંચિત્ક્ષણિકાઃ, કેષાંચિત્કાલાન્તરાવસ્થાયિનઃ, તથાશ્રિતાઃ, સ્વતન્ત્રા ઇત્યાદિ । તથા શ્રોતાદીનિ ભૌતિકાનિ, આહંકારિકાણિ, પૌરુષાણીતિ વિપ્રતિપત્તિઃ । એવં સર્વપદાર્થાભાવઃ સ્યાત્ । તસ્માદસ્તિ પુરુષઃ । તત્ર યુક્તં સર્વપ્રમાણાનુપલબ્ધેર્નાસ્તિ પુરુષ ઇતિ એતદયુક્તમ્। યદપ્યુક્તમ્ "શૂન્યકમાધ્યાત્મિકં પશ્યેતિ" તસ્ય પશ્ચાત્પ્રતિષેધં વક્ષ્યામઃ । યત્પુનરેતદુક્તં "અસ્તિ કર્માસ્તિ વિપાકઃ કારકસ્તુ નોપલભ્યત" ઇતિ સત્યમેતત્ । ન હિ પુરુષસ્કન્ધાનાં નિક્ષેપે પ્રતિસંધાનેઽન્યત્ર વા કારક ઇતિ નઃ પક્ષઃ । તસ્માચ્છ્રેયોઽર્થિભિઃ સર્વાગમતર્કવિરુદ્ધાં નૈરાત્મ્યવાદપરિકલ્પનાભ્રાન્તિમસમઞ્જસામપોહ્ય પુરુષસત્ત્વપરિજ્ઞાનાદેવ જનનમરણાદિસર્વોપદ્રવપ્રતિપક્ષભૂતં પરમમૃતં ધ્રુવં સ્થાનમવાપ્તવ્યમિતિ ॥ ૧૭॥

————————-

કારિકા ૧૮

————————-

આહ, ગૃહ્ણીમહે તાવદસ્ત્યયમાત્મેતિ । ઇદાનીમનેકોઽથૈક ઇતિ વિચાર્યમ્ । કુતઃ સંશય ઇતિ ચેત્, સમ્બન્ધિનામુભયથા દૃષ્ટત્વાત્ । ઇહ કસ્યચિદનેકસ્યાનેકેન સમ્બન્ધ ઉપલભ્યતે । તદ્યથા શ્રોત્રાદિના શરીરસ્ય । કસ્યચિદેકસ્યાનેકેન । તદ્યથાઽઽકાશસ્ય ઘટાદિના । અયમપિ ચાત્મા કાર્યકારણસમ્બન્ધીત્યતઃ સંશયઃ કિં શ્રોત્રાદિવદનેકઃ, આકાશવદેકો વેતિ ? કિં ચાન્યત્ । આચાર્યવિપ્રતિપત્તેઃ । ઔપનિષદાઃ ખલુ એક આત્મેતિ પ્રતિપન્નાઃ । કાણાદાક્ષપાદાર્હતપ્રભૃતયઃ પુનરેક ઇતિ । યથા ચૈકાનેકત્વં પ્રત્યાત્મનો વિપ્રતિપત્તિરેવં સાક્ષિત્વૌદાસીન્યદ્રષ્ટૃત્વાકર્તૃત્વેષુ । તસ્માદ્વક્તવ્યં કથમેતે ધર્માઃ પુરુષેઽવતિષ્ઠન્ત ઇતિ ?

ઉચ્યતે- યત્તાવદુક્તં સમ્બન્ધિત્વાદાત્મપદાર્થે સન્દેહઃ કિમનેકોઽથૈક ઇતિ, અત્ર બ્રૂમઃ- બહવઃ પુરુષા ઇતિ પ્રતિજ્ઞા । કસ્માત્ ?

॥ જન્મમરણકરણાનાં પ્રતિનિયમાત્ ॥

જન્મેતિ મહદાદેઃ સૂક્ષ્મશરીરાશ્રિતસ્ય લિઙ્ગસ્ય યથાસંસ્કારં બાહ્યેન શરીરેણ સમ્બન્ધઃ । મરણમિતિ પૂર્વકૃતસ્ય કર્મણઃ ફલભોગપરિસમાપ્તેઃ સામ્પ્રતસ્ય ચ ફલભોગસ્ય પ્રત્યુપસ્થાને લિઙ્ગસ્ય પૂર્વશરીરત્યાગઃ । કરણં ત્રયોદશવિધમિતિ (kA0 32) વક્ષ્યતિ । જન્મ ચ મરણં ચ કરણાનિ ચ જન્મમરણકરણાનિ । તેષાં પ્રતિપુરુષં નિયમઃ ।એતસ્માલ્લિઙ્ગાદાત્મનો બહુત્વમવસીયતે । એતદુક્તં ભવતિ- જન્મલક્ષણં ચ મરણલક્ષણં ચ કાર્યકારણસ્યાવસ્થાન્તરમ્ । પરસ્પરવિરોધિની તમઃપ્રકાશવત્ । તત્ર યદ્યેક આત્મા સ્યાત્ તેન યથૈકં દ્રવ્યં તમઃપ્રકાશાવેકપ્રદેશોપનિપાતિનૌ ન શક્નોત્યનુભવિતુમસમ્ભવાત્, એવમયં જન્મમરણે અપિ ન શક્નુયાદુપભોક્તુમ્ । અસ્તિ ચાયં કેનચિત્કાર્યકરણેન જન્મોપભોગઃ કેનચિન્મરણોપભોગઃ । તેન મન્યામહે નાના આત્માનઃ, યેષાં વિરોધિધર્મોપભોગસામર્થ્યમિતિ । તથા કરણાનાં પ્રકાશાતિશયો વિષયગ્રહણલક્ષણાઽશુદ્ધ્યતિશયશ્ચાષ્ટાવિંશતિધાઽશક્તિઃ, તયોઃ પરસ્પરવિરોધાદેકેનાત્મના યુગપદુપભોગો નોપપદ્યતે । ન હિ શક્યમેકેનાત્મના પ્રકાશાતિશયો વિષયગ્રહણલક્ષણોઽશુદ્ધ્યતિશયશ્ચાશક્તિલક્ષણો વિરોધિત્વાદ્યુગપદુપભોક્તુમ્ । અસ્તિ ચાયં કરણનિમિત્તઃ પ્રતિપુરુષં નિયમઃ । તેન મન્યામહે નાના આત્માન ઇતિ ।
કિં ચાન્યત્ ।

॥ અયુગપત્પ્રવૃત્તેશ્ચ ।
પુરુષબહુત્વં સિદ્ધમ્ ॥

કસ્માત્ ? અયુગપત્પ્રવૃત્તેઃ પ્રધાનસ્યેતિશેષઃ, યસ્ય પ્રવૃત્તિરુપપદ્યતે ।
કસ્ય પ્રવૃત્તિરુપપદ્યતે ?
પ્રધાનસ્ય ।
કથમિતિ ?
ઉચ્યતે- યદ્યેક આત્મા સ્યાત્તેનૈકપુરુષાધિકારનિબદ્ધં પ્રધાનમ્ । શક્તશ્ચાસૌ યુગપદનેકાનિ શરીરાણિ ઉપભોક્તુમિત્યતો યાવદ્ભિઃ શરીરૈરપચિતાસુ કાલમાત્રાસ્વસ્મિન્ભવપરિવર્તે ભવિતવ્યં સર્વેષામુત્પત્તિં પ્રતિ યુગપત્પ્રવર્તેત । દૃષ્ટા તુ

પ્રધાનસ્યાયુગપચ્છરીરભાવેન પ્રવૃત્તિઃ । તસ્માદયુગપત્પ્રવૃત્તેશ્ચ
નાના આત્માન ઇતિ ।
અન્યે પુનરાહુઃ- બહિષ્કરણામેવાયુગપત્પ્રવૃત્તેઃ । કથમ્ ? યદ્યેક
આત્મા સ્યાત્તેન તત્સંસ્કારોપનિબદ્ધાન્યેવ સર્વાણિ કરણાનીત્યતઃ
પ્રતિપણ્ડિતમવસ્થિતૈઃ કરણૈર્યુગપદ્વિષયાન્ગૃહ્ણીયાત્ । બાધિર્યાદ્યુપઘાતે
વા સતિ પિણ્ડાન્તરસમ્બન્ધિના કરણેનાસ્ય શબ્દાદિકરણમપ્રતિષિદ્ધં
સ્યાત્ । ન તુ તથા ભવતિ । તસ્માત્કરણાનામયુગપત્પ્રવૃત્તેર્નાના
આત્માન ઇતિ । તદયુક્તમ્ । કસ્માત્ ? પૂર્વેણાવિશેષાત્ । કરણાનાં
પ્રતિનિયમાદિત્યનેનાયમુપસંગૃહીતોઽર્થઃ । તસ્માદ્યથોક્તમેવાસ્તુ ।
કિં ચાન્યત્ ।

॥ ત્રિગુણાદિવિપર્યયાચ્ચૈવ ॥ ૧૮ ॥

ઇહ ત્રિગુણમવિવેકિ વિષયઃ સામાન્યમચેતનં પ્રસવધર્મીત્યેતે
ધર્માઃ પ્રતિપિણ્ડમુપલભ્યન્તે । યથા ચૈતે તથા
તત્પ્રતિયોગિનો નૈર્ગુણ્યાદયઃ પુરુષધર્માઃ । તત્ર યથૈવ
ગુણસ્વભાવવિપરીતસ્વભાવસ્યોપલમ્ભાદેકસ્માત્પિણ્ડાદેકપુરુષસિદ્ધિઃ એવં
પ્રતિપિણ્ડં ગુણસ્વભાવવિપરીતસ્વભાવસ્યોપલમ્ભાત્પુરુષનાનાત્વમવસેયમ્ ।
તસ્માદવસ્થિતમેતન્નાનાત્માન ઇતિ ॥ ૧૮॥

---

કારિકા ૧૯

---

આહ, સિદ્ધમાત્મનો નાનાત્વમ્ ।
સાક્ષિત્વકૈવલ્યમાધ્યસ્થ્યદ્રષ્ટૃત્વાકર્તૃત્વાનામિદાનીં કસ્માદ્ધેતોઃ
પ્રતિપત્તિરિતિ ?
ઉચ્યતે-

॥ તસ્માચ્ચ વિપર્યાયાત્સિદ્ધં સાક્ષિત્વમસ્ય પુરુષસ્ય ।
કૈવલ્યં માધ્યસ્થ્યં દ્રષ્ટૃત્વમકર્તૃભાવશ્ચ ॥ ૧૯ ॥

તસ્માદિત્યનેન હેતુસામાન્યમાચષ્ટે । ચશબ્દોઽવધારણે ।
વિપર્યાસાદિતિ સામાન્યેન હેતુમુપાત્તં વિશેષેઽવસ્થાપયતિ । સિદ્ધં
સાક્ષિત્વમસ્ય પુરુષસ્યેત્યેવમાદિના સાધ્યધર્મનિર્દેશં કરોતિ । તત્ર
સાક્ષિત્વમિત્યનેન ગુણાનાં પ્રવૃત્તાવસ્વાતન્ત્ર્યં ખ્યાપયતિ, પ્રધાનસ્ય

તદર્થનિબન્ધનત્વાત્પ્રવૃત્તેઃ ।
અધિષ્ઠાતૃત્વં કથમિતિ ?
ઉચ્યતે- યથા હિ ક્રિયાસાક્ષિણિ કસ્મિંશ્ચિદવસ્થિતે કર્તા
તદિચ્છાનુવિધાયી કાર્યં નિર્વર્તયતિ, ન સ્વતન્ત્રઃ, એવં
પ્રધાનમપિ । પ્રવૃત્તિનિવૃત્ત્યોર્યથા પુરુષસ્યાર્થઃ સિધ્યતિ તથા
મહદહઙ્કારતન્માત્રેન્દ્રિયભૂતદેવમનુષ્યતિર્યક્સ્થાવરભાવેન
વ્યૂહતે, ન યદૃચ્છાતઃ ।
તસ્માત્પુરુષસ્તદર્થપરતન્ત્રત્વાત્પ્રધાનપ્રવૃત્તિનિવૃત્ત્યોઃ સાક્ષી ।
કૈવલ્યમિત્યનેન સંસર્ગધર્મત્વમાત્મનો નિવર્તયતિ, ન યથા સત્ત્વાદીનાં
પરસ્પરેણ પ્રકાશાદિધર્માપેક્ષાણાં સંસર્ગઃ, એવં પુરુષસ્ય તૈર્ભવતિ ।
માધ્યસ્થ્યમિત્યનેનાતિશયનિહ્રાસાનુપપત્તેઃ પુરુષસ્ય ગુણૈઃ સહ
બાધાનુગ્રહાનુપપત્તિં સ્વકાર્યપ્રવૃત્તૌ ચાપક્ષપાતં દર્શયતિ ।
દ્રષ્ટ્ત્વમિત્યનેનોદાસીનસ્ય કાર્યકારણપિણ્ડવ્યૂહસમકાલં
ચૈતન્યશક્તિસદ્ભાવાત્સુખદુઃખમોહસ્વભાવાનાં
ગુણચેષ્ટાનામનિવૃત્તાર્થાનાં સન્નિધાનમાત્રાદુપલબ્ધિમાત્રં પ્રતિજાનાતિ ।
અકર્તૃભાવશ્ચેત્યનેન સપ્તવિધમકર્તૃત્વમાશ્રયતિ । ન હ્યયં
વિષયેષુ બાહ્યાન્તઃકરણસાન્નિધ્યેઽધ્યવસાયં કુરુતે । ન ચ સત્ત્વાદીનાં
પ્રકાશપ્રવૃત્તિનિયમલક્ષણૈર્ધર્મૈરિતરેતરોપકારેણ પ્રવર્તમાનાનાં
સ્વેન ચૈતન્યલક્ષણેન ધર્મેણાઙ્ગભાવં પ્રતિપદ્યતે, નાપ્યઙ્ગિભાવમ્ ।
એવં સહ ગુણૈઃ કાર્યં ન કુરુતે સ્ત્રીકુમારવત્ । સ્થિતપ્રયોગં ન કુરુતે
રથશકટયન્ત્રપ્રેરકવત્ । ન સ્વાત્મનો મૃત્પિણ્ડવત્ । ન પરતઃ
કુમ્ભકારવત્ । નાપ્યદેશાન્માયાકારવત્ । નોભયતો માતૃપિતૃવત્ ।
તદેવમનેન સૂત્રેણાચાર્યઃ પુરુષસ્યાધિષ્ઠાતૃત્વં નૈર્ગુણ્યમૌદાસીન્યં
ભોક્તૃત્વમકર્તૃત્વં ચ સાધ્યતામાપાદ્ય ત્રિગુણયાદિવિપર્યયં
સાધનત્વેનોપન્યતિ । તૈઃ પઞ્ચભિસ્ત્રિગુણાદિવિપરીતૈઃ કર્મભિઃ
પઞ્ચાનામેષાં યથાસંભવં પ્રવૃત્તિરવગન્તવ્યા ।
યસ્માદયં સુખાદિભ્યોઽર્થાન્તરભૂતઃ તસ્માદયં તત્ક્રિયાસાક્ષી । તત્ર
નૈર્ગુણ્યાત્સાક્ષિત્વમ્ ।
આહ, તદસિદ્ધેઃ । નૈર્ગુણ્યાસિદ્ધેઃ । યદ્યસ્ય સુખાદિધર્મત્વમાત્મનઃ
પ્રસિદ્ધં સ્યાદત એતદ્યુજ્જતે વક્તુમ્ । તત્ત્વસિદ્ધમ્ । તસ્માદયુક્તમેતત્ ।
વિશેષાનભિધાનાદિતરાત્સિદ્ધિરપીતિ ચેત્ સ્યાન્મતમ્, આત્મગુણાઃ સુખાદયો ન
શબ્દગુણા ઇત્યત્રાપિ ભવતા વિશેષો નાભિધીયતે । તસ્માદેતદપ્યસિદ્ધમ્ ।

એતદપ્યયુક્તમ્ । કસ્માત્ ? અહંકારેણૈકવાક્યત્વે ભિન્નાધિકરણત્વં
સ્યાત્ । દૃષ્ટં તુ સુખિતોઽહં દુઃખિતોઽહમિતિ । તસ્માત્સુખદુઃખયોઃ
શબ્દાદ્યાત્મભાવો ન યુક્તઃ ।
ઉચ્યતે- ન, ગૌરાદિષ્વનેકાન્તાત્ । તદ્યથા ગૌરઃ કૃષ્ણોઽહમિતિ
શરીરધર્મૈરાત્મનો ભિન્નાધિકરણત્વમહઙ્કારેણ એવં સુખદુઃખયોરપિ
સ્યાત્ । ન ચાત્મગુણત્વં સ્યાદિતિ ।
આહ, પૃથગુપલબ્ધેરયુક્તમ્ । યદ્યપિ ગૌરાદીનામવિભક્તમહંકારેણ
ગ્રહણં તથાપિ પૃથગયં પ્રાગેતાનાત્મનો ગૃહીત્વા
પશ્ચાદવિભક્તાન્ગૃહ્ણન્શક્નોતિ વ્યવસ્થાપયિતુમુષ્યૈતે ન પુનરમુષ્યેતિ ।
ન ત્વેવં સુખદુઃખયોઃ પૃથગુપલબ્ધિઃ । તસ્માદસદેતદિતિ ।
ઉચ્યતે- નૈવમુત્પદ્યતે । કસ્માત્ ? માર્ગાન્તરગમનાત્ ।
અહંકારેણાવિભક્તગ્રહણાદાત્મગુણત્વમિતિ પ્રાગપદિષ્ટમ્ । ઇદાનીં તુ સત્યપિ
તસ્મિન્પૃથગ્ગ્રહણાદભાવં બ્રુવતો માર્ગાન્તરગમનમનૈકાન્તિકસ્ય
ચાપરિહારઃ । કિં ચાન્યત્, સંશયાવ્યતિરેકાત્ । યત એવ
ગૌરાદયઃ પૃથગુપલભ્યન્તે ન સુખાદયો એવ સંશયઃ । ન
ચ યત એવ સંશયસ્તત એવ નિર્ણયો યુક્તઃ । તસ્માદ્યુક્તમેતદ્
ગૌરાદિવદહઙ્કારેણાપ્યભિન્નગ્રહણાચ્છબ્દાદ્યાત્મભૂતાઃ સુખાદયઃ ।
કિં ચાન્યત્ । સ્વભાવાનવધારણાદનુપાદાનપ્રસંગાત્ । સુખાદ્યાત્મકાઃ
શબ્દાદય ઇતિ ચેત્ સ્યાન્મતં, યથાગ્નિઃ પાકજનિમિત્તમુપાદીયતેઽથ
ચૈષાં પાર્થિવત્વમેવં શબ્દાદયોઽપિ સુખાદિનિમિત્તત્વેનોપાદીયેરન્
અથ ચૈષામાત્મગુણત્વમેવ સ્યાદિતિ । તદપ્યનુપપન્નમ્ ।
કસ્માત્ ? સામાનાધિકરણ્યદર્શનાત્ । યથા નિમિત્તસ્યાગ્નેર્ન પાકજૈઃ
સામાનાધિકરણ્યં પક્વોઽગ્નિઃ પચ્યતેઽગ્નિરિતિ એવં શબ્દાદીનાં નિમિત્તત્વાન્ન
સામાનાધિકરણ્યં સ્યાત્ । સુખશબ્દો દુઃખ ઇતિ દૃષ્ટં તુ । તસ્માન્ન
તેષાં નિમિત્તાર્થેનોપાદાનમિતિ ।
આહ, એવમપિ સુખાદીનાં શબ્દાદ્યાત્મભાવો ન યુક્તઃ । કસ્માત્ ? વિપ્રતિપત્તેઃ ।
યથા હિ શબ્દાઃ શબ્દાત્મકા એતિ સર્વૈઃ શબ્દરૂપેણ ગૃહ્યન્તે, એવં
સુખાત્મકોઽયમિતિ સર્વૈસ્તદ્રૂપેણ ગૃહ્યતે । દૃષ્ટા તુ વિપ્રતિપત્તિઃ ।
તસ્માદાત્મગુણા ઇતિ ।
ઉચ્યતે- ન, સંસ્કારવિશેષનિમિત્તત્વાત્ । તદ્યથા
પિત્તાદિસામર્થ્યાન્માધુર્યાદિષુ વિપ્રતિપત્તિઃ । ન
ચૈષામશબ્દાદિગુણત્વસંસ્કારવિશેષયોગાત્સુખાદિષુ

વિપ્રતિપત્તિઃ । ન ચૈષામશબ્દાદિગુણત્વમિતિ । કિં ચાન્યત્ ।
નિમિત્તત્વેઽપિ તત્પ્રસંગાત્ । નિમિત્તવાદિનોઽપ્યેતત્સમાનમ્ । ન
હિ નિમિત્તનૈમિત્તિકયોર્વિપ્રતિપત્તિરસ્તિ । તદ્યથા પ્રદીપપ્રકાશયોઃ ।
તતશ્ચ વિપ્રતિપત્તેર્નિમિત્તત્વમપિ શબ્દાદીનામકલ્પનીયં સ્યાત્ । યશ્ચ
દ્વયોર્દોષો ન તમેકશ્ચોદ્યત ઇતિ । આત્મગુણાકાંક્ષિત્વાદદોષ ઇતિ ચેત્
સ્યાન્મતમ્ નિમિત્તપ્રધાનત્વાદન્યપરિપાકવશેન સુખદુઃખેનોત્પાદયત્યાત્મનઃ ।
તન્મયત્વે તુ નિરાકાંક્ષત્વાત્પ્રધાનસ્ય વ્યવસ્થાભેદો ન યુક્ત ઇતિ ।
તચ્ચ નૈવમ્ । કસ્માત્ ? ઉક્તત્વાત્ । તન્મયત્વેઽપિ ગુણભાવાન્માધુર્યાદિષુ
વિપ્રતિપત્તિરિત્યાદાવેવોક્તમેતત્ । તસ્માત્તન્મયત્વે પ્રાધાન્યમિતિ
ચાનિશ્ચિતાભિધાનમેતત્ ।
આહ, એવમપ્યયુક્તમેતત્ । કસ્માત્ ? અતીતાનાગતેષ્વપિ તુ દૃષ્ટેઃ ।
તસ્માત્સુખાદીનાં શબ્દાદ્યાત્મભાવો ન યુક્ત ઇતિ ।
ઉચ્યતે- ન, સ્મૃતિનિમિત્તત્વાદ્ બુદ્ધેઃ । અયમતીતાનાગતેષ્વપિ
શબ્દાદિષુ સ્માર્તસુખદુઃખયોગો ભવતિ । તત્સમ્પર્કાત્તુ પુરુષેણ
તથાનુભૂયતે । પુરુષગુણત્વે તુ પાકજવન્નિમિત્તાદુત્પન્નાનાં
સુખાદીનાં વિશેષભાવાત્તીવ્રમન્દતાનુપપત્તિઃ સ્યાત્ ।
તસ્માત્સુખદુઃખયોઃ શબ્દાદ્યાત્મભાવો ન યુક્તઃ । કિંચાન્યત્ ।
અનિર્મોક્ષપ્રસંગાત્ । દ્રવ્યસ્ય ગુણૈરવિપ્રયોગાત્સુખદુઃખયોરાત્મગુણત્વે
સત્યાત્મનસ્તાભ્યામનિર્મોક્ષપ્રસંગઃ । તસ્માત્તયોરાત્મગુણત્વમયુક્તમિતિ ।
શ્યામાદિવત્તદ્વિનિવૃત્તિરિતિ ચેત્ સ્યાન્મતમ્, યથા શ્યામગુણત્વે
સત્યણોરગ્નિસમ્બન્ધાત્તદ્વિનિવૃત્તિઃ, શબ્દાદિગુણત્વે
ચાકાશસ્યાશબ્દકસ્યાવસ્થાનમેવમાત્મનોઽપિ । એતદયુક્તમ્ ।
કસ્માત્ ? વિશેષોપાદાનપ્રસંગાત્ । સાધ્યત્વાચ્ચ, યથા હ્યણુઃ
શ્યામતાં પરિત્યજ્ય રૂપવિશેષમેવ રક્તલક્ષણમુપાદત્તે, ન
રૂપવત્તાં ત્યજતિ, એવમાત્માપિ બાહ્યનિમિત્તસામર્થ્યાત્સુખાન્તરં
દુઃખાદ્ દુઃખાન્તરમુપાદદીત । ન તે અત્યન્તં જહ્યાત્ । તથા આકાશં
શબ્દલક્ષણં કસ્યાંચિદવસ્થાયામશબ્દકં ભવતીત્યસ્માન્પ્રતિ
સાધ્યોઽયમર્થઃ । ભેર્યાદિશબ્દાસ્તુ તદ્ગુણ એવેતિ પ્રતિપાદયિષ્યામઃ
તસ્માત્સુખદુઃખયોઃ શબ્દાદ્યાત્મભાવોઽયુક્તઃ । એવમનામિશ્રરૂપ આત્મા ।
તતશ્ચેચ્છાદ્વેષપ્રયત્નધર્મજ્ઞાનસંસ્કારાણામનેકસ્વભાવાનાં
પરસ્પરવિરોધિનાં ચ તદ્ગુણત્વમનુપપન્નમ્ । તસ્માદ્યુક્તમેતન્નિર્ગુણ
આત્મા નૈર્ગુણ્યાચ્ચ સાક્ષિમાત્ર ઇતિ કેવલો વિવિક્તત્વાત્ ।

તસ્માદયં ગુણેભ્યઃ પૃથગ્ભૂતઃ તસ્માત્કેવલઃ ન તૈઃ સહ સંસર્ગેણ
વર્તતે ।
આહ, કઃ પુનરસ્યાત્મનો ગુણેભ્યઃ પૃથગ્ભાવોऽભિપ્રેત ઇતિ ?
ઉચ્યતે- તદુપકારનિરપેક્ષાણાં સત્ત્વાદીનાં સ્વકાર્યસામર્થ્યપૃથગ્ભાવઃ ।
ન હિ સત્ત્વાદયઃ પ્રકાશાદિભિર્ધર્મૈરિતરેતરોપકારેણ વર્તમાનાઃ
પુરુષકૃતમુપકારમપેક્ષન્તે । પ્રકાશાદિધર્મસન્નિધાનમાત્રાદેવ
તુ પ્રવર્તન્તે । તથા ચ વાર્ષગણાઃ પઠન્તિ
"પ્રધાનપ્રવૃત્તિરપ્રત્યયા પુરુષેણાપરિગૃહ્યમાણાદિસર્ગે વર્તન્તે"
ઇતિ । યસ્માદ્ગુણાસ્તદુપકારનિરપેક્ષાઃ પ્રવર્તન્તે તસ્માદસાવપિ તત્સંસર્ગ
નાનુભવતિ । દૃષ્ટા તુ લોકેऽપ્યેકકાર્યત્વાપૃથક્પૃથગ્ભાવપરિકલ્પના ।
તદ્યથા ઇમે ભ્રાતરઃ પૃથક્, એષાં નૈકં કાર્યમ્ । ન પૃથગિમે
યેષામેકમિતિ ।
મધ્યસ્થો વિષયિત્વાત્ । યસ્માદયં પુરુષો વિષયી તસ્માન્મધ્યસ્થઃ । કિં
કારણમ્ ? વિષયાણાં હ્યતુલ્યબલત્વાત્, ન્યૂનાતિશયોપપત્તેશ્ચ પરસ્પરેણ
બાધાનુગ્રહાવુત્પન્નૌ । વિષયી ચાયમ્ । તસ્માન્નાસ્તિ ન્યૂનતાદ્યુપપત્તિઃ ।
તતશ્ચેતનાભાવઃ । ન ચામિશ્રરૂપત્વાત્સઙ્ગદ્વેષૌ ગુણવિષયૌ, અતો
મધ્યસ્થઃ ?
દ્રષ્ટૃત્વં ચૈતન્યાત્ । પ્રકૃતિવિકારભૂતત્વાત્
સત્ત્વાદિભ્યશ્ચૈતન્યમપોદ્ધૃત્ય પુરુષે વ્યવસ્થાપનીયમ્ । ન
ચાચેતનાનાં દ્રષ્ટૃત્વમુપપદ્યતે ઇત્યતઃ પુરુષ એવ ચૈતન્યાદ્ દૃષ્ટા
નાન્યત્તત્ત્વાન્તરમ્ ।
અકર્તૃભાવઃ, અપ્રસવધર્મિત્વાત્ । પ્રસવાર્થો ધર્મઃ પ્રસવધર્મઃ
સોऽસ્યાસ્તીતિ પ્રસવધર્મી ।
કઃ પુનરસૌ પ્રસવાર્થો ધર્મ ઇતિ ?
ઉચ્યતે- પ્રસ્પન્દનપરિણામૌ । નિષ્ક્રિયત્વાદકર્તેતિ યાવત્ ।
તદિદમપ્રસવધર્મિત્વાદકર્તેતિ । કથમસ્ય નિષ્ક્રિયત્વમિતિ ચેત્
? ચૈતન્યાત્ । અચેતનાનાં હિ ક્ષીરાદીનાં ક્રિયાવત્ત્વમુપલબ્ધં, ચેતનસ્ય
ન કસ્યચિદિત્યતો નિષ્ક્રિયઃ પુરુષઃ । કિંચ અનામિશ્રરૂપત્વાત્ ।
અનામિશ્રરૂપં હિ ક્રિયાદિમત્ક્ષીરાદિ । અનામિશ્રરૂપશ્ચાયમ્ ।
તસ્માન્નિષ્ક્રિયઃ । વિભુત્વાદિતિ ચેત્ સ્યાદેતત્, યથા વિભુત્વે સતિ પ્રધાનસ્ય
સક્રિયત્વમેવં પુરુષસ્ય ઇતિ વિભુત્વે સક્રિયત્વેન ભવિતવ્યમિતિ ।
તચ્ચ નૈવમ્ । કસ્માત્ ? ધર્મદ્વયસહિતસ્ય સાહચર્યોપલબ્ધેઃ ।

તદ્વિભુત્વમાચેતન્યાનેકરૂપત્વસહિતં ક્રિયાવતિ દૃષ્ટં, ન કેવલમ્ ।
ન તુ તથા પુરુષે । તસ્માદ્વિષમમેતત્ । એવં નિષ્ક્રિયઃ પુરુષઃ
નિષ્ક્રિયત્વાચ્ચ પ્રધાનાત્કાર્યકારણં ન કુરુતે । કસ્માત્ ? ક્રિયાવતઃ
કુમ્ભકારસ્ય મૃત્પિણ્ડાત્કાર્યનિષ્પત્તિસામર્થ્યદર્શનાત્ । સ્યાદેતત્ ।
ઉત્પાદિતસ્યાન્યેન સ્થિતિં કુરુતે, ધાત્રીકુમારવત્ । સ્થિતસ્ય વા પ્રયોગં
રથશકટયન્ત્રપ્રેરકવદિતિ । એતદપ્યનુપપન્નં, પૂર્વસ્માદેવ
હેતોઃ અથાપિ સ્યાત્સ્વતઃ પુરુષઃ કાર્યકરણં કુરુત ઇતિ તદપ્યયુક્તમ્ ।
ચેતનાચેતનયોરત્યન્તભેદાત્પ્રકૃતિવિકારભાવાનુપપત્તેઃ । અથ
મતમુભયત ઇતિ, તદપિ નૈવ સંભવતિ, ઉભયદોષપ્રસંગાત્ ।
સ્યાત્પુનરેતત્ અવ્યપદિશ્ય યોનિં પુરુષોઽભિધ્યાનમાત્રેણ કાર્યકરણં
કુરુતે ઇત્યસદેતત્ । કસ્માત્ ? અનુત્પત્તાવભિધ્યાનાનુપપત્તેઃ ।
ઈશ્વરકારણપ્રતિષેધેઽભિહિતં પ્રાક્ પ્રધાનવિપરિણામાદ્બુદ્ધિમતો
બુદ્ધિર્નાસ્તિ । ન ચ બુદ્ધિમન્તરેણાભિધ્યાનમુપપદ્યતે,
તદ્વૃત્તિભૂતત્વાત્ તથા બુદ્ધિમત્પૂર્વકસૃષ્ટિપ્રતિષેધઃ કૃતઃ ।
સ ઇહાપિ યોજ્યઃ, અધ્યવસાયકર્તૃત્વં ચ પ્રાક્પ્રતિષિદ્ધમ્ । એવં
સપ્તવિધેનાકર્તૃત્વેનાકર્તા પુરુષઃ । ઉક્તં ચ
નાધ્યવસાયં કુરુતે પુરુષો નૈવં સ્થિતિં પ્રયોગં વા ।
ન સ્વાત્મનો ન પરતો ન વ્યપદેશાન્ન ચોભયતઃ ॥

તદ્યુક્તમેતત્

॥ તસ્માચ્ચ વિપર્યાસાત્સિદ્ધં સાક્ષિત્વમસ્ય પુરુષસ્ય ।
કૈવલ્યં માધ્યસ્થ્યં દ્રષ્ટૃત્વમકર્તૃભાવશ્ચ ॥ ઇતિ ॥ ૧૯ ॥

---

કારિકા ૨૦

---

યતશ્ચેતનાશક્તિસમ્બન્ધાત્પુરુષ એવ દ્રષ્ટા નાન્યત્તત્ત્વાન્તરં, ગુણાશ્ચ
કર્તારો, ન પુરુષઃ

॥ તસ્માત્તત્સંયોગાદચેતનં ચેતનાવદિવ લિઙ્ગમ્ ।
ગુણકર્તૃત્વે ચ તથા કર્તેવ ભવત્યુદાસીનઃ ॥ ૨૦ ॥

પુરુષસમ્પર્કાદ્ હિ ગ્રહણધારણવિજ્ઞાનવચનોહાપોહક્રિયા
યથાન્યાયાભિનિવેશાનાં કરણધર્માણાં

પ્રત્યયરૂપાણામિવોપલબ્ધેશ્ચેતનાશક્તેશ્ચાધ્યવસાયવૃત્તિમનુરુધ્યમાનાયાસ્તદ્ભાવસન્નિવેશિનાં સત્ત્વાદીનાં વ્યાપારવતામભિસમ્બન્ધાદ્ વ્યાપારાવિષ્ટાયા ઇવોપલબ્ધિઃ । યતસ્તત્રાયમનેકકાલપ્રવૃત્તમિથ્યાપ્રત્યયાભ્યાસવાસનાપેક્ષો ભવબીજહેતુર્જ્ઞાનવિશેષઃ પ્રાણભૃતામવભાસતે । શ્રોત્રમુપલભ્યતે ત્વક્ચક્ષુર્જિહ્વા ઘ્રાણમિત્યાદિ । તથા પુરુષઃ કર્મણાં કર્તા, પુરુષઃ સુખદુઃખયોરિતિ । તસ્માત્કરણસ્ય ગ્રહણરૂપતા પુરુષસ્ય ચ કર્તૃરૂપતા, સમ્બન્ધ્યન્તરસમ્પર્કાદન્યગતાઽન્યત્રોપલભ્યમાના ભક્ત્યાઽધ્યવસાતવ્યા, ન પરમાર્થતઃ । ઉક્તં ચ

ચેતનાધિષ્ઠાતા બુદ્ધિશ્ચેતનેવ વિભાવ્યતે ।
કર્તૃષ્વવસ્થિતશ્ચાત્મા ભોક્તા કર્તેવ લક્ષ્યતે ॥

આહ, સંયોગાત્પરરૂપતાપત્તાવતિપ્રસંગઃ, અવિશેષાત્ । યદિ ચેતનસંયોગાદ્ બુદ્ધ્યાદીનાં પ્રત્યયવદુપચારઃ વ્યાપિત્વાદસ્ય ઘટાદિભિરપિ સંયોગો ન પ્રતિષિધ્યત ઇત્યતઃ પ્રાપ્તસ્તેષામપિ પ્રત્યયવદુપચારઃ । અથ સંયોગાવિશેષાત્કરણાનામેવ પ્રત્યયવદુપચારો ન ઘટાદીનાં, વિશેષસ્તર્હિ વક્તવ્ય ઇતિ ।

ઉચ્યતે- તદપ્રસંગઃ । શક્ત્યપેક્ષત્વાત્ સ્ફટિકાદિવત્ ।

યથોપધાનસંયોગવિશેષે સત્યાકાશસ્ફટિકયોઃ સ્ફાટિકમેવોપધનસરૂપં પ્રત્યવભાસતે શક્તિતો નાકાશમ્, એવં પુરુષસંયોગાવિશેષે બુદ્ધિઘટયોઃ શક્તિતો બુદ્ધિરેવ ચેતનારૂપાપન્નેવોપલભ્યતે, ન ઘટઃ ।

આહ, પુરુષસ્ય વિકાર્યત્વપ્રસંગઃ, રૂપાન્તરોપાદનાત્ । યદિ તર્હિ કરણસમ્બન્ધાત્પુરુષઃ કર્તૃત્વોપચારં વિષયસરૂપતાં ચ પ્રતિપદ્યતે, પ્રાપ્તમસ્યાપિ સ્ફટિકવદ્રૂપાન્તરોપાદાનાદ્વિકાર્યત્વમ્ । અથ નાસ્ય વિષયરૂપાપત્તિઃ, ન તર્હિ કરણસ્વરૂપઃ પુરુષ ઇતિ ।

ઉચ્યતે- ન, ભક્તિતોઽભ્યુપગમાત્ ।

બુદ્ધિરુપાત્તવિષયેન્દ્રિયવૃત્ત્યુપનિપાતાત્તાદ્રૂપ્યં પ્રતિપદ્યતે । બુદ્ધિરૂપં તુ સન્નિધાનમાત્રાચ્છક્તિવિશેષયોગાત્ફલભોક્તૃત્વાચ્ચ રાજનિ ભૃત્યજયપરાજયોપચારવત્પુરુષ ઉપચર્યતે । ન ત્વસૌ બુદ્ધિસમ્પર્કાત્તદ્રૂપો ભવતિ । અત એવાસ્ય સત્યાં ચેતનાશક્તૌ વ્યવસાયકર્તૃત્વં પ્રતિષિધ્યતે, મા ભૂત્ વિષયરૂપાપત્તૌ સત્યામનેકસ્વભાવત્વાદિકાર્યત્વપ્રસંગઃ । તસ્માદ્વિષયસમ્પર્કાદપ્યવિકાર્યઃ પુરુષઃ, ન હ્યસ્ય નિત્યત્વાત્કિંચિદનુગ્રહાય નાપઘાતાય । આહ ચ

મુષ્ટિર્યથા વિકીર્ણઃ સૂચ્યગ્રે સર્ષપાદીનામ્ ।
તિષ્ઠન્તિ ન સૂક્ષ્મભાવાત્તદ્વદ્ દ્વન્દ્વાનિ સર્વજ્ઞે ॥

ઇતિ । ચેતનાશક્તિયોગાત્તુ દ્રષ્ટૃત્વમસ્ય સ્વાભાવિકમ્ । એવં ચેદ્યયુક્તં
વર્ષાતપાભ્યાં કિં વ્યોમ્નશ્ચર્મણ્યસ્તિ તયોઃ ફલમ્ ।
ચર્મોપમશ્ચેત્સોઽનિત્યઃ ખતુલ્યશ્ચેદસત્સમઃ ॥

ઇતિ તદયુક્તમ્ । કિં કારણમ્ ? યસ્માદવિકાર્યરૂપસ્યાકાશસ્ય સન્નિધાનમાત્રાન્મેઘપયોરજોધૂમપ્રભૃતિભિરભિન્નદેશત્વાદત્યન્તશુદ્ધસ્યાપિ મલિનમિવ રૂપમુપલક્ષ્યતે, ન ચ વિકાર્યત્વમ્, એવમનાત્મનોઽપિ સ્યાત્ । તદ્યુક્તમેતત્પુરુષસંયોગાત્કરણસ્ય પ્રત્યયોપચારઃ, પુરુષસ્ય ચ ગુણસંયોગાત્કર્તૃત્વોપચાર ઇતિ ।
આહ, અયુક્તમેતત્ । કસ્માત્ ? સંયોગાનુપપત્તેઃ । પુરુષસ્ય હિ ગુણાનાં ચ સંયોગઃ પરિકલ્પ્યમાનોઽન્યતરકર્મજો વા પરિકલ્પ્યતે યથા સ્થાણુશ્યેનયોઃ, ઉભયકર્મજો યથા મેષયોઃ, સંયોગજો વા દ્વ્યઙ્ગુલાકાશયોઃ, સ્વાભાવિકો વા યથાઽગ્ન્યુષ્ણયોઃ, શક્તિનિમિત્તો વા યથા ચક્ષુરૂપયોઃ, યોગ્યતાલક્ષણો વા યથા મત્સ્યોદકયોરિતિ ? તન્ન તાવદન્યતરકર્મજ ઉભ્યકર્મજશ્ચ સંયોગ એષામુપપદ્યતે । કસ્માત્ ? વિભુત્વાત્ । ન સ્વાભાવિકઃ અનિર્મોક્ષપ્રસંગાત્ । યથાઽગ્નેઃ સ્વાભાવિકાદૌષ્ણ્યાન્મોક્ષો ન ભવતિ એવમાત્મનઃ સ્વાભાવિકત્વાદ્ગુણસંયોગાદનિર્મોક્ષપ્રસંગઃ સ્યાત્ । શક્તિનિમિત્તશ્ચ । કિમ્ ? અનિર્મોક્ષપ્રસંગાદેવ, સ ન ભવતીત્યનુવર્તતે । સ્વસ્વામિશક્તિનિમિત્તે હિ સંયોગે પરિકલ્પ્યમાને શક્ત્યોઃ સતતાવસ્થાનાદનિર્મોક્ષ એવ પ્રસજ્યેત । યોગ્યતાલક્ષણઃ શક્તિમાત્રરૂપત્વાદસંવેદ્યોઽતસ્તદસિદ્ધિઃ । કિંચ પ્રયોજનાન્તરાનુપપત્તેઃ । પ્રવૃત્ત્યનુગુણં હિ યોગ્યમિત્યુચ્યતે । તસ્યા એવ તુ પ્રવૃત્તે પુરુષાર્થમપોહ્ય નિમિત્તાન્તરં શક્યં કલ્પયિતુમ્ । આકસ્મિકત્વે ચ નિયમદ્વૈતાનુપપત્તિઃ । તસ્માદયુક્તં પુરુષસ્ય ગુણાનાં ચ યોગ્યતાલક્ષણઃ સમ્બન્ધઃ । ન યાદૃચ્છિકઃ । મોક્ષકારણનિયમાનુપપત્તેઃ । સંયોગકારણપ્રતિદ્વન્દ્વં કૈવલ્યકારણમ્ । યદિ ચ યાદૃચ્છિકો ગુણપુરુષસંયોગઃ સ્યાત્તસ્યાજ્ઞાનાન્નિવૃત્તિર્નાસ્તીતિ તદર્થસ્યાભ્યુત્થાનસ્યાનર્થક્યં પ્રાપ્તં વિશેષાનુપપત્તેશ્ચ કારણાન્તરં કલ્પયિતુમ્ । અત એતદપ્યયુક્તમિતિ । ન વૈષયિકઃ, અનિર્મોક્ષપ્રસંગાત્ । સતતમેવ હિ પુરુષસ્ય વિષયિત્વમવ્યાવૃત્તં ગુણાનાં ચ વિષયત્વમિત્યનિર્મોક્ષપ્રસંગ એવ સ્યાત્ । એતાવાંશ્ચ

સંયોગઃ પરિકલ્પ્યમાનઃ પરિકલ્પ્યેત । સર્વથા ચ નોપપદ્યતે ।
તસ્માત્તત્સંયોગાદિત્યયુક્તમભિધાતુમિતિ ।
ઉચ્યતે- સંયોગાનિત્યત્વાદિહ ચૌપકારિકપરિકલ્પનાદદોષઃ ।
ઇહાનેકવિધઃ સંયોગઃ । તદ્યથા પ્રાપ્તિપૂર્વિકા પ્રાપ્તિઃ । યથોદાહૃતં
અન્યતરજ ઉભયકર્મજઃ સંયોગ ઇત્યાદિ । યત્રાસૌ ન સંભવતિ તત્ર
સન્નિધિમાત્રસામાન્યાદ્ ભક્ત્યા કલ્પ્યતે । તદ્યથાऽऽકાશસ્ય ગવાદિભિઃ ।
પ્રદેશૈરિતિ ચેન્ન અભાવાત્ । તેऽપિ હિ નિરવયવત્વાદાકાશસ્ય
ભક્ત્યા કલ્પ્યન્તે, મા ભૂત્કૃતકત્વાનિત્યત્વદોષપ્રસંગઃ ।
તસ્માત્પ્રદેશોપચારાત્કાર્યમપ્યુપચરિતમ્ । અન્યસ્તુ
શાસ્ત્રીયઃ સંયોગોऽર્થનિમિત્તઃ । તત્રાનેકસંયોગોપપત્તેરિહ
પુરુષાન્તઃકરણયોરભિન્નદેશત્વાત્સન્નિધિમાત્રસામાન્યાદ્ભાક્તં સંયોગં
પરિકલ્પ્યૈવમુચ્યત ઇત્યદોષઃ ॥ ૨૦॥

---

કારિકા ૨૧

---

આહ, વિજ્ઞાતં સંયોગદ્વયમ્ । અયં ત્વન્યોऽર્થનિમિત્તઃ શાસ્ત્રીયઃ સંયોગો
ભવતા પરિભાષ્યતે । તત્ર વક્તવ્યં કિમર્થોऽસાવિતિ ?
ઉચ્યતે

॥ પુરુષસ્ય દર્શનાર્થઃ ॥

દૃષ્ટિર્દર્શનમ્ । અર્થશબ્દો નિમિત્તવચનઃ । દર્શનમર્થોऽસ્યાસૌ
દર્શનાર્થઃ । દર્શનનિમિત્તો દર્શનહેતુઃ દર્શનકારણ ઇત્યર્થઃ ।
એતદુક્તં ભવતિ- સન્નિધાનાવિશેષે સતિ આત્મન આકાશાદેશ્ચ
યસ્માદ્દૃક્છક્તિયુક્તઃ પુરુષઃ તસ્માત્કાર્યકારણતામાપન્નેન પ્રધાનેન
સહ ભોક્તૃત્વેન સંબધ્યતે, નાચૈતન્યાદાકાશાદય ઇતિ । અથવા
અર્થશબ્દઃ ફલવચનઃ । યથા તૃપ્ત્યર્થા ભુજિક્રિયા તૃપ્તૌ સત્યાં
નિવર્તતે પ્રાપ્ત્યર્થા ગમિક્રિયા પ્રાપ્તૌ સત્યામ્, એવં પુરુષસ્ય પ્રધાનેન
દર્શનાર્થઃ સંયોગઃ દર્શને સતિ નિવર્તતે । તથા ચ વક્ષ્યતિ દૃષ્ટા
મયેતિયુપેક્ષક એકો દૃષ્ટાહમિત્યુપરતૈકેતિ (kA0 66) ।
આહ, એવમપિ શબ્દાદ્યુપલબ્ધિસમકાલમેવ નિવૃત્તિપ્રસંગઃ । કિં કારણમ્
? તસ્યામપ્યવસ્થાયાં શક્યં વક્તું દૃષ્ટા પ્રકૃતિરિતિ ।
ઉચ્યતે યદ્યપ્યેતદેવં તથાપિ યથા પુરુષસ્ય દર્શનાર્થઃ સંયોગઃ

॥ કૈવલ્યાર્થસ્તથા પ્રધાનસ્ય ॥

કૈવલ્યમિતિ વિવેકપરિચ્છિન્નં સત્ત્વાદિભિરસંસર્ગધર્મિત્વમાત્મનઃ, સોઽર્થોઽસ્ય સોઽયં કૈવલ્યાર્થઃ । સત્યપિ હિ દર્શનાવિશેષે પ્રધાનં પુરુષસ્ય કૈવલ્યાર્થં પ્રવર્તતે । યદાઽસ્ય બુદ્ધિસ્તમસોઽઙ્ગિત્વાદ્યે ગુણાઃ કાર્યરૂપાપન્નાઃ શિરઃપાણ્યાદય આધ્યાત્મિકા, બાહ્યાશ્ચ ગવાદયઃ, કારણરૂપાપન્નાશ્ચાલોચનક્રિયાસંકલ્પાભિમાનાધ્યવસાયલક્ષણાઃ, સોઽહમિત્યવિશિષ્ટપ્રત્યયોપસંહારં કરોતિ તદા પ્રવર્તત એવ । યદા ત્વન્યે ગુણાઃ પ્રકૃતિભૂતા વિકારભૂતાઃ કાર્યભૂતાઃ કારણભૂતા અચેતનાઃ પરાર્થા અન્યોઽહં ન પ્રકૃતિર્ન વિકૃતિર્ન કાર્યં ન કારણં નાચેતનઃ સ્વાર્થ ઇતિ ભિન્નપ્રત્યયોપસંહારં કરોતિ તદા નિવર્તતે । સોઽયં પુરુષસ્ય દૃક્છક્તિનિમિત્તઃ પ્રધાનસ્ય ચ કૈવલ્યાવધિપરિચ્છિન્નઃ પુરુષાર્થઃ । સત્યપિ પારિભાષિકત્વે

॥ પઙ્ગ્વન્ધવદુભયોરપિ સંયોગઃ ॥

એતદુક્તં ભવતિ । પ્રાગપિ કાર્યકારણસમ્બન્ધાત્પુરુષે ચૈત્વન્યમવસ્થિતમ્ । તદ્યથા અગ્નેર્દહનં પરશોશ્છેદનમસતિ દાહ્યે છેદ્યે ન વ્યજ્યતે । તત્સન્નિધાનસમકાલમેવ તુ વ્યજ્યતે । ઇત્યતઃ પ્રધાનમપેક્ષતે । તથા પ્રધાનમપ્યન્તરેણ પુરુષોપકારં સ્વકાદસમર્થમનિષ્પન્નકાર્યસમં ચેતિતમનર્થકમ સ્યાદિત્યતઃ પુરુષમપેક્ષતે । તત્ર ઉભયોરિતરેતરાપેક્ષા તં સંયોગમધિકારબન્ધમાહુરાચાર્યાઃ । પઙ્ગ્વન્ધદૃષ્ટાન્તસ્તુ નાન્તરીયકમાત્રપ્રદર્શનાર્થમ્ । યથા પઙ્ગુર્નાન્તરેણાન્ધં દૃક્છક્ત્યા વિશિષ્ટેનાર્થેનાર્થવાન્ભવતિ અન્ધશ્ચ નાન્તરેણ પઙ્ગું વિશિષ્ટેનાર્થેન, એવં પ્રધાનં નાન્તરેણ પુરુષં કૃતમપિ કાર્યં દ્રષ્ટું શક્તમનવધિકં ચ પ્રવર્તમાનં વિશેષાભાવાન્નૈવ નિવર્તતે । તથા પુરુષઃ સત્યપિ ચેતનત્વે નાન્તરેણ પ્રધાનમુપલભ્યાભાવાદુપલબ્ધા ભવેદિતિ પ્રધાનમપેક્ષતે । તસ્માદિતરેતરાપેક્ષયા સંયોગત્વે કલ્પ્યમાને યદુક્તં

વિના સર્ગેણ બન્ધો હિ પુરુષસ્ય ન યુજ્યતે ।
સર્ગસ્તસ્યૈવ મોક્ષાર્થમહો સાંખ્યસ્ય સૂક્તતા ॥

ઇતિ તદયુક્તમ્ । કસ્માત્ ? ન હ્યસૌ વિના સર્ગેણ ન યુજ્યત ઇતિ । આહ ચ

દૃશ્યદર્શનભાવેન પ્રકૃતેઃ પુરુષસ્ય ચ ।
અપેક્ષા શાસ્ત્રતત્ત્વજ્ઞૈર્બન્ધ ઇત્યભિધીયતે ॥

એવં વિનાપિ સર્ગેણ યસ્માદ્બદ્ધઃ પુમાન્ગુણૈઃ ।
તસ્માદ્વિફલતાં યાતુ મનોરથમનોરથઃ ॥

ઇતિ સિદ્ધઃ સંયોગઃ ।

॥ તત્કૃતઃ સર્ગઃ ॥ ૨૧ ॥

પ્રધાનપુરુષયોર્હિ ભોક્તૃભોગ્યભાવાપેક્ષનિમિત્તોઽયં તત્ત્વસર્ગો મહદાદિઃ, ભાવસર્ગશ્ચ ધર્માદિઃ, ભૂતસર્ગશ્ચ બ્રાહ્માદિઃ પ્રવર્તતે । સા ચાપેક્ષા પુરુષાનન્ત્યાન્ન નિવર્તત ઇત્યતોઽર્થવતીનાં હિ પ્રકૃતીનાં તદપરિસમાપ્તેર્ન નિવૃતિરસ્તિ ॥ ૨૧॥

॥ ઇતિ શ્રીયુક્તિદીપિકાયાં સપ્તતિપદ્ધતૌ પઞ્ચમમાહ્નિકં દ્વિતીયં ચ પ્રકરણમ્ ॥

---

કારિકા ૨૨

---

એવં કારણાન્તરપ્રતિષેધાત્પ્રકૃતેઃ પુરુષાર્થોઽયં વ્યક્તભાવેન વિપરિણામ ઇતિ સ્થિતમ્ । તત્રેદાનીં વિપ્રતિપત્તિરાચાર્યાણામ્ । કેચિદાહુઃ પ્રધાનાદનિર્દેશ્યસ્વરૂપં તત્ત્વાન્તરમુત્પદ્યતે । તતો મહાનિતિ । પતઞ્જલિપઞ્ચાધિકરણવાર્ષગણાનાં તુ પ્રધાનાન્મહાનુત્પદ્યત ઇતિ । તદન્યેષાં પુરાણેતિહાસપ્રણેતૃણાં મહતોઽહંકારો વિદ્યત ઇતિ પક્ષઃ- મહતોઽસ્મિ પ્રત્યયકર્તૃત્વાભ્યુપગમાત્ । અહંકારાત્પઞ્ચ તન્માત્રાણીતિ સર્વે । મહતઃ ષડવિશેષાઃ સૃજ્યન્તે પઞ્ચ તન્માત્રાણ્યહંકારશ્ચેતિ વિન્ધ્યવાસિમતમ્ । તથા અહંકારાદિન્દ્રિયાણીતિ સર્વે । ભૌતિકાનીન્દ્રિયાણીતિ પઞ્ચાધિકરણમતમ્ । એકરૂપાણિ તન્માત્રાણીત્યન્યે । એકોત્તરાણીતિ વાર્ષગણ્યઃ । ઇન્દ્રિયાણિ સંસ્કારવિશેષયોગાત્પરિગૃહીતરૂપાણીતિ કેચિત્ । પરિચ્છિન્નપરિમાણાનીત્યપરે । વિભૂનીતિ વિન્ધ્યવાસિમતમ્ । અધિકરણમપિ કેચિત્ત્રયોદશવિધમાહુઃ । એકાદશકમિતિ વિન્ધ્યવાસી । તથાઽન્યેષાં મહતિ સર્વાર્થોપલબ્ધિઃ, મનસિ વિન્ધ્યવાસિનઃ । સંકલ્પાભિમાનાધ્યવસાયનાનાત્વમન્યેષામ્, એકત્વં વિન્ધ્યવાસિનઃ । તથા કરણં નિર્લિખિતસ્વરૂપં શૂન્યગ્રામનદીકલ્પમ્, પ્રાકૃતવૈકૃતિકાનિ તુ

જ્ઞાનાનિ પ્રેરકાઙ્ગસંગૃહીતાનિ પ્રધાનાદાગચ્છન્તિ ચેતિ પઞ્ચાધિકરણઃ, ન તુ તથેત્યન્યે । કારણાનાં મહતી સ્વભાવાતિવૃત્તિઃ પ્રધાનાત્, સ્વલ્પા ચ સ્વત ઇતિ વાર્ષગણ્યઃ । સર્વા સ્વત ઇતિ પતઞ્જલિઃ । સર્વા પરત ઇતિ પઞ્ચાધિકરણઃ । બુદ્ધિઃ ક્ષણિકેતિ ચ કાલાન્તરાવસ્થાયિનીત્યપરે । એવમનેકનિશ્ચયેષ્વાચાર્યેષુ યે તાવત્પ્રધાનમહતોરન્તરાલે તત્ત્વાન્તરમિચ્છન્તિ તત્પ્રતિક્ષેપાયાચાર્યઃ સ્વમતમુપન્યસ્યતિ ।

॥ પ્રકૃતેર્મહાન્ ॥

પ્રકૃતેર્મહાનુત્પદ્યતે । મહાન્બુદ્ધિર્મતિર્બ્રહ્માપૂર્તિઃ ખ્યાતિરીશ્વરો વિખર ઇતિ પર્યાયાઃ । સ તુ દેશમહત્ત્વાત્કાલમહત્ત્વાચ્ચ મહાન્ । સર્વોત્પાદ્યેભ્યો મહાપરિમાણયુક્તત્વાન્મહાન્ । અન્યસ્ય તુ પક્ષે નૈવાહંકારો વિદ્યત ઇતિ પ્રતિષેધવિવક્ષયેદમાહ ।

॥ તતોઽહઙ્કારઃ ॥

તસ્માન્મહતોઽહંકાર ઉત્પદ્યતે ।
યઃ પુનરાહ, મહતઃ ષડવિશેષાઃ સૃજ્યન્તે પઞ્ચ તન્માત્રાણ્યહંકારશ્ચેતિ તન્નિરાસાર્થમાહ

॥ તસ્માદ્ગણશ્ચ ષોડશકઃ ॥

તસ્માદહંકારાત્ષોડશકો ગણ ઉત્પદ્યતે, પઞ્ચ તન્માત્રાણિ એકાદશેન્દ્રિયાણિ ચ । અનેનૈવ ચ ભૌતિકેન્દ્રિયવાદી પ્રતિક્ષિપ્તો બોદ્ધવ્યઃ ।

॥ તસ્માદપિ ષોડશકાત્ પઞ્ચભ્યઃ પઞ્ચ ભૂતાનિ ॥ ૨૨ ॥

તસ્માદપિ ષોડશકાદ્ગણાદ્યઃ પઞ્ચકો ગણસ્તતઃ પઞ્ચ મહાભૂતાન્યુત્પદ્યન્તે । પૂર્વપદલોપેનાત્ર મહાભૂતાનીતિ વક્તવ્યે ભૂતાનીત્યુચ્યતે । ભૂતસંજ્ઞા હિ તન્માત્રાણાં ન પૃથિવ્યાદીનામત્ર તુ સાંખ્યાચાર્યાણામવિપ્રતિપત્તિઃ ભૂતકૌટસ્થ્યવાદિનસ્તુ મીમાંસકા આર્હતાશ્ચ । તત્પ્રતિક્ષેપેણેદમુચ્યત ઇતિ ॥ ૨૨॥

---

કારિકા ૨૩

---

આહ, ઉક્તં પ્રધાનાદ્બુદ્ધિરુત્પદ્યત ઇતિ । તત્ર વક્તવ્યં કિંલક્ષણા પુનર્બુદ્ધિરિત્યુચ્યતે

॥ અધ્યવસાયો બુદ્ધિઃ ॥

કોऽયમધ્યવસાયઃ ? ગૌરેવાયં, પુરુષ એવાયમિતિ યઃ પ્રત્યયો નિશ્ચયોऽર્થગ્રહણં સોऽધ્યવસાયઃ ।
અત્ર ક્ષણિકવાદ્યાહ યદ્યર્થગ્રહણં બુદ્ધિઃ, અનિત્યા । કસ્માત્ ? હેત્વપેક્ષણાત્ । અર્થગ્રહણં હીન્દ્રિયાદિવિષયસન્નિધાનમાવરણાદ્યભાવં ચાપેક્ષતે । ન ચ નિત્યસ્ય કારણાપેક્ષોપપદ્યતે । તસ્માદનિત્યા બુદ્ધિઃ ।
અભિવ્યક્તેરદોષ ઇતિ ચેત્સ્યાદેતન્નેન્દ્રિયસન્નિધાનાદિભિરર્થગ્રહણં જન્યતે કિં તર્હ્યભિવ્યજ્યત ઇતિ । તચ્ચ નૈવમ્ । દ્વિધા દોષાત્ ।
સા હ્યભિવ્યક્તિઃ સ્વરૂપલાભો વા સ્યાત્ ગ્રહણપ્રતિબન્ધવ્યુદાસો વા ।
કિં ચાતઃ ? તદ્યદિ તાવત્સ્વરૂપલાભઃ ક્રિયતેऽર્થગ્રહણમિતિ પ્રાપ્તમ્ ।
અર્થગ્રહણપ્રતિબન્ધસ્યાન્ધકારસ્ય વ્યુદાસસ્તદપ્યયુક્તમ્ । વિપ્રતિષેધાત્ ।
ગ્રહણં ચ સ્યાત્તત્પ્રતિબન્ધશ્ચેતિ વિપ્રતિષિદ્ધમ્ । કિંચ ભેદાત્ ।
વ્યઙ્ગ્યં હિ ઘટાદિ ચન્દ્રાર્કૌષધિમણિરત્નપ્રદીપભેદાન્ન ભિદ્યતે ।
અસ્તિ બુદ્ધીનામર્થભેદાદ્ ભેદઃ । વૃત્તિભેદાદદોષો મૃદ્વદિતિ ચેત્ સ્યાન્મતમ્ , યથા મૃદ્દ્રવ્યસ્ય ઘટાદિસંસ્થાનવૃત્તિભેદેऽપ્યભેદ એવં બુદ્ધેરિતિ । તદપ્યયુક્તમ્ । અનન્યત્વાત્ । યદા બુદ્ધિરન્યા વૃત્તિભ્યઃ, પ્રાપ્તસ્તદ્ભેદે બુદ્ધિભેદઃ । કિંચ દૃષ્ટાન્તાસિદ્ધેઃ ।
સાધ્યં ચૈતત્ કિં તદેવ મૃદ્દ્રવ્યં ઘટાદિવૃત્તિભેદમનુભવતિ આહોસ્વિત્પ્રત્યયાન્તરવશાદન્યચ્ચાન્યચ્ચોત્પદ્યતે ઇતિ ? અવયવભેદાચ્ચ ।
ઉપેત્ય વાऽનુવૃત્તિં બ્રૂમઃ- ન હિ તદેકં મૃદ્દ્રવ્યમ્, કિં તર્હિ બહવો મૃત્પરમાણવોऽનેકદેશાવચ્છિન્નવૃત્તય ઇતિ । કિં ચાન્યત્ ।
નિવૃત્તિવિભક્તિગ્રહણાત્ । તદ્ધિ મૃદ્દ્રવ્યં સંસ્થાનમપેક્ષ્યાપિ ગૃહ્યતે, ન ત્વર્થગ્રહણમનપેક્ષ્ય બુદ્ધેર્ગ્રહણમસ્તિ । તસ્માદ્વિષમો દૃષ્ટાન્તઃ ।
પરિમાણાદદોષ ઇતિ ચેત્ સ્યાન્મતમ્ સત્ત્વાદીનામઙ્ગાઙ્ગિભાવનિયમાત્તેન તેનાર્થગ્રહણાત્મના વિપરિણામો વૃત્તિરિતિ । એતચ્ચાયુક્તમ્ । ઉભયકલ્પને દોષપ્રસંગાત્ । યદિ ધર્માન્તરોપાદાનપરિત્યાગૌ વ્યક્તવ્યક્તી, દત્તોત્તર એષ પક્ષઃ । અથ નાશોત્પાદૌ તેન ધર્મધર્મિણોરનન્યત્વાદ્ધર્માણાં નાશોત્પાદાદ્બુદ્ધેરપિ નાશોત્પાદપ્રસંગઃ । તદનભ્યુપગમે વાऽન્યત્વમિતિ દોષઃ । આહ ચ
નષ્ટોત્પન્નમનન્યત્વાદનિત્યં નિત્યમેવ વા ।

નષ્ટોત્પન્નાવિનષ્ટાનાં નિત્યં તો નાસ્તિ ચૈકદા ॥

યદપ્યુક્તમ્- સત્ત્વાદીનામઙ્ગાઙ્ગિભાવનિયમાદિતિ, તદયુક્તમ્ ।
અત એવાનિત્યત્વસિદ્ધેઃ । તુલ્યાનાં ગુણપ્રધાનભાવાનુપપત્તેઃ ।
સત્ત્વાદીનાનઙ્ગાઙ્ગિભાવાભ્યુપગમાત્ વૃદ્ધિક્ષયાવભ્યુપગન્તવ્યૌ ।
તતશ્ચ બુદ્ધિરનિત્યેતિ પ્રાપ્તમ્ । તેભ્યોઽનન્યત્વાત્ । અથ મતં
તદવસ્થાપ્યસૌ નિત્યેતિ, ન તર્હિ સત્વાદ્યાત્મભૂતા બુદ્ધિરિતિ પ્રાપ્તમ્ ।
તતશ્ચ કાર્યકારણયોરવિવેક ઇત્યસ્ય વિરોધઃ । તસ્માદનિત્યા બુદ્ધિરિતિ ।
ઉચ્યતે- યત્તાવદુક્તં હેત્વપેક્ષણાદનિત્યા બુદ્ધિરિતિ તદયુક્તમ્ ।
કસ્માત્ ? સિદ્ધસાધનાત્ । કસ્યાત્ર વિપ્રતિપત્તિરનિત્યા વા
બુદ્ધિઃ સ્યાન્નિત્યા વેતિ ? કિં તર્હિ હેતુમદનિત્યં વ્યક્તમિતિ
વચનાદનિત્યૈવ । તસ્માદિષ્ટમેવૈતત્સઙ્ગૃહીતમ્ । અતએવ
ક્ષણિકત્વમિતિ ચેત્, અથાપિ સ્યાદ્ધેત્વપેક્ષા હિ સંસ્કૃતત્વમ્ ।
સંસ્કૃતં તુ ક્ષણિકમ્ । તદ્યથા પ્રદીપ ઇતિ । તસ્માદનિત્યે સત્યપિ
વિશેષાનભિધાને ક્ષણિકત્વમેવાનેન હેતુના બુદ્ધેઃ પ્રતિપાદ્યત
ઇતિ । કસ્માત્ ? ઉત્તરવચનવિરોધપ્રસંગાત્ । એવમપિ યદુત્તરં
ક્ષણિકત્વપ્રસિદ્ધ્યર્થમુચ્યતે પ્રત્યર્થગ્રહણાન્યત્વાદનિત્યેત્યાદિ
તસ્યાનર્થક્યમ્ । તસ્માત્ પૂર્વોત્તરવિરુદ્ધત્વાત્સકલમેવેદં
પ્રકરણં નાધ્યયનં, ન પ્રત્યાખ્યાનમર્હતિ । પરેષાં
ત્વભિનિષ્ટા બુદ્ધિરત્રેત્યસંગતાર્થોત્તરાપવાદદોષમનપેક્ષ્યાપિ
પ્રત્યેકમપ્યેતદસાધનમ્, વૃત્તિવિષયત્વાત્ । સ્વકારણપરિનિષ્પન્નાયા
હિ બુદ્ધેર્વ્યાપારોઽર્થગ્રહણસંજ્ઞક ઇન્દ્રિયાદિસન્નિધાનાપેક્ષો
ન બુદ્ધિઃ । તદનન્યત્વાત્પ્રસંગનિવૃત્તિરિતિ ચેદથ મતમ્,
વૃત્તિવૃત્તિમતોરનન્યત્વાદિત્થમપિ કલ્પયિત્વાઽયં પ્રસંગો ન નિવર્તતે ।
તથા ચોક્તમ્- સ્વાલક્ષણ્યં વૃત્તિસ્ત્રયસ્યેતિ (kA0 29) । તદપ્યબાધકમ્ ।
કસ્માત્ ? ઉપચારાત્ । સત્યમનન્યા, વૃત્તિવૃત્તિમતોર્ભેદેનાગ્રહણાત્,
તથાપ્યુપરતવ્યાપારસ્યાપિ પરશ્વાદેર્વૃત્તિમતઃ સ્વરૂપ નોપરમતીતિ
ભેદમુપચર્ય વ્યવહારો નાનાકાર્યવિષયઃ પ્રવર્તતે । અતએવાન્યત્વમપિ
સ્યાદિતિ તદયુક્તમ્, એકાન્તાત્ । તદ્યથા સેનાપઙ્ક્તિસેનાકુણ્ડલાદ્યુપરમે
ન તત્સન્નિવેશિનામુપરમઃ કાર્યભેદશ્ચ, ન ચાન્યત્વમ્ ।
એવં વૃત્તિતદ્વતોરપિ ચ સ્યાત્ । તસ્માદ્યુક્તમેતદ્ધેત્વપેક્ષણસ્ય
વૃત્તિવિષયત્વાન્ન બુદ્ધેરનિત્યત્વમિતિ । એતેન વ્યક્તિવિકલ્પઃ પ્રયુક્તઃ,

સોऽપિ વૃત્તિવિષય ઇતિ કૃત્વા તદપ્યુક્તમિન્દ્રિયાદિભેદે ભેદાદિતિ ।
તદપ્યનેનૈવોક્તમ્ । વૃત્તિભેદોऽત્ર ન ભેદ ઇતિ । કિં ચાનેકાન્તાત્ ।
યથોદકાદિભેદાત્પ્રતિબિમ્બભેદો ન ચાવ્યઙ્ગ્યત્વમેવમન્યત્રાપિ સ્યાત્ ।
દ્રવ્યાન્તરોત્પત્તેરદોષ ઇતિ ચેત્સ્યાન્મતમ્, ઉદકસ્યાનનસંયોગાદ્દ્રવ્યાન્તરમેવ
પ્રતિબિમ્બલક્ષણમુત્પદ્યતે ન તુ મુખં ભિદ્યતે ઇતિ અસદેતત્ । કસ્માત્
? ઉભયોઃ કારણત્વેન કલ્પનાનુપપત્તેઃ । ન હિ મુખઃ નિમિત્તં શક્યં વક્તુમ્
, વિપ્રકૃષ્ટત્વાન્નાસાદયો મુખાપગમેऽપ્યુપલબ્ધિપ્રસંગાત્પાકજવત્ ।
યત્પુનરેતદુક્તં વૃત્તિભેદાદદોષો મૃદ્વદિતિ તથા તદસ્તુ ।
યત્તૂક્તમનન્યત્વાદ્દૃષ્ટાન્તાસિદ્ધેશ્ચેતિ વૃત્ત્યનન્યત્વમિદાનીમેવ
પ્રત્યુક્તમ્ । ક્ષણભઙ્ગપ્રતિષેધે ચોક્તં ન પૃથિવ્યાદીનામન્યથા
ચાન્યથા ચોત્પત્તિઃ । યત્પુનરેતદુક્તં નૈકં મૃદ્દ્રવ્યમિતિ તત્ર
બુદ્ધિઃ પ્રમાણમ્ । યદેકબુદ્ધિનિમિત્તં તદેકં, તત્ર યદિ મૃદોऽનેકત્વેન
પ્રયોજનં બુદ્ધિરુપલભ્યતે- વયમિતિ । યત્પુનરેતદુક્તમ્, મૃદ્દ્રવ્યસ્ય
સંસ્થાનવ્યતિરેકેણ સ્વભાવોऽવધાર્યતે ન તુ બુદ્ધેરર્થગ્રહણમન્તરેણ
સ્વરૂપગ્રહણમિતિ, તદયુક્તમ્ । અભાવસ્યાऽરૂપત્વાત્ । ઉપેત્ય વા
યથા બાહ્યાદ્યવસ્થાસુ વ્યાકારા ચિત્તસન્તતિઃ ।
વિદ્યતે બીજમાત્રા વસ્તથા ધીરિતિ ગૃહ્યતામ્ ॥

યથા બાહ્યાર્થાકારવચ્ચિત્તસન્તતિરથ ચ
સુપ્તમૂર્છિતવિરોધસમાપન્નાનામર્થરૂપાદૃતે બીજમાત્રાસ્તીત્યુપગમ્યતે
સા ચિતિ કાપિ વાऽવસ્થેતિ વચનાત્, ન ચ ગૃહ્યતે તથા બુદ્ધિરપીતિ
કસ્માન્ન પરિકલ્પ્યતે ? યત્પુનરેતદુક્તમ્ યદિ ધર્માન્તરોપાદાનપરિત્યાગૌ
વ્યક્તવ્યક્તી દત્તોત્તર એષ પક્ષ ઇતિ । તદિતરત્ર તુલ્યમ્ ।
અસ્માભિરપિ તર્હ્યસત્કાર્યપ્રત્યાખ્યાને દત્તોત્તર એષ પક્ષો
વ્યક્તિતર્ન ક્રિયતે ઇતિ । નાશોત્પાદૌ તુ અનિષ્ટાવેવેતિ ન પરિહારં
પ્રત્યાદરઃ ક્રિયતે । યદપ્યુક્તં નષ્ટાદુત્પન્નાચ્ચાનષ્ટમનુત્પન્નં
ચાન્યન્નાસ્તીતિ તદયુક્તમ્, અનભ્યુપગમાત્ । નાશોત્પાદૌ કઃ પ્રતિજાનીતે
યં પ્રત્યેતદર્થવત્સ્યાત્ ? કિં ચ ત્વત્પક્ષપ્રાપ્તેઃ । ભવત એવ
નષ્ટોત્પન્નેભ્યઃ સ્કન્ધેભ્યો નાન્યા સન્તતિરથ ચ નાસ્તિ દોષઃ ।
કયાऽપિ યુક્તયા સ્યાદેતદન્યૈવાસાવિતિ તતશ્ચૈકા સન્તતિરિતિ હીનમ્ ।
યદપ્યુક્તં ગુણવૃદ્ધિક્ષયેऽનિત્યત્વમિતિ તદનુપપન્નમ્ । કસ્માત્
? રૂપાન્તરાપ્યાયનાત્ । સત્ત્વં હિ પ્રકર્ષમનુભવદ્રજસ્તમસી ચ

ન્યૂનતાં ધર્માદિરૂપાં બુદ્ધેરાપ્યાયન્તિ, નાર્થાન્તરં કુર્વન્તિ નો ખલ્વપ્યભાવમ્, એવં રહસ્તમો વા પ્રકર્ષમનુભવત્સત્ત્વં ચ ન્યૂનતાધર્માદિરૂપં બુદ્ધેરાપ્યાયન્તિ, નાર્થાન્તરં કુર્વન્તિ નાભાવમ્ । એવં ગુણવૃદ્ધિક્ષયેऽપિ રૂપાન્તરાપ્યાયનાન્નાસ્તિ ક્ષયો બુદ્ધેઃ । તત્ર યદુક્તં હેત્વપેક્ષણાદનિત્યા બુદ્ધિરિતિ એતદયુક્તમ્ ।યત્પુનરેતદુક્તં પ્રત્યક્ષગ્રહણાન્યત્વાત્પ્રતિક્ષણં દીપાદિતૈલધારાસુ શબ્દભેદાચ્ચ ક્ષણિકેતિ, અત્ર બ્રૂમઃ- ગ્રહણાન્યત્વે ચોક્તં વૃત્તિભેદો ન વૃત્તિમદ્ભેદઃ । કિં ચાન્યત્ । ભિન્નાર્થગ્રહણૈકત્વાત્ । ઉપેત્ય વા બ્રૂમઃ- યદિ પ્રત્યર્થમન્યદન્યદ્ગ્રહણં કલ્પ્યતે, વિકલ્પબાધસમુચ્ચયસંશયદ્વિત્વાતિશયનિવારણેષુ, તથા કલ્માષં શબલં ચિત્રમિત્યનેકાર્થરૂપમેકં ગ્રહણં ન સ્યાત્ । દૃષ્ટં તત્ । તસ્માન્નાયં ક્ષણિકત્વે હેતુઃ । એવમવસ્થિતમિદં- અધ્યવસાયો બુદ્ધિર્ન ક્ષણિકેતિ ।

બુદ્ધેસ્તુ ત્રિગુણાત્મકત્વાત્તસ્ય ગુણસ્ય પ્રકર્ષે તત્તદ્રૂપાન્તરમુત્પદ્યત ઇતિ ।

આહ, કસ્ય ગુણસ્ય પ્રકર્ષે બુદ્ધેઃ કિં લક્ષણં રૂપાન્તરમુપજાયતે ? ઇત્યુચ્યતે

॥ ધર્મો જ્ઞાનં વિરાગ ઐશ્વર્યમ્ ।
સાત્ત્વિકમેતદ્ રૂપમ્ ॥

અત્ર ત્વેતદ્રૂપમિતિ સત્યપિ ધર્માદિભેદે બુદ્ધિરિત્યભેદવિવક્ષાવિષય એકવચનનિર્દેશઃ ક્રિયતે । એતદુક્તં ભવતિ યદા રજસ્તમસી વશમાપાદ્ય બુદ્ધિગતં સત્ત્વમુત્કૃષ્ટં ભવતિ તદા ધર્મો જ્ઞાનં વિરાગ ઐશ્વર્યમિત્યેતદ્રૂપં ભવતિ । તત્ર શ્રુતિસ્મૃતિવિહિતાનાં કર્મણામનુષ્ઠાનાદ્બુદ્ધ્યવસ્થઃ સત્ત્વાવયવ આશયભૂતો ધર્મ ઇત્યુચ્યતે । સ તુ દ્વિવિધઃ । બ્રહ્માદિસ્થાનેષ્વભિપ્રેતશરીરેન્દ્રિયવિષયોપભોગનિર્વર્તકો જ્ઞાનાદ્યઙ્ગભૂતશ્ચ પ્રથમઃ । અગ્નિહોત્રહવનાદિક્રિયાનુષ્ઠાનસાધનો યમનિયમસાધન ઇતરઃ । તત્રાહિંસા સત્યમસ્તેયમકલ્કતા બ્રહ્મચર્યમિતિ પઞ્ચ યમાઃ । અક્રોધો ગુરુશુશ્રૂષા શૌચમાહારલાઘવમપ્રમાદ ઇતિ પઞ્ચ નિયમાઃ । એતેષામવિલોપેનાનુષ્ઠાનાદ્યતેરેવંવિધોત્તરણે સત્ત્વધર્મ આશયતાં પ્રતિપદ્યતે, યો જ્ઞાનાદીનાં રૂપાણામાપ્યાયનં

કરોતિ । એતદભ્યુદયનિઃશ્રેયસયોઃ સોપાનભૂતં પ્રથમં પર્વ ।
યત્રાયમવસ્થિતો યતિરિતરેષાં પર્વણામનુષ્ઠાને યોગ્યો ભવતિ । જ્ઞાનં
દ્વિવિધં શબ્દાદ્યુપલબ્ધિલક્ષણં ગુણપુરુષાન્તરોપલબ્ધિલક્ષણં
ચ । તત્ર શબ્દાદ્યુપલબ્ધિલક્ષણં પ્રત્યક્ષાનુમાનાગમરૂપમ્ ।
ગુણપુરુષાન્તરોપલબ્ધિલક્ષણં ચ દ્વિવિધં અપૂર્વમભ્યાસજં ચ ।
તયોરપૂર્વમ્- ઊહઃ શબ્દોઽધ્યયનમિતિ (kA0 51) સિદ્ધિકાણ્ડાનુપતિતાનિ
પ્રમાણાનિ । અભ્યાસજં પુનઃ વૈરાગ્યપૂર્વાવિજયપૃષ્ઠલબ્ધં શાન્તમમલં
ધ્રુવં સકલભવાભવપ્રતિપક્ષભૂતમ્ । યદાચાર્યો વક્ષ્યતિ-
એવં તત્ત્વાભ્યાસાન્નાસ્મિ ન મે નાહમિત્યપરિશેષમ્ ।
અવિપર્યયાદ્વિશુદ્ધં કેવલમુત્પદ્યતે જ્ઞાનમિતિ ॥ (kA0 64)
વિરાગસ્તુ રાગપ્રતિપક્ષભૂતો જ્ઞાનાભ્યાસોપજનિતો બુદ્ધેઃ પ્રસાદઃ ।
તસ્ય તુ યતમાનવ્યતિરેકૈકેન્દ્રિયવશીકારલક્ષણાશ્ચતસ્રોઽવસ્થા
ભવન્તિ । તત્રેન્દ્રિયાણાં વિષયાભિલાષલક્ષણકષાયપાચનં પ્રતિ યઃ
પ્રયત્ન ઉત્સાહઃ સા યતમાનસંજ્ઞા । યતમાનકો હ્યયમસ્મિન્પર્વણ્યવસ્થિતો
યતિર્ભવતિ । યદા તુ કેષાંચિદિન્દ્રિયાણાં પરિપક્વં સા વ્યતિરેકસંજ્ઞા ।
વ્યતિરિચ્યન્તે હિ તદા યતેરિન્દ્રિયાણિ પરિપક્વાણ્યપરિપક્વેભ્યો વિશિષ્ટતરાણિ
ભવન્તીત્યર્થઃ । વિપરિપક્વસર્વેન્દ્રિયસ્તુ સંકલ્પમાત્રાવસ્થિતકષાયો યદા
ભવતિ તદૈકેન્દ્રિયસંજ્ઞા । નિવૃત્તસર્વેન્દ્રિયવિષયેચ્છસ્ય યતેરેકમેવ
મનોલક્ષણમિન્દ્રિયં તદા પરિપક્વં ભવતિ । સંકલ્પમાત્રાવસ્થિતસ્યાપિ
પરિપાકો વશીકારસંજ્ઞા । સંકલ્પમૂલોચ્છિન્નવિષયમૃગતૃષ્ણો
હિ અયં યતિરિન્દ્રિયાણામન્તઃકરણસ્ય ચ પ્રવૃત્તિનિવૃત્ત્યોરીષ્ટે ।
એકાગ્ર એકરામોઽવિદ્યાપર્વણોઽતિક્રાન્તઃ, પરસ્ય બ્રહ્મણઃ પ્રત્યનન્તરો
ભવતિ । તદેવં ચતુરવસ્થં વૈરાગ્યપર્વ વિજ્ઞાય તદનુષ્ઠાનાય
યતિઃ પ્રયતેત । તસ્યોપાયો દૃષ્ટાનુશ્રવિકવિષયપ્રત્યાખ્યાને
ય ઉપદિષ્ટો યશ્ચ તુષ્ટિષુ વક્ષ્યમાણસ્તમેકીકૃત્યોત્તરોત્તરાં
તત્ત્વભૂમિં વિજ્ઞાનસ્ય વિષયીકુર્વન્પૂર્વસ્યાં તત્ત્વભૂમૌ મધ્યસ્થઃ
સ્યાત્ । ઐશ્વર્યમપ્રતિઘાતલક્ષણમ્, યત્પુનરષ્ટવિધં અણિમા મહિમા
લઘિમા ગરિમા પ્રાપ્તિઃ પ્રાકામ્યમીશિત્વં વશિત્વં યત્રકામાવસાયિત્વમિતિ ।
અત્રાણિમા, મહિમા, લઘિમા, ગરિમેતિ ભૂતવૈશેષિકમ્ । બુદ્ધેસ્તુ પ્રાપ્ત્યાદિ ।
એવમેતચ્ચતુર્વિધં મહતઃ સાત્ત્વિકં રૂપમિતિ ।
આહ, અથ ગુણાન્તરરૂપં કિમ્ ?
ઉચ્યતે

॥ તામસમસ્માદ્વિપર્યસ્તમ્ ॥ ૨૩ ॥

એતત્ અસ્માદ્ધર્માદેઃ સત્ત્વરૂપાદિવિપર્યસ્તં
તામસં તમઃપ્રકર્ષોપજનિતમિત્યર્થઃ । અત્ર
શાસ્ત્રચોદિતાનુષ્ઠાનાદાશયનિષ્પન્નસત્ત્વાવયવો ધર્મ
ઇત્યુક્તમ્ । શાસ્ત્રચોદિતસ્ય નિત્યસ્ય ચ કર્મણોઽનુષ્ઠાનાદ્
બુદ્ધ્યવસ્થસ્તમોઽવયવ આશયતાં પ્રતિપન્નોઽધર્મઃ । સ
ચાપિ દ્વિવિધઃ- અનિષ્ટશરીરેન્દ્રિયવિષયોપભોગનિર્વર્તકઃ,
ખ્યાતિવારકશ્ચ । યથા ચ જ્ઞાનં દ્વિવિધં શબ્દાદ્યુપલબ્ધિલક્ષણં
ગુણપુરુષાન્તરોપલબ્ધિલક્ષણં ચૈવમજ્ઞાનમપિ વિપર્યયેણ વાચ્યમ્ ।
યથા ચ ચતુરવસ્થં વૈરાગ્યં તથા યતમાનાદિકશ્ચતુરવસ્થો રાગઃ
યથા ચાષ્ટગુણમૈશ્વર્યમણિમાદિ તથાઽષ્ટગુણમનૈશ્વર્યમેવમેતત્તામસં
મહતો રૂપમ્ । યચ્ચૈતદધર્માદિનિમિત્તભૂતમુત્કૃષ્ટં તમોરૂપં
તદ્રજસા સહાવિરોધાદેકતામિવાપન્નમશુદ્ધિરિત્યાચાર્યૈઃ પઠ્યતે ।
સત્ત્વરૂપં તુ પ્રકાશ ઇતિ । અનયોશ્ચાભિધાનાદ્યઃ પઞ્ચાધિકરણપક્ષઃ
પ્રાકૃતવૈકૃતાનાં જ્ઞાનાનાં પ્રધાનવચ્છુષ્કનદીસ્થાનીયાન્તઃકરણે
બાહ્યે ચ પ્રેરકજ્ઞાનાંશકકૃત ઉપનિપાતઃ તથા
સાત્ત્વિકસ્થિત્યાત્મકકૃતમપ્રત્યયસ્યાવસ્થાનમિતિ તત્પ્રતિક્ષિપ્તં ભવતિ ।
કિં કારણં ? યસ્માદશુદ્ધિરેવ પ્રકાશમલમતિપ્રવૃત્તં નિવર્તયિતું
પ્રકર્ષાપન્નાન્યાભૂતા ચ પ્રવર્તયિતુમ્ । ઇત્યેવમષ્ટરૂપા બુદ્ધિર્વ્યાખ્યાતા
॥ ૨૩ ॥

કારિકા ૨૪

યસ્ત્વસાવનન્તરમુક્તોઽહઙ્કારસ્તં વ્યાખ્યાસ્યામઃ ।
આહ, યદ્યેવં તસ્માદિદમેવ તાવદુચ્યતાં કિમસ્યાહઙ્કારસ્ય લક્ષણમિતિ ?
ઉચ્યતે-

॥ અભિમાનોઽહઙ્કારઃ ॥

કર્તુઃ સ્વાત્મપ્રત્યવમર્શાત્મકો યોઽયમહમિતિ પ્રત્યય
ઉત્પદ્યતે સ ખલ્વહંકારઃ, મહતસ્તત્ત્વાન્તરમ્ । કસ્માત્ ? તસ્ય

સર્વવિષયાધ્યવસાયરૂપત્વાત્, અસ્ય તુ સ્વાત્મપ્રત્યવમર્શાત્ । ન ત્વર્થાન્તરમ્ । કસ્માત્ ? પ્રકૃતિવિકારયોરનન્યત્વાભ્યુપગમાત્ ન હિ નઃ પ્રકૃતેરર્થાન્તરભૂતો વિકાર ઇતિ પ્રાગ્વિસ્તરેણ પ્રતિપાદિતમ્ । સ ચ મૂર્તિપ્રત્યયાભ્યાં મહતઃ સ્થૂલતરઃ । કસ્માત્ ? અવિભાગાત્, વિભાગનિષ્પત્તેઃ કાલાદિવત્ । ત્રિગુણસ્ય ચ મહતો વિકારત્વાદસાવપિ ત્રિગુણઃ । કસ્માત્ ? પ્રકૃતિરૂપસ્ય વિકારે દૃષ્ટત્વાત્ તન્તુપટવત્ । તદ્ભાવસન્નિવિષ્ટાસ્તુ યે સત્ત્વાદયસ્ય આચાર્યૈર્વૈકારિકતૈજસભૂતાદિશબ્દેનાખ્યાયન્તે । તથા ચ શાસ્ત્રમાહ "એતસ્માદ્ધિ મહત આત્મન ઇમે ત્રય આત્માનઃ સૃજ્યન્તે વૈકારિકતૈજસભૂતાદયોઽહંકારલક્ષણાઃ । અહમિત્યેવૈષાં સામાન્યલક્ષણં ભવતિ । ગુણપ્રવૃત્તૌ ચ પુનર્વિશેષલક્ષણમિતિ" ।
આહ, કા પુનર્ગુણપ્રવૃત્તિર્યસ્યામસ્મિપ્રત્યયૈકરૂપસ્યાહઙ્કારસ્ય વિશેષપ્રતિપત્તિર્ભવતીતિ ?
ઉચ્યતે- યોઽયં

॥ તસ્માદ્વિવિધઃ પ્રવર્તતે સર્ગઃ ॥

દ્વિવિધ ઇન્દ્રિયલક્ષનસ્તન્માત્રલક્ષણશ્ચ । સા ગુણવૃત્તિરિત્યુચ્યતે । કસ્માત્ ? તત્કાર્યત્વાત્ । ગુણપ્રવૃત્તિકાર્યો હિ સર્ગઃ । દૃશ્યતે ચ ખલુ લોકે કાર્યકારણમુપચર્યમાણમ્ । તદ્યથા શાલીન્ભુઙ્ક્ત ઇતિ ।
આહ, પ્રાગુક્તમહંકારાત્ષોડશકો ગણ ઉત્પદ્યતે । ઇદાનીં પુનરુચ્યતે તસ્માદ્વિવિધઃ પ્રવર્તતે સર્ગઃ । તદિદં પૂર્વોત્તરવ્યાઘાતાદયુક્તમિતિ ।
ઉચ્યતે- ન, સામાન્યેન વિવક્ષિતત્વાત્ ।
અભેદવિવક્ષાયાં હિ કૃત્વા કાર્યકારણલક્ષણમેવમસ્માભિરુપદિષ્ટં દ્વિવિધઃ સર્ગ ઇતિ । ભેદવિવક્ષાયાં પુનઃ

॥ ઐન્દ્રિય એકાદશકસ્તાન્માત્રઃ પઞ્ચકશ્ચૈવ ॥ ૨૪ ॥

ઇન્દ્રિયાણામયમૈન્દ્રિયઃ એકાદશ પરિમાણમસ્ય એકાદશકઃ । એવં તન્માત્રેષુ વક્તવ્યમ્ । તન્માત્રાણાં શબ્દસ્પર્શાદીનામયં તાન્માત્રઃ સર્ગઃ । પઞ્ચકશ્ચ પઞ્ચ પરિમાણમસ્યેતિ પઞ્ચકઃ । અસ્ય તુ ષોડશકસ્ય વિકારસ્ય સંજ્ઞાલક્ષણપ્રયોજનાન્યુત્તરત્ર વક્ષ્યતિ । એષા ગુણપ્રવૃત્તિર્વ્યાખ્યાતા । યસ્યામસ્મિપ્રત્યયસ્ય વિશેષગ્રહણં ભવતિ- શબ્દેઽહં સ્પર્શેઽહં રૂપેઽહં રસેઽહં ગન્ધેઽહમિતિ ।
આહ, અહઙ્કારે સત્ત્વાદીનાં સંજ્ઞાન્તરાવચનમ્, આનર્થક્યાત્ । યદિદમહંકારે

સત્ત્વાદીનાં સંજ્ઞાન્તરમારભ્યતે વૈકારિકસ્તૈજસો ભૂતાદિરિતિ, તન્ન વક્તવ્યમ્ । કસ્માત્ ? આનર્થક્યાત્ । ન હિ તત્ત્વાન્તરસન્નિવેશિનાં સત્ત્વાદીનાં સંજ્ઞાન્તરાભિધાને કિંચિત્પ્રયોજનમસ્તીતિ, સંજ્ઞાભૂયસ્ત્વાત્ । અથાયં નિર્બન્ધસ્તત્ત્વાન્તરમ્, સંજ્ઞાભૂયસ્ત્વં પ્રાપ્નોતિ । પ્રયોજનાભિધાનં વા । વિશિષ્ટયત્નાનામનાકસ્મિકત્વાત્ । અથવા પ્રયોજનં વક્તવ્યમ્-એવમર્થમહઙ્કારે સંજ્ઞાન્તરાભિધાનમિતિ । કસ્માત્ ? ન હિ વિશિષ્ટયત્નાનામાકસ્મિકત્વમુપપદ્યત ઇતિ ।
ઉચ્યતે- ન, કાર્યવિશેષહેતુત્વાત્ । મહદાદિલક્ષણાનાં હિ ગુણાનામનેકરૂપસ્તત્ત્વારમ્ભ ઇતિ હિ ન સંજ્ઞાન્તરમારભ્યતે । અહંકારસ્તુ સત્ત્વતમોબહુલયોરિન્દ્રિયતન્માત્રપર્વણોઃ પ્રકૃતિઃ તદર્થમાચાર્યાણાં યત્નવિશેષઃ । ધર્માદિવિશેષાભ્યુપામાન્મહતિ પ્રસંગ ઇતિ ચેત્ ન વિશેષિતત્વાત્ । તત્ત્વાન્તરારમ્ભ ઇતિ વિશેષિતમ્, ન તુ ધર્માદયસ્તત્ત્વાન્તરમતો ન મહતિ પ્રસંગઃ । વિશેષાનભિધાનાદયુક્તમિતિ ચેત્ સ્યાદેતત્, કઃ પુનરત્ર વિશેષો યેન ધર્માદિ ન તત્ત્વાન્તરમ્, તત્ત્વાન્તરં તુ શ્રોત્રાદીતિ ? એતચ્ચ નૈવમ્ કુતઃ ? વૃત્તિમાત્રે તદુપચારાત્ । વૃત્તિમાત્રે હિ મહતો ધર્માદ્યુપચારઃ । તથા ચ તન્ત્રાન્તરેઽપ્યુક્તમ् "પ્રકાશવૃત્તિર્ધર્મ" ઇતિ । વૃત્તિનિષ્પાદિતસ્તુ સંસ્થાનવિશેષો વૃત્તિમતસ્તત્ત્વાન્તરમિત્યનયોર્વિશેષઃ । તસ્માદ્યુક્તમેતત્ કાર્યવિશેષહેતુત્વમિતિ ॥ ૨૪॥

---

કારિકા ૨૫

---

આહ, યદ્યેવમિદં તર્હિ વક્તવ્યમુષ્ય કાર્યવિશેષસ્યૈવં સંજ્ઞકાદહંકારાત્પ્રવૃત્તિરિતિ ।
ઉચ્યતે-

॥ સાત્ત્વિક એકાદશકઃ પ્રવર્તતે વૈકૃતાદહઙ્કારાત્ ॥

સર્ગ ઇત્યનુવર્તતે । એકાદશેન્દ્રિયાણિ સત્ત્વબહુલાનિ વૈકૃતાદહંકારાત્પ્રવર્તન્તે નિષ્પદ્યન્ત ઇત્યર્થઃ । એકાદશાભિધાનાદેવ ચેન્દ્રિયપ્રતીતિઃ, પૂર્વસૂત્રે તત્સામાનાધિકરણ્યાત્ । અતો ન પુનરિન્દ્રિયગ્રહણમ્ ।
આહ, તન્માત્રસર્ગઃ પુનઃ કિંગુણઃ, કસ્માચ્ચાહઙ્કારાત્પ્રવર્તતે ઇતિ ?

ઉચ્યતે-

॥ ભૂતાદેસ્તાન્માત્રઃ સ તામસઃ ॥

ભૂતાદેર્ભૂતાદિસંજ્ઞકાત્તમઃપ્રધાનાત્તાન્માત્રઃ સર્ગઃ ।
તાન્માત્રસ્તુ તમોબહુલો ભૂતાદિસંજ્ઞકાદહઙ્કારાત્પ્રવર્તતે । તત્ર
પુનસ્તન્માત્રગ્રહણાત્સંખ્યા શસ્યત ઇતિ નોચ્યતે ।
આહ, પ્રકૃતિવિશેષનિર્દેશાનર્થક્યમ્ । પ્રાગુક્તં
સત્ત્વાદીનામહઙ્કારાવસ્થિતાનાં વૈકારિકાદ્યાઃ સંજ્ઞા ઉચ્યન્તે । તદ્યદિ
સત્ત્વં વૈકારિકશબ્દેનોચ્યતે વૈકારિકાણિ ચૈન્દ્રિય એકાદશકઃ સર્ગઃ
પ્રવર્તત ઇત્યુક્તે ગમ્યત એતત્ સાત્ત્વિકોઽસૌ, ભૂતાદેસ્તાન્માત્ર ઇત્યુક્તે
ગમ્યત એતત્ તામસ ઇતિ । કસ્માત્ ? ન હ્યસ્તિ સમ્ભવો યત્સત્ત્વાત્તમોબહુલઃ
સર્ગઃ સ્યાત્તમસશ્ચ સત્ત્વબહુલ ઇતિ ।
ઉચ્યતે- ન, અપ્રસિદ્ધત્વજ્ઞાપનાત્ । યસ્યૈવાર્થસ્ય જ્ઞાપનાર્થમેવમિહ
ક્રિયતે, કથં ગમ્યતે સત્ત્વં વૈકારિકશબ્દેનોચ્યતે, તમો ભૂતાદિશબ્દેન,
રજસ્તૈજસશબ્દેન ? અપ્રસિદ્ધાર્થા હિ તાન્ત્રિકી પરિભાષેયમનિર્ણીતા ન
ગમ્યત ઇતિ ।
આહ, તૈજસસંજ્ઞાનર્થક્યમિતિ ।
ઉચ્યતે ન,

॥ તૈજસાદુભયમ્ ॥ ૨૫ ॥

ઉભયત્ર તત્સામર્થ્યાત્ । સ્યાદેતદેવં યદ્યસ્ય કાર્યસામર્થ્યમેવ ન
સ્યાત્ । અસ્માત્તુ તૈજસાદુભયમપ્યેતત્તન્માત્રેન્દ્રિયસંજ્ઞકં પ્રવર્તત
ઇત્યનુવર્તતે । કથમ્ ? યદા હિ વૈકારિકોઽહઙ્કાર ઇન્દ્રિયભાવેન
પ્રવર્તતે તદા નિષ્ક્રિયત્વાત્તૈજસં પ્રવર્તકત્વેનાકાંક્ષતિ,
ભૂતાદિ ભેદકત્વેન । કસ્માત્ ? તેનૈવ તદ્ભેદાત્ । તદ્યથાઽગ્નિનાગ્નૌ
પ્રક્ષિપ્તોઽગ્નિરેવ ભવતિ, આપો વાઽપ્સુ પ્રક્ષિપ્તા આપ એવ ભવન્તિ,
એવં સત્ત્વમેવ સત્ત્વે તુ ભેદં જનયતિ ગુણાન્તરસંસર્ગમપેક્ષતે ।
ભૂતાદિલક્ષણસ્ય તુ તમસઃ સંસર્ગાદ્ ભિદ્યમાનં તૈજસેન
ચ રજસા ક્રિયાત્મકેનાનુગૃહીતમેકાદશેન્દ્રિયભાવમપેક્ષતે ।
તથા ભૂતાદિલક્ષણં તમોઽહઙ્કારાત્તન્માત્રભાવેન પ્રવર્તમાનં
પ્રવૃત્ત્યર્થં તૈજસમાકાંક્ષતિ, વૈકારિકં ભેદત્વેન । કસ્માત્
? તેનૈવ તસ્ય ભેદાદિતિ યોજ્યમ્ । શાસ્રં ચૈવમાહ- "તદેતસ્મિન્વૈકારિકે

સ્ત્રક્ષ્યમાણ એષ ભૂતાદિસ્તૈજસેનોપષ્ટબ્ધ એવં વૈકારિકમભિધાવતિ ।
તથૈવ તસ્મિન્ભૂતાદૌ સ્રક્ષ્યમાણે એષ ભૂતાદિસ્તૈજસેનોષ્ટબ્ધ
એતં ભૂતાદિમભિભવતિ ।" ઇત્યનેન ન્યાયેન તૈજસાદુભયનિષ્પત્તિરિતિ
વ્યાખ્યાતોઽહઙ્કારઃ ॥ ૨૫॥

---

કારિકા ૨૬

---

આહ, પ્રાગપદિષ્ટ ઐન્દ્રિય એકાદશકઃ પ્રવર્તતે વૈકૃતાદહંકારાદિતિ,
તત્સામાન્યાભિધાનાન્ન પ્રતિપદ્યામહે । તસ્માદ્વક્તવ્યં કાનીન્દ્રિયાણિ
ભવતોઽભિપ્રેતાનિ ?
ઉચ્યતે- દ્વિવિધાનીન્દ્રિયાણિ, બુધ્દીન્દ્રિયાણિ, કર્મેન્દ્રિયાણિ ચ । તત્ર

॥ બુધ્દીન્દ્રિયાણિ કર્ણત્વક્ચક્ષૂરસનનાસિકાખ્યાનિ ॥

કર્ણૌ ત્વક્ચક્ષુષી ચ રસનં ચ નાસિકા ચ કર્ણત્વક્ચક્ષૂરસનનાસિકાઃ ।
આખ્યાનમાખ્યા પ્રત્યાયનમિત્યર્થઃ । એતૈઃ શબ્દૈરાખ્યા યેષાં તાનીમાનિ
કર્ણત્વક્ચક્ષૂરસનનાસિકાખ્યાનિ । અધિષ્ઠાનભેદાદ્દ્વિવચનેન વિગ્રહઃ
ક્રિયતે । એતાનિ બુધ્દીન્દ્રિયાણિ પ્રત્યવગન્તવ્યાનિ । બુધ્દેરિન્દ્રિયાણિ
બુધ્દીન્દ્રિયાણિ ।
કિં પુનરેતાનિ બુધ્દેરિતિ ?
ઉચ્યતે- શબ્દાદિવિષયપ્રતિપત્તૌ દ્વારમ્ । કસ્માત્
? અબહિર્વૃત્તિત્વાત્ । અન્તઃકરણસ્ય નાસ્તિ બહિર્વૃત્તિરિત્યતો
નાલમેતત્સાક્ષાચ્છબ્દાદીનર્થાન્પ્રતિપત્તુમ્ । તસ્માચ્છ્રોત્રાદિલક્ષણં
સાક્ષાદ્ બાહ્યવિષયપ્રકાશનસમર્થં કારણાન્તરમપેક્ષતે । તત્પ્રણાલિકયા
તસ્ય વિષયગ્રહણમ્ । તસ્માદ્યુક્તમુક્તં બુધ્દેર્બાહ્યવિષયપ્રતિપત્તૌ
દ્વારભૂતત્વાદ્બુધ્દીન્દ્રિયાણીતિ ।
આહ, કર્મેન્દ્રિયાણિ પુનઃ કાનીતિ ?

॥ વાક્પાણિપાદપાયૂપસ્થાઃ કર્મેન્દ્રિયાણ્યાહુઃ ॥ ૨૬ ॥

વાક્ચ પાણી ચ પાદૌ પાયુશ્ચોપસ્થશ્ચ વાક્પાણિપાદપાયૂપસ્થાઃ । એતાનિ
કર્મેન્દ્રિયાણ્યાહુરાચક્ષતે । કર્માર્થાનીન્દ્રિયાણિ કર્મેન્દ્રિયાણિ । કિં પુનઃ
કર્મ ? વચનાદિ વક્ષ્યમાણમ્ । એતદ્વિકુર્વત્ ઇતિ કર્મેન્દ્રિયાણિ ।
આહ, કથમેતદુપલભ્યતે અધિષ્ઠાનાદર્થાન્તરભૂતાનીન્દ્રિયાણિ, ન

પુનરધિષ્ઠાનમાત્રમિતિ ?
ઉચ્યતે- અધિષ્ઠાનાદિન્દ્રિયપૃથક્ત્વમ્, શક્તિવિશેષોપલમ્ભાત્ ।
યથા શરીરાસમ્ભવિનો વિષયવ્યવસાયલક્ષણસ્ય
શક્તિવિશેષસ્યોપલમ્ભાદર્થાન્તરં બુદ્ધિરનુમીયતે,
એવમધિષ્ઠાનાસમ્ભવિનો વિષયગ્રહણલક્ષણસ્ય
શક્તિવિશેષસ્યોપલમ્ભાદર્થાન્તરમિન્દ્રિયમિતિ ।
આહ, ન, અસમ્ભવાસિદ્ધેઃ । અધિષ્ઠાનમાત્રસ્ય વિષયગ્રહણં ન સમ્ભવતિ,
અર્થાન્તરસ્ય ચ સમ્ભવતિ  ઇત્યેતદુભયમપિ ચાપ્રસિદ્ધમિતિ ।
ઉચ્યતે- નૈતદપ્રસિદ્ધમ્ । તુલ્યજાતીયેષુ તદનુપપત્તેઃ । યસ્માદ્
ભૌતિકેષ્વન્યેષુ ઘટાદિષુ વિષયગ્રહણસામર્થ્યાસમ્ભવઃ
આહંકારવિકારવત્તત્સામર્થ્યાપ્રતિષેધાન્નેન્દ્રિયાણાં
નસ્તત્પ્રતિષેધોઽનુમાતવ્ય ઇતિ । એતચ્ચાયુક્તમ્ । કસ્માત્ ? શક્તિભેદાપત્તેઃ ।
વૈકારિકં સત્ત્વમાહઙ્કારિકં પ્રકાશરૂપં, તચ્છક્તિવિશેષાદિન્દ્રિયાણિ
ઉત્પદ્યન્તે । ભૂતાદિલક્ષણસ્ય તમસઃ સામર્થ્યાત્ તન્માત્રાણિ પરસ્ય,
પૃથિવ્યાદીનામેકરૂપત્વાત્ । તસ્માદયમસમઃ સમાધિરિતિ । એતેન ભૌતિકત્વં
પ્રત્યુક્તમ્ ।
આહ, કથમવગમ્યતે બહૂનીન્દ્રિયાણિ, ન પુનરેકમેવેન્દ્રિયં
મનોવત્સર્વાર્થમનેકાધિષ્ઠાનં સ્યાદિતિ ?
ઉચ્યતે- ન, યુગપત્પ્રવૃત્ત્યપ્રવૃત્તિપ્રસંગાત્ । યદ્યેકમેવેન્દ્રિયં
મનોવત્સર્વાર્થમનેકાધિષ્ઠાનં સ્યાદેકવિષયપ્રતિપત્તૌ વા
સર્વવિષયપ્રતિપત્તિઃ । દૃષ્ટસ્તુ ગ્રહણભેદસ્તસ્માન્નૈકમિન્દ્રિયમિતિ ।
ભૌતિકૈરનુગ્રહોપઘાતદર્શનાદિન્દ્રિયાણાં
ભૌતિકત્વમિતિ ચેત્ સ્યાન્મતમ્, ઇહ ભૌતિકાનાં ઘટાદીનાં
ભૌતિકૈર્મૃદ્દણ્ડચક્રસૂત્રોદકમુદ્ગરાદિભિરનુગ્રહોપઘાતો
દૃષ્ટઃ । યદિ ચ ભૌતિકાનીન્દ્રિયાણિ ન સ્યુઃ નૈષાં
ભૌતિકૈરઞ્જનાદિભિરનુગ્રહઃ ક્રિયતે, ઉપઘાતશ્ચ
રજઃપ્રભૃતિભિરિતિ । એતચ્ચાયુક્તમ્ । કસ્માત્ ? અનેકાન્તાત્ । તદ્યથા
ભૌતિકૈર્વદનાદિભિરન્તઃકરણસ્ય ગ્રહણધારણસ્મૃતિલક્ષણોઽનુગ્રહઃ
ક્રિયતે, ઉપઘાતશ્ચોપલાદિભિઃ । ન ચાસ્ય ભૌતિકત્વમ્ । એવમિન્દ્રિયસ્યાપિ
સ્યાત્ । વૈશેષિકગુણવ્યઞ્જકત્વાદ્વિકારપ્રતીતિરિતિ ચેત્ અથ મતમ્-
પૃથિવ્યાદિવૈશેષિકો ગન્ધો ઘ્રાણેનાભિવ્યજ્યતે । ઔદકો રસે રસનેન
ચ । આગ્નેયં રૂપં વીક્ષણેન । વાયવીયઃ સ્પર્શસ્ત્વચા ।આકાશીયઃ શબ્દઃ

શ્રોત્રેણ । યેન ચ યસ્ય વૈશેષિકગુણાભિવ્યક્તિસ્તસ્ય તદ્વિકારત્વં દૃષ્ટમ્ । તદ્યથા પ્રદીપસ્ય રૂપાભિવ્યઞ્જકત્વે સતિ તૈજસત્વમિતિ । એતચ્ચાનુપપન્નમ્ । કસ્માત્ ? અનિષ્ટપ્રસંગાત્ । વૈશેષિકગુણવ્યઞ્જકાનાં તદ્વિકારમિચ્છતઃ પ્રાપ્તમપાં ગન્ધાભિવ્યક્તિહેતુત્વાત્ પાર્થિવત્ત્વમ્ । અથૈતદનિષ્ટં, ન તર્હ્યૈકાન્તિકો હેતુરિતિ । તત્ર યદુક્તં વૈશેષિકગુણાભિવ્યઞ્જકત્વાદ્ ભૌતિકાનીન્દ્રિયાણીતિ એતદયુક્તમ્ ॥ ૨૬॥

---

કારિકા ૨૭

---

આહ, એકાદશેન્દ્રિયાણિ અહઙ્કારાદુત્પદ્યન્ત ઇતિ પ્રાગપદિષ્ટમ્ । ઇદાનીં બુદ્ધીન્દ્રિયકર્મેન્દ્રિયાણિ દશાપદિશ્યન્તે । તદિદં પદાર્થન્યૂનમિતિ । ઉચ્યતે- સ્યાદેતદેવમ્, યદ્યેતાવદિન્દ્રિયપર્વ સ્યાત્ । કિં તર્હીતિ-

॥ સઙ્કલ્પકમત્ર મનઃ ॥

અત્રેન્દ્રિયપર્વણિ મનો ભવદ્ભિઃ પ્રત્યવગન્તવ્યમ્ । તત્ર સંકલ્પકમિતિ લક્ષણમાચક્ષ્મહે । સંકલ્પોઽભિલાષ ઇચ્છાતૃષ્ણેત્યાદ્યનર્થાન્તરમ્ । સંકલ્પયતીતિ સંકલ્પકમ્ । એતન્મનસો લક્ષણમ્ ।
તસ્માદસ્ય પ્રત્યક્ષતોઽનુપલભ્યમાનસ્યાસ્તિત્વમવસીયતે । કસ્માત્ ? વ્યસ્તસમસ્તાનામિન્દ્રિયાન્તરાણાં તદસમ્ભવાત્ । અપોહ્ય હિ મનઃ સંકલ્પં વ્યસ્તાનામિન્દ્રિયાન્તરાણાં ભવાન્પરિકલ્પયેત્ સમસ્તાનાં વા ? કિં ચાતઃ ? તન્ન તાવદ્વ્યસ્થાનામિન્દ્રિયાણાં સંકલ્પો ભવતિ । કિં કારણમ્ ? અનિયતવિષયત્વાત્ । નિયતો હિ શ્રોત્રાદીનાં શબ્દાદિર્વિષયઃ । અનિયતવિષયશ્ચ સંકલ્પઃ । કિંચ ત્રિકાલવિષયત્વાત્ । વર્તમાનવિષયા શ્રોત્રાદિવૃત્તિઃ ત્રિકાલવિષયશ્ચ સંકલ્પઃ । તસ્માન્ન વ્યસ્તાનાં નાપિ સમસ્તાનામ્ । બધિરાદિષુ તદભાવપ્રસંગાત્ । યદિ સમસ્તેન્દ્રિયવૃત્તિઃ સંકલ્પઃ સ્યાત્પ્રાણાદિવદિતિ ચેત્ સ્યાન્મતમ્, યથા સમસ્તેન્દ્રિયવૃત્તિઃ પ્રાણાદિઃ, ન ચાન્યતરવૈકલ્યે તદભાવઃ, એવં સમસ્તેન્દ્રિયવૃત્તિઃ સંકલ્પઃ સ્યાન્ન ચાન્યતરવૈકલ્યે તદભાવઃ સ્યાદિતિ । એતચ્ચાનુપપન્નમ્ । વિશેષિતત્વાત્ । નિર્વિષયા પ્રાણાદિવૃત્તિઃ । શબ્દાદિવિષયસ્તુ સંકલ્પ ઇતિ વિશેષિતમ્ । તસ્માદ્વ્યસ્તસમસ્તાનામિન્દ્રિયાણાં સંકલ્પાનુપપત્તેર્મનસો લિઙ્ગમેતદસ્તિત્વે ઇતિ સિદ્ધમ્ ।
આહ, તદવધારણીયમ્, ઇન્દ્રિયદ્વૈવિધ્યાત્ । દ્વિપ્રકારાણિ હીન્દ્રિયાણિ

પુરસ્તાદુપદિષ્ટાનિ । તત્ર મનોઽપ્યવધારણીયં કિં બુદ્ધીન્દ્રિયમથ કર્મેન્દ્રિયમિતિ ?
ઉચ્યતે-

॥ તચ્ચેન્દ્રિયમુભયથા સમાખ્યાતમ્ ॥

હ્યર્થે ચઃ પઠિતઃ । તદ્બુદ્ધીન્દ્રિયમુભયથેત્યર્થઃ । મનો ન કેવલં બુદ્ધીન્દ્રિયમપિ તુ કર્મેન્દ્રિયમપિ ।
નિયમહેત્વભાવાદયુક્તમિતિ ચેત્ સ્યાત્પુનરેતત્, કોઽત્ર નિયમહેતુઃ યદિન્દ્રિયત્વાવિશેષે મનસ એવોભયપ્રચારત્વમભ્યુપગમ્યતે, નાન્યેષામિતિ ?
ઉચ્યતે-

॥ અન્તસ્ત્રિકાલવિષયં તસ્માદુભયપ્રચારં તત્ ॥ ૨૭ ॥

ત્રિકાલવિષયત્વાત્ । ઇહ યસ્યાન્તસ્ત્રિષુ ચ કાલેષુ કરણસ્ય વૃત્તિસ્તદુભયપ્રચારમ્, તદ્યથા બુદ્ધિઃ । સાક્ષાત્ વિષયાનભિસન્ધાનાદતીતાનાગતવર્તમાનવિષયત્વાચ્ચ મનોઽન્તસ્ત્રિકાલવિષયમ્ । તસ્માદુભયપ્રચારં તદિતિ સિદ્ધમ્ ॥ ૨૭ ॥

॥ યુક્તિદીપિકાયાં સાંખ્યસપ્તતિપદ્ધતૌ ષષ્ઠમાહ્નિકમ્ ॥

---

કારિકા ૨૮

---

સમધિગતં કરણપર્વ । તસ્યેદાનીં વ્યસ્તસમસ્તવૃત્તયો વક્તવ્યાઃ । સતિ ચોભયાભિધાને વ્યસ્તવૃત્તિરેવ તાવદુચ્યતે, ન સમસ્તવૃત્તિઃ । કિં કારણમ્ ? પ્રકરણશેષભૂતત્વાત્ ।
શ્રોત્રાદીનાં હિ સદ્ભાવપ્રકરણમિદમનુક્રાન્તમ્ । સ ચૈષાં સદ્ભાવઃ શક્તિવિશેષોપાલમ્ભાદિત્યુક્તમ્ । ઇદાનીમસૌ શક્તિવિશેષોઽસ્માકં વ્યસ્તવૃત્તિરિત્યુચ્યતે । તસ્માત્તદનુક્રમણં કરિષ્યામઃ ।
આહ, યદ્યેવં તસ્માદુચ્યતાં તસ્ય કરણસ્ય કસ્મિન્નર્થે વૃત્તિઃ, કિં લક્ષણં વેતિ ?
ઉચ્યતે- યદુક્તં તસ્ય કસ્મિન્નર્થે વૃત્તિરિત્યત્ર બ્રૂમઃ

॥ રૂપાદિષુ પઞ્ચાનામાલોચનમાત્રમિષ્યતે વૃત્તિઃ ॥

રૂપાદિષુ શબ્દસ્પર્શરૂપરસગન્ધેષુ સ્વભેદભિન્નેષુ પઞ્ચાનાં

શ્રોત્રત્વક્ચ્ચક્ષુર્જિહ્વાઘ્રાણાનાં શ્રવણસ્પર્શનદર્શનરસનઘ્રાણલક્ષણો વ્યાપારો વૃત્તિરિત્યુચ્યતે । તત્ર કરણનિર્દેશે શ્રોત્રેન્દ્રિયસ્ય પ્રાક્પાઠાત્તદ્વિષયનિર્દેશાતિલંઘને પ્રયોજનં નાસ્તીતિ કૃત્વા શબ્દાદિષુ પઞ્ચાનામિત્યેવ પઠિતવ્યમ્ । પ્રાક્તનસ્તુ પ્રમાદપાઠઃ ।
યત્પુનરેતદુક્તં કિંલક્ષણેતિ અત્ર બ્રૂમઃ- આલોચનમાત્રમિષ્યતે । આલોચનં ગ્રહણમિત્યનર્થાન્તરમ્ । માત્રશબ્દો વિશેષનિવૃત્ત્યર્થઃ । તદ્યથા ભૈક્ષમાત્રમસ્મિન્ગ્રામે લભ્યત ઇત્યુક્તે નાન્યો વિશેષ ઇતિ જ્ઞાયતે । છન્દોમાત્રમધીતે માણવક ઇત્યુક્તે નાન્યદધીત ઇતિ । એવમાલોચનમાત્રમિન્દ્રિયાણામિષ્યતે વૃત્તિરિત્યુક્તે નાન્યો વિશેષ ઇતિ ગમ્યતે । તેન કિં સિદ્ધં ભવતિ ? યદુક્તમન્યૈરાચાર્યૈઃ સામાન્યજ્ઞાનમિન્દ્રિયાણાં વિશેષજ્ઞાનં બુદ્ધેરિતિ તત્પ્રતિષિદ્ધં ભવતિ ।
આહ, કઃ પુનરસ્મિન્દર્શને દોષો યત એતત્પ્રતિષિધ્યત ઇતિ ?
ઉચ્યતે- સામાન્યવિશેષયોરિતરેતરાપેક્ષત્વે સત્યેકસ્મિન્નવિરોધાદન્યતરપરિકલ્પનાનર્થક્યમ્ । યદિ ખલ્વિન્દ્રિયસ્ય સામાન્યજ્ઞાનં ન સ્યાત્તેન વિશેષાપેક્ષં સામાન્યં સામાન્યાપેક્ષશ્ચ વિશેષ ઇતિ યત્ર સામાન્યજ્ઞાનં તત્ર વિશેષજ્ઞાનમપિ ન પ્રતિષિધ્યત ઇત્યુભયમપીન્દ્રિયસ્ય સ્યાત્ । તતશ્ચાન્તઃકરણપરિકલ્પનાનર્થક્યમ્ । વિશેષવતો વાન્તઃકરણસ્ય કઃ સામાન્યેન વિરોધ ઇત્યુભયસ્યાપિ તત્ર સમ્ભવાદિન્દ્રિયાનર્થક્યમ્ । તસ્માદપ્રત્યયમિન્દ્રિયમિતિ । ઇન્દ્રિયસ્ય ચેત્પ્રત્યયઃ સ્યાદ્યથા પ્રત્યયવતોઽન્તઃકરણસ્યાનિયતવિષયત્વમ્, એવમસ્યાપિ સ્યાત્ ન તુ તદસ્તિ । તસ્માદપ્રત્યયમિન્દ્રિયમિતિ । કિંચ કાલાતિવૃત્તિપ્રસંગાત્ । ઇન્દ્રિયસ્ય ચેત્પ્રત્યયઃ સ્યાદ્યથા પ્રત્યયવતોઽન્તઃકરણસ્ય ત્રિકાલવિષયત્વમેવમસ્યાપિ સ્યાત્ । ન તુ તદસ્તિ । તસ્માદપ્રત્યયમિન્દ્રિયમિતિ । કિં ચાન્યત્ સ્મૃત્યદર્શનાત્ । ઇન્દ્રિયસ્ય ચેત્પ્રત્યયઃ સ્યાદ્યથા પ્રત્યયવતોઽન્તઃકરણસ્યાદિરૂપોપપત્તિરેવમત્રાપિ સ્યાત્ । ન તુ તદસ્તિ । તસ્માદપ્રત્યયમિન્દ્રિયં સિદ્ધમિતિ ।
ઉચ્યતે- ન કારણાન્તરપ્રસંગાત્ । યદિ પ્રદીપવદિન્દ્રિયં પ્રકાશકં સ્યાત્તેન યથા તત્પ્રકાશિતેષુ ઘટાદિષ્વર્થેષુ કરણાન્તરમાર્ગણમેવમત્રાપિ સ્યાત્ । ન ચૈતદિષ્ટમ્ । અતો ન પ્રદીપવદિન્દ્રિયં પ્રકાશકમિતિ । અન્તઃકરણસદ્ભાવાદયુક્તમિતિ ચેત્ સ્યાન્મતમ્- અસ્તિ કારણાન્તરં બુદ્ધિલક્ષણં યદિન્દ્રિયેણ પ્રદીપવત્પ્રકાશિતમર્થં ગૃહ્ણાતિ । તસ્માત્પરવાદાનુવાદોઽયં

ક્રિયતે, ન પ્રતિષેધ ઇતિ । તચ્ચ નૈવમ્ । કસ્માત્
? પ્રદીપેન્દ્રિયયોરન્યતરાનુપાદાનપ્રસંગાત્ । ઇન્દ્રિયમપિ પ્રકાશકમ્,
પ્રદીપોઽપિ । તત્રાન્યતરસ્યાનુપાદાનં પ્રસક્તમ્ । કસ્માત્ ? ન હ્યેકાર્થકારિણો
યુગપત્કરણે સામર્થ્યમસ્તીતિ । કિં ચાન્યત્ । અન્તઃકરણહાનેઃ ।
ઇન્દ્રિયેણ પ્રદીપવત્પ્રકાશિતાન્બાહ્યાનર્થાન્સાક્ષાદન્તઃકરણં ગૃહ્ણાતીતિ
વદતોઽન્તઃકરણમેવ હીયતે । તસ્માદયુક્તમન્તઃકરણસ્ય સામર્થ્યમ્ ।
પુરુષસ્યેતિ ચેન્ન કરણાનર્થક્યપ્રસંગાત્ । સાક્ષાદ્વિષયગ્રહણસમર્થં
પુરુષમિચ્છતઃ કરણાનર્થક્યં પ્રસજ્યતે । તસ્માદ્યુક્તમેતત્
ગ્રાહકમિન્દ્રિયં ન તુ પ્રદીપવત્પ્રકાશકમિતિ ।
આહ, ભવતુ તાવદ્ ગ્રહણમાત્રમિન્દ્રિયવૃત્તિરપ્રત્યયા ।
ગ્રહણપ્રત્યયપ્રકાશાભેદઃ ?
ઉચ્યતે- વિષયસમ્પર્કાત્તાદ્રૂપ્યાપત્તિરિન્દ્રિયવૃત્તિગ્રહણં, તથા
વિષયેન્દ્રિયવૃત્ત્યનુકારેણ નિશ્ચયો ગૌરયં શુક્લો ધાવતીત્યેવમાદિઃ
પ્રત્યયઃ । તથા વિષયસમ્પર્કાગમે શ્રોત્રાદિવૃત્તેઃ તાદ્રૂપ્યાગમો
વર્તમાનકાલતા, ગ્રહણસ્યાનુભવાત્તુ સંસ્કારાધાનં તત્પૂર્વિકા ચ
સ્મૃતિરિતિ ત્રિકાલવિષયા પ્રત્યયસ્યેત્યયમનયોર્વિશેષઃ । બાહ્યસ્તુ
પ્રકાશો ન વિષયરૂપાપન્નઃ । સંસ્કારાત્તુ ઘટાદીનાં વ્યવધાનરૂપં
પાર્થિવં છાયાલક્ષણં વ્યઞ્જકત્વાય કલ્પતે, ચક્ષુષોઽનુગ્રહાય ।
ઉભયોર્વા ચક્ષુર્વિષયયોરિત્યપરે । તસ્માદુપપન્નમેતત્ પ્રકાશકં
પ્રદીપાદિ, ગ્રાહકં શ્રોત્રાદિ, વ્યવસાયકમન્તઃકરણમિતિ ।
અથ કર્મેન્દ્રિયાણાં કા વૃત્તિરિત્યુચ્યતે- નૈયાયિકાસ્ત્વેવમાહુઃ-
ઘ્રાણરસનચક્ષુસ્ત્વક્શ્રોત્રાણીન્દ્રિયાણિ ભૂતેભ્યઃ । ભૂતેભ્ય ઇત્યનેન
સ્વવિષયોપલબ્ધિલક્ષણં હીન્દ્રિયાણાં ભૂતપ્રકૃતિત્વે સતિ નિર્વહતિ
(?) નાન્યથા । તાનિ પુનરિન્દ્રિયકારણાનિ પૃથિવ્યપ્તેજોવાયુરાકાશમિતિ
ભૂતાનિ । એભ્યઃ પઞ્ચભ્યો યથાસંખ્યં ઘ્રાણરસનચક્ષુસ્ત્વક્શ્રોત્રાણિ
પઞ્ચેન્દ્રિયાણિ ભવન્તિ । ભૂતપ્રકૃતિત્વમિતિ ભૂતસ્વભાવં વ્યાખ્યાયમાનં
પઞ્ચસ્વપિ સમ્ભવતિ । ભૂતકારણત્વં ત્વન્યેષુ ચતુર્ષુ તથૈવ ।
શ્રોત્રે તુ કથંચિત્કર્ણશષ્કુલ્યવચ્છિન્નનભોભાગાભિપ્રાયેણ વ્યવહારતઃ
સમર્થનીયમ્ । એવં ભૌતિકાનીન્દ્રિયાણિ સ્વસ્વવિષયમધિગન્તુમુત્સહન્ત
ઇતિ તલ્લક્ષણત્વમેષાં સિધ્યતીતિ, અતો ભૂતેભ્ય ઇત્યુક્તમ્ । એતત્તુ
સાંખ્યાચાર્યાણાં નેષ્ટમ્ । એવં હિ સાંખ્યવૃદ્ધા આહુઃ- આહઙ્કારિકાણીન્દ્રિયાણિ
અર્થં સાધયિતુમર્હન્તિ નાન્યથા । તથા હિ કારકં કારકત્વાદેવ પ્રાપ્યકારિ

ભવતિ । ભૌતિકાનિ ચેન્દ્રિયાણિ કથં પ્રાપ્યકારીણિ દુરવર્તિનિ વિષયે
ભવેયુઃ ? આહંકારિકાણાં તુ તેષાં વ્યાપકત્વાત્ । વિષયાકારપરિણામાત્મિકા
વૃત્તિર્વૃત્તિમતોऽનન્યા સતી સમ્ભવત્યેવેતિ સુવચં પ્રાપ્યકારિત્વમ્
અપિ ચ મહદણુગુણગ્રહણમાહઙ્કારિત્વે તેષાં કલ્પતે, ન ભૌતિકત્વે ।
ભૌતિકત્વે હિ યત્પરિમાણં કરણં તત્પરિમાણં ગ્રાહ્યં ગૃહ્ણીયાત્ ।
આહ, અથ કર્મેન્દ્રિયાણાં કા વૃત્તિરિતિ ?
ઉચ્યતે-

॥ વચનાદાનવિહરણોત્સર્ગાનન્દાશ્ચ પઞ્ચાનામ્ ॥ ૨૮ ॥

વાક્પાણિપાદપાયૂપસ્થાનાં તુ વચનાદાનવિહરણોત્સર્ગાનન્દલક્ષણા
યથાક્રમં વૃત્તયઃ પ્રત્યવગન્તવ્યાઃ । તત્રોચ્યતેऽનેનેતિ
વચનમ્ । તસ્માદ્ય એવાર્થપ્રત્યાયનસમર્થો વર્ણસમુદાયઃ
પદવાક્યશ્લોકગ્રન્થલક્ષણઃ સ વાગિન્દ્રિયસ્યાર્થો નાન્યઃ ।
આદીયતેऽનેનેત્યાદાનમ્ । આઙભિવિધ્યર્થે પ્રયુજ્યતે । તતશ્ચ યદેવ
પ્રક્ષાલનપરિમાર્જનોપસ્પર્શનાધ્યયનપ્રહરણશિલ્પવ્યાયામાદિ કૃત્સ્નં
ગ્રહણં સ ઇન્દ્રિયાર્થો નાન્યઃ । વિશિષ્ટં હરણં વિહરણમ્ । અતશ્ચ
યદેવ સમવિષમનિમ્નોન્નતચઙ્ક્રમણપરિવર્તનનાટ્યવ્યાયામાદિઃ
સ ઇન્દ્રિયાર્થો નાન્યઃ । એવમુત્કૃષ્ટઃ સર્ગ ઉત્સર્ગઃ । નાન્યઃ ।
અતશ્ચ ય એવાશિતપીતવિપરિણામસ્ય સમ્યક્સ્રોતોમાર્ગાનુસારિણો વિસર્ગઃ
સ ઇન્દ્રિયાર્થો નાન્યઃ । એવમભિવ્યાપ્યાનન્દમાનન્દઃ । તતશ્ચ ય
એવાસાધારણપ્રીતિનયનાભિનિષ્પત્તિલક્ષણઃ સ ઇન્દ્રિયાર્થો નાન્યઃ ॥ ૨૮॥

---

કારિકા ૨૯

---

આહ, પ્રાગન્તઃકરણવૃત્તિનિર્દેશઃ, સર્ગક્રમાનુગમાત્પૂર્વં
બુદ્ધ્યહંકારમનસાં વૃત્તિનિર્દેશઃ કર્તવ્યઃ । કિં કારણમ્ ? એવં હિ
સર્ગક્રમોऽનુગતો ભવતિ । ક્રમભેદે વા પ્રયોજનં વક્તવ્યમિતિ ।
ઉચ્યતે- ન, ઇન્દ્રિયવૃત્તિપૂર્વકત્વાત્ । અન્તઃકરણસ્ય હિ
ઇન્દ્રિયવૃત્તિપ્રવર્તકઃ પ્રત્યયઃ । તથા ચ વક્ષ્યતિ- દૃષ્ટે
તથાऽપ્યદૃષ્ટે ત્રયસ્ય તત્પૂર્વિકા વૃત્તિરિતિ (kA0 30) ।
તસ્માત્સર્ગક્રમેણ વિના તન્નિર્દેશઃ પ્રાગાચાર્યેણ ક્રિયતે ઇતિ ।
આહ, તદસમ્ભવઃ, શાસ્ત્રે પ્રાગભિમાનાભિધાનાત્ । શાસ્ત્રં હ્યેવમાહ- કા નુ

ભોઃ સંજ્ઞા માતુરુદરેઽવસ્થિતં કુમારં પ્રત્યભિનિર્વિશત ઇતિ ? અસ્મીત્યેષા માહાત્મી સંવિદિતિ । તથા કાર્યકારણવ્યૂહસમકાલં માહાત્મ્યશરીરોઽસ્મીતિ પ્રતિબુદ્ધ્યતે । પ્રવૃત્તાશ્ચૈવ હ્યવ્યક્તા ભવન્ત્યસ્મીત્યસ્મિતામાત્રાઃ । પ્રમાણં ચ શાસ્ત્રમ્ । તસ્માત્પ્રાગન્તઃકરણનિર્દેશઃ કર્તવ્યઃ ।
ઉચ્યતે- તન્નિમિત્તાર્થેન વિવક્ષિતત્વાત્ । સત્યમેતત્ કાર્યકારણવ્યૂહનિષ્પત્તિસમકાલમસ્મીત્યેષા માહાત્મી સંવિત્ પ્રત્યુપધીયતે । શબ્દાદિવિષયસ્ત્વન્તઃકરણપ્રત્યયઃ શ્રોત્રાદિનિમિત્ત ઇતિ । એતત્પૂર્વશબ્દેન વિવક્ષિતમ્ । ન ચ નિમિત્તમતિક્રમ્ય નૈમિત્તિકાભિધાનં ન્યાય્યમ્ ।
અથવા નૈવ વયમિદં પ્રષ્ટવ્યા યથા પ્રાગન્તઃકરણવૃત્તિનિર્દેશઃ કર્તવ્ય ઇતિ । કિં કારણમ્ ? યસ્માત્

॥ સ્વાલક્ષણ્યં વૃત્તિસ્ત્રયસ્ય ॥

સ્વલક્ષણમેવ સ્વાલક્ષણ્યમ્ । સ્વાર્થે તદ્ધિતવૃત્તિઃ, અન્યભાવસ્તુ કાલશબ્દવ્યવાયાદિતિ । યથા બુદ્ધ્યહંકારમનસાં હિ સૌક્ષ્મ્યાન્ન શક્યં સ્વરૂપમભિધાતુમિત્યતો વૃત્તિરેવ લક્ષણભાવેનોપદિશ્યતે । શ્રોત્રાદીનામપિ ચ સૌક્ષ્મ્યાલ્લક્ષણમપદેષ્ટુમશક્યમિતિ વૃત્તિરેવોચ્યતે, ન લક્ષણમ્ । તદેવ ચૈષા લક્ષણં ભવતિ । યચ્છબ્દાલોચનસમર્થં તચ્છ્રોત્રમ્ । એવમિતરેષ્વપિ વક્તવ્યમ્ । બુદ્ધ્યહંકારમનસાં ચ લક્ષણમધ્યવસાયાદ્યુક્તમ્ । તદેવ વૃત્તિત્વેનાચક્ષાણઃ શ્રોત્રાદીનામેવ ચાભિદધાનં લક્ષણં ચાપ્યાચક્ષાણો વૃત્તિવૃત્તિમતોરનન્યત્વં જ્ઞાપયતિ । અન્યથા તુ યથાઽધ્યવસાયાદિ લક્ષણમેવં રૂપાદિષુ પઞ્ચાનામલોચનમાત્રં લક્ષણમિત્યુચ્યતે, ન તુ વૃત્તિરિતિ । શ્રોત્રાદિવદ્ બુદ્ધ્યાદીનામપિ વ્યવસાયાદયો વૃત્તિરિત્યુચ્યતે, ન તુ લક્ષણમ્ । તસ્માદન્યથા નિર્દેશો જ્ઞાપકં વૃત્તિવૃત્તિમતોરન્યત્વસ્યેતિ વ્યાખ્યાતા કરણવૃત્તિઃ ।

॥ સૈષા ભવત્યસામાન્યા ॥

સેતિ પૂર્વકૃતાં વૃત્તિમભિસમ્બધ્નાતિ । એષેતિ સર્વનામ્ના પ્રત્યાકૃષ્ટાં તામેવ પ્રત્યક્ષં પ્રતિ નિર્દિશતિ । ભવતીતિ વક્ષ્યમાણેન ધર્માન્તરેણાસ્યાસ્તદ્વત્તાનુભાવિતં ખ્યાપયતિ । અસામાન્યેતિ ધર્મમાચષ્ટે । સામાન્યા સાધારણેત્યર્થઃ । ન સામાન્યાઽસામાન્યા । પ્રતિકરણં નિયતેત્યુક્તં ભવતિ । યા હીયમનુક્રાન્તા કરણપર્વણોઽધ્યવસયાદિકા વૃત્તિરિયં

વ્યસ્તાનાં કરણાનાં પ્રતિસ્વં નિયતા । તતશ્ચૈષાં બુદ્ધ્યાદીનાં
કાર્યવિશેષનિમિત્તભાવસંસૂચિતસ્ય સ્વરૂપસ્યાસંકરઃ સિદ્ધઃ ।
આહ, સામાન્યવિશેષયોરિતરેતરાપેક્ષત્વાદસામાન્યાભિધાનેન
સામાન્યસ્યાપ્યભિધાનાદધ્યવસાયાદિકા કરણાનામસામાન્યા
વૃત્તિરિત્યુક્તેઽર્થાદાપન્નમેષાં સામાન્યાઽપિ વૃત્તિરસ્તીતિ । તસ્માદસાવપિ
વક્તવ્યેતિ ।
ઉચ્યતે-

॥ સામાન્યકરણવૃત્તિઃ પ્રાણાદ્યા વાયવઃ પઞ્ચ ॥ ૨૯ ॥

સામાન્યા ચાસૌ કરણવૃત્તિઃ સામાન્યકરણવૃત્તિઃ । પ્રાણશ્ચાદ્યો યેષાં
તે પ્રાણાદ્યાઃ, પ્રાણાપાનસમાનોદાનવ્યાનાઃ પઞ્ચ સમસ્તકરણવૃત્તિઃ
પ્રત્યવગન્તવ્યેતિ । તૈઃ સર્વૈઃ સહિતઃ પ્રાણ ઇતિ વેદાન્તેષ્વપિ ।
આહ, અયુક્તમેતત્ । કસ્માત્ ? ધર્મિણો ધર્મ્યન્તરવૃત્તિભાવાનુપપત્તેઃ ।
વૃત્તિરિત્યયં શબ્દો વ્યાપારમાચષ્ટે । ન ચ ધર્માન્તરં ધર્માન્તરસ્ય
વ્યાપારો ભવિતુમર્હતીતિ ।
ઉચ્યતે- ન કાર્યે કારણોપચારાત્ । સત્યમેતત્ । ધર્મી ધર્મ્યન્તરસ્ય
વૃત્તિત્વેનાશક્યઃ પરિકલ્પયિતુમ્ । કિં તુ સામાન્યકરણવૃત્ત્યા પ્રેર્યમાણો
વાયુસ્તત્પ્રવણત્વાત્તત્કાર્યતાં પ્રતિપદ્યતે । તત્ર પ્રાણાદિકાર્યે વાયૌ
પ્રાણોપચારં કૃત્વા એવમુચ્યતે- પ્રાણાદ્યા વાયવઃ પઞ્ચ ।
તત્પ્રેરણાસિદ્ધેરયુક્તમિતિ ચેત્ સ્યાદેતત્,
કથમેતદવગમ્યતેઽર્થાન્તરપ્રેરિતસ્ય વાયોરિયં ક્રિયા ભવતિ ન પુનઃ
સ્વતન્ત્રસ્યેતિ ?
ઉચ્યતે- ન સ્વતઃ, તદ્વ્યતિરિક્તત્વાનુપપત્તેઃ । ઇહેયમકસ્માદ્ભિન્ના
ક્રિયાવાયોઃ સ્વતો વા સ્યાત્, કરણવૃત્તિવ્યતિરિક્તત્વાદ્વા । કિં ચાતઃ
? તત્ર તાવત્સ્વત ઉપપદ્યતે । કસ્માત્ ? સર્વત્ર પ્રસંગાત્ સ્વાભાવિકે
હિ વાયોર્દિક્સંચારેઽભ્યુપગમ્યમાને સર્વત્ર તત્સંભવઃ સ્યાત્ ।
તતશ્ચ તિર્યક્પાતાદિવૃત્તિર્હન્યેત, ન ચાન્યતઃ । કસ્માત્ ? અદર્શનાત્ ।
ન હિ પૃથિવ્યાદીનાં વાયુપ્રેરણસામર્થ્યં ક્વચિદુપલબ્ધમ્ ।
ભસ્ત્રાદિષુ દૃષ્ટમિતિ ચેન્ન, અન્યનિમિત્તત્વાત્ । અત્રાપિ ચૈત્રવ્યાપાર
ઉપલભ્યતે ઇત્યવશ્યમન્યન્નિમિત્તમુપલભ્યતે ઇત્યભ્યુપગન્તવ્યમ્ ।
આત્મેતિ ચેન્ન, ક્રિયાપ્રતિષેધાત્ । ઉપપાદિતમેતત્પૂર્વમાત્મા નિષ્ક્રિય
ઇતિ । ન ચ નિષ્ક્રિયસ્ય પ્રેરણમુપપદ્યતે । ન ચ નિર્નિમિત્તા

સ્વભાવભેદાનામનાકસ્મિકત્વાત્ । તસ્માદ્યત્તન્નિમિત્તં સા સમસ્તકરણવૃત્તિઃ
।
સ ચાયં વાયુરેક એવ સ્થાનસંચારવિશેષાન્નાનાખ્યો ભવતિ ।
યથૈકો દેવદત્તઃ પાચકો લાવક ઇતિ ક્વચિત્ । તદયુક્તમ્ । કસ્માત્
? યુગપત્પરસ્પરાતિશયવિરોધાત્ । પૂર્વસ્માત્પૂર્વસ્માદુત્તર ઉત્તરો
વાયુર્બલીયાનિતિ હ્યભ્યુપગમઃ । તદેતદેકસ્યૈકસ્મિન્કાલે નોપપદ્યતે ।
તસ્માદુપપન્નં પ્રાણાદ્યા વાયવઃ પઞ્ચ ।
કિં પુનરેષાં પ્રાણાદીનાં લક્ષણમિતિ ?
ઉચ્યતે- દ્વિવિધાઃ પ્રાણાદયઃ । અન્તર્વૃત્તયો બહિર્વૃત્તયશ્ચ । તત્ર
મુખનાસિકાભ્યાં પ્રગમનાત્પ્રણતેશ્ચ પ્રાણઃ । યોઽયં મુખનાસિકાભ્યાં
સઞ્ચરતિ સોઽન્તર્વૃત્તિર્વાયુઃ પ્રાણ ઇત્યભિધીયતે । યા કાચિત્પ્રણતિર્નામ
ભૂતેષુ તદ્યથા પ્રણતેયં સેના, પ્રણતોઽયં વૃક્ષઃ, પ્રણતોઽયં
ધર્મે, પ્રણતોઽયમર્થે, પ્રણતોઽયં કામે, પ્રણતોઽયં વિદ્યાયામ્ ।
તદ્વિપરીતેષુ વા બાહ્યપ્રાણવૃત્તિરેષા । પ્રાણિવિષય એવૈષા ભવતિ ।
સ ખલ્વયમત્રાભિવ્યક્તો ભવતિ । તદ્યથા મહતા વા દુઃખેનાભિપ્લુતસ્ય
મહતા વા બન્ધુના વિયુક્તસ્ય, સહિતસ્ય વા સૌરભેયસ્ય, નિપાનાવતીર્ણસ્ય
વા મહિષસ્યાવગતેઃ ।
અપક્રમણાચ્ચાપાનઃ । યોઽયં રસં ધાતૂન્ શુક્રં મૂત્રં પુરીષં
વાતાર્તવગર્ભાંશ્ચાકર્ષન્નધોગચ્છન્નયમન્તર્વૃત્તિર્વાયુરપાન
ઇત્યભિધીયતે । યચ્ચાપિ કિંચિદપક્રમણં નામ ભૂતેષુ તદ્યથા
અપક્રાન્તોઽયં ધર્માદિભ્યસ્તદ્વિપરીતેભ્યો વા ઇતિ બાહ્યા ખલ્વપાનવૃત્તિરેષા ।
અપાનવિષય એવૈષ ભવતિ । બલવત્તરશ્ચાયં પ્રાણોદ્વાયોઃ કસ્માત્
? એષા હ્યેતં પ્રાણમૂર્ધ્વં વર્તમાનમર્વાગેવ સન્નિયચ્છતિ અર્વાગેવ
સન્નિરુણદ્ધિ । એષોઽત્રાભિવ્યક્તો ભવતિ । તદ્યથા ઉપકૂપમુપશ્વભ્રં
વા પરિવર્તમાનસ્યા..શતપદીં લઙ્ઘયતઃ ।
હૃદ્યવસ્થાનાત્સહ ભાવાચ્ચ સમાનઃ । યસ્ત્વયં પ્રાણાપાનયોર્મધ્યે
હૃદ્યવતિષ્ઠતે સ સમાનો વાયુરન્તર્વૃત્તિઃ યશ્ચાપિ કશ્ચિત્સહ
ભાવો નામ ભૂતેષુ દ્વન્દ્વારામતા । તદ્યથા સહ દાસ્યે, સહ યક્ષ્યે, સહ
તપશ્ચરિષ્યામિ સહ ભાર્યાપુત્રૈર્બન્ધુભિઃ સુહૃદ્ભિશ્ચ વર્તિષ્ય
બાહ્યા સમાનવૃત્તિરેષા । સમાનવિષય એવૈષ ભવતિ ઇતિ । બલવત્તરઃ
ખલ્વયં પ્રાણાપાનાભ્યામ્ । એષ હ્યેતૌ પ્રાણાપાનૌ ઊર્ધ્વમર્વાક્ચ વર્તમાનૌ
મધ્ય એવ સન્નિયચ્છતિ, મધ્ય એવ સન્નિરુણદ્ધિ, સ ચૈષૌઽત્રાભિવ્યક્તો

ભવતિ । તદ્યથા સ્રુતસારસ્ય વા સારમેયસ્ય, અનડુહો વોઢભારસ્ય,
ધર્માભિતપ્તાયા વા એડકાયા અર્ધાર્ધકાયં શકશકેતિ । પ્રાણાન્તે
સર્વપ્રાણિનાં પ્રાણાપાનાવુત્સૃજ્યોર્ધ્વમધશ્ચ મુક્તયોક્ત્રૌ હયાવિવ
વિષમં સંચારયન્ શરીરં સ પરાસ્યતિ ।
મૂર્ધારોહણદાત્મોત્કર્ષણાચ્ચોદાનઃ । યસ્ત્વયં પ્રાણાપાનસમાનાનાં
સ્થાનાન્યતિક્રમ્ય રસં ધાતૂંશ્ચાદાય મૂર્ધાનમારોહતિ તતશ્ચ પ્રતિહતો
નિવૃત્તઃ સ્થાનકરણાનુપ્રદાનવિશેષાદ્વર્ણપદવાક્યશ્લોકગ્રન્થલક્ષણસ્ય
શબ્દસ્યાભિવ્યક્તિનિમિત્તં ભવતિ અયમન્તર્વૃત્તિર્વાયુરુદાન ઇત્યુચ્યતે ।
યશ્ચાપિ કશ્ચિદાત્મોત્કર્ષો નામ ભૂતેષુ તદ્યથા હીનાદસ્મિ શ્રેયાન્,
સદૃશેન વા સદૃશઃ, સદૃશાદસ્મિ શ્રેયાન્, શ્રેયસા વા સદૃશઃ,
શ્રેયસો વા શ્રેયાન્ । એતસ્મિંસ્તથા રૂપાભિમાનો વા પ્રાપ્તવિદ્યસ્તુ । તદ્યથા
બહ્વન્તરવિશેષાદલ્પાન્તરવિશેષોઽસ્મ્યગુણવતો વા ગુણવાનસ્મીતિ
બાહ્યોદાનવૃત્તિરેષા । ઉદાનવિષય એવૈષ ભવતિ । બલવત્તરઃ
ખલ્વયં પૂર્વભ્યઃ । કથમ્ ? એષ હ્યેતાન્પ્રાણાદીનૂર્ધ્વમવાઙ્મધ્યે ચ
વર્તમાનાનૂર્ધ્વમેવોન્નયતિ, ઊર્ધ્વમેવોત્કર્ષતિ । સ ચૈષોઽત્રાભિવ્યક્તો
ભવતિ શીતોદકેન વા પર્યુક્ષિતસ્ય પ્રાસમસિં વિકોશં
ચોદ્યતમભિપશ્યતઃ ।
શરીરવ્યાપ્તેરત્યન્તાવિનાભાવાચ્ચ વ્યાનઃ । યસ્ત્વયમાલોમનખાચ્છરીરં
વ્યાપ્ય રસાદીનાં ધાતૂનાં પૃથિવ્યાદિનાં વ્યૂહં મર્મણાં ચ
પ્રસ્પન્દનં પ્રાણાદીનાં ચ સ્થિતિં કરોતિ સોઽન્તર્વૃત્તિર્વ્યાનઃ ।
યશ્ચાપિ કશ્ચિદત્યન્તાવિનાભાવો નામ ભૂતેષુ તદ્યથા પતિવ્રતા
ભર્તારં મૃતમપ્યનુગચ્છતિ ભવાન્તરેઽપ્યયમેવ ભર્તા સ્યાત્ તથા
ધર્માદિભિસ્તદ્વિપરીતૈશ્ચેતિ બાહ્યો વ્યાનવિષય એવૈષ પ્રભવતિ ।
બલવત્તમશ્ચાયં સર્વેભ્યઃ । કથમ્ ? અનેન હિ વ્યાપ્તે શરીરદણ્ડકે
તદ્વશીકૃતાનાં પ્રાણાદીનાં સમા સ્થિતિર્ભવતિ । સ એષોઽન્તકાલે
પ્રાણભૃતામવિનાભાવેન વર્તમાનોઽભિવ્યજ્યતે । તદ્યથા હા તર્હિ
પાદૌ હૈમૌ શીતીભૂતૌ ગુલ્ફે જઙ્ઘે ઉરૂ કટિરુદરમુરઃકણ્ઠેઽસ્ય
ખુરઘુરો વર્તતે હૂ(?) ઇત્યવૈષો બાહ્યો વ્યાન ઇતિ । એવમેતે પ્રાણાદ્યાઃ
સ્થાનકાર્યવિશેષસૂચિતાઃ પઞ્ચ વાયવો વ્યાખ્યાતાઃ તેષાં પ્રેરિકા
સામાન્યકરણવૃત્તિઃ ।
એષા ચ તન્ત્રાન્તરેષુ પ્રયત્ન ઇત્યુચ્યતે । સ ચ
ધર્માદિસંસ્કારભાવનાવશાદનુપરતો જીવનમ્ । આહ ચ

વૃત્તિરન્તઃ સમસ્તાનાં કરણાનાં પ્રદીપવત્ ।
અપ્રકાશા ક્રિયારૂપા જીવનં કાયધારિકા ॥

સા યાવદનિરુદ્ધા તુ હન્તિ વાયું રજોઽધિકા ।
ધર્માધનાવૃત્તિવશાત્તાવજ્જીવતિ માનવઃ ॥

અત્ર ચ સામાન્યકરણવૃત્તિગ્રહણસામર્થ્યાત્પ્રાણાદ્યાઃ પઞ્ચ વાયવઃ ।
બુદ્ધીન્દ્રિયાણિ ષષ્ઠમ્ । કર્મેન્દ્રિયાણિ સપ્તમમ્ । પૂરષ્ટમમ્ ।
પૂરિત્યહંકારાવસ્થાસંવિધમધિકુરુતે । યસ્માદાહ- તત્ર
સંવિદહંકારગતં કાર્યં કારણં પૂરયતિ યસ્માત્ ।
તસ્માત્પૂરિત્યુક્તા પ્રત્યવભાસાષ્ટમં ભોક્તુઃ ॥

સા ચાહઙ્કારગતા સંવિદ્ બુદ્ધિગતૈવ પુરુષેણોપલભ્યતે ।
યસ્માદ્વક્ષ્યતિ-
એતે પ્રદીપકલ્પાઃ પરસ્પરવિલક્ષણા ગુણવિશેષાઃ ।
કૃત્સ્નં પુરુષસ્યાર્થં પ્રકાશ્ય બુદ્ધૌ પ્રયચ્છન્તિ ॥ (kA0 36)
સર્વપ્રત્યુપભોગં યસ્માત્પુરુષસ્ય સાધયતિ બુદ્ધિઃ ॥ (kA0 37)
તસ્માત્સૈવ પૂરિતિ । શાસ્ત્રં ચૈવમાહ- પ્રાણાપાનસમાનોદાનવ્યાનાઃ
પઞ્ચ વાયવઃ । ષષ્ઠં મનઃ । સપ્તમી પૂરષ્ટમી વાક્ । વાગ્ગ્રહણેન
કર્મેન્દ્રિયપર્વણો ગ્રહણમ્ । મનોગ્રહણેન બુદ્ધીન્દ્રિયપર્વણઃ ।
તદેતત્પ્રાણાષ્ટમં વૈકારિકં ગુણશરીરસ્ય પરિદ્રષ્ટુઃ ક્ષેત્રજ્ઞસ્ય
શરીરમાદદાનસ્ય નિત્યં સ્તમ્ભસ્થાનીયં પ્રત્યઙ્ગં ભવતિ,
અચ્છેદ્યમભેદ્યમદાહ્યમવિનાશ્યમવિકમ્પ્યમ્ । અનિત્યાનિ પુનર્ભૌતિકાનિ
બાહ્યાનિ કુશમૃત્તિકાસ્થાનીયાનિ ઉપચીયન્તે ચેતિ ।
આહ, કુતઃ પુનરિયં પ્રાણાદિવૃત્તિઃ પ્રવર્તત ઇતિ ? ઉચ્યતે- સા
કર્મયોનિભ્યઃ । મહતઃ પ્રચ્યુતં હિ રજો વિકૃતમ્ અણ્ડસ્થાનીયાઃ પઞ્ચ
કર્મયોનયો ભવન્તિ- ધૃતિઃ શ્રદ્ધા સુખા વિવિદિષા અવિવિદિષેતિ । આહ ચ
પ્રચ્યુતો મહતો યસ્તુ ન પ્રાપ્તો જ્ઞાનલક્ષણમ્ ।
વ્યાપારો જ્ઞાનયોનિત્વાત્સા યોનિઃ કુક્કુટાણ્ડવત્ ॥

તાસાં લક્ષણવિષયસતત્ત્વગુણસમન્વયા ભવન્તિ । તત્ર લક્ષણં
તાવત્ વ્યવસાયાદપ્રચ્યવનં ધૃતિઃ । ફલમનભિસન્ધાય
શાસ્ત્રોક્તેષુ કાર્યેષ્વવશ્યકર્તવ્યતાબીજભાવઃ શ્રદ્ધા ।
દૃષ્ટાનુશ્રવિકફલાભિલાષદ્વારકો હિ બુદ્ધેરાભોગઃ સુખા ।

વેત્તુમિચ્છા વિવિદિષા । તન્નિવૃત્તિરવિવિદિષા । તત્ર યદાઽયં જન્તુઃ
શુભાશુભેષુ કાર્યેષુ વૃત્ત્યનુસારી જિજ્ઞાસુરજિજ્ઞાસુર્વા શરીરં
પરિત્યજતિ તામેવ કર્મયોનિમુપપદ્યતે । તસ્યામુપપન્નસ્તામેવ ભાવયતિ ।
એતત્તાવલ્લક્ષનસતત્ત્વમ્ । આહ ચ
વાચિ કર્મણિ સંકલ્પે પ્રતિજ્ઞાં યો ન રક્ષતિ ।
તન્નિષ્ઠસ્તત્પ્રતિજ્ઞશ્ચ ધૃતેરેતદ્ધિ લક્ષણમ્ ॥

અનસૂયા બ્રહ્મચર્યં યજનં યાજનં તપઃ ।
દાનં પરિગ્રહઃ શૌચં શ્રદ્ધાયાં લક્ષણં સ્મૃતમ્ ॥

સુખાર્થી યસ્તુ સેવેત વિદ્યાં કર્મ તપાંસિ વા ।
પ્રાયશ્ચિત્તપરો નિત્યં સુખાયાં સ તુ વર્તતે ॥

દ્વિત્વૈકત્વપૃથક્ત્વં નિત્યં ચેતનમચેતનં સૂક્ષ્મમ્ ।
સત્કાર્યમસત્કાર્યવિવિદિષિતવ્યં વિવિદિષાયાઃ ॥

વિષપીતસુપ્તમત્તવદવિવિદિષા ધ્યાયિનાં સદા યોનિઃ ।
કાર્યકરણક્ષયકરી પ્રાકૃતિકા ગતિઃ સમાખ્યાતા ॥

વિષયસતત્ત્વં પુનઃ સર્વવિષયિણી ધૃતિઃ । આશ્રમવિષયિણી
શ્રદ્ધા । દૃષ્ટાનુશ્રવિકવિષયિણી સુખા । વ્યક્તવિષયિણી વિવિદિષા ।
અવ્યક્તવિષયિણ્યવિવિદિષા । ગુણસમન્વયસ્તુ રજસ્તમોબહુલા ધૃતિઃ ।
સત્ત્વરજોબહુલા શ્રદ્ધા । સત્ત્વતમોબહુલા સુખા । રજોબહુલા વિવિદિષા ।
તમોબહુલાઽવિવિદિષા ઇતિ । ઉક્તં ચ
લક્ષણવિષયસતત્ત્વં ત્રૈગુણ્યસમન્વયં ચ પઞ્ચાનામ્ ।
યોનીનાં યો વિદ્યાદ્યતિવૃષભં તં ત્વહં મન્યે ॥

ઇત્યુક્તાઃ પ્રાણાદયો યોનયશ્ચ ।
એતદ્ દ્વયમધિગમ્ય સમ્યઙ્માર્ગાનુગમનં કુર્યાત્ ।
રજસ્તમોધર્માદિસાધનભાવવિનિવૃત્તિતસ્ત્વત્ર
પ્રાણાનામન્તર્વૃત્તિરનુપાધિકત્વાદનિવર્ત્યા । બહિર્વૃત્તિસ્તુ
માર્ગામાર્ગવિષયતયા પ્રયોક્તવ્યા । કથમિત્યુચ્યતે- પ્રાણવિષયા
તાવત્પ્રાણતિર્ધર્માદિવિષય એવાપરોદ્ધવ્યા । તતો હ્યસ્ય સત્ત્વવૃદ્ધિઃ,
સત્ત્વવૃદ્ધેશ્ચોત્તરોત્તરબુદ્ધિરૂપાધિગમઃ । અપાનવિષયસ્ત્વપક્રમણં
ધર્માદિવિષય એવાપરોદ્ધવ્યમેવં હ્યસ્ય ખ્યાતિવિષયાકારસ્ય તમસો
નિર્હ્રાસઃ । તતશ્ચોત્તરોત્તરબુદ્ધિરૂપાધિગમઃ । તથા સમાનવિષયં

સાહચર્યસત્ત્વધર્માનુગુણં કુર્યાત્ । યસ્માચ્છાસ્ત્રમાહ- સત્ત્વારામઃ સત્ત્વમિથુનશ્ચ સદા સ્યાદિતિ । આત્મોત્કર્ષ તૂદાનવિષયમ્ । અવિદ્યાપર્વણોઽન્ત્યં રૂપં વિવર્જ્ય તત્પ્રતિપક્ષૈર્નિવર્તયેત્ । અત્યન્તાવિનાભાવં ચ વ્યાનવિષયં જ્ઞાનવિષય એવ ભાવયેત્ । યોનીનાં ચતસૃણાં ધર્મતાબીજતામેવાદધ્યાત્ । અવિવિદિષામપિ અનિષ્ટફલહેતુષુ ભાવયેત્ । સોઽયં ધર્માદિષુ પ્રવણસ્તત્પ્રતિપક્ષાપક્રાન્તઃ સત્ત્વારામો વિનિવૃત્તાભિમાનો જ્ઞાનનિષ્ઠઃ સવિશુદ્ધયોનિરચિરેણ પરમ બ્રહ્મોપપદ્યત ઇતિ । આહ ચ

બાહ્યાં પ્રાણવિવૃત્તિં સમ્યઙ્માર્ગે બુધઃ પ્રતિષ્ઠાપ્ય ।
વિનિવૃત્તવિખરકલુષો ધ્રુવમમૃતં સ્થાનમભ્યેતિ ॥

પઞ્ચાનાં યોનીનાં ધર્માદિનિમિત્તતાં ચ સંસ્થાપ્ય ।
પરિપક્વમિત્યધસ્તાન્ન પુનસ્તદ્ભાવિતો ગચ્છેત્ ॥

ઇતિ વ્યાખ્યાતા વ્યસ્તસમસ્તા કરણાનાં વૃત્તિઃ ॥ ૨૯॥

---

કારિકા ૩૦

---

આહ, યેયમેકૈકસ્મિન્ રૂપાદાવર્થે કરણચતુષ્ટયસ્ય વૃત્તિઃ સા કિં યુગપત્ આહોસ્વિત્ ક્રમેણેતિ ? કુતઃ સંશય ઇતિ ચેત્ ઉભયથા દૃષ્ટત્વાત્ । ઇહૈકાર્થવિષયાણાં યુગપદપિ વૃત્તિર્દૃષ્ટા । તદ્યથા ચન્દ્રમણ્ડલે ચક્ષુષાં મનસો વા । ક્રમશશ્ચ તદ્યથા ઘટે મધૂદકપયસામ્ । એકાર્થવિષયં ચ કરણચતુષ્ટયમ્ । અતો નઃ સંશયઃ કિં ચક્ષુર્મનોવદ્યુગપદસ્ય વૃત્તિઃ, આહોસ્વિન્મધ્વાદિવત્ક્રમેણેતિ ? ઉચ્યતે- યથાદર્શનમપિ તાવદુચ્યતામ્ । કિમત્ર યુક્તં ભવાન્ મન્યતે ? સ ચેત્સપ્યગુપદેક્ષ્યસિ કો નિર્બન્ધસ્તદેવ પ્રતિપદ્યામહે ઇતિ । યદ્યેવં તસ્માદિદમસ્મદ્દર્શનમ્

॥ યુગપચ્ચતુષ્ટયસ્ય તુ વૃત્તિઃ ॥

તુશબ્દોઽવધારણાર્થઃ યુગપદેવેત્યર્થઃ । બુદ્ધ્યહંકારમનસાં હિ બુદ્ધીન્દ્રિયાણાં ચ સમાનદેશત્વમ્ । તત્ર ન શક્યત એતદ્વક્તું સતિ શક્તિસદ્ભાવે વિષયસમ્બન્ધે ચ કસ્યચિત્તત્ર વૃત્તિઃ કસ્યચિન્નેતિ । કિં ચાન્યત્ । મેઘસ્તનિતાદિષુ ક્રમાનુપલબ્ધેઃ । યદિ હિ

ક્રમેણ શ્રોત્રાદીનામન્તઃકરણસ્ય ચ બાહ્યેઽર્થે વૃત્તિઃ સ્યાદપિ તર્હિ મેઘસ્તનિતકૃષ્ણસર્પાલોચનાદિષ્વપ્યુપલભ્યતે ક્રમઃ । ન તૂપલભ્યતે । તસ્માદ્યુગપદેવ બાહ્યેઽર્થે ચતુષ્ટયવૃત્તિરિતિ ।
ઉચ્યતે- યદુક્તં શ્રોત્રાદીનામન્તઃકરણસ્ય ચાભિન્નકાલં વૃત્તિરિત્યત્ર બ્રૂમઃ, અયુક્તમેતત્ । કિં કારણમ્ ? યસ્માદસ્માકં

॥ ક્રમશશ્ચ તસ્ય નિર્દિષ્ટા ॥

તસ્યેતિ ચતુષ્ટયમપિ સમ્બધ્યતે । ચશબ્દોઽવધારણાર્થઃ । ક્રમશ એવેત્યર્થઃ । ક્રમશ એવ હિ બાહ્યાન્તઃકરણવૃત્ત્યોરેકાર્થનિપાતઃ । યત્તૂક્તં સમાનદેશાનાં શક્તિસમ્બન્ધસદ્ભાવે વૃત્ત્યભાવાનુપપત્તિરિતિ, અત્ર બ્રૂમઃ- ચક્ષુરાદિવદેતત્સ્યાત્ । તદ્યથા ચક્ષુસ્ત્વચોઃ સમાનદેશત્વે શક્તિવિષયસમ્બન્ધોપપત્તૌ રજોધૂમાતપાદિગતઃ સ્પર્શ એવોપલભ્યતે, ન રૂપમ્ । એવમિહાપિ સ્યાત્ । તસ્માત્

॥ દૃષ્ટે તથાપ્યદૃષ્ટે ॥

ક્રમશ એવ ચતુષ્ટયસ્ય વૃત્તિઃ । અદૃષ્ટગ્રહણેન પુનરત્રાતીનાગતવ્યવહિતવિષયગ્રહણમ્ । તત્રાતીતં દ્વિવિધમ્, દૃષ્ટવિષયદૃષ્ટવિષયં ચ । અત્રાપિ દૃષ્ટવિષયં પ્રત્યભિજ્ઞાનમિત્યભિપ્રેતમ્, અદૃષ્ટવિષયં સ્મૃતિઃ । સા તુ લિઙ્ગાગમાભ્યામકસ્માદ્વા ભવતિ । તથા ચ વૃષગણવીરેણાપ્યુક્તં ભવતિ ... અનાગતવ્યવહિતવિષયજ્ઞાનં તુ લિઙ્ગગાગમાભ્યામ્ । આહ ચ
વિષયેન્દ્રિયસંયોગાત્પ્રત્યક્ષજ્ઞાનમુચ્યતે ।
તદેવાતીન્દ્રિયં જાતં પુનર્ભાવનયા સ્મૃતિઃ ॥

તદેવ ભાવનાપેક્ષજ્ઞાનં કાલાન્તરે પુનઃ ।
તત્રૈવ સેન્દ્રિયં જાતં પ્રત્યભિજ્ઞાનમુચ્યતે ॥

તત્ર દૃષ્ટે ક્રમઃ પ્રતિ નાસ્તિ સન્દેહઃ । યત્પુનરેતદુક્તં દૃષ્ટે મેઘસ્તનિતકૃષ્ટસર્પાલોચનાદૌ ક્રમાનુપલબ્ધેર્યુગપચ્ચતુષ્ટયસ્ય વૃત્તિરિત્યત્ર બ્રૂમઃ- એતદપ્યયુક્તમ્ । કિં કારણમ્ ? યસ્માત્

॥ ત્રયસ્ય તત્પૂર્વિકા વૃત્તિઃ ॥ ૩૦ ॥

ન તાવદ્ બુદ્ધ્યહંકારમનસાં સાક્ષાદ્ બાહ્યાર્થગ્રહણસામર્થ્યમસ્તિ,

અન્તઃકરણાનુપપત્તિપ્રસંગાત્, શ્રોત્રાદિવૈયર્થ્યપ્રસંગાત્, દ્વારિદ્વારભાવવ્યાઘાતપ્રસઙ્ગાચ્ચ । તસ્માત્પૂર્વં શ્રોત્રાદીનામર્થસમ્બન્ધોઽસ્તિ મેઘસ્તનિતાદાવપ્યવશ્યમેતદભ્યુપગન્તવ્યમ્ । પશ્ચાત્તુ તદ્વૃત્ત્યુપનિપાતાદન્તઃકરણસ્યેત્યસ્તિ ક્રમોઽત્રાપિ । તત્ર યદુક્તં મેઘસ્તનિતાદિષુ ક્રમાનનુગતે યુગપચ્ચતુષ્ટયસ્ય વૃત્તિરિત્યેતદયુક્તમ્ ।
અન્યૈસ્ત્વન્યથાઽન્વયો દર્શિતઃ । તદ્યથા ચતુષ્ટયસ્ય મનોઽહંકારબુદ્ધીનામન્તઃકરણાનાં બાહ્યેનૈકેન કરણેન શ્રોત્રેણ વા ચક્ષુષા વા સહ ચતુષ્ટયસ્યેત્યર્થઃ । અસ્ય દૃષ્ટે વર્તમાને યુગપદ્વૃત્તિઃ પૂર્વાચાર્યૈર્નિર્દિષ્ટા । આચાર્યેણ તુ ક્રમેણેત્યર્થઃ । અદૃષ્ટેઽતીતાદાવપિ ક્રમશશ્ચ ક્રમેણૈવ, યતસ્ત્રયસ્યાન્તઃકરણસ્ય તત્પૂર્વિકા બાહ્યેન્દ્રિયપૂર્વિકા વૃત્તિઃ । યદા યથાઽનુભવસ્તથા સંસ્કારઃ, યથા ચ સંસ્કારસ્તથા સ્મૃતિરિત્યેવં વૃત્તિર્બાહ્યેન્દ્રિયપૂર્વિકેતિ ॥ ૩૦॥

---

કારિકા ૩૧

---

આહ, કિં પુનરેષાં કરણાનાં સ્વવિષયનિયમેન વૃત્તિર્ભવતિ આહોસ્વિદ્વ્યતિકરેણેતિ ?
ઉચ્યતે- નનુ ચ પ્રાગેવ રૂપાદિષુ પઞ્ચાનામાલોચનમાત્રમિષ્યતે વૃત્તિરિતિ (kA0 28) ચોક્ત્વાઽઽચાર્યેણાન્તેઽપદિષ્ટં સૈષા ભવત્યસામાન્યેતિ (kA0 29) । તત્રૈવં ગતે ભવતઃ સંશયઃ ।
કુતઃ ઇત્યુચ્યતે- સત્યમેવૈતત્ । તથાપિ જાયતે સંશયઃ । કુતઃ ? કરણાન્તરેણ સ્વવિષયોપલબ્ધૌ કરણાન્તરૌત્સુક્યદર્શનાત્ । ઇહ કરણાન્તરેણ ચક્ષુષાઽઽમ્રદાડિમાદિરૂપોપલબ્ધૌ સત્યાં કરણાન્તરસ્ય જિહ્વાલક્ષણસ્યૌત્સુક્યં પ્રવૃત્તિશ્ચોપલબ્ધા । તદ્યદિ સ્વવિષયનિયતાનીન્દ્રિયાનિ, નૈષાં કરણાન્તરવિષયોપલમ્ભાત્તત્સાહચર્યાપેક્ષઃ સ્વવિષયગ્રહણભાવઃ સ્યાત્ । અસ્તિ ચ । તસ્માદુપપન્નઃ સંશયઃ । તત્રેદાનીં ભવતઃ પ્રતિપત્તિરિતિ ।
ઉચ્યતે- અત્રાપિ નાસ્તીન્દ્રિયાણાં સ્વવિષયગ્રહણવ્યતિકરઃ । કિં તર્હિ

॥ સ્વાં સ્વાં પ્રતિપદ્યન્તે પરસ્પરાકૂતહેતુકીં વૃત્તિમ્ ।
પુરુષાર્થ એવ હેતુર્ન કેનચિત્ કાર્યતે કરણમ્ ॥ ૩૧ ॥

યસ્ય કરણસ્ય યા વૃત્તિરપદિષ્ટા તદ્યથા શ્રોત્રસ્ય
શબ્દગ્રહણમ્, ચક્ષુષો રૂપગ્રહણમ્ ઇત્યાદિ । તામેવ પ્રતિપદ્યન્તે-
સ્વવિષયજિધૃક્ષયાઽવલમ્બન્ત ઇત્યર્થઃ । પરસ્પરસ્યાકૂતં
પરસ્પરાકૂતમ્ । આકૂતમભિપ્રાયોઽભિસન્ધિરિત્યર્થઃ । પરસ્પરાકૂતં હેતુઃ
પ્રતિપત્તેરસ્યાઃ, સેયં પરસ્પરાકૂતહેતુકી । પરસ્પરાકૂતં પ્રતિપત્તેઃ
કારણમિતિ કૃત્વા તાચ્છબ્દ્યં લભતે । તદ્યથા દધિત્રપુસં જ્વરઃ ।
એતદુક્તં ભવતિ યદા ચક્ષુષાઽઽમ્રદાડિમાદિ રૂપમુપલબ્ધં
ભવતિ તદા રસનેન્દ્રિયમુપાત્તવિષયસ્ય ચક્ષુષો વૃત્તિં સંવેદ્ય
સ્વવિષયજિધૃક્ષયૌત્સુક્તવદ્વિકારમાપદ્યતે, રસનસ્ય વૃતિં
સંવેદ્ય પાદૌ વિહરણમારભેતે હસ્તાવાદાનં, તાવદ્યાવદસૌ વિષયો
રસનેન્દ્રિયયોગ્યતાં નીતઃ । તતો રસનં સ્વવિષયે પ્રવર્તતે ।
એવમિતરેષ્વપિ વક્તવ્યમ્ ।
આહ, યદ્યેવં તેન તર્હીન્દ્રિયાન્તરવૃત્તિસંવેદનેઽક્ષપ્રત્યયવત્વપ્રસંગઃ ।
યદિ તર્હીન્દ્રિયાન્તરેણેન્દ્રિયાન્તરસ્ય વૃત્તિઃ સંવેદ્યતે, પ્રાપ્તમસ્ય
પ્રત્યયવત્ત્વમ્ । અથાપ્રત્યયમિન્દ્રિયં પરસ્પરાકૂતસંવેદનં,
તર્હિ ન વાચ્યમિતિ । કિં ચ પરસ્પરદ્વારિદ્વારભાવપ્રસંગશ્ચ ।
ઇન્દ્રિયાન્તરં ચેદિન્દ્રિયાન્તરસ્ય વૃત્તિં સંવેદ્ય સ્વાર્થમાકાંક્ષેત્,
પ્રાપ્તમસ્ય દ્વારિત્વમિતરસ્ય ચ દ્વારત્વમ્ । તદયુક્તમિન્દ્રિયાણાં
પરસ્પરાકૂતસંવેદનમિતિ ।
ઉચ્યતે- ન, ઉપચારાત્ । પ્રાગેવોપદિષ્ટમસ્માભિરપ્રત્યયમિન્દ્રિયમિતિ ।
કિં તર્હિ સ્વવિષયસ્ય પટોઃ સહચારિણમર્થમિન્દ્રિયાન્તરવિષયતામાપન્નં
સંસ્પૃશ્ય સ્વભાવત ઇન્દ્રિયાન્તરં સ્વવિષયં પ્રતિ સાકાંક્ષં ભવતિ,
તત્સન્નિધૌ વિક્રિયાદર્શનાત્ । તત્ર સંવેદનમુપચર્યૈવમુચ્યતે ઇત્યદોષઃ ।
કિં ચાન્યત્ । ભૌતિકાવયવપ્રત્યયવિવૃત્તિવત્તદ્વિવૃત્તેઃ । યથા બુદ્ધેઃ
પ્રસાદમનન્તરં ભૌતિકાનામવયવાનાં મુખનયનાદીનાં પ્રસાદો ભવતિ,
ન ચૈષાં પ્રત્યયવત્ત્વમ્, એવમિહાપિ સ્યાત્ । ન ચ પ્રત્યયવત્ત્વમ્ ।
એતેન દ્વારિદ્વારભાવઃ પ્રત્યુક્તઃ ।
મનોઽધિષ્ઠાનસામર્થ્યાદ્વા । અથવા પરસ્પરવિષયમાકૂતં પરસ્પરાકૂતમ્,
યથા જલવિષયઃ પુરુષઃ જલપુરુષઃ । આકૂતમિચ્છા સંકલ્પઃ મન
ઇત્યર્થઃ । સ હેતુરસ્યાઃ સેયં પરસ્પરાકૂતહેતુકી તામ્ । એતદુક્તં
ભવતિ, યથા કિંચિદિન્દ્રિયં વિષયે પ્રવૃત્તં ભવતિ તદા તદ્દ્વારેણ
સમસ્તમર્થમુપલભ્ય તત્સહચારિણમર્થાન્તરમાકાંક્ષદિન્દ્રિયાન્તરં

વૃત્યા પ્રતિતિષ્ઠતે । તેનાકાંક્ષાવતા મનસાઽધિષ્ઠિતામિન્દ્રિયં વિક્રિયામાપદ્યતે । તથા ચ તન્ત્રાન્તરેઽપ્યુક્તં- "યસ્ય યસ્યેન્દ્રિયસ્ય વિષયં મનોધ્યાયત્યભિસમ્પત્ત્યર્થેન તસ્ય તસ્યૌત્સુક્યં પ્રવૃત્તિશ્ચ ભવતીતિ "। એતદુક્તં સ્વાં સ્વાં પ્રતિપદ્યન્તે પરસ્પરાકૂતહેતુકીં વૃત્તિરિતિ ।

કિમિન્દ્રિયં મનોવૃત્ત્યાધિષ્ઠાય સ્વવિષયે પ્રવર્તયતિ યથા પરશ્વાદીંશ્ચૈત્ર ઇતિ ?

નેત્યુચ્યતે । કિં તર્હિ સ્વવિષયસંકલ્પાનુગૃહીતસ્ય મનસઃ સંસ્પર્શાત્સ્વયમેવેન્દ્રિયં સ્વવિષયં પ્રતિપદ્યતે । કસ્માત્ ? પ્રયોગશક્ત્યસિદ્ધેઃ । ન હિ યથા ચૈત્રસ્ય પરશ્વાદિપ્રયોગશક્તિઃ સિદ્ધા એવં મનસ ઇન્દ્રિયપ્રયોગશક્તિઃ । તસ્માદયુક્તમિન્દ્રિયસ્ય મનઃ પ્રેરકમિતિ । રજ ઇતિ ચેત્સ્યાન્મતમ્, રજસો હીન્દ્રિયાન્તરપ્રયોગસામર્થ્યં વિદ્યતે । તસ્માદયુક્તમુક્તં પ્રયોગશક્ત્યસિદ્ધેર્નેન્દ્રિયાણાં મનઃપ્રયોજકમિતિ । એતચ્ચાયુક્તમ્ ? કસ્માત્ ? અવિશેષાત્ । ઇન્દ્રિયાન્તરેઽપિ હિ તર્હિ રજોઽસ્તીત્યત આત્મભૂતેનૈવાસ્ય નિમિત્તેન પ્રવૃત્તિરપ્રતિષિદ્ધા, કિં મનસા પરિકલ્પિતેનેતિ ? કિં ચાન્યત્, કરણાન્તરાનુપપત્તેઃ । ચૈત્રો હિ પરશ્વાદીનાં પ્રયોગં કરણાન્તરેણ કરોતિ । ન તુ મનસઃ કરણાન્તરમસ્તીત્યસમાનમ્ । પાણિવદિતિ ચેન્ન ચૈત્રવ્યાપારાપેક્ષત્વાત્ । તદપિ હિ ચૈત્રવ્યાપારાપેક્ષં પ્રવર્તતે ન સ્વતઃ । કિંચ તદ્વ્યતિરેકેણ પ્રવૃત્ત્યુપલબ્ધેઃ । યસ્ય હિ પ્રયોજકાન્તરાપેક્ષા પ્રવૃત્તિઃ ન તસ્ય કદાચિદપિ સ્વતન્ત્રસ્ય ભવતિ । અસ્તિ તુ સંકલ્પવ્યતિરેકેણ મેઘસ્તનિતાદિષ્વિન્દ્રિયસ્ય પ્રવૃત્તિઃ । તસ્માન્નેન્દ્રિયાન્તરસ્ય મનઃ કારકમ્ । ન ચેત્કારકં યથા મૌલાનાં ગુણાનામેવમિહાપિ પુરુષાર્થ એવં હેતુર્ન કેન ચિત્કાર્યતે કરણમિતિ સિદ્ધમ્ ॥ ૩૧॥

---

કારિકા ૩૨

---

આહ, કરણં પ્રત્યાચાર્યવિપ્રતિપત્તેઃ । તદવધારણં કર્ત્તવ્યમ્ । આચાર્યાણાં કરણં પ્રતિ વિપ્રતિપત્તિઃ । એકાદશવિધમિતિ વાર્ષગણાઃ । દશવિધમિતિ તાન્ત્રિકાઃ પઞ્ચાદિકરણપ્રભૃતયઃ । દ્વાદશવિધમિતિ પતઞ્જલિઃ । તસ્માદ્ભવતઃ કતિવિધં કરણમભિપ્રેતમિતિ વક્તવ્યમેતત્ ।

ઉચ્યતે-

॥ કરણં ત્રયોદશવિધં તદાહરણધારણપ્રકાશકરમ્ ॥

પઞ્ચ કર્મેન્દ્રિયાણિ પઞ્ચ બુદ્ધીન્દ્રિયાણિ મનોઽહઙ્કારો બુદ્ધિશ્ચેત્યેતત્સર્વં પુરુષાર્થોપયોગિકરણમ્ । કસ્માત્ ? અપુરુષાર્થોપયોગિત્વે તત્ત્વાન્તરાનુપપત્તિપ્રસંગાત્ । યદિ યથા વાર્ષગણા આહુઃ- લિઙ્ગમાત્રે મહાનસંવેદ્યઃ કાર્યકારણરૂપેણ વિશિષ્ટાવિશિષ્ટલક્ષણેન, તથા સ્યાત્તત્ત્વાન્તરમ્ । તન્ન સ્યાત્, અનર્થકત્વાત્ ।
આહ, સત્યમ્, પ્રધાનલક્ષણાનાં ગુણાનાં વૈષમ્યમાત્રરૂપત્વેઽપિ તત્ત્વાન્તરમસૌ ભવિષ્યતીતિ । કસ્માત્ ? સામ્યાદ્વૈષમ્યમુપાખ્યાન્તરમિતિ ।
એતચ્ચાયુક્તમ્ । કસ્માત્ ? તત્ત્વાનવસ્થાપ્રસંગાત્ । એવં હિ પરિકલ્પ્યમાને પ્રધાનમહતોર્યદન્તરાલં તદપિ ચ ક્રિયારૂપત્વાદક્રિયાવત ઉપાખ્યાન્તરમિતિ તત્ત્વાન્તરાનવસ્થાપ્રસંગઃ । અભ્યુપગમે વા મહતસ્તત્ત્વાન્તરાણાં ચ ક્રિયાકાલવિરોધઃ । તસ્માત્તત્ત્વાન્તરાનુપપત્તિરનવસ્થા વા, ત્રયોદશવિધં કરણમિત્યન્યતરવદવશ્યમભ્યુપગન્તવ્યમ્ । તત્ર ચાસ્મત્પ્રતિજ્ઞાતમેવ નિર્દોષં લક્ષ્યતે । તસ્માદુપપન્નમેતત્ ત્રયોદશવિધં કરણમિતિ ।
આહ, કરણમિતિ ક્રિયાકારકસમ્બન્ધગર્ભોઽયં નિર્દેશઃ । કથમ્ ? યેન તત્કરણમિતિ । તત્ર વક્તવ્યમ્ કા ક્રિયા, કિં ચ તત્ક્રિયતે યદપેક્ષ્ય બુદ્ધ્યાદીનાં કરણત્વમિતિ ?
ઉચ્યતે- યદુક્તં કા ક્રિયેત્યત્ર બ્રૂમઃ- તન્નિર્વર્તકમિહાભિપ્રેતાત્ ન દણ્ડાદિવત્, કિં તર્હિ તદાહરણધારણપ્રકાશકરમ્ । તત્રાહરણં કર્મેન્દ્રિયાણિ કુર્વન્તિ, વિષયાર્જનસમર્થત્વાત્ । ધારણં બુદ્ધીન્દ્રિયાણિ કુર્વન્તિ, વિષયસન્નિધાને સતિ શ્રોત્રાદિવૃત્તેસ્તદ્રૂપાપત્તેઃ । પ્રકાશમન્તઃકરણં કરોતિ, નિશ્ચયસામર્થ્યાત્ ।
અપર આહ- આહરણં કર્મેન્દ્રિયાણિ કુર્વન્તિ । ધારણં મનોઽહંકારશ્ચ । પ્રકાશનં બુદ્ધીન્દ્રિયાણિ બુદ્ધિશ્ચેતિ । એતદભિસન્ધાય બુદ્ધ્યાદીનાં કરણત્વમુચ્યત ઇતિ ।
યત્તૂક્તં કિં કાર્યમિતિ, ઉચ્યતે-

॥ કાર્યં ચ તસ્ય દશધા ॥

દશધેતિ પઞ્ચ વિશેષાઃ પઞ્ચાવિશેષાઃ । તદપ્યત એવ કાર્યશબ્દં

લભતે ।

॥ આહાર્યં ધાર્યં પ્રકાશ્યં ચ ॥ ૩૨ ॥

તદ્ધ્યાહર્તવ્યં ધારણીયં પ્રકાશયિતવ્યં ચ । અતઃ કાર્યમિત્યુચ્યતે,
ન નિર્વર્ત્યત્વાત્ ॥ ૩૨॥

---

કારિકા ૧૩

---

એતસ્મિંસ્ત્રયોદશવિધે તુ કરણે ત્રયોદશં કતરદિતિ ?
ઉચ્યતે- બુદ્ધિરહંકારો મનશ્ચ । તસ્માત્ ।

॥ અન્તઃકરણં ત્રિવિધમ્ ॥

કસ્માત્ ? વિષયાનભિસન્ધાનાત્ । શ્રોત્રાદિપ્રણાલિકયા ચ
વિષયસમ્પ્રતિપત્તેઃ । અવિશેષાભિધાનાદ્ બુદ્ધ્યાદિપ્રતિપત્તિરયુક્તેતિ
ચેત્સ્યાન્મતમ્, અવિશેષેણેદમુક્તમાચાર્યેણ અન્તઃકરણં ત્રિવિધમિતિ ।
તત્ર કથમિદમવગમ્યતે બુદ્ધ્યહંકારમનસાં ગ્રહણાભિપ્રેતં, ન
પુનરન્યેષામિતિ ? ઉચ્યતે- ન, પ્રથમસંખ્યાવ્યતિક્રમહેત્વનુપપત્તેઃ ।
બુદ્ધ્યાદિસંખ્યાં હિ વ્યતિક્રમમાણસ્ય પ્રતિપત્તૌ નાસ્તિ હેતુઃ ।
તસ્માત્તેષામેવ ગ્રહણમ્ । યથા વસન્તાય કપિઞ્જલાનાલભત ઇતિ ।
શ્રોત્રસ્યાન્તઃકરણત્વપ્રસંગાદયુક્તમિતિ ચેત્ સ્યાદેતત્- બુદ્ધિમહંકારં
ચોક્ત્વા તત આહ બુદ્ધીન્દ્રિયાણિ કર્ણત્વક્ચક્ષૂરસનનાસિકાખ્યાનીતિ (kA0 26) ।
તસ્માચ્છ્રોત્રમન્તઃકરણં પ્રસજ્યત ઇતિ । એતદનુપપન્નમ્ । કસ્માત્ ? મનસઃ
પૃથગભિધાનાત્ । અત એવેદમાચાર્યેણાપેક્ષ્ય મનસોઽન્તઃકરણત્વં
પૃથગુક્તમ્- તચ્ચેન્દ્રિયમુભયથા સમાખ્યાતમ્, અન્તસ્ત્રિકાલવિષયમિતિ
(kA0 27) તસ્માદુપપન્નમન્તઃકરણં ત્રિવિધં બુદ્ધ્યાદીનિ ।

॥ દશધા બાહ્યમ્ ॥

પઞ્ચ બુદ્ધીન્દ્રિયાણિ પઞ્ચ કર્મેન્દ્રિયાણીત્યેતદ્બાહ્યં
દશપ્રકારમાચાર્યૈરાખ્યાયતે ।
આહ, દશધા બાહ્યમિત્યસ્યાનર્થક્યમ્, પરિશેષબુદ્ધેઃ । અન્તઃકરણં
ત્રિવિધમિત્યુક્તે ગમ્યત એતત્પરિશેષાદેવ દશધા બાહ્યમિતિ ।
તસ્માત્તદ્ગ્રહણમનર્થકમિતિ ।

ઉચ્યતે- ન, વિષયાર્થત્વાત્ । ત્રયસ્ય વિષયાખ્યમિત્યેવં વક્ષ્યામીત્યાચાર્ય
આરભતે । અક્રિયમાણે ત્વસ્મિન્ કિન્તત્ ત્રયસ્ય વિષયાખ્યમિતિ ન જ્ઞાયતે ।
આહ, એવમપિ વિષયગ્રહણાત્સિદ્ધેર્બાહ્યગ્રહણપાર્થકમિતિ ।
ઉચ્યતે- વક્તવ્યં તાવદિદમવશ્યં વિષયભાવપ્રતિપત્ત્યર્થમ્ ।
તત્ર શેષે વા યથાન્યાસં વોચ્યમાને ન કશ્ચિદ્વિશેષઃ । અથવા
નેદં બાહ્યસંજ્ઞાપ્રતિપત્ત્યર્થમારભ્યતે, કિં તર્હિ નિયમાર્થમ્ । કથમ્
? દશધા બાહ્યં શબ્દાદિવિષયગ્રહણભૂતમેવ ત્રયસ્યાપિ વિષયાખ્યં યથા
સ્યાત્, મા ભૂદન્તઃપ્રાણાદિભૂતમ્ । અથવા દશધૈવ બાહ્યમ્ । ભેદવિષયં
બાહ્યમિત્યર્થઃ । પ્રાણાદિભૂતસ્ય તુ ભેદો નાસ્તીત્યદોષઃ ।
તદેતત્

॥ ત્રયસ્ય વિષયાખ્યમ્ ॥

બુદ્ધ્યહંકારમનોલક્ષણસ્ય હિ
ત્રયસ્યોપાત્તવિષયા બુદ્ધીન્દ્રિયકર્મેન્દ્રિયવૃત્તયઃ
સમ્પર્કાદ્વિષયરૂપપ્રત્યવભાસનિમિત્તતામુપગચ્છન્ત્યો
વિષયાખ્યતાં લભન્તે । તથા મનોઽહંકારાવપિ બુદ્ધેઃ । બુદ્ધિસ્તુ
નિશ્ચયરૂપત્વાત્કરણાન્તરનિરપેક્ષા સર્વમર્થં પ્રવૃત્તૌ પ્રતિ
નિશ્ચયરૂપેણાધ્યસ્તં પુરુષાયોપસંહરતિ ।
તત્ર શબ્દાદિસન્નિધાને વૃત્તીનાં તાદ્રૂપ્યાપત્તેસ્તદપગમે ચ
તાદ્રૂપ્યાપગમાત્ પ્રાપ્યકારિ ।

॥ સામ્પ્રતકાલં બાહ્યમ્ ॥

ઉપાત્તવિષયેન્દ્રિયવૃત્તિસન્નિધાનાત્તુ
તદાકારસંસ્કારાધાનનિમિત્તસ્મૃતિપ્રત્યયવશાત્

॥ ત્રિકાલમાભ્યન્તરં કરણમ્ ॥ ૩૩ ॥

---

કારિકા ૩૪

---

આહ, પ્રાક્છબ્દાદિષુ શ્રોત્રાદીનામાલોચનમાત્રં વૃત્તિરિત્યવિશેષેણોક્તમ્ ।
તત્ર કિં તથૈવ પ્રતિપત્તવ્યમથેન્દ્રિયાણાં વિષયવિશેષોઽસ્તીતિ ? અથ
ચોક્તં કાર્યં ચ તસ્ય દશધા વિશેષલક્ષણમવિશેષલક્ષણં ચ ।
તત્ર કેન કરણેન કસ્ય વિષયસ્ય ગ્રહણમિતિ ?

ઉચ્યતે-

॥ બુદ્ધીન્દ્રિયાણિ તેષાં પઞ્ચ વિશેષાવિશેષવિષયાણિ ॥

તેષાં પૂર્વોક્તાનામિન્દ્રિયાણાં યાનિ બુદ્ધીન્દ્રિયાણિ પઞ્ચ શ્રોત્રાદીનિ તાનિ વિશેષાવિશેષવિષયાણિ પ્રતિપત્તૃભેદેન । તત્ર દેવાનાં યાનિ ઇન્દ્રિયાણિ તાનિ ધર્મોત્કર્ષાદ્વિશુદ્ધાન્યવિશેષાનપિ ગૃહ્ણન્તિ પ્રાગેવ વિશેષાત્, યોગિનાં ચ સમ્પ્રાપ્તવિશેષાણામ્ । અસ્મદાદીનાં તુ વિશેષાનેવ તમસા પરિવૃતત્વાત્ ।
આહ, કિં કર્મેન્દ્રિયાણામપિ પ્રતિપત્તૃભેદાદ્ગ્રહણભેદો ભવતિ ?
નેત્યુચ્યતે । કિં તર્હિ સર્વેષામેવ

॥ વાગ્ભવતિ શબ્દવિષયા ॥

વાગિન્દ્રિયસ્ય વાય્વભિહતેષુ વદનપ્રદેશેષુ તાલ્વાદિષુ ધ્વનેર્વર્ણપદવાક્યશ્લોકગ્રન્થભાવેન વિકારાપાદનં સર્વપ્રાણિનામવિશિષ્ટમ્ ।
આહ, અથેતરાનિ કર્મેન્દ્રિયાણિ કથમિતિ ?
ઉચ્યતે-

॥ શેષાણ્યપિ પઞ્ચવિષયાણિ ॥ ૩૪ ॥

પાણિપાદપાયૂપસ્થાસ્તુ આદાનવિહરણોત્સર્ગાનન્દલક્ષણૈઃ કર્મભિઃ શબ્દસ્પર્શરસરૂપગન્ધસમુદાયરૂપા મૂર્તીર્વિકુર્વન્તીતિ ।
આહ, યદિ પઞ્ચવિષયાણ્યેવાવિશેષાણીતિ નિયમોઽભ્યુપગમ્યતે તેનૈકકરણેષ્વાદાનાદિક્રિયાઽનુપપત્તિપ્રસંગ ઇતિ ।
ઉચ્યતે ન, નિયમપ્રતિષેધાર્થત્વાત્ । સ્વવિષયનિયમો બુદ્ધીન્દ્રિયવત્કર્મેન્દ્રિયાણામપિ મા વિજ્ઞાયીત્યતો નિયમપ્રતિષેધાર્થમિદમારભ્યતે । તદર્થમેવ ચાપિશબ્દમાચાર્યોઽધિજગે । સમ્ભાવનાર્થમપિ ચ પઞ્ચવિષયાણ્યેતાનિ પ્રાગેવ તુ ચતુસ્ત્રિવિષયાણીતિ ।
આહ, કથમેતદવગમ્યતે વિશેષાવિશેષવિષયાણીન્દ્રિયાણિ, ન પુનરસદ્વિષયાણિ ઇતિ ?
ઉચ્યતે- વિશેષાણામસત્ત્વાસિદ્ધેઃ । પ્રત્યક્ષતસ્તાવદ્વિશેષા ઉપલભ્યન્તે । તસ્માદેષામસત્ત્વમશક્યં પ્રતિજ્ઞાતુમ્ ।
અથાપિ સ્યાત્સાધ્યમેતત્પ્રત્યક્ષમેવૈતદનવદ્યમ્,

બાહ્યવસ્તુવિષયમયમૃગતૃષ્ણિકાદિવિજ્ઞાનવત્પ્રત્યક્ષાભાસમ્ ।
એતચ્ચાયુક્તમ્ । કસ્માત્ ? વિકલ્પાનુપપત્તેઃ । સર્વમભૂતમભ્યુપગન્તવ્યમ્ ।
યત્ર નાસ્તિ કિંચિદ્ ભૂતાર્થેન પ્રત્યક્ષં યદપ્યેક્ષ્યેતરત્ પ્રત્યક્ષાભાસં
સ્યાત્ । ઉક્તસ્ત્વયં વિકલ્પઃ । તસ્માદયુક્તં જ્ઞાનમાત્રમિદમિતિ । કિં ચાન્યત્ ।
વિપરીતદર્શનપ્રસંગાત્ । મૃગતૃષ્ણિકાસ્વપ્નવિષયૈરસદ્‌ભિઃ
સતામસત્ત્વમિચ્છતસ્તદ્વદેવ વિપરીતદર્શનપ્રસંગઃ ।
તથા હિ ગન્ધર્વનગરાદિષુ કદાચિત્તમેવાર્થં ગાં પશ્યતિ,
કશ્ચિદ્ધ્વજં પશ્યતિ, કદાચિત્પતાકામ્ । સ્વપ્ને ચૈકમૂર્તિપતિતાનાં
ગોપુરુષાશ્વરાસભનદીવૃક્ષપ્રભૃતીનાં દર્શનં સ્મરણે વિપર્યયેણ
દૃષ્ટમ્ । તથા વાતાયનેન હસ્તિયૂથપ્રવેશને... । વિચ્છિન્નાનાં
ચાવયવાનાં પુનઃ સન્ધાનં આકાશગમનમનીશ્વરસ્યાનિમિત્તં
રાજ્યલાભ ઇતિ । તદિતરત્રાપિ સ્યાત્ । ન ત્વસ્તિ । તસ્માદયુક્તં
મૃગતૃષ્ણિકાસ્વપ્નાદિવદસત્ત્વં ભાવાનામ્ । અર્થક્રિયા ચ ન
સ્યાત્ । યથા સ્વપ્ને સ્નાતાનુલિપ્તાશિતપીતવસ્ત્રાચ્છાદિતાનામફલત્વં
દૃષ્ટમ્, એવમિહાપિ સ્યાત્ । શુક્રવિસર્ગવદિતિ ચેત્, સ્યાદેતત્- યથા
દ્વયસમાપ્તિપૂર્વકઃ શુક્રવિસર્ગઃ સ ચ તદભાવેઽપિ સ્વપ્ને ભવતિ,
એવમિતરત્સ્યાદિતિ । તદયુક્તમ્, રાગાદિનિમિત્તત્વાત્ । તથાહિ જાગ્રતોઽપિ તત્
દ્વયસમાપત્તિમન્તરેણ ભવતિ । તસ્માન્મનોરઞ્જનાનિમિત્તં તત્ । પ્રેતવદિતિ
ચેત્ સ્યાદિયં મમ સદ્બુદ્ધિઃ, યથા પ્રેતાનામસદ્‌ભિઃપૂયનદ્યાદિભિરર્થક્રિયા,
નરકપાલૈશ્ચ બાધનમ્ । એવમત્રાપિ સ્યાદિતિ । તદયુક્તમ્ । અસિદ્ધત્વાત્ ।
ન હ્યેતદસદિતિ સિદ્ધમ્ । કિંચ પ્રત્યક્ષેણ ચાપ્રત્યક્ષબાધનાત્ ।
ઇહ પ્રત્યક્ષં બલીય ઇત્યપ્રત્યક્ષસ્ય તેન પ્રત્યાખ્યાનમુપપદ્યતે ।
ભવન્તસ્ત્વપ્રત્યક્ષેન પ્રત્યક્ષં પ્રત્યાચક્ષતે । તસ્માદયુક્તં
નરકલાપાદિવદસતામર્થક્રિયેતિ । સ્વભાવભેદાત્તદસત્ત્વમિતિ ચેત્,
સ્યાદેતત્- યદિ પરમાર્થતો નરકપાલાઃ સ્યુસ્તેષામપિ દુઃખસમ્બન્ધઃ સ્યાત્,
મૂર્તિમત્ત્વાવિશેષાત્ । ન તુ તેષાં બાધાઽસ્તિ । તસ્માદ્ ભ્રાન્તિરસાવિતિ ।
એતદયુક્તમ્ । કસ્માત્ ? કર્મશક્તિવૈચિત્ર્યાત્ । પ્રત્યક્ષમેવ
તાવત્કર્મનિમિત્તો વાગ્બુદ્ધિસ્વભાવાહારવિહારશક્તિભેદભિન્નો વિચિત્રઃ
સંસાર ઉપલભ્યતે । સ નિપુણમવેક્ષિતુમશક્યઃ, ગમ્ભીરત્વાત્ । કિં
પુનરપ્રત્યક્ષકર્મણાં વિપાકવૈશ્વરૂપ્યમતર્કગોચરમસ્મદાદિબુદ્ધયઃ
પરિચ્છેત્સ્યન્તિ ? તસ્માન્મનોરથમાત્રમેતત્ । ધર્માધર્માનુપપત્તિશ્ચ સ્યાત્ ।
યથા સ્વપ્ને બ્રહ્મહત્યાસુરાપાનાગમ્યગમનાદીનામફલત્વમ્, એવમિતરત્રાપિ

સ્યાત્, અસદવિશેષાત્ । મિદ્ધોપઘાતાત્તદ્વિશેષ ઇતિ ચેત્ ન, અવિશેષાત્ । અસત્ત્વે તુલ્યે ક્વચિદુપઘાતઃ ક્વચિન્નેતીચ્છામાત્રમેતત્ । એવં ચેત્ નાસન્તઃ પૃથિવ્યાદયઃ । ન ચેદસન્તો યુક્તમુપદિષ્ટં બુદ્ધીન્દ્રિયાણિ તેષાં પઞ્ચ વિશેષાવિશેષવિષયાણીતિ ॥ ૩૪॥

॥ ઇતિ શ્રીયુક્તિદીપિકાયાં સપ્તમમાહ્નિકમ્ ॥

---

કારિકા ૩૫

---

દ્વારિદ્વારભાવમેષામિદાનીં વક્ષ્યામઃ । તત્ર બાહ્યં કરણં દ્વારમ્, અન્તઃકરણં દ્વારીતિ ।
આહ, કરણાવિશેષાદયુક્તમ્ અન્તઃકરણસ્ય હીન્દ્રિયાનાં ચ કરણત્વમવિશિષ્ટમ્ । તત્ર કો હેતુરન્તઃકરણં દ્વારિ, દ્વારાણીન્દ્રિયાણીતિ ?
ઉચ્યતે-

॥ સાન્તઃકરણા બુદ્ધિઃ સર્વં વિષયમવગાહતે યસ્માત્ ।
તસ્માત્ ત્રિવિધં કરણં દ્વારિ દ્વારાણિ શેષાણિ ॥ ૩૫ ॥

સહાન્તઃકરણેન વર્તતે યા સાઽન્તઃકરણા બુદ્ધિઃ । અહંકારમનોભ્યાં સહિતા બુદ્ધિરિત્યર્થઃ । અત્ર ચાન્તઃકરણગ્રહણેનૈવ બુદ્ધેર્ગ્રહણે સિદ્ધે ભૂયો બુદ્ધિગ્રહણં પ્રાધાન્યખ્યાપનાર્થમ્ । ભવતિ હિ પ્રધાનસ્ય સામાન્યેઽન્તર્ભૂતસ્યાપિ પૃથગુપદેશઃ । તદ્યથા
જગામ તં વનોદ્દેશં વ્યાસઃ સહ મહર્ષિભિઃ ।
ઇતિ મહર્ષિગ્રહણે વ્યાસોઽપ્યન્તર્ભૂતઃ પ્રાધાન્યાત્પૃથગુચ્યતે, એવં સાન્તઃકરણા બુદ્ધિઃ સર્વં વિષયમવગાહતે, વિશિષ્ટાનવિશિષ્ટાંશ્ચ શબ્દાદીન્સન્નિકૃષ્ટવિપ્રકૃષ્ટવ્યવહિતાન્પ્રમાણબલેન સ્વવૃત્તે વિષયીકરોતીત્યર્થઃ । એતદુક્તં ભવતિ અનિયતવિષયો દ્વારી, નિયતવિષયાણિ દ્વારાણિ । તદ્યથા પ્રાસાદસ્ય પૂર્વોત્તરદક્ષિણપશ્ચિમાનાં સ્વદિઙ્નિયમો ન પૂર્વમુત્તરં દક્ષિણં પશ્ચિમં વા કદાચિદ્ભવતિ, તથેતરાણ્યપિ દ્વારીણિ । તત્રાનિયતાઃ સર્વદિગવસ્થિતૈર્દ્વારૈઃ પ્રવર્તન્ત એવમિહાપિ શ્રોત્રાદીનિ સ્વવિષયનિયતાનિ । સાન્તઃકરણા તુ બુદ્ધિઃ સર્વં વિષયમવગાહતે યસ્માત્ તસ્માદનિયતવિષયત્વાદુપપન્નમેતત્ત્રિવિધં કરણં દ્વારિ, દ્વારાણિ શેષાણીતિ ॥ ૩૫॥

## કારિકા ૩૬

॥ એતે પ્રદીપકલ્પાઃ પરસ્પરવિલક્ષણા ગુણવિશેષાઃ ।
કૃત્સ્નં પુરુષસ્યાર્થં પ્રકાશ્ય બુદ્ધૌ પ્રયચ્છન્તિ ॥ ૩૬ ॥

એતે ઇત્યનેન ત્રયમભિસમ્બધ્નાતિ શ્રોત્રાદીનામન્યતમં મનોઽહંકારશ્ચ ।
પ્રદીપકલ્પા ઇત્યનેન પ્રકાશસામ્યં કરણપર્વણ આચષ્ટે, યથા પ્રદીપઃ
પ્રકાશક એવં કરણમપિ, તદ્વ્યાપારે સતિ વિષયાવિર્ભાવાનુપપત્તેઃ ।
પરસ્પરવિલક્ષણ ઇત્યનેન વ્યસ્તવૃત્તિં પૂર્વોક્તામાકર્ષતિ । તથા હ્યેષાં
વૈલક્ષણ્યમનુમીયતે, આલોચનસંકલ્પાભિમાનભેદાત્ । ગુણવિશેષા
ઇત્યનેન સત્ત્વાદીનાં પુરુષવિજ્ઞાનમુદ્દિશ્ય તદ્ભાવેન પરિણામં
ખ્યાપયતિ । કૃત્સ્નં પુરુષસ્યાર્થમિતિ વિશેષાવિશેષલક્ષણં કાર્યં
આહાર્યધાર્યપ્રકાશ્યતયા યથાસમ્ભવં પ્રકાશ્ય સ્વવૃત્ત્યનુગુણં કૃત્વા
વિષયવ્યાપારેણાનુભૂય બુદ્ધાવાધત્તે, અતદ્વિષયતામાપાદયતીત્યર્થઃ ।
કદાચિત્તુ બુદ્ધિરેવ બાહ્યકરણસંકલ્પાભિમાનગૃહીતમ્ । સર્વથા ત્વયં
શાસ્ત્રાર્થો યેન વા તેન કરણેન વિષયમુપાત્તં બુદ્ધિરધ્યવસ્યતિ ।
તથા ચાધ્યવસાયરૂપાપન્નયા ચેતનાશક્તિરનુગૃહ્યતે
ન કરણાન્તરસ્ય પુરુષેણ સમબન્ધોઽસ્તિ । તતશ્ચ દ્વારિણાં
બહુત્વાત્તદ્દર્શનવિશેષસ્વાતન્ત્ર્યસમુચ્ચયાન્તઃકરણપુરુષકર્તૃત્વદોષાણામપ્રસંગઃ
॥ ૩૬॥

## કારિકા ૩૭

આહ, કઃ પુનરત્ર હેતુર્યેન દ્વારિત્વાવિશેષે સત્યહંકારમનસી બુદ્ધૌ
વિષયાધાનં કુરુતો ન પુનરનયોઃ સાક્ષાત્પુરુષેણ સમ્બન્ધ ઇતિ ?
ઉચ્યતે-

॥ સર્વં પ્રત્યુપભોગં યસ્માત્ પુરુષસ્ય સાધયતિ બુદ્ધિઃ ॥

અહંકારમનસોર્હિ, નાસ્તિ નિશ્ચયરૂપતા, સંકલ્પાભિમાનમાત્રરૂપત્વાત્ ।
અનિશ્ચિતવિષયયા ચ કરણવૃત્ત્યા પુરુષસ્ય
સમન્ધોઽનર્થકઃ સ્યાત્ । સ્વયં વા નિશ્ચેતુરસ્ય કર્તૃત્વં સ્યાત્ ।

તતશ્ચામિશ્રનિશ્ચયકારણત્વાદયમપ્યામિશ્રરૂપઃ સ્યાત્ । સર્વં ચૈતદુક્તોત્તરં નિશ્ચયરૂપા હિ બુદ્ધિઃ । અતસ્તદ્વૃત્ત્યુપનિપાતી વિષયઃ સન્નિધાનમાત્રાત્પુરુષેણ સંચેતિતો નાસ્યૌદાસીન્યં બાધિતુમુત્સહતે, નો ખલ્વપ્યાનર્થક્યમનુષજ્યતે । એતદુક્તં સર્વં પ્રત્યુપભોગં યસ્માત્પુરુષસ્ય સાધયતિ બુદ્ધિરિતિ ।

આહ, એવમપિ શબ્દાદિલક્ષણો વિષયઃ પ્રકૃતઃ, સ ચ બુદ્ધ્યા સર્વઃ પ્રતિપાદ્યતે । તત્ર વિષયાન્તરમપ્યસ્તિ પ્રધાનપુરુષાન્તરલક્ષણમ્ । તથા ચાહુઃ । "ઉપભોગસ્ય શબ્દાદ્યુપલબ્ધિરાદિઃ ગુણપુરુષોપલબ્ધિરન્તઃ" । તસ્માત્તત્પ્રતિપત્ત્યર્થં કરણાન્તરં વક્તવ્યમિતિ ।

ઉચ્યતે- ન વક્તવ્યમ્ । કિં કારણમ્ । યસ્માત્

॥ સૈવ ચ વિશિનષ્ટિ પુનઃ પ્રધાનપુરુષાન્તરં સૂક્ષ્મમ્ ॥ ૩૭ ॥

યતો યસ્માત્કારણાત્ સા બુદ્ધિરેવ હિ કાષ્ઠાપન્નેન તમસાઽભિભૂતત્વાદ્ધર્માદીનાં સત્ત્વધર્માણાં પ્રકૃતિભૂતાન્વિકારભૂતાન્પરતન્ત્રાનુપકાર્યાનુપકારકાનચેતનાન્સંસર્ગધર્મિણશ્ચ ગુણાનાત્મત્વેનાધ્યવસ્ય પુરુષાયોપહરતિ । સ ચ મિથ્યાજ્ઞાનાભ્યાસવાસનાનુરઞ્જિતં બુદ્ધિપ્રત્યયમનુરુધ્યમાનો દર્શિતવિષયત્વાત્તથૈવ પ્રતિપદ્યતે । યદા તુ ધર્માદ્યભ્યાસાત્તમોરૂપાગમે સત્યુત્તરોત્તરાણાં સત્ત્વધર્માણમુત્કર્ષસ્તદા વિનિવૃત્તમિથ્યાપ્રત્યયા વૃત્તિઃ । ન પ્રકૃતિવિકારભૂતઃ સ્વતન્ત્રોઽનુપકાર્યોઽનુપકારકશ્ચેતનોઽસંસર્ગધર્મા ચ । તતો વિપરીતાશ્ચ ગુણા ઇતિ શુદ્ધાધ્યવસાયં કરોતિ । પુરુષશ્ચ પરોપહૃતપ્રવૃત્તિત્વાત્તથૈવ પ્રતિપદ્યતે । તદેતદ્ ગુણાનાં પુરુષસ્ય ચાન્તરં દ્વયોરપિ નિશ્ચયસ્વભાવત્વાદસ્માત્પૂર્વોક્તધર્મભેદેઽપિ સતિ સૂક્ષ્મં ગમ્ભીરં દુર્જ્ઞેયમ્ । અતશ્ચ સૂક્ષ્મં યદ્ બુદ્ધિમાત્રમવલમ્બ્ય તદવિશિષ્ટાયાશ્ચેતનાશકક્તેર્ગ્રાહ્યગ્રાહક..... ॥ ૩૭ ॥

---

કારિકા ૩૮

---

વ્યાખ્યાતં કરણપર્વ । કાર્યપર્વેદાનીં વક્તવ્યમ્ । તસ્ય ચ પુરસ્તાદુદ્દેશઃ કૃતઃ- કાર્યં ચ તસ્ય દશધા પઞ્ચ વિશેષા ઇતિ । સામ્પ્રતં તુ નિર્દેશં કરિષ્યામઃ ।

આહ, યદ્યેવં તસ્માદિદમેવ તાવદુચ્યતાં કે વિશેષાઃ, કેઽવિશેષા ઇતિ ।
ઉચ્યતે-

॥ તન્માત્રાણ્યવિશેષાઃ ॥

યાનિ તન્માત્રાણિ પઞ્ચાહંકારાદુત્પદ્યન્તે ઇતિ પ્રાગપદિષ્ટમ્ । તે ખલ્વવિશેષાઃ । કાનિ પુનસ્તન્માત્રાણીત્યુચ્યતે શબ્દતન્માત્રં, સ્પર્શતન્માત્રં, રૂપતન્માત્રં, રસતન્માત્રં, ગન્ધતન્માત્રમિતિ ।
કથં પુનસ્તન્માત્રાણીતિ ?
ઉચ્યતે- તુલ્યજાતીયવિશેષાનુપપત્તેઃ । અન્યે શબ્દજાત્યભેદેઽપિ । સતિ વિશેષા ઉદાતાનુદાત્તસ્વરિતાનુનાસિકાદયસ્તત્ર ન સન્તિ તસ્માચ્છબ્દતન્માત્રમ્ । એવં સ્પર્શતન્માત્રે મૃદુકઠિનાદયઃ । એવં રૂપતન્માત્રે શુક્લકૃષ્ણાદયઃ । એવં રસતન્માત્રે મધુરામ્લાદયઃ । એવં ગન્ધતન્માત્રે સુરભ્યાદયઃ । તસ્માત્તસ્ય તસ્ય ગુણસ્ય સામાન્યમેવાત્ર, ન વિશેષ ઇતિ તન્માત્રાસ્વેતેઽવિશેષાઃ ।
આહ, અથ કે પુનર્વિશેષા ઇતિ ?
ઉચ્યતે- યાનિ ખલુ

॥ તેભ્યો ભૂતાનિ પઞ્ચ પઞ્ચભ્યઃ ॥

ઉત્પદ્યન્તે

॥ એતે સ્મૃતા વિશેષાઃ ॥

તત્ર શબ્દતન્માત્રાદાકાશમ્, સ્પર્શતન્માત્રાદ્વાયુઃ, રૂપતન્માત્રાત્તેજઃ, રસતન્માત્રાદાપઃ, ગન્ધતન્માત્રાત્પૃથિવી । તેભ્યો ભૂતાનીત્યેતાવતિ વક્તવ્યે પઞ્ચ પઞ્ચભ્ય ઇતિ ગ્રહણં સમસંખ્યાકતસ્તદુત્પત્તિજ્ઞાપનાર્થમ્ । તેનૈકૈકસ્માત્તન્માત્રાદેકૈકસ્ય વિશેષસ્યોત્પત્તિઃ સિદ્ધા ।
તતશ્ચ યદન્યેષામાચાર્યાણામભિપ્રેતમ્ એકલક્ષણેભ્યસ્તન્માત્રેભ્યઃ પરસ્પરાનુપ્રવેશાદેકોત્તરા વિશેષાઃ સૃજ્યન્ત ઇતિ તત્પ્રતિષિદ્ધં ભવતિ । કિન્તર્હિ અન્તરેણાપિ તન્માત્રાનુપ્રવેશમેકોત્તરેભ્યો ભૂતેભ્ય એકોત્તરાણાં ભૂતવિશેષાણામુત્પત્તિઃ । તત્ર શબ્દગુણાચ્છબ્દતન્માત્રાદાકાશમેકગુણમ્, શબ્દસ્પર્શગુણાત્સ્પર્શતન્માત્રાદ્દ્વિગુણો વાયુઃ, શબ્દસ્પર્શરૂપગુણાદ્રૂપતન્માત્રાત્ત્રિગુણં તેજઃ, શબ્દસ્પર્શરૂપરસગુણાદ્રસતન્માત્રાચ્ચતુર્ગુણા આપઃ, શબ્દસ્પર્શરૂપરસગન્ધાદ્ ગન્ધતન્માત્રાત્પઞ્ચગુણા પૃથિવી ।

અત્ર ચ વાયોઃ શીતઃ સ્પર્શ અપાં ચ, તેજસ ઉષ્ણઃ, અનુષ્ણાશીતઃ પૃથિવ્યાઃ । રૂપં ચ શુક્લં ભાસ્વરં ચ તેજસોઽપાં ચ, કૃષ્ણં પૃથિવ્યાઃ । રસો મધુરોઽપામ્, સાધારણઃ પૃથિવ્યાઃ । ગન્ધસ્તુ પાર્થિવ એવ તદવયવાનુપ્રવેશાદ્ભૂતાન્તરેષૂપલભ્યતે । ઇત્યેતે પૃથિવ્યાદીનાં ધર્માઃ । અન્યે ચ પરસ્પરાનુગ્રાહકાઃ । કે પુનસ્ત ઇત્યાહ-

આકારો ગૌરાં રૌક્ષ્યં વરણં સ્થૈર્યમેવ ચ ।
સ્થિતિભેદઃ ક્ષમા કૃષ્ણચ્છાયા સર્વોપભોગ્યતે ॥

ઇતિ તે પાર્થિવા ધર્માસ્તદ્વિશિષ્ટાસ્તથા પરે ।
જલાગ્નિપવનાકાશવ્યાપકાસ્તાન્નિબોધત ॥

સ્નેહઃ સૌક્ષ્મ્યં પ્રભા શૌક્લ્યં માર્દવં ગૌરવં ચ યત્ ।
શૈત્યં રક્ષા પવિત્રત્વં સન્તાનશ્ચૌદકા ગુણાઃ ॥

ઊર્ધ્વગં પાવકં દગ્ધૃ પાચકં લઘુ ભાસ્વરમ્ ।
પ્રધ્વંસ્યોજસ્વિતા જ્યોતિઃ પૂર્વાભ્યાં સવિલક્ષણમ્ ॥

તિર્યગ્ગતિઃ પવિત્રત્વમાક્ષેપો નોદનં બલમ્ ।
રૌક્ષ્યમચ્છાયતા શૈત્યં વાયોર્ધર્માઃ પૃથગ્વિધાઃ ॥

સર્વતોગતિરવ્યૂહો વિષ્કમ્ભશ્ચેતિ તે ત્રયઃ ।
આકાશધર્મા વિજ્ઞેયાઃ પૂર્વધર્મવિરોધિનઃ ॥

સંહતાનાં તુ યત્કાર્યં સામાન્યં તે ગવાદયઃ ।
ઇતરેતરધર્મેભ્યો વિશેષાન્નાત્ર સંશયઃ ॥

તત્રાકારાદિધર્મૈઃ પૃથિવ્યા લોકસ્ય ચોપક્રિયતે ભૂતાન્તરાણાં ચ । તત્રાકારાત્તાવત્ ગવાદીનાં ઘટાદીનાં ચાકારનિર્વૃત્તિઃ ગૌરવાદેષામવસ્થાનમ્ । રૌક્ષ્યાદપાં સંગ્રહો વૈશદ્યં ચ ભૂતાનામ્ । વરણાદનભિપ્રેતાનાં છાદનમ્ । સ્થૈર્યાદ્વૃત્તિઃ પ્રજાનાં ભૂતાન્તરાણાં ચ । સ્થિતેર્માત્રાદિસન્નિધાનાદ્યનુગ્રહઃ । ભેદાદ્ઘટાદિનિષ્પત્તિઃ । વ્યૂહશ્ચાવયવાનામ્ । ક્ષાન્તેરુપભોગભોગ્યતા । કૃષ્ણચ્છાયત્વાદ્રાત્રિસમ્પચ્છાયાકાર્યપ્રસિદ્ધિશ્ચ । સર્વોપભોગ્યત્વાત્સર્વભૂતાનુગ્રહઃ । એવં સ્નેહાદિભિર્લોકસ્યોપકારઃ ક્રિયતે ભૂતાન્તરાણાં ચ । સ્નેહાદ્રૂપસમ્પદ્વાયુપ્રતીકારોઽગ્નિશમનં સંગ્રહશ્ચ પૃથિવ્યાઃ । સૌક્ષ્મ્યાદનુપ્રવેશઃ । શૌક્લ્યાચ્ચન્દ્રાદ્વિનિર્વૃત્તિઃ । માર્દવાત્સ્નાનાવગાહનમેકક્રિયા કઠિનાનામ્ ચાવનામનમ્ । ગૌરવાત્સન્તાનાચ્ચ

ભૂતાનુગ્રહાર્થં સ્રોતસ્ત્વમ્ । શૈત્યાદુષ્ણપ્રતીકારઃ । રક્ષાતઃ પ્રજાસુ ઘોરશમનમ્ । પવિત્રત્વાદ્ધર્મોપચયઃ શૌચવિધિરલક્ષ્યોપઘાતશ્ચ । સન્તાનાદ્દ્રવ્યસંઘાતઃ । તથોર્ધ્વગત્યાદિભિર્ધર્મમાત્રૈસ્તેજસાં લોકસ્ય ચોપક્રિયતે ભૂતાન્તરાણાં ચ । ઊર્ધ્વગતેઃ પાકપ્રકાશસિદ્ધિઃ । પાવકત્વાદ્ દ્રવ્યશૌચં ચ । દાહકત્વાત્ક્ષારોત્પત્તિઃ । શીતપ્રતીકારો નભસશ્ચોષ્ણત્વં શબ્દનિષ્પત્ત્યર્થમ્ । પાચકત્વાત્સ્વેદં સ્વેદનમન્નપક્તિઃ પૃથિવ્યવયવાનાં ક્રિયાયોગ્યતા, તથા બાહ્યાન્તરપરિણામઃ, રસલોહિતમાંસસ્નાય્વસ્થિમજ્જાશુક્રાણાં લાઘવાદ્વાહ્યાતિક્રમઃ । ભાસ્વરત્વાદ્દ્રવ્યાન્તરપ્રકાશનમ્ । પ્રધ્વંસિત્વાદ્ગ્ધપક્વાનામુપભોગઃ । તૈજસઃ પ્રજાપાલનમ્ । તથા તિર્યક્પાતાદિભિર્ધર્મૈર્વાયુના લોકસ્ય ચોપકારઃ ક્રિયતે ભૂતાન્તરાણાં ચ । તિર્યક્પાતાદૃષ્ટિવિક્ષેપો ગન્ધસંવહનં ચ । પવિત્રત્વાત્પૂતિદ્રવ્યપવનમ્ । આક્ષેપનોદનાભ્યામુત્કર્ષઃ પ્રથમં ધર્મામ્ભસઃ । વ્યૂહશ્ચ શરીરે રસાદીનાં ધાતૂનાં ચ । અગ્નેશ્ચોપધ્માનમભિઘાતશ્ચાકાશસ્ય । બલાત્સમીકરણં સર્વેષામ્ । રૌક્ષ્યાદ્વિશોષણમ્ । અચ્છાયત્વાદહોરાત્રપ્રસિદ્ધિઃ । શૈત્યાદુષ્ણપ્રતીકારઃ । તથા સર્વતોગત્યાદિભિર્ધર્મૈર્નભસા લોકસ્યોપકારઃ ક્રિયતે ભૂતાન્તરાણાં ચ । સર્વતોગતેઃ સમન્તાત્તુલ્યદેશશ્રવણનામેકશ્રુતિત્વમ્ । અવ્યૂહવિષ્કમ્ભાભ્યાં સર્વેષામવકાશતાદાનમિત્યુક્તાઃ પૃથિવ્યાદયઃ । એતે વિશેષા ઇત્યુચ્યન્ત ઇતિ ।

આહ, કથં પુનરેતે વિશેષા ઇત્યુચ્યન્તે ?

યસ્માત્

॥ શાન્તા ઘોરાશ્ચ મૂઢાશ્ચ ॥ ૩૮ ॥

તત્ર શાન્તાસ્તાવત્ સ્વસંસ્કારવિશેષયોગાત્તત્સન્નિધૌ પ્રસાદાદિધર્મોત્પત્તેઃ । ઘોરાસ્તુ શેષાદિધર્મનિમિત્તત્વાત્ । મૂઢાશ્ચ વરણાદિધર્મહેતુત્વાત્ । તન્માત્રાણિ પુનરશાન્તઘોરમૂઢાનિ અતોઽવિશેષા ઇત્યુચ્યન્તે । તદેતે યથા વ્યાખ્યાતા અવિશેષા વિશેષાઃ પુરુષાર્થસિદ્ધ્યર્થં બહુધા વ્યવતિષ્ઠન્તે । કસ્માત્ ? ન હ્યેતેષામેકધાઽવસ્થાને પુરુષાર્થઃ સિદ્ધ્યતીતિ ॥ ૩૮॥

---

કારિકા ૩૯

---

આહ, અતિસામાન્યોક્તમિદમિત્યતો ન પ્રતિપદ્યામહે । તસ્માદ્વક્તવ્યં કથં

વિશેષણામવસ્થાનમિતિ ?

ઉચ્યતે-

॥ સૂક્ષ્મા માતાપિતૃજાઃ સહ પ્રભૂતૈસ્ત્રિધા વિશેષાઃ સ્યુઃ ॥

તત્ર સૂક્ષ્મા નામ ચેષ્ટાશ્રિતં પ્રાણાષ્ટકં સંસરતિ । માતૃપિતૃજાસ્તુ દ્વિવિધાઃ । જરાયુજા અણ્ડજાશ્ચ । તેષાં કોશોપહૃતાઃ કોશાઃ લોમરુધિરમાંસાસ્થિસ્નાયુશુક્રલક્ષણઃ । તત્ર લોમરુધિરમાંસાનાં માતૃતઃ સમ્ભવઃ । અસ્થિસ્નાયુશુક્રાણાં પિતૃતઃ । તત્રૈવાશિતપીતાધ્યાસા દષ્ટૌ કોશાનપરે વ્યાચક્ષતે ।

કથં પુનરેષાં કોશત્વમ્ ?

આવેષ્ટનસામર્થ્યાત્ । યથા કોશકારઃ કોશેનાવેષ્ટિતોઽસ્વતન્ત્રઃ, એવં સૂક્ષ્મશરીરં સપ્રાણમેતૈરાવેષ્ટિતમસ્વતન્ત્રં તત્તત્કર્મોપચિનોતિ ।

પ્રભૂતાસ્તૂદ્ભિજ્જાઃ સ્વેદજાશ્ચ

તદેતૈસ્ત્રિવિધૈર્દૈવમાનવતૈર્યગ્યોનલક્ષણસ્ત્રિવિધો ભૂતસર્ગ આરભ્યતે । તત્ર દેવાનાં ચતુર્વિધં શરીરં પ્રધાનાનુગ્રહાત્, યથા પરમર્ષેર્વિરિઞ્ચસ્ય ચ । તત્સિદ્ધિભ્યો યથા બ્રહ્મણઃ પુત્રાણાં તત્પુત્રપુત્રાણાં ચ । માતાપિતૃતો યથાઽદિતેઃ કશ્યપસ્ય ચ પુત્રાણામ્ । કેવલાદ્વા યથા પિતૃતો મિત્રાવરુણાભ્યાં વશિષ્ઠસ્ય । મનુષ્યાણાં તુ જરાયુજમ્ । ધર્મશક્તિવિશેષાત્તુ કસ્યચિદન્યથાઽપિ ભવતિ । યથા દ્રોણકૃપકૃપીધૃષ્ટદ્યુમ્નાદીનામ્ । તિર્યગ્યોનીનામપિ ચતુર્વિધમ્

જરાયુજં ગવાદીનામણ્ડજં ચૈવ પક્ષિણામ્ ।

તૃણાદેશ્ચોદ્ભિજ્જં ક્ષુદ્રજન્તૂનાં સ્વેદજં સ્મૃતમ્ ॥

એવં ત્રિવિધા વિશેષા વ્યાખ્યાતાઃ ।

તત્ર કેચિન્નિયતાઃ કેચિદનિયતા ઇત્યાહ- કે પુનરત્ર નિયતાઃ, કે વાઽનિયતાઃ ?

॥ સૂક્ષ્માસ્તેષાં નિયતા માતાપિતૃજા નિવર્તન્તે ॥ ૩૯ ॥

સૂક્ષ્મા આસર્ગપ્રલયાન્નિત્યાઃ માતૃપિતૃજા નિવર્તન્તે । સહ પ્રભૂતૈરિતિ વર્તતે । કેચિત્તુ પ્રભૂતગ્રહણેન બાહ્યાનામેવ વિશેષાણાં ગ્રહણમિચ્છન્તિ । તેષામુદ્ભિજ્જસ્વેદજયોરગ્રહણમ્ । તસ્માદુભયથા પ્રભૂતા ઇત્યેતદનવદ્યમ્ ।

આહ, સૂક્ષ્માભિધાનમપ્રસિદ્ધત્વાત્ । માતાપિતૃજાશ્ચ પ્રભૂતાશ્ચ

ઇત્યતો યુક્ત એષાં પરિગ્રહઃ । સૂક્ષ્માસ્ત્વપ્રસિદ્ધા । તસ્માદ્વક્તવ્યં કથમેષામુત્પત્તિરસ્તિત્વં વેતિ ?
ઉચ્યતે- પૂર્વસર્ગે પ્રકૃતેરુપપન્નાનાં પ્રાણિનાં સત્ત્વધર્મોત્કર્ષાદન્તરેણ દ્વયસમાપત્તિં મનસૈવાપત્યમન્યદ્વા યથેપ્સિતં પ્રાદુર્બભૂવ । પ્રિયં ખલ્વપિ ચક્ષુષા નિરીક્ષ્ય કૃતાર્થમાત્માનં મન્યતે । તસ્યામપિ ક્ષીણાયાં વાક્સિદ્ધિર્બભૂવ । અભિભાષ્ય પ્રાણિનો યદિચ્છન્તિ તદાપાદયન્તિ । તદદ્યાપ્યનુવર્તતે- યચ્છઙ્ખી વિરુતેનાપત્યં બિભર્તિ । પ્રિયં ખલ્વપિ સમ્ભાષ્ય મહતીં પ્રીતિમનુભવતિ । તસ્યામુપક્ષીણાયાં હસ્તસિદ્ધિર્બભૂવ । સંસ્પૃશ્ય પાણિમીપ્સિતમર્થમુપપાદયન્તિ । તદેતદદ્યાપ્યનુવર્તતે- યત્પ્રિયં ચિરાદાલોક્ય પાણૌ સંસ્પૃશ્ય પ્રીતિર્ભવતિ । અસ્યામુપક્ષીણાયામાશ્લેષસિદ્ધિર્બભૂવ । આલિઙ્ગનેન પ્રાણિન ઈપ્સિતં લભન્તે । તદેતદદ્યાપ્યનુવર્તતે- યત્પ્રિયમાલિઙ્ગ્ય નિર્વૃત્તિર્ભવતિ । તસ્યામુપક્ષીણાયાં દ્વન્દ્વસિદ્ધિરારબ્ધા । સ્ત્રીપુંસૌ સંધૃષ્યાપત્યમુત્પાદયેતાં મમેદં મમેદમિતિ ચ પરિગ્રહાઃ પ્રવૃત્તાઃ । એતસ્મિન્નેવાવસરે સંસારો વર્ણ્યતે ।
તત્ર ચાચાર્યાણાં વિપ્રતિપત્તિઃ । પઞ્ચાધિકરણસ્ય તાવદ્વૈવર્તં શરીરં માતાપિતૃસંસર્ગકાલે કરણાવિષ્ટં શુક્રશોણિતમનુપ્રવિશતિ । તદનુપ્રવેશાચ્ચ કલલાદિભાવેન વિવર્ધતે । વ્યૂઢાવયવં તૂપલબ્ધપ્રત્યયં માતુરુદરાન્નિસ્સૃત્ય યૌ ધર્માધર્મૌ ષટ્સિદ્ધ્યુપભોગકાલે કૃતૌ તદ્વશાદવતિષ્ઠતે । યાવત્તત્ક્ષયાચ્છરીરપાતસ્તાવત્ । યદિ ધર્મસંસ્કૃતં કરણં તતો દ્યુદેશં સૂક્ષ્મશરીરેણ પ્રાપ્યતે, તદ્વિપર્યયાત્તુ યાતનાસ્થાનં તિર્યગ્યોનિં વા, મિશ્રીભાવેન માનુષ્યમ્ । એવમાતિવાહિકં સૂક્ષ્મશરીરમિન્દ્રિયાણાં ધારણપ્રાપણસમર્થં નિત્યં બાહ્યેનાપાયિના પરિવેષ્ટ્યતે પરિત્યજ્યતે ચ । પતઞ્જલેસ્તુ સૂક્ષ્મશરીરં યત્સિદ્ધિકાલે પૂર્વમિન્દ્રિયાણિ બીજદેશં નયતિ તત્ર તત્કૃતાશયવશાત્ દ્યુદેશં યાતનાસ્થાનં વા કરણાનિ વા પ્રાપય્ય નિવર્તતે । તત્ર ચૈવં યુક્તાશયસ્ય કર્મવશાદન્યદુત્પદ્યતે યદિન્દ્રિયાણિ બીજદેશં નયતિ તદપિ નિવર્તતે, શરીરપાતે ચાન્યદુત્પદ્યતે । એવમનેકાનિ શરીરાણિ । વિન્ધ્યવાસિનસ્તુ વિભુત્વાદિન્દ્રિયાણાં બીજદેશે વૃત્ત્યા જન્મ । તત્ત્યાગો મરણમ્ । તસ્માન્નાસ્તિ સૂક્ષ્મશરીરમ્ । તસ્માન્નિર્વિશેષઃ સંસાર ઇતિ પક્ષઃ । એષા સૂક્ષ્મશરીરસ્યોત્પત્તિઃ ॥ ૩૯॥

કારિકા ૪૦

આહ, એવમનેકનિશ્ચયેષ્વાચાર્યેષુ ભવતઃ કા પ્રતિપત્તિરિતિ ?
ઉચ્યતે- યત્તાવત્પતઞ્જલિરાહ સૂક્ષ્મશરીરં વિનિવર્તતે
પુનશ્ચાન્યદુત્પદ્યતે, તત્ સૂક્ષ્માસ્તેષાં નિયતા ઇતિ
વચનાદસ્માભિર્નાભ્યુપગમ્યતે । તસ્માત્

॥ પૂર્વોત્પન્નમસક્તં નિયતં મહદાદિસૂક્ષ્મપર્યન્તમ્ ।
સંસરતિ નિરુપભોગં ભાવૈરધિવાસિતં લિઙ્ગમ્ ॥ ૪૦ ॥

તત્ર પૂર્વોત્પન્નમિત્યનેન મહદાદેઃ સૂક્ષ્મપર્યન્તસ્ય
લિઙ્ગસ્યાસર્ગપ્રલયાન્નિત્યત્વમાહ । અસક્તમિત્યનેન
ગૂઢસ્થિરબીજાનુપ્રવેશમાચષ્ટે । ન હિ લિઙ્ગં ક્વચિદ્વ્યાહન્યતે,
કિં તર્હિ લિક્ષાદિ બીજમપ્યાવિશતિ । બદરગોલમપિ ભિત્વા પ્રવિશતિ ।
નિયતમિત્યનેન પ્રતિપુરુષવ્યવસ્થાં પ્રતિજાનાતિ । સાધારણો
હિ મહાન્પ્રકૃતિત્વાદિતિ વાર્ષગણાનાં પક્ષઃ । મહદાદીત્યનેન
પ્રાણાષ્ટકં પરિગૃહ્ણાતિ પૂર્વાત્માનઃ પ્રાણાદ્યાશ્ચ પઞ્ચ વાયવ ઇતિ ।
સૂક્ષ્મપર્યન્તમિતિ તત્ત્વાન્તરપ્રતિષેધમાહ, એતાવદેવ નાતોઽન્યદિતિ ।
સંસરતીતિ ગતિમાચષ્ટે, તતશ્ચાવિભુત્વાદ્ બીજાવેશત્યાગૌ
પ્રખ્યાતો ભવતઃ । નિરુપભોગમિતિ શરીરાન્તરસ્યાવકાશં
કરોતિ । સૂક્ષ્મશરીરસ્ય હ્યુપભોગસામર્થ્યેઽભ્યુપગમ્યમાને
શરીરાન્તરસ્ય નિરવકાશત્વાદનુત્પત્તિપ્રસંગઃ સ્યાત્ ।
ભાવૈરધિવાસિતમિત્યનેન ભાવાષ્ટકપરિગ્રહં દ્યોતયતિ । બુદ્ધિરૂપૈરિહ
ધર્માદિભિરધિવાસિતમ્ । તત્સામર્થ્યાત્સર્વત્રાપ્રતિહતં પ્રાણાષ્ટકં
સૂક્ષ્મશરીરેઽવસ્થાનગમનમાત્રફલે વ્યવસ્થિતમ્ । દ્યુતિર્યક્પ્રેતેષુ
સંસરતીતિ તેનૈવ ચાર્થસિદ્ધૌ શરીરાન્તરપરિકલ્પનાઽનર્થક્યમતો
ન બહૂનિ શરીરાણિ ॥ ૪૦ ॥

કારિકા ૪૧

યત્પુનરેતદુક્તમ્- વિભુત્વાદિન્દ્રિયાણાં સ્વાત્મન્યવસ્થાનં

વૃત્તિલાભો વૃત્તિનિરોધશ્ચ સંસાર ઇતિ, અયુક્તમેતત્ । કસ્માત્
? વિભુત્વાસિદ્ધેઃ । ન હિ વિભુત્વમિન્દ્રિયાણાં કશ્ચિદભ્યુપગચ્છતિ ।
કિં કારણમ્ ? સતતોપલબ્ધિપ્રસંગાત્ । યુગપદુપલબ્ધિપ્રસંગાચ્ચ ।
કાર્યકરણપુરુષાણાં હિ વિભુત્વે સતતોપલબ્ધિપ્રસંગઃ । વિષયાણાં
પ્રતિબન્ધાભાવાત્પ્રસજ્યતે । પ્રાત્યવિશેષાચ્ચ સર્વવિશેષાણાં
યુગપદુપલબ્ધિપ્રસંગઃ । વ્યવહિતવિષયગ્રહણં ચ । સર્વત્ર
સન્નિધાનાત્સન્નિકૃષ્ટવિપ્રકૃષ્ટયોઃ પ્રત્યક્ષાનુમાનાગમાનાં ચાવિશેષઃ
પ્રસજ્યતે । વૃત્તિવિશેષાત્તદ્વિશેષ ઇતિ ચેત્ ન, હેત્વભાવાત્ ।
વિભૂનામિહાસ્તિ વૃત્તિવિશેષ ઇત્યત્ર હેતુરનુક્તઃ । તસ્માન્ન કરણાનાં
વિભુત્વમુપપદ્યતે । તસ્માત્

॥ ચિત્રં યથાઽઽશ્રયમૃતે સ્થાણ્વાદિભ્યો વિના યથા ચ્છાયા ।
તદ્વદ્વિના વિશેષૈર્ન તિષ્ઠતિ નિરાશ્રયં લિઙ્ગમ્ ॥ ૪૧ ॥

યથા હિ ચિત્રસ્ય કુડ્યમૃતેઽવસ્થાનં નાસ્તિ, સ્થાણુપુરુષાદિભ્યો વા
વિના ચ્છાયાયાઃ તદ્વદ્વિના વિશેષૈર્ન તિષ્ઠતિ નિરાશ્રયં લિઙ્ગમ્ ।
તસ્માદુપપન્નમેતત્ સવિશેષઃ સંસારઃ ।
આહ, યદિ સવિશેષઃ સંસારબીજદેશગમને શરીરમુપલભ્યેત । ન ત્વેવમ્ ।
તસ્માદયુક્તમેતત્ ।
ઉચ્યતે- ન, વિશેષિતત્વાત્ । સૂક્ષ્મં તચ્છરીરમિતિ વિશેષિતમ્ । તતો
નાસ્યાહેતુકમગ્રહણમિતિ ।
આહ, સૂક્ષ્મશરીરયોગાત્પૂર્વેશ્વરત્વપ્રસંગઃ । તસ્માદયુક્તં
તન્નિમિત્તમસ્યાગ્રહણમિતિ ।
ઉચ્યતે- ન અનેકાન્તાત્ । તદ્યથા ક્ષુદ્રજન્તૂનાં સૂક્ષ્મશરીરં લઘિમા ચ,
ન ચૈષામીશ્વરત્વમેવં સર્વપ્રાણિનાં સ્યાત્ । અથ મતમગૃહ્યમાણેન
સમ્બન્ધાત્ સ્થૂલસ્યાપિ શરીરસ્યાગ્રહણં પ્રેતાગ્જનસિદ્ધમાલ્યાદિવત્ ।
તદપ્યનુપપન્નમ્ । અનેકાન્તાત્ । તદ્યથા કરણૈરગૃહ્યમાણૈઃ
શરીરસ્ય સમ્બન્ધઃ । ન ચાગ્રહણમ્, પિશાચાદિભિર્વા તથૈતદપિ
સ્યાત્ । કિંચ અન્તઃકરણાનુવિધાને ચૈશ્વર્યાભિમાનાત્ । યસ્ય
ચાધ્યવસાયમનુવિદધત્યણિમાદીનિ તસ્યૈશ્વર્યમભિપ્રેતમ્ । ન તુ યસ્ય
સ્વભાવસિદ્ધાનિ । અન્યથા તુ પિપીલિકાદીનામપ્યાકાશગમનાદૈશ્વર્યં સ્યાત્ ।
આહ, ન, શરીરાનુપપત્તિપ્રસંગાત્ । સૂક્ષ્મશરીરોત્પત્તૌ તર્હિ ચરિતાર્થયોઃ
શરીરાન્તરસામર્થ્યં વિરુધ્યતે । તસ્માદયુક્તમ્ સવિશેષઃ સંસારઃ ।

ઉચ્યતે- ન અનભ્યુપગમાત્ । ન ધર્માધર્મનિમિત્તં વૈવર્તં શરીરમ્, કિં તર્હિ આધિકારિકમિત્યદોષઃ । ન ચાનેકશરીરત્વમભ્યુપગમ્યતે । તસ્માત્પક્ષાન્તરોપાલમ્ભોઽયમ્ । કિં ચ કૃત્સ્નાશયપરિણામાપ્રતિજ્ઞાનાત્ । કૃત્સ્નસ્યાશયસ્ય પરિણામં જાનન્નેવમુપાલભ્યઃ સ્યાદેકદેશસ્તુ નો વિપરિણામી । તસ્માન્ન કિંચિદેતત્ । નિમિત્તાવશેષાદાશયૈકદેશાભિવ્યક્તિરયુક્તેતિ ચેત્, સ્યાન્મતમ્- ઇહ નિમિત્તાનામલ્પબહુત્વવિશેષાદાશયાભિવ્યક્તિવિશેષો દૃષ્ટઃ । તદ્યથા વાય્વાદિક્રોધાદિષુ । પ્રાયણકાલશ્ચાયં ફલાભિવ્યક્તૌ નિમિત્તમ્ । અવિશિષ્ટશ્ચાસૌ । તસ્માદાશયૈકદેશપરિણામોઽનુપપન્ન ઇતિ । એતચ્ચાયુક્તમ્ । કસ્માત્ ? નૈમિત્તિકત્વાત્ । પૂર્વકૃતસ્ય કર્મણઃ ફલભોગપરિસમાપ્તિઃ, સામ્પ્રતસ્ય ચ ફલોપભોગાર્થવિપરિણામઃ પ્રાયણસ્ય નિમિત્તમ્ । ન તુ પ્રાયણો વિપરિણમસ્યેતિ । કિંચ શરીરાન્તરાભાવશ્ચ । કૃત્સ્નસ્યાશયસ્યાભિવ્યક્તિમિચ્છતઃ શરીરાન્તરાભાવો નિમિત્તાન્તરાભાવાત્પ્રાપ્નોતિ । તત્ર કૃતેનેતિ ચેત્ ન, કલલાદ્યવસ્થાનાશે તદસમ્ભવાત્ । તત્ર કૃતાભ્યાં હિ બીજાવેશઃ કરણસ્ય નિષ્પાદિતો યાવત્કલલાદ્યસ્થાયામેવ તચ્છરીરં વિનષ્ટમિતિ તત્ર કૃતાશયસ્યાસમ્ભવાચ્છરીરાન્તરાનુપપત્તિપ્રસંગઃ । કિં ચ સ્થાવરાણાં ચ શરીરાન્તરાસમ્ભવઃ । આશયસ્ય સ્થાવરશરીરારમ્ભે ચરિતાર્થત્વાત્સ્થાવરશરીરેણ ચાશયોપાદાનસમ્ભવાત્તસ્ય સંસારાભાવઃ પ્રાપ્તઃ । તસ્માદુપપન્નમેતત્પુરુષાર્થમાદિસર્ગોત્પન્નં સૂક્ષ્મશરીરં સંસરતિ । યાવચ્ચ સ પુરુષાર્થો ન પરિસમાપ્યતે તાવત્તિષ્ઠત ઇતિ ॥ ૪૧॥

## કારિકા ૪૨

આહ, યદિ પુરુષાર્થા લિઙ્ગસ્યોત્પત્તિરભ્યુપગમ્યતે તત્સમનન્તરમેવાનેન પુરુષાર્થોઽવસાયયિતવ્યો ન પુનર્દેવમાનુષતિર્યગ્ભાવેન પુનઃ પુનરાજઞ્જવીભાવોઽનુષ્ઠાતવ્ય ઇતિ ।

ઉચ્યતે-

॥ પુરુષાર્થહેતુકમિદં નિમિત્તનૈમિત્તિકપ્રસઙ્ગેન ।
પ્રકૃતેર્વિભુત્વયોગાન્નટવદ્ વ્યવતિષ્ઠતે લિઙ્ગમ્ ॥ ૪૨ ॥

યદ્યપિ પુરુષાર્થસિદ્ધ્યર્થં લિઙ્ગમુત્પદ્યતે, તથાપિ સત્ત્વરજસ્તમસાં
ત્રયાણામપિ પ્રાધાન્યાદ્રજસ્તમોભ્યામભિભૂતે સત્ત્વે તત્પ્રેરિતં
નિમિત્તનૈમિત્તિકશરીરેન્દ્રિયવિષયોપભોગનિર્વર્તકં શ઼ૃણોતિ ।
તદ્યથા અગ્નિહોત્રં જુહુયાત્સ્વર્ગકામો, યમરાજ્યમગ્નિષ્ટોમેનાભિજયતીતિ ।
તત્ર ફલેચ્છયા યોનીઃ પ્રાણાદીંશ્ચ સમ્મુખીકૃત્ય ક્રિયામારભતે ।
ગુણવૃત્તવૈચિત્ર્યાચ્ચ પ્રયત્નવાનપિ મનોવાગ્દેહૈર્મલિનમપિ કર્મ
કરોતિ । તતશ્ચ પ્રકૃતેર્વિભુત્વયોગાત્તેન તેન નિમિત્તેનોપસ્થાપિતં
દેવમનુષ્યતિર્યક્પ્રેતાદિશરીરમેકસ્વભાવમપિ સન્નટવદ્વ્યવતિષ્ઠતે
લિઙ્ગમાકૃતિવિશેષોપાદાનત્યાગસામ્યતઃ । વિભુત્વં ગુણાનાં ત્રયાણામપિ
સામ્યાદિતરેતરાભિભવો દૃષ્ટઃ । તસ્માદ્ભાવનિમિત્તઃ સંસારઃ ।
તન્નિમિત્તાનુપાદાનાન્મોક્ષઃ ॥ ૪૨॥

---

કારિકા ૪૩

---

આહ, ભાવા ઇતિ તત્ર ભવતાઽભિધીયતે, ન ચાસ્ય શબ્દસ્યાર્થં
પ્રતિપદ્યામહે । તસ્માદ્વક્તવ્યમિદં કે પુનરમી ભાવા ઇતિ ?
ઉચ્યતે- ધર્માદ્યા ભાવાઃ । ધર્મો જ્ઞાનં
વૈરાગ્યમૈશ્વર્યમધર્મોઽજ્ઞાનમવૈરાગ્યમનૈશ્વર્યમિત્યેતે ભાવાઃ ।
તત્રાચાર્યાણાં વિપ્રતિપત્તિઃ । પઞ્ચાધિકરણસ્ય તાવદ્દ્વિવિધં જ્ઞાનં
પ્રાકૃતિકં વૈકૃતિકં ચ । પ્રાકૃતિકં ત્રિવિધં- તત્ત્વસમકાલં
સાંસિદ્ધિકમાભિષ્યન્દિકં ચ । તત્ર તત્ત્વસમકાલં સંહતશ્ચ
મહાંસ્તત્ત્વાત્મના મહતિ પ્રત્યયો ભવતિ । ઉત્પન્નકાર્યકારણસ્ય તુ
સાંસિદ્ધિકમાભિષ્યન્દિકં ચ ભવતિ । સાંસિદ્ધિકં યત્સંહતવ્યૂહસમકાલં
નિષ્પદ્યતે, યથા પરમર્ષેર્જ્ઞાનમ્ । આભિષ્યન્દિકં ચ
સંસિદ્ધકાર્યકરણસ્ય કારણાન્તરેણોત્પદ્યતે । વૈકૃતં તુ દ્વિવિધં
સ્વવૈકૃતં પરવૈકૃતં ચ । સ્વવૈકૃતં તારકમ્ । પરવૈકૃતં
સિદ્ધ્યન્તરાણિ । આહ ચ
તત્ત્વસમં વૈવર્તમ્ તત્રાભિષ્યન્દિકં દ્વિતીયં સ્યાત્ ।
વૈકૃતમતસ્તૃતીયં ષાટ્કૌશિકમેતદાખાતમ્ ॥

અત્ર તુ સત્ત્વૈઃ સહોત્પત્ત્યવિશેષાત્સાંસિદ્ધિકમભેદેનાહ-
વૈકૃતમપિ ચ દ્વિવિધં સ્વવૈકૃતં તત્ર તારકં ભવતિ ।

સ્યાત્સપ્તવિધં પરવૈકૃતં સ્વતારાદિ નિર્દિષ્ટમ્ ॥

ઇતિ યથા જ્ઞાનમેવં ધર્માદયોऽપીતિ ।
વિન્ધ્યવાસિનસ્તુ નાસ્તિ તત્ત્વસમં સાંસિદ્ધિકં ચ । કિં તર્હિ
સિદ્ધિરૂપમેવ । તત્ર પરમર્ષેરપિ સર્ગસંઘાતવ્યૂહોત્તરકાલમેવ
જ્ઞાનં નિષ્પદ્યતે યસ્માદ્ ગુરુમુખાભિપ્રતિપત્તેઃ પ્રતિપત્સ્યત
ઇત્યપીત્યાહ- સિદ્ધં નિમિત્તં નૈમિત્તિકસ્યાનુગ્રહં કુરુતે,
નાપૂર્વમુત્પાદયતીતિ । નિમિત્તનૈમિત્તિકભાવાચ્ચૈવમુપપદ્યતે । તત્ર
પરમર્ષેઃ પટુરૂહઃ અન્યેષાં ક્લિષ્ટ ઇત્યયં વિશેષઃ । સર્વેષામેવ તુ
તારકાદ્યવિશિષ્ટમાચાર્ય આહ- ત્રિવિધા ભાવાઃ સાંસિદ્ધિકાઃ પ્રાકૃતિકા
વૈકૃતિકાશ્ચેતિ । તત્ર સાંસિદ્ધિકગ્રહણાત્તત્ત્વસમકાલં પ્રત્યાચષ્ટે,
નૈવ તદસ્તીતિ । કથમ્ ? યદિ હિ તથા સ્યાત્તત્ત્વાન્તરાનુત્પત્તિસંઘાતો
વ્યૂહશ્ચાનર્થકઃ સ્યાત્ । મહત્યુત્પન્નં જ્ઞાનં તત્રૈવોપલબ્ધમિતિ
કઃ સંઘાતાર્થઃ ? તથા ચર્ષેરૂહો નોપપદ્યતે, પ્રતિબન્ધાભાવાત્ ।
ન હ્યસ્ય કાર્યકારણવ્યૂહસમકાલજ્ઞાનોત્પત્તૌ કશ્ચિત્પ્રતિબન્ધોऽસ્તિ ।
અપરિવૃતખલત્વાદ્યતઃ કાલાન્તરં પ્રતીક્ષતે । તસ્માદસ્ય સહૈવ
કાર્યકારણાભ્યાં જ્ઞાનમભિનિષ્પદ્યતે પ્રદીપપ્રકાશાદિત્યતઃ સાંસિદ્ધિકમ્ ।
અન્યેષાં તુ સત્ત્વસ્યાપટુત્વાત્કાલાન્તરેણ પ્રકૃત્યભિષ્યન્દાદ્ દ્રાગિતિ
ભવતિ । કૃષ્ણસર્પદર્શનવત્ । તત્પ્રાકૃતમ્ । વૈકૃતં તુ
દ્વિવિધં પૂર્વવત્ । યથા ચ પરમર્ષેર્જ્ઞાનં સાંસિદ્ધિકમેવં
માહાત્મ્યશરીરસ્યૈશ્વર્યં, ભૃગ્વાદીનાં ધર્મઃ, સનકાદીનાં વૈરાગ્યમ્ ।
અધર્મો યક્ષરક્ષઃપ્રભૃતીનામ્ । અનૈશ્વર્યં ષટ્સિદ્ધિક્ષયકાલોત્પન્નાનાં
મનુષ્યાણાં તિરશ્ચાઞ્ચ । રાગોऽજ્ઞાનં પરમર્ષિવર્જ્યાનામ્ । પ્રાકૃતાસ્તુ
તદ્યથા વૈરાગ્યં ભગવદાસુરેઃ । તસ્ય હિ પરમર્ષિસમ્ભાવનાદુત્પન્નો
ધર્મઃ, અશુદ્ધિં પ્રતિદ્વન્દ્વિભાવાદપજગામ । તસ્યામપહતાયાં પ્રકૃતેઃ
શુદ્ધિસ્રોતઃ પ્રવૃત્તં યેનાનુગૃહીતો દુઃખત્રયાભિઘાતાદુત્પન્નજિજ્ઞાસઃ
પ્રવ્રજિતઃ । તથા મહેશ્વરસમ્પર્કાન્નન્દિન ઐશ્વર્યમ્ ।
નહુષસ્યાગસ્ત્યસમ્પર્કાદ્ધર્મ ઇત્યાદિ । વૈકૃતાસ્તુ ભાવા અસ્મદાદીનામ્ ।
એવં ત્રિવિધભાવપરિગ્રહાત્ત્વાચાર્યસ્ય ન સર્વં સ્વતઃ પતઞ્જલિવત્,
ન સર્વં પરતઃ પઞ્ચાધિકરણવત્ । કિન્તર્હિ મહતી સ્વભાવાતિવૃત્તિઃ
પ્રકૃતિતોऽલ્પા સ્વતો વિકૃતિતઃ ।
એવમ્

॥ સાંસિદ્ધિકાશ્ચ ભાવાઃ પ્રાકૃતિકા વૈકૃતાશ્ચ ધર્માદ્યાઃ ।
દૃષ્ટાઃ કરણાશ્રયિણઃ ॥

યથા ચૈતે તથા

॥ કાર્યાશ્રયિણશ્ચ કલલાદ્યાઃ ॥ ૪૩ ॥

ત્રિવિધા એવેતિ કલલાદિગ્રહણેન શરીરાણ્યાહ । તેષામાકૃતિવૈશ્વરૂપ્યં ચતુર્દશવિધે સંસારે ત્રિવિધમ્ । તત્ર સાંસિદ્ધિકસ્તાવત્ વૈવર્ત્તાનાં ગ્રહનક્ષત્રતારાદીનામ્ । જાતિકૃતશ્ચ વિશેષઃ હંસાનાં શૌક્લ્યમ્, તિત્તિરમયૂરાદીનાં ચિત્રચ્છદત્વમિતિ । પ્રાકૃતં યથામાહાત્મ્યં શરીરાભિમાનાત્ તસ્ય હ્યભિમાનો ભવતિ- હન્તાહં પુત્રાન્સ્રક્ષ્યે યે મે કર્મ કરિષ્યન્તિ । યે માં પરં ચ જ્ઞાસ્યન્તિ । સ યાદૃક્સર્ગમભિધ્યાયતિ તાદૃક્પ્રધાનાદુત્પદ્યતે । તદ્યથા મહેશ્વરસ્ય રુદ્રકોટિસૃષ્ટાવિતિ । વૈકૃતાસ્તુ કલલાદ્યાઃ । યથા ભિષગ્વેદેઽભિહિતમ્- ક્ષીરં પીત્વા ગર્ભિણી ગૌરં પુત્રં જનયતીતિ । એતે ભાવા વ્યાખ્યાતાઃ । એષાં વૈશ્વરૂપ્યાલ્લિઙ્ગસ્ય ગતિવિશેષઃ સંસારો ભવતીતિ ॥ ૪૩ ॥

---

કારિકા ૪૪

---

આહ, કસ્ય પુનર્ભાવસ્યાનુષ્ઠાનાત્કો ગમનવિશેષો લિઙ્ગસ્ય નિષ્પદ્યત ઇતિ ?
ઉચ્યતે-

॥ ધર્મેણ ગમનમૂર્ધ્વમ્ ॥

ઉક્તો ધર્મઃ । તદનુષ્ઠાનાદષ્ટવિકલ્પાયાં દેવભૂમાવુત્પત્તિર્ભવતિ ।

॥ ગમનમધસ્તાદ્ ભવત્યધર્મેણ ॥

અધર્મોઽપ્યુક્તઃ । તદનુષ્ઠાનાપઞ્ચવિકલ્પાયાં તિર્યગ્ભૂમાવુત્પત્તિર્ભવતિ ।
આહ, એકભૂમિવિશેષાનુપપત્તિઃ, ગતિવિશેષાત્ । યદિ ભાવાનાં ભૂમિવિશેષનિમિત્તત્વં નિયમ્યતે તેનૈકસ્યાં ભૂમૌ હીનમધ્યમોત્કૃષ્ટત્વં જાત્યાકૃતિસ્વભાવાનુગ્રહોપઘાતાનાં ન પ્રાપ્નોતિ ।
ઉચ્યતે- ન તર્હ્યનેન ભૂમિવિશેષો નિયમ્યતે, કિં તર્હિ ઊર્ધ્વશબ્દ ઉત્કૃષ્ટવચનઃ । ધર્મેણ દેવેષુ માનવેષુ તિર્યક્ષુ ચોર્ધ્વગમનમુત્કૃષ્ટં જન્મ ભવતિ ।

તથાઽધર્માદધોગમનમપકૃષ્ટં જન્મ ભવતિ ।

॥ જ્ઞાનેન ચાપવર્ગઃ ॥

ચશબ્દોઽવધારણાર્થઃ । જ્ઞાનેનૈવાપવર્ગઃ, ન ભાવાન્તરેણેતિ ।
યદુક્તમન્યૈરાચાર્યૈઃ- વૈરાગ્યાત્પુરુષકૈવલ્યં જ્ઞાનવૈરાગ્યાભ્યાં
ચેતિ તત્પ્રતિષિદ્ધં ભવતિ ।
આહ, યદિ પુનર્વૈરાગ્યાત્પુરુષકૈવલ્યમભ્યુપગમ્યતે ક એવં સતિ દોષઃ
સ્યાત્ ?
ઉચ્યતે- ન શક્યમેવં પ્રતિપત્તુમ્ । કસ્માત્ ? સંસારનિમિત્તાપ્રતિપક્ષત્વાત્
। યદિ રાગનિમિત્તઃ પ્રધાનપુરુષસંયોગઃ સ્યાત્ પ્રાપ્તમિદં તત્પ્રતિપક્ષેણ
વૈરાગ્યેણ વિયોગો ભવિષ્યતીતિ । ન ત્વેવમ્ । કુતઃ ? સંયોગકૃતે
કાર્યકરણસર્ગે નિષ્પત્તેઃ । કાર્યકરણવ્યૂહોત્તરકાલં હિ રાગો ભવતિ ।
તસ્માન્નાસૌ કાર્યકરણનિષ્પત્તેર્નિમિત્તમિતિ શક્યમાશ્રયિતુમ્ । યસ્ય તુ
જ્ઞાનાન્મોક્ષ ઇતિ પક્ષઃ, તસ્ય પ્રતિપક્ષાદજ્ઞાનાદ્બન્ધ ઇતિ પ્રાપ્તમસ્તિ,
ન ચાસૌ પ્રાગપિ કાર્યકરણનિષ્પત્તેઃ । તસ્માન્ન વૈરાગ્યાન્મોક્ષઃ ।
અતએવ ન જ્ઞાનવૈરાગ્યાભ્યાં મોક્ષોઽસ્તિ । ઉભયનિમિત્તાસમ્ભવાત્ ।
તસ્માત્સૂક્તં જ્ઞાનેનૈવાપવર્ગઃ ।

॥ વિપર્યયાદિષ્યતે બન્ધઃ ॥ ૪૪ ॥

જ્ઞાનવિપર્યયોઽજ્ઞાનમ્ । તસ્માદ્ બન્ધસ્ત્રિવિધો ભવતિ પ્રકૃતિબન્ધો
દક્ષિણાબન્ધો વૈકારિકબન્ધશ્ચેતિ ॥ ૪૪॥

---

કારિકા ૪૫

---

આહ, કસ્માદ્ ભાવાત્પ્રકૃતિબન્ધો ભવતિ ?
ઉચ્યતે-

॥ વૈરાગ્યાત્ પ્રકૃતિલયઃ ॥

વૈરાગ્યાદષ્ટસુ પ્રકૃતિષુ લયં ગચ્છતિ, અસાવુચ્યતે પ્રકૃતિબન્ધ
ઇતિ ।
આહ, યદિ વૈરાગ્યાત્પ્રકૃતિલયઃ પ્રાપ્તો યદેતત્પ્રકૃતૌ વૈરાગ્યમાઞ્જસમ્ ।
અન્યા પ્રકૃતિસ્ત્રિગુણા, કારણભૂતા, કાર્યભૂતા, કાર્યકારણભૂતા,

અકાર્યકારણભૂતા અચેતના પરતન્ત્રા ચેતિ । અન્યઃ પુરુષો નિર્ગુણો, ન કાર્યં, ન કારણં, ન કાર્યકારણં, તદ્વિપરીતઃ ચેતનઃ સ્વતન્ત્રશ્ચેતિ તતોઽપિ પ્રકૃતૌ લયઃ તતશ્ચાનિર્મોક્ષપ્રસંગ ઇતિ ।

ઉચ્યતે- વિપર્યયાદિતિ વર્તતે । તદિહાભિસમ્ભન્ત્સ્યામઃ । તતશ્ચ વિપરીતં યદેવ વૈરાગ્યં તુષ્ટિકાણ્ડાનુપતિતં પ્રકૃત્યાદિષુ પરત્વાભિમાનઃ તત એવ પ્રકૃતિલયો ભવતિ નાન્યસ્માત્ । અથવાઽત્રાપિ યત્તત્પ્રકૃતાવન્યત્વજ્ઞાનં તત એવ મોક્ષો ન વૈરાગ્યાત્ । કુતઃ ? ભવબીજાપ્રતિપક્ષત્વાદિતિ હ્યુક્તમ્ । આમ્ભસિકસ્ય ચ મોક્ષપ્રસંગાત્ । તુલ્યા હ્યસ્ય નાનાત્વસંવિદ્, આસંગદોષનિવૃત્તેઃ । ન ચૈતદિષ્ટમ્ । તસ્માદ્યુક્તમેતત્ વૈરાગ્યાત્પ્રકૃતિલય ઇતિ ।

આહ, અથ દક્ષિણાબન્ધઃ કુતઃ ?

ઉચ્યતે-

॥ સંસારો ભવતિ રાજસાદ્ રાગાત્ ॥

યોઽયં દૃષ્ટાનુશ્રવિકવિષયાભિલાષઃ સ રાગઃ । તત્ર દૃષ્ટવિષયરાગાત્તત્પ્રાપ્તિનિર્વર્તકં કર્મ કરોતિ । તતશ્ચ તત્રોપપદ્યતે । આનુશ્રવિકવિષયાભિલાષાદગ્નિહોત્રાદિષુ પ્રવર્તતે । તતશ્ચ સ્વર્ગાદિષૂપપત્તિર્ભવતિ । અસૌ દક્ષિણાબન્ધઃ । દૃષ્ટાનુશ્રવિકવિષયાભિલાષદ્વારેણ તન્નિર્વર્તકે કર્મણિ પ્રવર્તમાનો ગુણવૃત્તિવૈચિત્ર્યાદનિષ્ટફલનિર્વર્તકમપિ કર્મ કરોતિ । એવં માનુષ્યે ગત્યન્તરે યોપપત્તિઃ સર્વાઽસૌ રાગાત્ ।

આહ, રાજસંગ્રહણાનર્થક્યમ્ તત્પૂર્વકત્વાદ્રાગસ્ય । રજોનિમિત્ત એવ હિ રાગઃ । તત્ર સંસારો રાગાદિત્યેવ વક્તવ્યમ્, રાજસગ્રહણમનર્થકમિતિ ।

ઉચ્યતે- ન, વિષયવિશેષણત્વાત્ । વિષયે યો રાગઃ સ સંસારહેતુરિત્યસ્યાર્થસ્ય જ્ઞાપનાર્થમિદમુચ્યતે । અન્યથા યો યતેઃ સાત્ત્વિકો યમનિયમધ્યાનાદ્યનુષ્ઠાનાનુરાગઃ પ્રવચનરાગો વા સોઽપિ સંસારાય સ્યાત્ ।

॥ ઐશ્વર્યાદવિઘાતઃ ॥

યદષ્ટગુણમૈશ્વર્યમણિમાદિ પ્રાગુપદિષ્ટં તસ્માત્સ્વે સ્વે વિષયેઽવિઘાત ઉત્પદ્યતે । તદભિરતિર્વૈકારિકો બન્ધઃ ।

આહ, યદિ ત્રિભિસ્ત્રિભિર્નિમિત્તૈર્વૈરાગ્યાદિભિસ્ત્રિવિધો બન્ધો નિર્વર્ત્યતે યદુક્તમજ્ઞાનાદ્ બન્ધ ઇતિ તદયુક્તમ્ । ભાવાન્તરં હ્યજ્ઞાનમતઃ

ફલાન્તરેણ ભવિતવ્યમિતિ ।

ઉચ્યતે- ન, મૂલકારણત્વાત્ । જ્ઞાનવર્જિતાનાં હિ ભાવાનાં યત્ફલં તત્રાજ્ઞાનં મૂલમ્ । તન્નિમિત્તત્વાત્સર્વેષામ્ । ન હિ જ્ઞાનિવૈરાગ્યમલં પ્રકૃતિલયાય । તથેતરાણિ પરમર્ષ્યાદાવદૃષ્ટત્વાદ્ વિચિત્રં કાર્યમેકસ્માત્કારણાદયુક્તમિતિ વૈરાગ્યાદીન્યસાધારણાનિ પૃથક્ કલ્પ્યન્તે, સાધારણં ત્વજ્ઞાનમતો ન કશ્ચિદ્દોષઃ ।

॥ વિપર્યયાત્તદ્વિપર્યાસઃ ॥ ૪૫ ॥

અનૈશ્વર્યાત્તુ અણિમાદેરષ્ટવિધાદવિઘાતવિપર્યયો વિઘાતો ભવતિ । તદેવમેતદષ્ટવિધં ધર્માદિવિધાનમુપાદાયાષ્ટવિધં નૈમિત્તિકમુપપદ્યતે । એવમેષ તત્ત્વસર્ગો ભાવસર્ગશ્ચ વ્યાખ્યાતઃ । એતચ્ચ વ્યક્તસ્ય રૂપં પ્રવૃત્તિશ્ચ પરિકલ્પ્યતે । ફલમિદાનીં વક્ષ્યામઃ ॥ ૪૫ ॥

॥ ઇતિ યુક્તિદીપિકાયામષ્ટમમાહ્નિકં તૃતીયં ચ પ્રકરણમ્ ॥

---

કારિકા ૪૬

---

આહ, કિં પુનસ્તત્ફલમિતિ ?

ઉચ્યતે- યઃ ખલુ

॥ એષ પ્રત્યયસર્ગો વિપર્યયાશક્તિતુષ્ટિસિદ્ધ્યાખ્યઃ ॥

તત્ફલમિતિ વાક્યશેષઃ । એષ ઇતિ વક્ષ્યમાણસ્ય સમ્મુખીકરણાર્થમુચ્યતે । પ્રત્યયસર્ગ ઇતિ પ્રત્યયઃ પદાર્થો લક્ષણમિતિ પર્યાયાઃ, પ્રત્યયાનાં સર્ગઃ પ્રત્યયસર્ગઃ પદાર્થસર્ગો લક્ષણસર્ગ ઇત્યર્થઃ । અથવા પ્રત્યયો બુદ્ધિર્નિશ્ચયોऽધ્યવસાય ઇતિ પર્યાયાઃ । તસ્ય સર્ગોऽયમતઃ પ્રત્યયસર્ગઃ પ્રત્યયકાર્યં પ્રત્યયવ્યાપાર ઇત્યર્થઃ । અથવા પ્રત્યયપૂર્વકઃ સર્ગઃ પ્રત્યયસર્ગઃ । બુદ્ધિપૂર્વક ઇત્યુક્તઃ । કથમ્ ? એવં હિ શાસ્ત્રમ્- મહદાદિવિશેષાન્તઃ સર્ગો બુદ્ધિપૂર્વકત્વાત્ । ઉત્પન્નકાર્યકરણસ્તુ માહાત્મ્યશરીર એકાકિનમાત્માનમવેક્ષ્યાભિદધ્યૌ હન્તાऽહં પુત્રાન્સ્રક્ષ્યે યે મે કર્મ કરિષ્યન્તિ । યે માં પરં ચાપરં ચ જ્ઞાસ્યન્તિ । તસ્યાऽભિધ્યાયતઃ પઞ્ચ મુખ્યસ્રોતસો દેવાઃ પ્રાદુર્બભૂવુઃ । તેષૂત્પન્નેષુ ન તુષ્ટિં લેભે । તતોऽન્યે તિર્યક્સ્રોતસોऽષ્ટાવિંશતિઃ પ્રજજ્ઞે । તેષ્વપ્યસ્ય મતિર્નૈવ તસ્થે ।

અથાપરે નવોર્ધ્વસ્રોતસો દેવાઃ પ્રાદુર્બભૂવુઃ । તેષ્વપ્યુત્પન્નેષુ નૈવ
કૃતાર્થમાત્માનં મેને । તતોઽન્યેઽષ્ટાવર્વાક્સ્રોતસ ઉત્પેદુઃ । એવં તસ્માદ્
બ્રહ્મણોઽભિધ્યાનાદુત્પન્નસ્તસ્માત્પ્રત્યયસર્ગઃ । સ વિપર્યયાખ્યઃ
અશક્ત્યાખ્યઃ તુષ્ટ્યાખ્યઃ સિદ્ધ્યાખ્યશ્ચેતિ । તત્રાશ્રેયસઃ
શ્રેયસ્ત્વેનાભિધાનં વિપર્યયઃ । વૈકલ્યાદસામર્થ્યમશક્તિઃ ।
ચિકીર્ષિતાદૂનેન નિર્વૃતિસ્તુષ્ટિઃ । યથેષ્ટસ્ય સાધનં સિદ્ધિઃ ।
તદ્યથા ધર્માર્થપ્રવૃત્તોઽગ્નિષ્ટોમાદીન્પરિત્યજ્ય સંકરં કુર્વીત સોઽસ્ય
વિપર્યયઃ । સાધનવૈકલ્યાદસામર્થ્યમશક્તિઃ । આધાનમાત્રસન્તોષસ્તુષ્ટિઃ ।
કૃત્સ્નસ્ય ક્રિયાતિશેષસ્યાનુષ્ઠાનં સિદ્ધિઃ । એવમર્થાદિષુ યોજ્યમ્ ।
યશ્ચાયં ચતુર્વિધઃ ફલવિશેષો વિપર્યયાદિરાખ્યાતઃ ।

॥ ગુણવૈષમ્યવિમર્દાત્ તસ્ય ભેદાસ્તુ પઞ્ચાશત્ ॥ ૪૬ ॥

ગુણાનાં વૈષમ્યં ગુણવૈષમ્યમ્ । ગુણવૈષમ્યં પ્રાધાન્યગુણભાવયોગ
ઇત્યર્થઃ । ગુણવૈષમ્યાદ્વિમર્દો ગુણવૈષમ્યવિમર્દઃ, પ્રત્યયપર્યાયેણ
સત્ત્વરજસ્તમસામિતરેતરભાવઃ । તન્નિમિત્તા એષાં પ્રત્યયાણાં
પઞ્ચાશદ્ભેદા ભવન્તિ ॥ ૪૬॥

---

કારિકા ૪૭

---

કથમિત્યુચ્યતે-

॥ પઞ્ચ વિપર્યયભેદા ભવન્તિ ॥

તમો મોહો મહામોહસ્તામિસ્રોઽન્ધતામિસ્ર ઇતિ । તત્રાશ્રેયસિ
પ્રવૃત્તસ્ય પ્રત્યયાવરે શ્રેયોઽભિમાને આદ્યો વિપર્યયસ્તમ
ઇત્યભિધીયતે । ભૌતિકેષ્વાકારેષુ શિરઃપાણ્યાદિષ્વાત્મગ્રહો યોઽયં
વ્યૂઢોરસ્કઃ સિતદશનસ્તામ્રાક્ષઃ પ્રલમ્બબાહુઃ સોઽહમિતિ । તથા
શ્રવણસ્પર્શનરસનઘ્રાણવચનાદાનવિહરણોત્સર્ગાનન્દસંકલ્પાભિમાનાધ્યવસાયલક્ષણાસુ
કરણવૃત્તિષ્વહં શ્રોતા દ્રષ્ટા ચેત્યેવમાદિરાદ્યકાલપ્રવૃત્તો ગ્રહઃ
સર્વસ્માદવરો મોહ ઇત્યુચ્યતે । કથં પુનરયમવરઃ ઇત્યુચ્યતે પૂર્વં
શરીરેન્દ્રિયવ્યતિરિક્તમુપલબ્ધુમિચ્છન્સૌક્ષ્મ્યાત્તત્તદનધિગમે
ભૂતાકારમભૂતં પ્રમાણં પરપરિકલ્પિતં વાઽનુમન્યેત,
સ્વયં વા પરિકલ્પયેદિતિ ન માર્ગાદ્ દૂરાપગતમેતત્ ।

અયં તુ પ્રત્યક્ષાદિગતોત્પત્તિસ્થિતિવિનાશેષ્વનેકરૂપકેષુ કાર્યકરણેષ્વહમિતિ અભિમન્યતે, તસ્માત્પૂર્વસ્યાદવરઃ । બાહ્યે તુ વિષયે મમેદમિત્યભિનિવેશઃ પૂર્વસ્માદવર ઇત્યુચ્યતે । પૂર્વઃ શરીરિણોઽપ્રત્યક્ષત્વાત્કરણવૃત્ત્યવિશેષાદ્ વાત્મવૃત્તેઃ કાર્યકરણે કુર્યાદાત્મબુદ્ધિમિતિ શક્યમેતદ્ ભિન્નનિમિત્તાકારદેશસ્વભાવપ્રયોજનાનુગ્રહોપઘાતોત્પત્તિસ્થિતિવિનાશાંશ્ચ માતૃપિતૃપુત્રભ્રાતૃપુત્રદારગોહિરાયવસનાચ્છાદનાદીનયમકસ્માદાત્મત્વેન પશ્યતિ, તસ્માત્પૂર્વસ્માદવરઃ । ક્રોધશ્ચતુર્થો વિપર્યયઃ પૂર્વસ્માદવરઃ તામિસ્ર ઇત્યભિધીયતે । કથં પુનરયં પૂર્વસ્માદવર ઇતિ ? ઉચ્યતે- પૂર્વોઽભિનિવેશપ્રતિષેધમભ્યનુજાનાતિ । યદાઽસ્ય બાહ્યદ્રવ્યવિયોગે કશ્ચિત્કુશલસંસૃષ્ટ એવં બ્રવીતિ સંસારસ્ય ... બુદ્ધાવવસ્થાપ્ય વિમૃશ્યતાં યાવદયં કાલો યદિ કશ્ચિત્પ્રિયેણાવિયુક્તપૂર્વઃ । તસ્માદાગમાપાયિષુ બાહ્યેષુ દ્રવ્યેષુ વિદુષા નાભિનિવેશઃ કાર્ય ઇતિ, તદા પ્રત્યાહ સત્યમેવમેતદિતિ । સન્નિકૃષ્ટસ્તુ વિયોગકાલ ઇતિ ન બુદ્ધિરવસ્થાપયિતું શક્યતે । ક્રોધાવિષ્ટસ્તુ સ્વવિકલ્પિતગ્રાહવિપરીતબુદ્ધિરશક્યો દણ્ડેનાપિનિવર્તયિતુમ્ । તસ્માત્પૂર્વસ્માદવરઃ । મરણવિષાદઃ પઞ્ચમો વિપર્યયઃ પૂર્વસ્માદવરોઽન્ધતામિસ્ત્ર ઇત્યભિધીયતે । કથં પુનરયં પૂર્વસ્માદવર ઇત્યુચ્યતે- પૂર્વોઽભિનિવેશાત્પ્રતિષિધ્યમાનઃ પ્રતીકારમન્તતો જિહ્વાક્ષિનિરીક્ષતો (?) નાપિ તાવદારભતે । ન તુ બ્રહ્માદૌ સ્તમ્બપર્યન્તે સંસારે સ્વનિમિત્તનિયતતમપાતસ્ય વિનાશસ્ય કેનચિત્પ્રતીકારઃ કૃતઃ । તસ્માદપરિહાર્યં મરણમનુશોચત્પૂર્વસ્માદવર ઇતિ । એતે પઞ્ચ વિપર્યયભેદા ભવન્તિ ।

॥ અશક્તિશ્ચ કરણવૈકલ્યાત્ ।
અષ્ટાવિંશતિભેદા ॥

ભવતીત્યનુવર્તતે । તત્ર બાહ્યકરણવૈકલ્યં સહ મનસૈકાદશપ્રકારમ્ । સપ્તદશવિધં બુદ્ધિવૈકલ્યમ્ । એતેઽશક્તિભેદાઃ ।

॥ તુષ્ટિર્નવધાઽષ્ટધા સિદ્ધિઃ ॥ ૪૭ ॥

એવં ચતુર્વિધસ્ય પ્રત્યયસર્ગસ્ય ગુણવૈષમ્યવિમર્દેન પઞ્ચાશદ્ભેદા ભવન્તિ ॥ ૪૭॥

કારિકા ૪૮

વિસ્તરેણ તુ પદાર્થશતસહસ્રમાનન્ત્યં વા લક્ષણાનામ્ ।
કથમિત્યુચ્યતે યસ્માત્-

॥ ભેદસ્તમસોઽષ્ટવિધઃ ॥

ય એતે પઞ્ચ વિપર્યયભેદા વ્યાખ્યાતાઃ તેષુ તમસોઽષ્ટવિધો ભેદઃ ।
કથમ્ ? પરવિજ્ઞાનમાશ્રિત્ય પ્રવૃત્તસ્યાષ્ટાસુ પ્રકૃતિષ્વપરાસુ
પરાભિમાનગ્રહાત્ ।

॥ મોહસ્ય ચ ॥

કિમ્ ? અષ્ટવિધો ભેદ ઇતિ ।
ચશબ્દાત્કાર્યકરણસામર્થ્યેઽષ્ટવિધેઽણિમાદાવહમિતિ પ્રત્યયઃ ।

॥ દશવિધો મહામોહઃ ॥

માતૃપિતૃભ્રાતૃસ્વસૃપત્નીપુત્રદુહિતૃગુરુમિત્રોપકારિલક્ષણે
દશવિધે કુટુમ્બે યોઽયં મમેત્યભિનિવેશઃ । દૃષ્ટાનુશ્રવિકેષુ વા
શબ્દાદિષ્વિત્યપરે । સ દશવિધો મહામોહઃ પરિસંખ્યાયતે ।

॥ તામિસ્રોઽષ્ટાદશધા ॥

અષ્ટવિધે કાર્યકરણસામર્થ્યે દશવિધે ચ કુટુમ્બે વિષયેષુ વા યઃ
પ્રતિહન્યમાનસ્યાવેશઃ ।

॥ તથા ભવત્યન્ધતામિસ્રઃ ॥ ૪૮ ॥

તથેતિ સામાન્યાતિદેશાર્થઃ । અન્ધતામિસ્રોઽષ્ટાદશધૈવેતિ ।
કથમ્ ? અસાવપ્યષ્ટવિધાત્કાર્યકરણસામર્થ્યાદ્દશવિધાચ્ચ
કુટુમ્બાત્પ્રત્યવસાનસ્ય વિષાદઃ ।
એવમેતે પઞ્ચ વિપર્યયભેદાઃ સ્વલક્ષણતો વિષયવિશેષા
લક્ષિતાઃ । તત્રાપિ ચાષ્ટાસુ પ્રકૃતિષુ સત્ત્વરજસ્તમસાં
સંહતવિવિક્તપરિણતવ્યસ્તસમસ્તાનાં પરત્વાભિમાનભેદાદેકૈકા
પ્રકૃતિઃ પઞ્ચદશભેદા । અત એવ તેઽષ્ટૌ પઞ્ચદશ વિંશં
શતં ચ ભવન્તિ । યથા મોક્ષે પ્રવૃત્તસ્ય એવં ધર્મકામેષ્વપિ ।

એકઃ પદાર્થો વિસ્તરેણ પરિસંખ્યાયમાનોઽનન્તભેદઃ સમ્પદ્યતે ।
નિદર્શનમાત્રમેતદાચાર્યેણ કૃતમ્ । એવમશક્ત્યાદિષ્વપિ
લક્ષણાન્તરેષુ યોજ્યમ્ । સેયમવિદ્યા પઞ્ચપર્વા સપ્રપઞ્ચા વ્યાખ્યાતા ।
તદનન્તરોદ્દિષ્ટાનશક્તિભેદાન્વક્ષ્યામઃ ॥ ૪૮॥

---

કારિકા ૪૯

---

આહ, અતિવ્યાસાભિહિતમિદમિતિ નાસ્માકં બુદ્ધાવવતિષ્ઠતે । તસ્માદ્વિપર્યયોક્તં
ભેદાભિધાનં પરિત્યજ્ય વક્તવ્યમ્ કથમશક્તિરષ્ટાવિંશતિભેદેતિ ?
ઉચ્યતે-

॥ એકાદશેન્દ્રિયવધાઃ સહ બુદ્ધિવધૈરશક્તિરુદ્દિષ્ટા ॥

ઇન્દ્રિયાણાં વધા ઇન્દ્રિયવધાઃ । સ્વસંસ્કારવિષયયોગાત્પ્રકર્ષાપન્નેન
તમસા ગ્રહણરૂપસ્ય સત્ત્વસ્યાભિભવાત્સ્વવિષયેષ્વપ્રવૃત્તયઃ । તદ્યથા
બાધિર્યમાન્ધ્યમઘ્રત્વં મૂકતા જડતા ચ યા ।
ઉન્માદકૌષ્ઠ્યકૌણ્યાનિ ક્લૈબ્યોદાવર્તપઙ્ગુતાઃ ॥

તત્ર બાધિર્યં શ્રોત્રસ્ય, આન્ધ્યં ચક્ષુષઃ, અઘ્રત્વં નાસિકાયાઃ, મૂકતા
વાચઃ, જડતા રસનસ્ય, ઉન્માદો મનસઃ, કૌષ્ઠ્યં ત્વચઃ, કૌણ્યં પાણેઃ,
ક્લૈબ્યમુપસ્થસ્ય, ઉદાવર્તઃ પાયોઃ, પઙ્ગુતા પાદયોરિત્યેવમિન્દ્રિયવધા
એકાદશ ।
અન્યે તુ

॥ સપ્તદશ વધા બુદ્ધેર્વિપર્યયાત્તુષ્ટિસિદ્ધીનામ્ ॥ ૪૯ ॥

તત્ર તુષ્ટયઃ પ્રકૃત્યાદ્યા વક્ષ્યમાણાઃ, તાસાં દ્વિવિધો વિપર્યયઃ ।
અવ્યુત્પન્નસ્ય યોગધર્મેણ તસ્યાં ભૂમાવપ્રવૃત્તિઃ, વ્યુત્પન્નસ્ય
ચોત્તરભૂમ્યપરિજ્ઞાનાત્પૂર્વસ્યાં ભૂમાવક્ષેમરૂપેણ ગ્રહણમ્ ।
આત્મવિદો વા સર્વાસુ ભૂમિષુ । તેષુ યત્પૂર્વં તદશક્તિભાવાભિપ્રેતમ્ ।
યન્મધ્યમં તદાપેક્ષિકમ્ । કથમ્ ? તન્માત્રભૂમ્યવસ્થો હિ
યોગ્યસ્મિતાદિભૂમ્યનવજયાત્તુષ્ટો મહાભૂતાતિક્રમાત્સિદ્ધઃ । તથા
વિજિતાસ્મિતારૂપો મહદાદ્યવસ્થાપેક્ષયા તુષ્ટઃ, પૂર્વભૂમ્યપેક્ષયા સિદ્ધઃ ।
એવં મહદવસ્થઃ પ્રધાનાપેક્ષયા પૂર્વાપેક્ષયા ચ । પ્રધાનાવસ્થઃ
પુરુષાપેક્ષયા પૂર્વાપેક્ષયા ચ । ગુણપુરુષાન્તરજ્ઞસ્તુ સિદ્ધ એવ ।

તસ્માદવ્યુત્પન્નસ્યામ્ભઃપ્રભૃતિષુ નવાનમ્ભઃપ્રભૃતયો બુદ્ધિવધાઃ ।
તારકાદિવિપર્યયેણાષ્ટાવતારકાદયઃ । એષા ખલ્વશક્તિરષ્ટાવિંશતિભેદા ।
તુષ્ટિસ્તુ સન્નિહિતવિષયસન્તોષાચ્ચિકીર્ષિતાદર્થાદૂનેન નિવૃત્તિઃ
સામાન્યત એકૈવ, પ્રત્યર્થમનન્તા, શતેન તુષ્ટઃ સહસ્રેણેતિ ।
શાસ્ત્રે તુ બાહ્યાધ્યાત્મિકાનાં સુખદુઃખમોહાનાં પ્રાપ્તિષ્વપગમેષુ
વાચાऽવ્યવસ્થ્યલક્ષણા ઉપાયનવત્વાન્નવ તુષ્ટયો ભવન્તિ ॥ ૪૯॥

---

કારિકા ૫૦

---

તાસામ્

॥ આધ્યાત્મિક્યશ્ચતસ્રઃ । પ્રકૃત્યુપાદાનકાલભાગ્યાખ્યાઃ ॥

આધ્યાત્મિકી ઇતિ શરીરશરીરિણોર્વિશેષમુપલિપ્સમાનેન યોગિના
યદનાત્મન્યાત્મબુદ્ધિરવસ્થાપ્યતે સા ખલ્વાધ્યાત્મિકી સિદ્ધિઃ તુષ્ટિઃ
સન્તોષઃ ક્ષેમ ઇત્યર્થઃ ।
તાસાં પ્રકૃત્યાખ્યા । યદા વીતાવીતૈઃ પ્રધાનમધિગમ્ય તત્પૂર્વકત્વં
ચ મહદાદીનાં વિકારાણામાનન્ત્યાચ્ચ પ્રધાનાત્મનઃ કૃત્સ્નસ્ય
મહદાદિભાવેન વિપરિણામાસમ્ભવાદેકદેશસ્યાપ્રકૃતિવિકારભૂતસ્ય
ભોક્તૃત્વમકર્તૃત્વં ચાધ્યવસ્ય સઙ્ગદ્વેષનિવૃત્તિં લભતે, સાऽऽઘા
તુષ્ટિરમ્ભ ઇત્યભિધીયતે । કસ્માત્ ? અમિતં હિ પ્રધાનતત્ત્વં ભાતિ
જગદ્બીજભૂતત્વાન્મહદાદિભાવપરિણામેન ન્યૂનસ્યૈકદેશસ્યાત્મન એવાऽऽપૂરાત્ ।
તદ્વ્યતિરેકેણ ચાન્યસ્યૈકદેશસ્યોભયધર્મિણો ભોક્તૃભૂતસ્ય
સદ્ભાવાત્સમ્પ્રક્ષાલનેऽપિ ચાપસંહૃતમ્, વૈશ્વરૂપ્યસ્યાનુચ્છેદાત્ ।
તથા ચ શાસ્ત્રમાહ- અમ્ભ ઇતિ ગુણલિઙ્ગસન્નિચયમેવાધિકુરુતે ।
ગુણાશ્ચ સત્ત્વરજસ્તમાંસિ । લિઙ્ગં ચ મહદાદિ અત્ર સન્નિહિતં ભવતિ ।
તદિદં પ્રધાનમમિતં ભાત્યમિતમુપલભ્યત ઇત્યમ્ભઃ । સ ખલ્વયં
યોગી પ્રધાનલક્ષણાં ભૂમિમવજિત્ય તન્મહિમ્ના ચ તદશૂન્યં દૃષ્ટ્વા
વ્યતિરિક્તસ્ય પદાર્થાન્તરસ્યાભાવં મન્યમાનસ્તામેવ ભૂમિં કૈવલ્યમિતિ
ગૃહ્ણાતિ । ભિન્ને ચ દેહે પ્રકૃતૌ લયં ગચ્છતિ, તતશ્ચ પુનરાવર્તતે ।
તસ્યાં ચ તુષ્ટાવન્યે સપ્ત મહદાદિકારણિનોऽવરુદ્ધા દ્રષ્ટવ્યાઃ । તત્ર
યથા પ્રાધાનિકસ્ય પુરુષે નાસ્તિ વિજ્ઞાનં એવમિતરેષામુત્તરેષુ તત્ત્વેષુ ।
મહત્કારણિનઃ પ્રધાનેऽસ્મિતાકારણિનો મહતિ, તન્માત્રકારણિનોऽહંકારે ।

તદેકદેશાશ્ચૈષાં ભોક્તારઃ પૂર્વવત્ । અત્રાપિ ચ સત્ત્વાદીનાં
સંહતવિવિક્તપરિણતવ્યસ્તસમસ્તાનાં ભેદાદવિદ્યાઽવચ્છેદાનન્ત્યમવસેયમ્ ।
આહ, તુષ્ટ્યવિદ્યયોરભેદઃ લક્ષણૈકત્વાત્ । અષ્ટાસુ
પ્રકૃતિષ્વાત્મબુદ્ધિસ્તુષ્ટિઃ । તદેવ ચ તમ ઇત્યવિદ્યાકાણ્ડે નિર્દિષ્ટમ્ ।
તસ્માત્પદાર્થસંકર ઇતિ ।
ઉચ્યતે- ન, પ્રત્યયવિશેષાત્ । તમઃપ્રધાનપુરુષોપદેશે સતિ
પ્રત્યયનિર્દિધારયિષયા તયોઃ પ્રધાનમેવ જ્યાયો ન પુરુષ
ઇત્યભિનિવિશેત । તુષ્ટિસ્તુ કિં પરમિત્યાશ્રિત્ય પ્રવૃત્તઃ
પ્રધાનજ્ઞાનમાત્રે સન્તોષાત્પદાર્થાન્તરં વિજ્ઞાતુમેવ નાદ્રિયતે । કિં ચ
પ્રહાણવિશેષાત્ । નિરૂઢમૂલો હ્યનાત્મનિ આત્મગ્રહો જ્ઞાનોત્તરકાલભાવનયા
પ્રહાતવ્યઃ । તમોબહુલત્વાત્તમ ઇત્યભિધીયતે । પેલવસ્તુ સત્ત્વબહુલો
દર્શનપ્રણયસ્તુષ્ટિઃ । કિંચ તત્ત્વાભિજયાત્ । વિજિતભૂમિકસ્ય હિ
યોગિનસ્તન્માહાત્મ્યવશીકૃતત્વાદ્ ભૂમ્યન્તરે પ્રવૃત્તિસ્તુષ્ટિઃ । ઇતરસ્ય
ત્વભિનિવેશમાત્રમેવેત્યનયોર્વિશેષઃ । તસ્માન્ન પદાર્થસંકર ઇતિ
વ્યાખ્યાતા પ્રકૃત્યાખ્યા તુષ્ટિઃ ।
યદા તુ સત્યપિ પ્રકૃતિસામર્થ્યે નાનપેક્ષ્ય યથાસ્વમુપાદાનં
ભાવાનામુત્પત્તિઃ સમ્ભવતિ પ્રકૃત્યવિશેષે સર્વકાલમુત્પત્તિપ્રસંગાત્,
પ્રકૃતિકૃત્યમેવેદં વિશ્વમિત્યભ્યુપગચ્છતસ્તદવિશેષાદ્
ગોઃ પુરુષાદુત્પત્તિપ્રસંગઃ, પુરુષસ્ય વા મહિષાત્ । કિં ચ
જાત્યભેદપ્રસંગાત્ । પ્રકૃતિકૃત્યમિદં વિશ્વમિત્યભ્યુપગચ્છતો
જાતિભેદો ન સ્યાત્, તદવિશેષાત્ । દૃષ્ટં તૂપાદાનાજ્જાત્યનુવિધાનં
ભાવાનામ્ । તસ્માત્તદેવ કારણત્વેન પરિકલ્પયિતું ન્યાય્યમ્ । ઉપાદાનૈકદેશ
એવ ચ કાર્યકારણવિધાત્મા ભોક્તેત્યેતસ્માદ્ દર્શનાત્સઙ્ગદ્વેષનિવૃત્તિં
લભતે, સા દ્વિતીયા તુષ્ટિઃ સલિલમિત્યભિધીયતે । કથં પુનરેતત્સલિલમ્
? સત્યુપાદાને વિકારો લીયત ઇતિ । તથા ચ કૃત્વા શાસ્ત્રમાહ "સલિલં
સલિલમિતિ વૈકારિકોપનિપાતમેવાધિકુરુતે, સતિ તસ્મિંલ્લીયતે જગદિતિ" ।
સ ખલ્વયં યોગી પાર્થિવાનવજિત્ય તન્મહિમ્ના જગદશૂન્યં દૃષ્ટ્વા
પદાર્થાન્તરસ્યાભાવં મન્યમાનસ્તામેવ ભૂમિં કૈવલ્યમિતિ ગૃહ્ણાતિ ।
ભિન્ને ચ દેહે પૃથિવ્યાદિષુ લીયતે । તતશ્ચ પુનરાવર્તતે ।
યદા ચ સત્યુપાદાનસામર્થ્યે ન તાવતૈવ ભાવાનાં પ્રાદુર્ભાવઃ કિં તર્હિ
સન્નિહિતસાધનાનામપિ કાલં પ્રત્યપેક્ષા ભવતિ- કાલવિશેષાદ્બીજાદઙ્કુરો
જાયતે, અઙ્કુરાન્નાલં, નાલાત્કાણ્ડમ્, કાણ્ડાત્પ્રસવ ઇત્યાદિ । અન્યથા તૂપાદાનાનાં

સન્નિધાનમાત્રાત્ક્ષણેનૈવામીષામવસ્થાવિશેષાણામભિવ્યક્તિઃ સ્યાત્ । કિંચ કાલવિપર્યયેણોત્પત્તિપ્રસંગાત્ । ન ચૈતદિષ્ટમ્ । કિં ચ તદનભિધાનાત્ । દૃશ્યન્તે ચ પ્રાણિનાં કાલાનુરૂપાઃ સ્વાભાવાહારવિહારવ્યવસ્થાઃ । તસ્માદસાવેવ કારણમ્ । તદેકદેશશ્ચાપ્રકૃતિવિકારભૂતો ભોક્તેત્યેતસ્માદ્દર્શનાત્સંગદ્વેષનિવૃત્તિં લભતે, સા તૃતીયા તુષ્ટિરોઘ ઇત્યભિધીયતે । કથં પુનરયં કાલ ઓઘ ઇત્યુચ્યતે ? સલિલૌઘવત્સર્વાભ્યાવહનાત્ । તદ્યથા સલિલૌઘસ્તૃણં કાષ્ઠમશ્માનં પ્રાણિનં વા સ્વમૂર્તિસંસૃષ્ટં સર્વમેવાભ્યાવહતિ, એવમયં કાલો ગર્ભાદ્બાલ્યં, બાલ્યાત્કૌમારં, કૌમારાદ્યૌવનં, યૌવનાત્સ્થાવિર્યમ્, સ્થાવિર્યાન્મરણં, તથા બીજાન્મૂલં મૂલાદઙ્કુરમિતિ વહતિ । તથા ચાહ
યામેવ પ્રથમાં રાત્રિં ગર્ભે ભવતિ પૂરુષઃ ।
સમ્પ્રસ્થિતસ્તાં ભવતિ સ ગચ્છન્ન નિવર્તતે ॥

તસ્માદોઘસામાન્યાદોઘઃ કાલઃ । સ ખલ્વયં યોગી કાલમવજિત્ય પદાર્થાન્તરાભાવં મન્યમાનસ્તામેવ ભૂમિં કૈવલ્યમિતિ મન્યતે । દેહભેદે ચ કાલમનુપ્રવિશતિ । તતશ્ચ પુનરાવર્તતે । યદા તુ સત્યપિ કાલસામર્થ્યે ભાવાનામુત્પત્તિઃ ભાગ્યાનપેક્ષતે । કસ્માત્ ? તત્સન્નિધાનેઽપ્યપ્રાદુર્ભાવાત્ । સત્યપિ સાધનસામર્થ્યે કાલવિશેષે ચ કસ્યચિદુત્પત્તિર્ભવતિ કસ્યચિન્નેતિ । તસ્માદસ્તિ કારણાન્તરં યદપેક્ષ્ય ભાવાનામુત્પત્તિરનુત્પત્તિશ્ચ । કિં ચાભ્યુત્થાનાનુપપત્તિપ્રસંગાત્ । કાલમાત્રાત્ફલં ભવતીત્યેતદિચ્છતઃ શાસ્ત્રોક્તેષુ ક્રિયાવિશેષેષ્વભિષેચનવ્રતોપવાસાગ્નિહોત્રાદિષ્વભ્યુત્થાનં ન સ્યાત્ । કસ્માત્ ? આનર્થક્યાત્ । અસ્તિ ચ, તસ્માન્ન કાલનિમિત્તા ભાવાનામુત્પત્તિઃ । કિં ચ તદનુવિધાનાત્ । દૃશ્યન્તે ખલ્વપિ પ્રકૃત્યુપાદાનકાલાવિશેષેઽપિ ભાગ્યવિશેષાત્ફલવિશેષાઃ । તસ્માત્તત્સંકાર એવ કારણમ્ । તદેકદેશશ્ચાપ્રકૃતિવિકારભૂતો ભોક્તેત્યેતસ્માદ્દર્શનાત્સંગદ્વેષનિવૃત્તિં લભતે । સા ચતુર્થી તુષ્ટિર્વૃષ્ટિરિત્યભિધીયતે । કથં પુનર્વૃષ્ટિરિત્યુચ્યતે । સર્વસત્ત્વાપ્યાયનાત્ । યથા હિ શીર્ણાનામપિ તૃણલતાદીનાં વૃષ્ટિં પ્રાપ્ય પુનરાપ્યાયનં ભવતિ, એવમેવ સર્વેષાં પ્રાણિનાં ભાગ્યવિપરિણામાત્પુનરાપ્યાયનં ભવતિ । તસ્માદ્વૃષ્ટિસામ્યાદ્ ભાગ્યાખ્યા તુષ્ટિર્વૃષ્ટિરિત્યભિધીયતે । શાસ્ત્રમપ્યાહ- વૃષ્ટિર્વૃષ્ટિરિતિ શ્રિય

એવોપનિપાતમધિકુરુતે । સા હિ વૃષ્ટિવત્સર્વમાપ્યાયતીતિ । સ ખલ્વયં યોગી ભાગ્યાન્યવજિત્ય તન્મહિમ્ના જગદશૂન્યં દૃષ્ટ્વા પદાર્થાન્તરસ્યાભાવં મન્યમાનસ્તામેવ ભૂમિં કૈવલ્યમિતિ ગૃહ્ણાતિ । સ તસ્યામેવ દેહભેદે લીયતે । તતશ્ચ પુનરાવર્તત ઇતિ ।

આહ, કાલભાગ્યયોરપ્રતિપત્તિઃ, સમાખ્યાપરિજ્ઞાનાત્ । પ્રકૃત્યાત્મકસ્ય તાવદ્યોગિનોઽષ્ટૌ પ્રકૃતયો વિષય ઇત્યુક્તં પુરસ્તાત્ । ઉપાદાનાત્મકસ્ય ચ પૃથિવ્યાદીનિ મહાભૂતાનિ । કાલભાગ્યયોસ્તુ ન તથોક્તમ્ । તસ્માદ્વક્તવ્યં કસ્ય તત્ત્વસ્યૈષા સમાખ્યેતિ ?

ઉચ્યતે- ન, ઉક્તત્વાત્ । પ્રાગેવૈતદપદિષ્ટં ન કાલો નામ કશ્ચિત્પદાર્થોઽસ્તિ । કિં તર્હિ ક્રિયાસુ કાલસંજ્ઞા । તાશ્ચ કરણવૃત્તિરિતિ । પ્રતિપાદિતમ્ । ન ચાન્યા વૃત્તિર્વૃત્તિમતઃ । તસ્માત્કારણચૈતન્યપ્રતિજ્ઞઃ કાલાત્મક ઇતિ । ભાગ્યસંજ્ઞા તુ ધર્માધર્મયોઃ । તૌ ચ બુદ્ધિધર્માવિતિ પ્રાગપદિષ્ટમ્ । તસ્માદ્ભાગ્યવાદી બુદ્ધિચૈતનિક ઇતિ ।

આહ, ન તુષ્ટ્યન્તરત્વાત્ । પ્રકૃતિત્વાન્મહાન્પૂર્વં પ્રકૃત્યાખ્યાયાં તુષ્ટાવવરુદ્ધઃ । તસ્યેદાનીં તુષ્ટ્યન્તરત્વેન પરિકલ્પનં નાતિસમઞ્જસમિતિ ।

ઉચ્યતે- મહાંસ્તર્હિ પૂર્વતુષ્ટિવિષયભાવાદપકૃષ્યત ઇતિ । કાર્યકરણવૃત્તિક્રિયારૂપાં વૃત્તિમદ્યોત્યાં પરિકલ્પ્ય તસ્યાં કાલત્વમયમાહ । મહતશ્ચ રૂપં ધર્માદિકં મહતોઽર્થાન્તરં ભાગ્યમિતિ ભાગ્યવાન્ । અથવા બાહ્ય એવાયં કાલઃ કર્મકારણં નિર્દિશ્યતે । તત્ર ચાન્યેઽપિ સ્વમતિપરિકલ્પિતપદાર્થાન્તરાત્મભાવગ્રહા એવેતિ સાઙ્ખ્યાઃ પ્રવાદિનઃ પ્રતિક્ષિપ્તા બોદ્ધવ્યા ઇતિ ।

અપર આહ, પ્રકૃતિચૈતનિકઃ પ્રધાનભાવાશાદ્યુપાદાનકાલભાગ્યવાદિનો મહદહઙ્કારતન્માત્રવાદિન ઇતિ । તદેતદપસિદ્ધત્વાદયુક્તમ્ । ન હિ મહદહઙ્કારતન્માત્રલક્ષણાઃ પ્રકૃતય ઉપાદાનકાલભાગ્યભાવેન પ્રસિદ્ધાઃ । તસ્માદિદમપ્યયુક્તમ્ । એવમેતા આધ્યાત્મિક્યશ્ચતસ્રસ્તુષ્ટયઃ ।

॥ બાહ્યા વિષયોપરમાત્ પઞ્ચ ચ નવ તુષ્ટયોઽભિહિતાઃ ॥ ૫૦ ॥

ચશબ્દોઽવધારણાર્થઃ । અવ્યુત્પન્નાત્મવિચારસ્ય યોગિનો વિષયદોષદર્શનમાત્રાત્સંગદોષનિવૃત્તિર્બાહ્યા તુષ્ટિઃ । તત્ર યદાઽર્જનદોષમવગચ્છતિ ન તાવત્સર્વસ્યાભિજાતિરસ્તીતિ અર્થિનાઽવશ્યં

વિષયાર્જને વર્તિતવ્યમ્ । તેષામસ્વાભાવિકત્વાત્ક્વચિદેવાવસ્થિતિરિત્યુક્તં પ્રાક્ । કિં ચ સપ્રત્યનીકત્વાત્ । સ્વાભાવિકમવસ્થાનં વિષયાણામપરિકલ્પ્યાऽપિ યદા પ્રતિગ્રહાદિભિરર્જનં પ્રત્યાદ્રિયતે તદપ્યયુક્તમ્ । કુતઃ ? સપ્રત્યનીકત્વાત્ । એવમપિ નાસ્તિ કશ્ચિદપ્રત્યનીક વિષયોપાર્જનાય ઇતિ તદ્વિઘાતેऽવશ્યં પ્રયતિતવ્યમ્ । સ ચ યદિ પ્રતિયતમાનઃ પ્રત્યનીકિવિઘાતં કુર્યાત્પરોપઘાતેનાત્માऽનુગ્રહાનુષ્ઠાનાચ્છાસ્ત્રવિરોધઃ । યસ્માદાહ-
ન તત્પરસ્ય સન્દધ્યાત્પ્રતિકૂલં યદાત્મનઃ ।
એષ સંક્ષેપતો ધર્મઃ કામાદન્યઃ પ્રવર્તતે ॥

પુનરપ્યાહ-
પ્રાણિનામુપઘાતેન યોऽર્થઃ સમુપજાયતે ।
સોऽનપેક્ષૈઃ પ્રહાતવ્યો લોકાન્તરવિઘાતકૃત્ ॥

તસ્માત્સંઘાતમાત્રત્વાત્સત્ત્વાદીનાં ઘટાદિવત્ ।
આબ્રહ્મણઃ પરિજ્ઞાય દેહાનામનવસ્થિતિમ્ ॥

સત્યં સદ્ભિરાદીપ્તં તૃણોલ્કાચપલં સુખમ્ ।
સુદૃઢૈર્ન નિપાતવ્યં દુઃખૈર્દેહાન્તરોદ્ભવૈઃ ॥

અથ પુનરયં પ્રત્યનીકૈર્વિહન્યતે, તતોऽસ્ય વિષયાભાવઃ । સુખાર્થં ચ પ્રવૃત્તસ્ય ભૂયિષ્ઠં દુઃખમેવેત્યેતસ્માદ્દર્શનાન્માધ્યસ્થ્યં લભતે, સા પઞ્ચમી તુષ્ટિઃ સુતારમિત્યભિધીયતે । કથં પુનઃ સુતારમિત્યુચ્યતે ? સુખમનેનોપાયેન તરન્તિ વિષયસંકટમિતિ સુતારમ્ ।
યદા તુ યોગી પૂર્વદોષાધિગમેऽભિજાત્યા વા યત્નાર્જિતવિષયત્વે સતિ રક્ષાદોષમુપન્યસ્યતિ । કથમ્ ? ભોક્તૃભોગ્યભાવાવ્યતિરેકાત્ સર્વપ્રાણિસાધારણા વિષયાઃ, તસ્માત્તેષાં રક્ષા વિધેયા । તસ્યાં ચ પ્રવર્તમાનો યદિ પરમુપરુન્ધ્યાત્ તદા પૂર્વોક્તદોષઃ, અથાત્માનં, વિષયાભાવઃ । રાત્રિન્દિવં ચ તદેકાગ્રમનસઃ સુખાર્થં પ્રવૃતસ્ય ભૂયિષ્ઠં દુઃખમેવેત્યેતસ્માદ્દર્શનાન્માધ્યસ્થ્યં લભતે । સા ષષ્ઠી તુષ્ટિઃ સુપારમિત્યભિધીયતે । કથં પુનઃ સુપારમિત્યુચ્યતે ? સુખમનેન પારં વિષયાર્ણવસ્ય પ્રયાન્તીતિ ।
યદા તુ સતિ પૂર્વદોષે, સતિ વા ગ્રામનગરનિગમસન્નિવેશાદ્યુપાયાનુષ્ઠાનાદ્વા કૃતવિષયરક્ષો યોગી ક્ષયદોષમુપન્યસ્યતિ । કથમ્ ?

યેન દ્રવ્યેણ મોહાદ્રરન્તુમિચ્છન્તિ દેહિનઃ ।
તદેવૈષાં વિનાશિત્વાદ્ ભવત્યરતિકારણમ્ ॥

યત્નોપાત્તાઃ સુગુપ્તાશ્ચ વિષયા વિષયૈષિણામ્ ।
પશ્યતામેવ નશ્યન્તિ બુદ્બુદાઃ સલિલે યથા ॥

ન તદસ્તિ જગત્યસ્મિન્ભૂતં સ્થાવરજઙ્ગમમ્ ।
પ્રત્યક્ષતોઽનુમાનાદ્વા વિનાશો યસ્ય નેક્ષ્યતે ॥

તસ્માદ્વિનાશિષ્વાસક્તાનાં પુત્રદારગૃહાદિષુ ।
મમેતિ બુદ્ધિં યત્નેન બુદ્ધિમાન્વિનિવર્તયેત્ ॥

ઇતિ એતસ્માદ્દર્શનાન્માધ્યસ્થ્યં લભતે, સા સપ્તમી તુષ્ટિઃ સુનેત્રમિત્યુચ્યતે
।
કથં પુનઃ સુનેત્રમિત્યુચ્યતે ?
સુખમનેનાત્માનં કૈવલ્યાવસ્થાં નયન્તીતિ સુનેત્રમ્ ।
યદા તુ સત્સુ પૂર્વદોષેષુ પ્રસઙ્ગદોષમુપન્યસ્યતિ । કથમ્
? પ્રાપ્તવિષયાણામિન્દ્રિયાણાં તદભિલાષાન્નિવૃતિસ્તત્સુખમ્ ।
વિષયજિઘૃક્ષયા ચ દુઃખમ્ । પ્રાપ્તિરપ્યેષામનુપશાન્તયે
તદુપભોગકૌશલાય ચ । યસ્માદાહ-
યદા પ્રબન્ધાદ્વિષયી વિષયાનુપસેવતે ।
તદાસ્યેતસ્ત્વભિપ્રાયઃ સુતરાં સમ્પ્રવર્તતે ॥

અતોઽપિ યેન પુરુષઃ શમયેદ્ વડવાનલમ્ ।
નેન્દ્રિયાણ્યુપભોગેન વિષયેભ્યો નિવર્તયેત્ ॥

તસ્માદ્વિષયસમ્પર્કમસમર્થં નિવર્તને ।
ઇન્દ્રિયાણાં પરિજ્ઞાય નિરાસઙ્ગમતિશ્ચરેત્ ॥

ઇત્યેતસ્માદ્ દર્શનાન્માધ્યસ્થ્યં લભતે સાઽષ્ટમી તુષ્ટિઃ
સુમારીચમિત્યુચ્યતે । કથં સુમારીચમિત્યુચ્યતે ? અર્ચતેઃ પૂજાર્થસ્ય
શોભનમર્ચિતં વિષયસંગનિવૃત્તસ્ય યોગિનોઽવસ્થાનં ભવતિ ।
યદા તુ પૂર્વદોષેષુ હિંસાદોષમુપન્યસ્યતિ । કથમ્ ? અનુપહત્યાન્યભૂતાનિ
વિષયભોગાનુપપત્તેઃ । ઉપભોગો હિ નામ મનોજ્ઞાભ્યવહારઃ, સ્ત્રીસેવા,
હયગજનરાદિભિર્યાનમિત્યેવમાદિ । તત્ર મનોજ્ઞાઽભ્યવહારચિકીર્ષુષા
તદઙ્ગાનાં ગોઽજાઽવિબલીવર્દસ્ત્રીપુરુષાદીનામવશ્યમુપઘાતઃ કાર્યઃ ।
અનુપઘાતે વા વિષયાનુપપત્તિપ્રસંગઃ । સ્ત્રિયમાસેવમાનેનાન્યાસાં સ્ત્રીણાં

માતૃપિતૃભ્રાતૃપ્રભૃતીનાં ચ, અન્યથા તદભાવો હયાદીનામ્ ।
તસ્માદુપભોગાર્થિનાવશ્યમન્યોપઘાતઃ કાર્યો નિહિતદણ્ડેન વા
વિષયોપભોગસ્ત્યાજ્ય ઇતિ । આહ ચ
યથા યથા હિ વિષયો વૃદ્ધિં ગૃહ્ણાતિ દેહિનામ્ ।
અપઘાતસ્તદઙ્ગાનાં તથૈવાસ્ય વિવર્ધતે ॥

તસ્માદનિચ્છન્નન્યેષાં પ્રાણિનાં દેહપીડનમ્ ।
સન્તોષેણૈવ વર્તેત ત્યક્તસર્વપરિચ્છદઃ ॥

સત્યવાચઃ પ્રશાન્તસ્ય સર્વભૂતાન્યનિચ્છતઃ ।
ભાવાન્ધકારાન્તજ્ઞાનમચિરેણ પ્રવર્તતે ॥

ઇત્યેતસ્માદ્દર્શનાન્માધ્યસ્થ્યં લભતે, સા નવમી
તુષ્ટિરુત્તમાભયમિત્યપદિશ્યતે । કથમ્ ? ઉત્તમં હિ પ્રાણિનાં સર્વેભ્યો
હિંસાભયમિતિ તદપગમાદુત્તમાઽભયમિતિ ।
આહ, અર્જનરક્ષણલક્ષણયોરપિ તુષ્ટ્યોઃ પરોપઘાતદોષાઃ,
અપદિષ્ટોઽસ્યામપિ ચ । તત્ર કથમનયોર્વિશેષઃ પ્રતિપત્તવ્ય ઇતિ ?
ઉચ્યતે ન, વિષયભેદાત્ । તત્ર યેષામર્જનરક્ષણે પ્રત્યાદ્રિયતે વિષયી
તદર્થિના પ્રત્યનીકાનામવશ્યમભિઘાતોઽનુષ્ઠાતવ્ય ઇત્યાદાવુક્તમ્ ।
ઇહ તુ યેષામેવાર્જનરક્ષણે તદનુપઘાતેનાશક્યો વિષયોપભોગ
ઇત્યેતદ્વિવક્ષિતમ્ । તસ્માદસંકીર્ણમેતદિત્યેવમમ્ભઃપ્રભૃતયો નવ
વિષયેભ્યઃ સંગદ્વેષનિવૃત્તિહેતવો વ્યાખ્યાતાઃ । તે જ્ઞાનવિરહિતાનાં
યોગિનાં તુષ્ટિશબ્દવાચ્યતાં લભન્તે । જ્ઞાનિનાં તુ વૈરાગ્યપર્વસંજ્ઞિતા
સ્વાસુ સ્વાસુ તત્ત્વભૂમિષુ સિદ્ધા એવેતિ ॥ ૫૦॥

---

કારિકા ૫૧

---

આહ- પ્રાગપદિષ્ટમષ્ટધા સિદ્ધિરિતિ તદિદાનીમભિધીયતામિતિ । ઉચ્યતે-

॥ ઊહઃ શબ્દોઽધ્યયનં દુઃખવિઘાતાસ્ત્રયઃ સુહૃત્પ્રાપ્તિઃ ।
દાનઞ્ચ સિદ્ધયોઽષ્ટૌ ॥

તત્રોહો નામ યદા પ્રત્યક્ષાનુમાનાગમવ્યતિરેકેણાભિપ્રેતમર્થં
વિચારણાબલેનૈવ પ્રતિપદ્યતે, સાઽઽદ્યા સિદ્ધિઃ તારકમિત્યપદિશ્યતે-
તારયતિ સંસારાર્ણવાદિતિ તારકમ્ । યદા તુ સ્વયં પ્રતિપત્તૌ પ્રતિહન્યમાનો

ગુરૂપદેશાત્ પ્રતિપદ્યતે સા દ્વિતીયા સિદ્ધિઃ સુતારમિત્યપદિશ્યતે ।
કથમ્ ? સુખમનેનદ્યત્વેઽપિ ભવસઙ્કટાત્ તરન્તીતિ । યદા
ત્વન્યોપદેશાદપ્યસમર્થઃ પ્રતિપત્તુમધ્યયનેન સાધયતિ સા તૃતીયા
સિદ્ધિઃ તારયન્તમિત્યપદિશ્યતે । તદેતત્ તારણક્રિયાયા અદ્યત્વેઽપિ
અવ્યાવૃતત્વાત્ મહાવિષયત્વાત્ તારયન્તમિત્યપદિશ્યતે । ત એતે ત્રયઃ
સાધનોપાયૈરાબ્રાહ્મણઃ પ્રાણિનોઽભિપ્રેતમર્થં પ્રાપ્નુવન્તિ । આહ ચ-
"સાક્ષાત્કૃતધર્માણ ઋષયો બભૂવુઃ, તેઽપરેભ્યોઽસાક્ષાત્કૃતધર્મેભ્ય
ઉપદેશેન મન્ત્રાન્ સમ્પ્રાહુરુપદેશાય ગ્લાયન્તોઽપરે બિલ્મગ્રહણાયેમં
ગ્રન્થં સમામ્નાસિષુર્વેદઞ્ચ વેદાઙ્ગાનિ ચેતિ" । બિલ્મં ભાસનમ્-
સમ્યક્ પ્રતિભાસાય વિશિષ્ટઃ સંકેત ઉક્તઃ । એષાં તુ સાધનોપાયાનાં
પ્રત્યનીકપ્રતિષેધાય દુઃખવિઘાતત્રયમ્ । દુઃખાનિ ત્રીણિ- આધ્યાત્મિકાદીનિ ।
તત્ર ચાધ્યાત્મિકાનાં વાતાદીનાં સિદ્ધિપ્રત્યનીકાનામાયુર્વેદક્રિયાનુષ્ઠાનેન
વિઘાતં કૃત્વા પૂર્વેષાં ત્રયાણામન્યતમેન સાધયતિ સા ચતુર્થી સિદ્ધિઃ
પ્રમોદમિત્યભિધીયતે । કથમ્ ? નિવૃત્તરોગા હિ પ્રાણિનઃ પ્રમોદન્ત ઇતિ
કૃત્વા । યદા ત્વાધિભૌતિકાનાં માનુષાદિનિમિત્તાનાં સિદ્ધિપ્રત્યનીકાનાં
સામાદિના યતિધર્માનુગુણેન વોપાયેન પૂર્વેષાં ત્રયાણામન્યતમેન સાધયતિ,
સા પઞ્ચમી સિદ્ધિઃ પ્રમુદિતમિત્યભિધીયતે । કથમ્ ? અનુદ્વિગ્નો હિ પ્રમુદિત
ઇતિ કૃત્વા । યદા તુ શીતાદીન્યાધિદૈવિકાનિ દ્વન્દ્વાનિ સિદ્ધિપ્રત્યનીકાનિ
સ્વધર્માનુરોધેન પ્રતિહત્ય પૂર્વેષાં ત્રયાણામન્યતમેન સાધયતિ, સા
ષષ્ઠી સિદ્ધિર્મોદનામમિત્યભિધીયતે । કથમ્ ? દ્વન્દ્વાનુપહતા હિ પ્રાણિનો
મોદન્ત ઇતિ કૃત્વા । સુહૃત્પ્રાપ્તિઃ- યદા તુ કૃશલં સંસ્પૃષ્ટં
સન્મિત્રમાશ્રિત્ય સન્દેહનિવૃત્તિં લભતે, સા રમ્યકમિતિ સપ્તમી
સિદ્ધિરપદિશ્યતે । રમ્યો હિ લોકે સન્મિત્રસમ્પર્કઃ, તસ્ય સંજ્ઞાયાં
રમ્યમેવ રમ્યકમ્ । દાનમ્- યદા તુ દૌર્ભાગ્યં દાનેનાતીત્ય પૂર્વેષાં
ત્રયાણામન્યતમેન સાધયતિ સાઽષ્ટામી સિદ્ધિઃ સદાપ્રમુદિતમિત્યભિધીયતે ।
સુભગો હિ સદાપ્રમુદિતો ભવતિ, તસ્માદ્દૌર્ભાગ્યનિવૃત્તિઃ સદાપ્રમુદિતમ્ ।
ઇત્યેવમેતાઃ સિદ્ધયોઽષ્ટૌ વ્યાખ્યાતાઃ । એતાસાં સંશ્રયેણાભિપ્રેતમર્થં
યતઃ સંસાધયન્તીત્યતઃ પૂર્વાચાર્યાગતં માર્ગમારુરુક્ષુસ્તત્પ્રવણઃ
સ્યાદિતિ ।

આહ, કઃ પુનરત્ર હેતુર્યેન પુરુષાર્થત્વાવિશેષે સતિ ગુણાનાં
સર્વસિદ્ધિનિમિત્તં ત્વનુભવતીતિ ?

ઉચ્યતે- યસ્માત્

॥ સિદ્ધેઃ પૂર્વોઽઙ્કુશસ્ત્રિવિધઃ ॥ ૫૧ ॥

સાધ્યપ્રતિપત્તિસામર્થ્યસામાન્યમઙ્ગીકૃત્યાહ સિદ્ધેરિતિ ।
પૂર્વો વિપર્યયાશક્તિતુષ્ટિલક્ષણઃ અંકુશ ઇવાંકુશઃ,
નિવર્તનસામાન્યાત્ । નિત્યપ્રવૃત્તસ્યાપિ પ્રધાનાત્સિદ્ધિસ્રોતસો
વિપર્યયાશક્તિતુષ્ટિપ્રતિબન્ધાત્સર્વપ્રાણિષ્વપ્રવૃત્તિર્ભવતિ ।
વિપર્યયાત્તાવત્સ્થાવરેષુ । તે હિ મુખ્યાઃ સ્રોતસો વિપર્યયાત્માનઃ ।
અશક્તેસ્તિર્યક્ષુ । તે હિ તિર્યક્સ્રોતસોઽશક્ત્યાત્માનઃ । તુષ્ટેર્દેવેષુ ।
તે હ્યૂર્ધ્વસ્રોતસસ્તુષ્ટ્યાત્માનઃ । માનુષાસ્ત્વર્વાક્સ્રોતસઃ
સંસિદ્ધ્યાત્માનઃ । તસ્માત્ત એવ તારકાદિષુ પ્રવર્તન્તે । સત્ત્વરજસ્તમસાં
ચાઙ્ગાઙ્ગિભાવનિયમાદ્વિપર્યયાશક્તિતુષ્ટિભિઃ પ્રતિહન્યત ઇતિ ન સર્વેષાં
સર્વદા સિદ્ધિર્ભવતિ । અત એતદુક્તં સિદ્ધેઃ પૂર્વોઽઙ્કુશાસ્ત્રિવિધ ઇતિ ।
યથા ચ સિદ્ધેઃ વિપર્યયાશક્તિતુષ્ટયઃ પ્રતિપક્ષાઃ, એવં
સિદ્ધિરપિ વિપર્યયાદીનામ્ । સા હ્યુત્પન્ના સર્વાનેતાન્નિવર્તયતિ । કથમ્
? અવિપરીતજ્ઞાનં વિપર્યયમતીતાનાગતવર્તમાનેષુ સન્નિકૃષ્ટેષુ
વિપ્રકૃષ્ટેષુ ઇન્દ્રિયગ્રાહ્યેષ્વતીન્દ્રિયેષુ ચાપ્રતિઘાતાદશક્તિં
પુરુષસ્ય પ્રકૃતિવિકારવ્યતિરિક્તસ્ય દર્શનાત્સર્વાસુ ભૂમિષુ તુષ્ટિમ્ ।
એવમેતાનિ સ્રોતાંસિ પ્રાણાદયઃ કર્મયોનયશ્ચ વ્યાખ્યાતાઃ । એતેષાં
માર્ગેઽવસ્થાપનાત્પરાં સિદ્ધિકૈવલ્યલક્ષણામચિરેણ પ્રાપ્નોતિ । આહ ચ

યોનીનાં સપ્રમાણાનાં સમ્યઙ્માર્ગે નિયોજનાત્ ।
સ્રોતસાં ચ વિશુદ્ધત્વાન્નિરાસઙ્ગમતિશ્ચરેત્ ॥ ઇતિ ॥ ૫૧॥

॥ ઇતિ યુક્તિદીપિકાયાં નવમમાહ્નિકમ્ ॥

---

કારિકા ૫૨

---

એવં યત્પૂર્વમપદિષ્ટં સંયોગકૃતઃ સર્ગ (kA0 21) ઇતિ
તદ્વ્યાખ્યાતમ્ । અત્રેદાનીમાચાર્યાણાં વિપ્રતિપત્તિઃ । ધર્માદીનાં
શરીરમન્તરેણાનુત્પત્તેઃ । શરીરસ્ય ચ ધર્માદ્યભાવે
નિમિત્તાન્તરાસમ્ભવાદુભયમિદમનાદિ । તસ્માદેકરૂપ એવાયં યથૈવાદ્યત્વે
તથૈવાતિક્રાન્તાસ્વનાગતાસુ કાલકોટિષુ સર્ગ ઇતિ । આચાર્ય આહ-

નૈતદેવમ્, કિં તર્હિ પ્રાક્પ્રધાનપ્રવૃત્તેર્ધર્માધર્મયોરસમ્ભવો બુદ્ધિધર્મત્વાત્તસ્યાશ્ચ પ્રધાનવિકારત્વાત્ । તતસ્તદ્વ્યતિરિક્તં શબ્દાદ્યુપલબ્ધિગુણલક્ષણં ગુણપુરુષાન્તરોપલબ્ધિલક્ષણં ચાર્થમુદ્દિશ્ય સત્ત્વાદયો મહદહઙ્કારતન્માત્રેન્દ્રિયભૂતત્વેનાવસ્થાય પરમર્ષિહિરણ્યગર્ભાદીનાં શરીરમુત્પાદયન્તિ । ષટ્સિદ્ધિક્ષયકાલોત્તરં તુ ગુણવિમર્દવૈચિત્ર્યાદ્રજસ્તમોવૃત્ત્યનુપાતિ સંસારચક્રં પ્રવૃત્તમ્ ।

॥ ન વિના ભાવૈર્લિઙ્ગમ્ ॥

દેવમનુષ્યતિર્યગ્ભાવેન વ્યવતિષ્ઠત ઇતિ વાક્યશેષઃ ।

॥ ન વિના લિઙ્ગેન ભાવસંસિદ્ધિઃ ॥

સંસિદ્ધિરત્ર નિષ્પત્તિરભિપ્રેતા ।

॥ લિઙ્ગાખ્યો ભાવાખ્યસ્તસ્માદ્ દ્વિવિધઃ પ્રવર્તતે સર્ગઃ ॥ ૫૨ ॥

સોઽયં લિઙ્ગાખ્યો ભાવાખ્યશ્ચ ષટ્સિદ્ધિક્ષયકાલાદૂર્ધ્વં ભવતિ । ગુણસમનન્તરં તુ અધિકારલક્ષણઃ । તસ્માદ્ દ્વિધા સર્ગઃ અધિકારલક્ષણો ભાવાખ્યશ્ચ । યેષાં તુ ધર્માધર્મશરીરયોઃ પર્યાયેણ હેતુહેતુમદ્ભાવસ્તેષાં કારણમસ્ત્યવ્યક્તમિત્યત્ર (kA0 16) પ્રતિવિહિતમ્ । યેઽપિ ચ સાંખ્યા એવમાહુઃ- "ધર્માધર્માધિકારવશાત્પ્રધાનસ્ય પ્રવૃત્તિરિતિ" તેષામન્યતરપરિકલ્પનાનર્થક્યમિતિ । કથમ્ ? યદિ તાવદધિકાર એવાયં પ્રધાનપ્રવૃત્તયેઽલમ્, કિં ધર્માધર્માભ્યામ્ ? અથ તાવદન્તરેણાધિકારસ્ય પ્રધાનપ્રવૃત્તાવસામર્થ્યમ્, એવમપિ કિમધિકારેણ ? તયોરેવ પ્રવૃત્તિસામર્થ્યાત્ । તસ્માદધિકારભાવનિમિત્તો દ્વિધા સર્ગઃ । તત્ર યથેદં શરીરમવિભક્તં ધર્માર્થકામમોક્ષલક્ષણાસુ ક્રિયાસુ વિભક્તં ભવેદિત્યતઃ પાણ્યાદિવિકલ્પોઽસ્ય ભવતિ, એવં સત્ત્વસર્ગોઽપ્યવિભક્તો ધર્માર્થકામમોક્ષલક્ષણાસુ ક્રિયાસુ સમર્થો ભવેદિતિ ॥ ૫૨॥

---

કારિકા ૫૩

---

॥ અષ્ટવિકલ્પો દૈવસ્તૈર્યગ્યોનશ્ચ પઞ્ચધા ભવતિ ।
માનુષ્યશ્ચૈકવિધઃ ॥

અષ્ટૌ વિકલ્પા અસ્ય સોઽયમષ્ટવિકલ્પઃ । અષ્ટપ્રકારોઽષ્ટભેદ ઇત્યર્થઃ ।
તદ્યથા બ્રહ્મપ્રજાપતીન્દ્રપિતૃગન્ધર્વનાગરક્ષઃપિશાચાઃ ।
તૈર્યગ્યોનશ્ચ પઞ્ચધા ભવતિ- પશુમૃગપક્ષિસરીસૃપસ્થાવરાઃ ।
માનુષ્યશ્ચૈકવિધઃ ચ જાત્યન્તરાનુપપત્તેઃ । આહ કિમેતાવાનેવ
ભૂતસર્ગવિકલ્પઃ, આહોસ્વિદન્યોઽસ્તીતિ ? ઉચ્યતે- વિકલ્પાન્તરમસ્ત્યેતેષામેવ
સ્થાનાનામન્તર્ગણભેદાત્ । અયં તુ આહોસ્વિદન્યોઽસ્તીતિ ? ઉચ્યતે-
વિકલ્પાન્તરમસ્ત્યેતેષામેવ સ્થાનામન્તરગણભેદાત્ । અયં તુ

॥ સમાસતો ભૌતિકઃ સર્ગઃ ॥ ૫૩ ॥

કિમ્ ? ઉપદિષ્ટ ઇત વાક્યશેષઃ । તત્ર દેવાનાં
સાધ્યમરુદ્રુદ્રાદિભેદાત્ । તિરશ્ચાં ગ્રામ્યારણ્યાદિભેદાત્ । માનુષાણાં ચ
બ્રાહ્મણક્ષત્રિયવિટ્શૂદ્રભેદાત્ । ઉદ્ભિદ્ભેદશ્ચ વિસ્તરેણાપદિશ્યમાન
આનન્ત્યમાપાદયેત્ । તસ્માત્સમાસતો ભૂતસર્ગોઽપદિશ્યતે ॥ ૫૩ ॥

---

કારિકા ૫૪

---

આહ, વિકલ્પાન્તરવચનમ્, સ્રોતોભેદાત્ । દૈવમાનુષતૈર્યગ્યોના ઇતિ ત્રિવિધો
ભૂતાનાં વિકલ્પ ઉપદિશ્યતે । સ્રોતાંસિ તુ ચત્વાર્યુક્તાનિ । તસ્માદ્વિકલ્પાન્તરં
વક્તવ્યમિતિ ।
ઉચ્યતે- ન, ગુણધર્મસંગ્રહસામર્થ્યાત્ । સત્ત્વબહુલા ઊર્ધ્વસ્રોતસઃ ।
રજોબહુલા અર્વાક્સ્રોતસઃ । તમોબહુલાસ્તિર્યક્સ્રોતસો મુખ્યસ્રોતસશ્ચ ।
તસ્માદનયોરભેદેનોપદેશઃ ।
આહ, અસુરાદ્યુપસંખ્યાનં કર્તવ્યમ્ । ઇતરેષ્વનન્તર્ભાવાદભેદેન વોપદેશઃ
કાર્યા ન તુ દૈવમાનુષતિરશ્ચ ઇતિ ।
ઉચ્યતે- ન, ઉક્તેષ્વેવ તત્સંગ્રહાત્ । અસુરાણાં તાવદૈન્દ્ર એવ
સ્થાનેઽન્તર્ભાવઃ, પૂર્વદેવત્વાત્ । પૂર્વદેવા હ્યસુરાઃ । કિંચ
પર્યાયેણેન્દ્રત્વાત્ । ધન્વિપ્રભૃતીનાં પર્યાયેણેન્દ્રત્વં શ્રૂયતે ।
તથા યક્ષાણાં રક્ષસ્સ્વેકરૂપત્વાત્ । કિન્નરવિદ્યાધરાણાં ગન્ધર્વેષુ,
સમાનશીલત્વાત્ । પ્રેતાનાં પિતૃષ્વધિપતિસામાન્યાત્ । તસ્માત્ત્રિવિકલ્પ એવ
ભૂતસર્ગઃ । સ ચાયમ્

॥ ઊર્ધ્વં સત્ત્વવિશાલઃ ॥

ઊર્ધ્વમિત્યનેનાષ્ટૌ દેવસ્થાનાન્યાહ । તત્રાયં સર્ગં સત્ત્વવિશાલઃ ।
પિશાચેભ્યો રક્ષસામ્, રક્ષોભ્યો નાગાનામ્, નાગેભ્યો ગન્ધર્વાણામ્,
ગન્ધર્વેભ્યઃ પિતૃણામ્, પિતૃભ્યસ્ત્રિદશાનામ્, તેભ્યઃ પ્રજાપતીનામ્,
તેભ્યોઽપિ બ્રહ્મણઃ । એવં વિશાલગ્રહણં સમર્થિતં ભવતિ ।

॥ તમોવિશાલસ્તુ મૂલતઃ સર્ગઃ ॥

મૂલતસ્તુ સર્ગસ્તમોવિશાલઃ । પશુભ્યો હિ મૃગાણાં પ્રકૃષ્ટતરં તમઃ,
મૃગેભ્યઃ પક્ષિણામ્, પક્ષિભ્યઃ સરીસૃપાણામ્, સરીસૃપેભ્યઃ સ્થાવરાણામ્ ।

॥ મધ્યે રજોવિશાલઃ ॥

દેવેભ્યસ્તિર્યગ્ભ્યશ્ચાવકૃષ્ટાસુ ભૂમિષુ યથા યથા સત્ત્વતમસો
નિર્હ્રાસઃ, તથા તથા રજસો વૃદ્ધિઃ । મનુષ્યાસ્તૂભયોર્મધ્યમિતિ
તત્ર પરમઃ પ્રકર્ષો રજસઃ । અર્વાક્ સ્રોતસઃ સિદ્ધિરૂપત્વાદત્યન્તં
ક્રિયાપ્રવૃત્તત્વાત્ । યથા ચ માનુષેષુ રજઃપ્રકર્ષ એવં બ્રહ્મણઃ
સ્થાને સત્ત્વસ્ય, સ્થાવરેષુ તમસઃ । સ ખલ્વયમ્-

॥ બ્રહ્માદિસ્તમ્બપર્યન્તઃ ॥ ૫૪ ॥

ચતુર્દશભેદસ્ત્રિવિકલ્પઃ સત્ત્વાદ્યતિશયનિર્હ્રાસવિષયભાવેન યઃ
સર્ગો વ્યાખ્યાતઃ ।

---

કારિકા ૫૫

---

॥ અત્ર જરામરણકૃતં દુઃખં પ્રાનોતિ ચેતનઃ પુરુષઃ ॥

જરાકૃતં મરણકૃતં જરામરણકૃતમ્ । તત્ર જરાકૃતં તાવદ્યથા
બલીતરંગિતગાત્રત્વમ્, દણ્ડમન્તરેણ ચઙ્ક્રમણાદિષ્વપ્રવૃત્તિઃ,
સર્વેન્દ્રિયાણાં વિષયોપભોગેષ્વસામર્થ્યમ્, પ્રબલકાસશ્વાસતા,
સાસ્રાવિલેક્ષણતા, દશનાનામસ્થિરત્વમ્, વર્ણવિકૃતિઃ,
શૈથિલ્યમભિવ્યાહારસંગો મન્દા સ્મૃતિરિત્યેવમાદિ ।
મરણકૃતમપિ પૃથિવ્યાદીનાં શરીરભાવેનાવસ્થિતૌ સહભાવપ્રતિપક્ષતા
સ્વભાવભેદવૃત્તિસંગ્રહપન્થિવ્યૂહાવકાશદાનાદેરુપકારસ્ય પ્રચ્યુતિઃ ।
ઇન્દ્રિયાધિષ્ઠાનવિકારાચ્છબ્દસ્પર્શરૂપરસગન્ધાનાં સતામગ્રહણમસતાં
ચ ગ્રહણમભૂતાકારં સમ્ભવવિપરીતં વા સર્વાર્થાનાં ગ્રહણમ્ । તદ્યથા

પૌર્ણમાસ્યાં દક્ષિણતઃ ખણ્ડસ્યેન્દુમણ્ડલસ્ય પિશાચાદીનાં પાણ્ડરસ્ય ચ નભસ ઇત્યાદિ । તથા વાતાદિવૈષમ્યાત્સમુપજનિતાનેકપ્રકારવ્યાધિઃ પ્રભ્રશ્યમાનસકલેન્દ્રિયવૃત્તિઃ સ્રસ્તાઙ્ગઃ તામ્રપીતાસ્રાવિલેક્ષણો ભ્રમદાહશ્વાસાદિપરિગમાન્તર્મર્મસન્ધિર્જલાર્થં દિશોઽવલોકયન્ સબ્રહ્મલોકેષ્વપિ લોકેષુ ત્રાતારમવિન્દન્ રાગાદ્યનેકકાલાત્પક્વેનાત્મગ્રહેણાત્મકાર્યકરણોપહ્રિયમાણબુદ્ધિર્મન્દમન્દેષ્વપિ સ્મૃતિપ્રલમ્ભેષુ દયિતજનસ્યાત્મનશ્ચાનુસ્મરન્દશવિધાત્કુટુમ્બાદ્યઃ પ્રભ્રશ્યતે સોઽયમવશ્યમ્ભાવી સર્વસત્ત્વાનાં પ્રકૃષ્ટોદ્વેગકારી ચાવ્યુત્પન્નશ્ચાપરિહાર્યશ્ચાનિયતકાલશ્ચ મહાત્મભિઃ પરમર્ષ્યાદિભિરન્ધતામિસ્રશબ્દેનાપદિષ્ટો મરણકૃતં દુઃખમ્ । તચ્ચેદં દુઃખં પ્રધાનમહદહંકારતન્માત્રેન્દ્રિયભૂતવિશેષલક્ષણસ્ય તત્ત્વપર્વણશ્ચૈતન્યાસમ્ભવાત્પુરુષ એવ ચૈતન્યશક્તિયોગાદુપલભ્યતે । તદપિ સમીક્ષ્યોક્તમાચાર્યેણ અત્ર જરામરણકૃતં દુઃખં પ્રાપ્નોતિ ચેતનઃ પુરુષ ઇતિ ।

આહ, જન્મકૃતસ્યોપસંખ્યાનમ્ । યથૈવ હિ જરામરણં ચાત્મનઃ પ્રકૃષ્ટોદ્વેગકારકમેવં જન્માપિ । તથા હ્યયં માતુરુદરે જરાયુપરિવેષ્ટિતશરીરોઽમેધ્યપરિસ્નુતો વ્રણમાત્રાયાં ગર્ભધાન્યાં યથાસુખસમ્ભવાત્પરિપીતિતગાત્રો માતુરશનાદિભિઃ પીડ્યમાનો ગર્ભાવાસે દુઃખમનુભૂય પશ્ચાત્સંવૃતેનાસ્થિદ્વયવિવરેણ નિસ્સૃતો મૂત્રરુધિરકલિલૈઃ પરિષિક્તગાત્રો બાહ્યેન વાયુના કરૈશ્ચ સંસ્પર્શદસિભિરિવ તુદ્યમાનઃ સ્વસંવેદ્યં દુઃખમાત્મનિ વર્તમાનમાખ્યાતુમસમર્થઃ સ્વસુખદુઃખસામન્યાત્પરત્ર પરિકલ્પિતસુખદુઃખબુદ્ધિભિર્દૃઢગાત્રૈરુપચિતક્લેશૈશ્ચ યાત્યમાનો જન્મદુઃખમનુભવતિ । તસ્માત્તદપિ વક્તવ્યમિતિ ।

ઉચ્યતે- ન, અવ્યાપિતવાત્ । માનુષતિરશ્ચામેવ જન્મકૃતં દુઃખં ભવતિ ન દેવાનામ્ । કથમ્ ? તડિદ્વિલસિતવત્ક્ષણમાત્રેણ શરીરપ્રાદુર્ભાવાત્ । જરામરણકૃતં તુ તેષ્વપિ ન નિવર્તતે । તસ્માત્પ્રાધાન્યાદેતદેવોપદિષ્ટં નેતરદિતિ ।

આહ, ઇતરગ્રહણાપ્રસંગઃ, તુલ્યત્વાત્ । ન હિ દેવસ્થાનેષુ જરામરણં વા શ્રૂયતે, તસ્માદવ્યાપિત્વાત્તયોરપ્યગ્રહણપ્રસંગઃ ।

ઉચ્યતે- ન, સ્મૃતિવચનાત્ । જીર્યતેઽનયેતિ જરા ક્ષય ઇત્યુક્તં ભવતિ । સ ચ દેવભૂમાવપિ ભવતિ । કસ્માત્ ? એવં હ્યાહ-

રજોવિષક્તિરઙ્ગેષુ વૈવર્ણ્યં મ્લાનપુષ્પતા ।
પતિષ્યતાં દેવલોકાત્પ્રાણિનામુપજાયતે ॥

શક્રાદીનાં વ્યાધિશ્રવણાચ્છરીરક્ષયઃ । એવં હ્યાહ- "ત્વાષ્ટ્રીયં સામ ભવતિ ઇન્દ્રં ક્ષામમપિ ન સર્વભૂતાનિ પ્રસ્વાપયિતું નાશક્નુવં સ્તમેતેન સામ્ના ત્વાષ્ટ્રીયેણાસ્વાપયદિતિ ।" તથા પ્રજાપતેર્વાયુરક્ષયીત્ । દક્ષાભિશાપાચ્ચ સોમસ્ય ક્ષયઃ । તથા "પ્રજાપતિર્વૈ સોમાય રાજ્ઞે દુહિતૃરદાન્નક્ષત્રાણિ, સ રોહિણ્યામેવાવસત્ । તાન્યપેક્ષ્યમાણાનિ પુનરગચ્છન્ । તસ્માત્ સ્વાનનુપેયમાના પુનર્ગચ્છતિ । તાન્યન્વાગચ્છત્તાનિ પુનરયાચત । તાન્યસ્મૈ ન પુનરદદાત્ । સાઽબ્રવીત્સર્વેષ્વેવ સમાસત વસાથ તે પુનર્દાસ્યામીતિ । સ રોહિણ્યામેવાવસત્તસ્મિન્નનૃતે યક્ષ્મોઽગૃહ્ણાત્ । ચન્દ્રમા વૈ સોમો રાજ યદ્રાજાનં યક્ષ્મોગૃહ્ણાત્તદ્રાજયક્ષ્મસ્ય જન્મ । સ તૃણમિવાશુષ્યત્ । સ પ્રજાપતા અનાથત । સોઽબ્રવીત્સર્વેષ્વેવ સમાવદ્વસાથ ત્વાઽતો મોક્ષ્યામીતિ । તસ્માચ્ચન્દ્રમાઃ સર્વેષુ નક્ષત્રેષુ સમાવદ્વસતિ । તં વૈશ્વદેવેન ચરુણામાવસ્યાં રાત્રીમયા યજન્તે નૈનં યક્ષ્મોદમુગ્ચદિત્યાદિ ।" તસ્માદ્દેવભૂમાવપિ જરાકૃતં દુઃખમસ્તિ । તથા મરણકૃતં ભૂમ્યન્તરગમનાત્તત્રોત્પન્નાનાં યયાતિરુદાહરણમ્ । યથા ગોપથબ્રાહ્મણમ્- "દેવાનાં હ વા પઞ્ચદશશતાનિ આસંસ્તાનિ બ્રહ્મકિલ્બિષાદક્ષીયન્ત । તતસ્ત્રયસ્ત્રિંશદેવાસત તદેતદૃચાપ્યુક્તમ્ । સોદર્યાણાં પઞ્ચદશાનાં શતાનાં ત્રયસ્ત્રિંશદુદશિષ્યન્ત દેવાઃ । શેષાઃ પ્રાસીયન્તેતિ ।" શ્વેતારણ્યે ચાન્તકસ્ય રુદ્રેણ કૃતં દુઃખમસ્તીતિ । ઉદાહરણમાત્રાદ્વા । અથવોદાહરણમાત્રમેવ દુઃખાનામ્ । આદિશબ્દલોપો વા વક્તવ્યઃ । જરામરણકૃતમેવોદાહરણત્વેનાભિપ્રેતમ્ । ન પુનર્દુઃખાન્તરમ્ । કસ્માત્ ? તત્રાપિ હ્યાદિશબ્દલોપ ઉદાહરણમાત્રત્વાત્ શક્ત્યા પરિકલ્પયિતુમિદમિત્યુચ્યતે । ન સર્વદુઃખાસ્પદત્વાત્ । સર્વેષાં હિ દુઃખાનામાસ્પદં જરામરણકૃતં સાધારણમ્ । કથમ્ ? તદ્બન્ધુમિત્રાણામપ્યુદ્વેગહેતુત્વાત્ । ન તુ જન્મકૃતમ્, સમ્બન્ધિનાં પ્રહર્ષનિમિત્તત્વાત્ । યતશ્ચ બ્રહ્માદૌ સ્તમ્બપર્યન્તે જગતિ જરામરણકૃતં દુઃખં ન કશ્ચિદતિવર્તતે ।

॥ લિઙ્ગસ્યવિનિવૃત્તેસ્તસ્માદ્દુઃખં સમાસેન ॥ ૫૫ ॥

સુખલેશસ્ય તદ્વ્યાપ્તત્વાત્ । યાવદિદં લિઙ્ગં ન નિવર્તતે તાવદવશ્યં

દુઃખેન ભવિતવ્યમ્ । પર્યાયેણ સંસ્કારસ્ય સામર્થ્યાલ્લોકાન્તરોપપત્તેઃ ।
તથા ચાહ-
સુખં ચ દુઃખં ચ હિ સંશયં વારેણાયં સેવતે તત્ર તત્ર ।
કથમ્પુનર્દુઃખેન વ્યાપ્તં સુખમિતિ ચેત્, આબ્રહ્મણોઽશુદ્ધ્યાતિશયોપપત્તેઃ ।
તસ્યાશ્ચ દુઃખમૂલત્વાત્ । પ્રજાપતેરક્ષિરોગશ્રવણાત્, ઇન્દ્રસ્ય
કામોપતાપાત્ । ગૌતમપરિભાવાદ્ રમ્ભાયાશ્ચાભિશાપાત્પાષાણભાવોપપત્તેઃ,
નાગાનાં સર્પસત્રાયાસાત્, વૈશ્રવણસ્ય યસ્કાભિશાપાદ્ધસ્તિભાવોપપત્તિઃ ।
જરત્કારો પિતૃણાં ચ ગર્તેઽવલમ્બનાત્, પિશાચાનાં
મન્ત્રૌષધિમઙ્ગલપ્રયોગૈરુદ્વાસનાન્માનુષતિરશ્ચાં પ્રત્યક્ષત
એવ પ્રાયેણ દુઃખાસ્પદત્વાત્ । તસ્માન્નાસ્તિ સંસારે કશ્ચિત્પ્રદેશો
યત્ર સહ લિઙ્ગેનાત્માનં દુઃખં નાવાપ્નુયાદિત્યત એવં પ્રયતિતવ્યં
યેન લિઙ્ગસ્યૈવાત્યન્તોચ્છેદઃ । તતો હિ સર્વદુઃખાનામત્યન્તોપશમઃ ।
સમાસગ્રહણં તુ સુખમોહયોરવકાશદાનાર્થમ્ । અન્યથા સંસારે તયોરભાવ
એવાભ્યુપગતઃ સ્યાત્ ॥ ૫૫॥

---

કારિકા ૫૬

---

એવં યથાવત્સર્ગમુપાખ્યાયોપસંહરન્નાહ-

॥ ઇત્યેષ પ્રકૃતિવિકૃતઃ પ્રવર્તતે તત્ત્વભૂતભાવાખ્યઃ ।
પ્રતિપુરુષવિમોક્ષાર્થં સ્વાર્થ ઇવ પરાર્થ આરમ્ભઃ ॥ ૫૬ ॥

ઇતિકરણેન સર્ગસમાપ્તિં દ્યોતયતિ । એષ ઇત્યુક્તમપિ પ્રત્યામ્નાયાર્થં
પુનરપેક્ષતે । પ્રકૃત્યા કૃતઃ પ્રકૃતિકૃતઃ । અનેન
વાક્યપરિસમાપ્ત્યર્થં વીતાવીતાભ્યાં સિદ્ધં પ્રધાનાસ્તિત્વમ્ ।
અણ્વાદિપ્રતિષેધં ચાપેક્ષતે । પ્રકૃતિકૃત એવ નાણ્વાદિકૃતઃ ।
પ્રવર્તત ઇતિ ક્રિયાપ્રબન્ધમાહ । પ્રવૃત્તો ન પ્રવર્ત્સ્યતિ કિં તર્હિ
પ્રવર્તત એવાનન્તાનાં શરીરાદિભાવેન પરસ્પરાનુગ્રહેણ ચ । નેયં ક્રિયા
કદાચિદપિ ભૂતભવિષ્યદ્રૂપા ભવતિ । કિન્તર્હિ વર્તમાનરૂપા । યથા
વહન્તિ નદ્યઃ, તિષ્ઠન્તિ પર્વતા ઇતિ । તત્ત્વભૂતભાવાખ્ય ઇત્યુક્તાનાં
નિગમાર્થં પ્રત્યામ્નાયં કરોતિ । તત્ત્વાખ્યો મહદાદિભિર્ભાવાખ્યો
વ્યોમાદિઃ । પુરુષં પુરુષં પ્રતિ વિમોક્ષઃ પ્રતિપુરુષવિમોક્ષઃ ।
તદર્થં પ્રતિપુરુષવિમોક્ષાર્થમ્ । સર્વપુરુષાધિકારનિબદ્ધાયાઃ

સર્વશક્તેર્નિરાકાંક્ષીકરણાર્થમિત્યર્થઃ । સ્વાર્થ ઇવ પરાર્થ
આરમ્ભઃ । કાર્યકારણભાવેન । તત્ર કાર્યસ્ય તાવચ્છબ્દાદેઃ
સ્વાર્થ ઇવેન્દ્રિયાણાં વિષયભાવઃ । ઇન્દ્રિયાણામપ્રાપ્તવિષયાણાં
લૌલ્યમધિષ્ઠાનવિકારાનુમેયં સ્વાર્થમિવ । કરણાનાં ચ
સંકલ્પાભિમાનાધ્યવસાયાનાં વિષયદ્વારિભાવોપગમનં મનઃપ્રભૃતીનાં ચ
સ્વપ્રવૃત્તિવિષયત્વમ્ । મનોઽહંકારયોશ્ચ બુદ્ધૌ સ્વપ્રવૃત્ત્યુપસંહારો
બુદ્ધેશ્ચ શાન્તઘોરમૂઢત્વં વ્યવસાયકર્તૃત્વં ચ સત્ત્વરજસ્તમસાં
ચ પ્રકાશપ્રવૃત્તિનિયમલક્ષણૈર્ધર્મૈઃ પરસ્પરોપકારિત્વમ્ । ન
ચૈષ સ્વાર્થઃ, સર્વસ્યાસ્યાચૈતન્યાત્ । કિં તર્હિ પરાર્થ એવાયમારમ્ભઃ ।
સંઘાતત્વાદિતિ ।
આહ, યદુક્તં પ્રતિપુરુષવિમોક્ષાર્થમયમારમ્ભ ઇતિ તદયુક્તમ્ ।
આચાર્યવિપ્રતિપત્તેઃ । પ્રતિપુરુષમન્યત્પ્રધાનં શરીરાદ્યર્થં કરોતિ ।
તેષાં ચ માહાત્મ્યશરીરપ્રધાનં યદા પ્રવર્તતે તદેતરાણ્યપિ ।
તન્નિવૃત્તૌ ચ તેષામપિ નિવૃત્તિરિતિ પૌરિકઃ સાંખ્યાચાર્યો મન્યતે ।
તત્કથમપ્રતિષિધ્યૈકા પ્રકૃતિરભ્યુપગમ્યતે ઇતિ ?
ઉચ્યતે- ન, પ્રમાણાભાવાત્ । ન તાવત્પ્રત્યક્ષત એવ તચ્છક્યં નિશ્ચેતુમ્ ।
પ્રધાનાનામતીન્દ્રિયત્વાત્ । લિઙ્ગં ચાસન્દિગ્ધં નાસ્તિ । આપ્તાશ્ચ નો
નાભિદધુરતો મન્યામહે નૈતદેવમિતિ । કિંચ એકેનાર્થપરિસમાપ્તેઃ ।
અપરિમિતત્વાદેતદેકં પ્રધાનમલં સર્વપુરુષશરીરોત્પાદનાય ।
તસ્માદન્યપરિકલ્પનાનર્થક્યમ્ । પરિમિતમિતિ ચેદથ મતમ્,
પરિમિતં પ્રધાનમિતિ ન, ઉચ્છેદપ્રસંગાત્ । એવમપિ તસ્યોચ્છેદઃ
પ્રાપ્તઃ ક્ષીરવત્ । તથા ચ સંસારોચ્છેદપ્રસંગઃ । કિં ચ
અનવસ્થાપ્રસંગાત્ । એકસ્યેશ્વરસ્ય યોગિનો વેચ્છાયોગાદનેકશરીરત્વમ્ ।
તત્પરિમિતાદયુક્તમ્ । પ્રતિશરીરં વા પ્રધાનપરિકલ્પને પ્રધાનાનવસ્થા
ભવતિ । પરિમિતશરીરકારણત્વાભ્યુપગમાદન્યપરિકલ્પનાનર્થક્યમ્ ।
તતશ્ચ પ્રધાનૈકત્વમેવ । તસ્માદયુક્તં પ્રતિપુરુષં
પ્રધાનાનીતિ । યત્તૂક્તં માહાત્મ્યશરીરપ્રધાનપ્રવૃત્તાવિતરેષાં
પ્રવૃતિસ્તન્નિવૃત્તૌ નિવૃત્તિરિત્યત્ર બ્રૂમઃ- ન, અતિશયાભાવાત્ ।
યથા ક્ષેત્રજ્ઞાનાં નિરતિશયત્વાદિતરેતરાપ્રવર્તકત્વમેવમેષામપિ
સાતિશયત્વે વા પ્રધાનાનુપપત્તિપ્રસંગઃ, વૈષમ્યાત્ । તસ્માદ્યુક્તં
પ્રતિપુરુષવિમોક્ષાર્થમેકા પ્રકૃતિઃ પ્રવર્તત ઇતિ ॥ ૫૬॥

કારિકા ૫૭

આહ, તદનુપપત્તિરાચેતન્યાત્ । ઇહાચેતનાનાં ઘટાદીનામુદ્દિશ્ય પ્રવૃત્તિરદૃષ્ટા । સા ચેદિયમચેતના પ્રકૃતિરસ્યા અપ્યુદ્દિશ્ય પુરુષાર્થં પ્રવૃત્તિર્નોપપદ્યતે । ભવતિ ચેચ્ચૈતન્યં તર્હિ પ્રાપ્તમસ્યા । તત્ર યદુક્તં પ્રતિપુરુષવિમોક્ષાર્થં પ્રકૃતેઃ પ્રવૃત્તિરિતિ એતદયુક્તમિતિ ।
ઉચ્યતે- ન, દૃષ્ટાન્તોપપત્તેઃ ।

॥ વત્સવિવૃદ્ધિનિમિત્તં ક્ષીરસ્ય યથા પ્રવૃત્તિરજ્ઞસ્ય ।
પુરુષવિમોક્ષનિમિત્તં તથા પ્રવૃત્તિઃ પ્રધાનસ્ય ॥ ૫૭ ॥

યથા ક્ષીરમચેતનં વત્સવિવૃદ્ધિમુદ્દિશ્ય પ્રવર્તતે, એવં પ્રધાનમપિ પુરુષવિમોક્ષમુદ્દિશ્ય પ્રવર્તતે । ન ચાસ્ય ચૈતન્યં સ્યાત્ । સાધ્યત્વાદયુક્તમિતિ ચેત્ સ્યાન્મતમ્, સાધ્યમેતત્ કિં ક્ષીરસ્યોદ્દિશ્ય વત્સવિવૃદ્ધિં પ્રવૃત્તિઃ, અથ નેતિ ? તસ્માદુદાહરણં સાધ્યત્વાદયુક્તમિતિ । એતચ્ચાયુક્તમ્ । કસ્માત્ ? તદભાવેઽભાવાત્ તદ્ભાવે ચ ભાવાત્ । યત્ર નાસ્તિ વત્સવિવૃદ્ધિસ્તત્ર ન ક્ષીરસ્ય પ્રવૃત્તિરુપલબ્ધા । યત્રાસ્તિ તત્રોપલબ્ધા । યદ્યસ્મિન્ સતિ ભવતિ તસ્ય તદર્થા પ્રવૃત્તિર્દૃષ્ટા । તદ્યથા ઘટે કુમ્ભકારસ્ય । સ ચાયમીદૃશોઽસ્માકમુદ્દેશોઽભિપ્રેતઃ યદુત તાદર્થ્યમ્ । તસ્માન્નાસ્ત્યુદાહરણસાધ્યત્વમિતિ । અસદ્ભાવાભિધાનાત્સત્કાર્યવિરોધ ઇતિ ચેન્ન, વ્યક્તિપર્યાયત્વાત્ । વ્યક્તિપર્યાયો હિ તદિતિ શાસ્ત્રલોકપ્રામાણ્યાત્ । શાસ્ત્રં તાવત્ સત્તામાત્રો મહાન્ વ્યક્તિમાત્ર ઇત્યર્થઃ । લોકેઽપિ નાસ્ત્યસ્મિન્કૂપે સલિલમિત્યુચ્યતે । ન ક્વચિદપિ કૂપે સલિલં નાસ્ત્યભિવ્યક્તં ન તદ્ ભવતિ । તસ્માન્ન સત્કાર્યવિરોધઃ । અદૃષ્ટપ્રેરણત્વાદસિદ્ધિરિતિ ચેદથ મતમ્ । ધર્માધર્મપ્રેરિતં ક્ષીરં પ્રવર્તતે ન વત્સવિવૃદ્ધ્યર્થમિતિ, તદપ્યયુક્તમ્ । કસ્માત્ ? દોષસામ્યાત્ । ધર્માધર્માવચેતનૌ વિવૃદ્ધિકાલે ક્ષીરં પ્રવર્તયતસ્તદવસાને ચ નિવર્તયતઃ । તસમાદિત્થમપિ પરિકલ્પ્યમાને સમાનો દોષઃ । ઈશ્વરપ્રેરણાદિતિ ચેત્ સ્યાન્મતમ્ ઈશ્વરસ્તત્ર ક્ષીરં પ્રવર્તયતે વત્સાર્થં, ન સ્વયમિતિ । તદયુક્તમ્ । કસ્માત્ ? પ્રતિષેધાત્ । પ્રાક્પ્રતિષિદ્ધમીશ્વરકર્મ ।

તસ્માદિદમપ્યયુક્તમ્ । એવં ચેદવસ્થિતો દૃષ્ટાન્તઃ । વાર્ષગણાનાં
તુ યથા સ્ત્રીપુંશરીરાણામચેતનાનામુદ્દિશ્યેતરેતરં પ્રવૃત્તિસ્તથા
પ્રધાનસ્યેત્યયં દૃષ્ટાન્તઃ ।
આહ, કથમવગમ્યતે તાદર્થ્યાદુત્પન્નેન વ્યક્તેન પુરુષસ્ય સમ્બન્ધો ન
પુનઃ સાન્નિધ્યમાત્રાત્, ભિક્ષુવદિતિ ?
ઉચ્યતે- ન, અનપવર્ગપ્રસંગાત્ ।
સાન્નિધ્યમાત્રાત્પુરુષોપભોગમભ્યુપગચ્છતો નાપવર્ગપ્રસંગઃ
સ્યાન્નિત્યસાન્નિધ્યાત્ । તસ્માદયુક્તમેતત્ ।
અપ્રવર્તયિતારં પ્રતિ કાર્યકારણાનાં પ્રવૃત્તિરયુક્તેતિ ચેત્
સ્યાન્મતમ્- અપ્રવર્તયિતા કૃષ્ણાદીનાં ભિક્ષુરતો ન તેષામપિ
તં પ્રતિ પ્રવૃત્તિઃ । એવમપ્રવર્તયિતા કાર્યકરણાનાં પુરુષઃ ।
તસ્માત્તેષામપિ તં પ્રતિ પ્રવૃત્તિરયુક્તેત્યેતદપ્યત એવાનૈકાન્તિકમ્ ।
વત્સો હિ ક્ષીરસ્યાપ્રવર્તયિતાઽથ ચ તં પ્રતિ તસ્ય પ્રવૃત્તિઃ ।
તસ્માદ્યુક્તમેતત્પુરુષવિમોક્ષાર્થા પ્રકૃત્તેઃ પ્રવૃત્તિર્ન ચૈતન્યપ્રસંગ
ઇતિ ॥ ૫૭॥

---

કારિકા ૫૮

---

આહ, ન, અપ્રવૃત્તિપ્રસંગાત્ । યદિ પ્રધાનસ્ય પુરુષકૈવલ્યાર્થા
પ્રવૃત્તિસ્તેન તદભાવે કૈવલ્યં સિદ્ધમેવેત્યપ્રવૃત્તિપ્રસંગઃ ।
અથ કેવલે પુરુષે પ્રધાનં પ્રવર્તતે ન તર્હ્યસ્ય તદર્થા પ્રવૃત્તિરિતિ ।

॥ ઔત્સુક્યનિવૃત્ત્યર્થં યથા ક્રિયાસુ પ્રવર્તતે લોકઃ ।
પુરુષસ્ય વિમોક્ષાર્થં પ્રવર્તતે તદ્વદવ્યક્તમ્ ॥ ૫૮ ॥

પ્રાગેવૈતદપદિષ્ટમ્- યથા દૃશ્યદર્શનશક્તિયુક્તત્વાદન્યતરાભાવે
ચ તયોરાનર્થક્યાત્પ્રધાનપુરુષયોરિતરેતરસમ્બન્ધં પ્રત્યૌત્સુક્યમ્ ।
દૃષ્ટા ચોપરમાર્થાઽપિ લોકસ્યૌત્સુક્યનિવૃત્ત્યર્થા
પ્રવૃત્તિસ્તથા પ્રધાનસ્યાપ્યુપરમાર્થા પ્રવૃત્તિઃ । અથ
દૃશ્યદર્શનશક્ત્યોરૌત્સુક્યનિવૃત્ત્યર્થં પ્રવર્તત
ઇત્યેકત્ર કૃતાર્થત્વાદિતરેષ્વપ્રવૃત્તિપ્રસંગ ઇતિ ચેત્
સ્યાદેતત્ । પ્રધાનમેકસ્ય પુરુષસ્યાત્માનં પ્રકાશ્યોપરમેદે
દૃશ્યદર્શનશક્તયોરૌત્સુક્યનિવૃત્તિર્ભવિષ્યતિ ॥ ૫૮॥

કારિકા ૫૯

અપ્રવૃત્તિશ્ચેત્યેતદપિ નોપપન્નમ્ । કસ્માત્ ? દૃષ્ટાન્તાન્તરસામર્થ્યાત્ ।
તદ્યથા કિમ્ ?
ઉચ્યતે-

॥ રઙ્ગસ્ય દર્શયિત્વા નિવર્તતે નર્તકી યથા નૃત્યાત્ ।
પુરુષસ્ય તથાઽઽત્માનં પ્રકાશ્ય વિનિવર્તતે પ્રકૃતિઃ ॥ ૫૯ ॥

તત્ર નાનાવર્ણસ્વભાવવિજ્ઞાનાનાં પ્રેક્ષાર્થિનાં પુરુષાણાં સંઘાતો રઙ્ગ ઇત્યુચ્યતે । નર્તક્યાશ્ચ તદારાધના નૃત્તિક્રિયાઽનેકપુરુષાર્થા । યદિ વાઽત્ર કશ્ચિદ્ બ્રૂયાત્ નૃત્તાચાર્યેણ કુશીલવૈર્વા દૃષ્ટૈવેયં કસ્માન્ન નિવર્તતે ? કથમ્ ? અકૃતાર્થત્વાત્ । એવં સર્વપુરુષાણાં કાર્યકારણસમ્બન્ધેનૌત્સુક્યવતાં નિરાકાંક્ષીકરણાર્થં પ્રવૃત્તા પ્રકૃતિઃ કથમેકસ્ય પુરુષસ્યૌત્સુક્યનિવૃત્તૌ કૃતાર્થા સ્યાત્ ? તસ્માન્નૈકસ્ય પુરુષસ્યાત્માનં પ્રકાશ્ય પ્રકૃતેર્નિવૃત્તિર્યુક્તેતિ ।
અત્ર ચ-........

કારિકા ૬૪

...... કાર્યકારણક્રિયાસાક્ષી પુરુષઃ । તસ્માદ્યે ભૌતિકાઃ શિરઃપાણ્યાદયો યે ચાહંકારિકાઃ શ્રવણાદયો વચનાદયઃ સંકલ્પાભિમાનાધ્યવસાયાશ્ચ તે લક્ષણવિપર્યયાત્- નાહં નાષ્ટૌ પ્રકૃતયઃ । તદેતદેવં તત્ત્વાનામભ્યાસૈકાગ્રમનસો યતેઃ પુનઃ પુનરભ્યાસાત્ એકસ્યાપ્યસ્મિતારૂપસ્ય પરિકલ્પિતવિષયભેદપ્રતિષેધમુખેન

॥ નાસ્મિ ન મે નાહમિત્યપરિશેષમ્ ॥

આપ્રકૃતેઃ પ્રતિપક્ષગ્રહણાત્

॥ અવિપર્યયાત્ ॥

પઞ્ચસ્રોતસોઽસ્યાવિદ્યાપર્વણો નિવૃત્તેઃ શાન્તં ધ્રુવં

સકલભાવાનુબન્ધપ્રતિપક્ષભૂતં ધર્માધ્યાપ્યાયિતસ્ય બુદ્ધિતત્ત્વસ્યાસન્દિગ્ધમવિપરીતં

॥ વિશુદ્ધં કેવલમુત્પદ્યતે જ્ઞાનમ્ ॥ ૬૪ ॥

આહ, વિશુદ્ધં કેવલમ્ । અન્યતરાનભિધાનમર્થાભેદાત્ । યદેવ વિશુદ્ધં તદેવ કેવલમિત્યર્થાભેદાદન્યતરચ્છક્યમવક્તુમિતિ ।
ઉચ્યતે- ગુણાન્તરરૂપનિવૃત્તિહેતુત્વાત્ । રજસ્તમોધર્માણાં તાવદ્ ગ્રહણાચ્છુદ્ધં સંશયવિપર્યયવ્યતિરિક્તં ચ કેવલં ક્ષેત્રજ્ઞાપરિજ્ઞાનેઽપૂર્વમેવ ઇતિ ॥ ૬૪॥

---

કારિકા ૬૫

---

આહ, તત્સમકાલમેવ શરીરસ્ય પાતઃ પ્રાપ્નોતિ । સતિ ધ....વસ્થાનેનાજ્ઞાનહેતુકં શરીરમિતિ ।
ઉચ્યતે- અજ્ઞાનહેતુકં શરીરમ્ । અથ ચાયં નાનાત્વદર્શી ।

॥ ધર્માદીનામકારણપ્રાપ્તૌ ।
તિષ્ઠતિ સંસ્કારવશાચ્ચક્રભ્રમવદ્ ધૃતશરીરઃ ॥ ૬૭ ॥

ય... શરીરાન્તરોપાર્જિતા ધર્માદયો ન તાવત્કારણમ્ । બુદ્ધિ... મુપસમ્પ્રાપ્તા અકૃતાર્થત્વાદ્ બુદ્ધિશ્ચ પ્રધાનં તદા તિષ્ઠત્યયં નાનાત્વદર્શી તસ્ય સંસ્કારસ્ય સામર્થ્યાત્ । કો દૃષ્ટાન્તઃ ? ચક્રભ્રમવદ્ધૃતશરીરઃ । તદ્યથા કુમ્ભકારપ્રયત્નવિશિષ્ટેન દણ્ડેન ઘટાદિનિષ્પત્તિયોગ્યક્રિયા ચક્રસ્ય ભ્રમઃ । તેન તુલ્યં ચક્રભ્રમવત્ । યથા ચક્રભ્રમણં ઘટાર્થમ્ । નિષ્પન્ને ઘટાદિનિષ્પત્તિયોગ્યક્રિયા ચક્રસ્ય ભ્રમઃ । તેન તુલ્યં ચક્રભ્રમવત્ । યથા ચક્રભ્રમણં ઘટાર્થમ્ । નિષ્પન્ને ઘટે પૂર્વસંસ્કારાનુરોધાન્ન નિવર્તતે ન ચ તદા નિવૃત્તમિતિ કૃત્વા સંસ્કારક્ષયેઽપ્યવતિષ્ઠતે, એવં સમ્યગ્દર્શનાર્થં શરીરં સમ્યગ્જ્ઞાનાધિગમેઽપિ ન નિવર્તતે પૂર્વસંસ્કારવશાત્ । ન ચ તદા નિવૃત્તમિતિ કૃત્વા સંસ્કારક્ષયેઽપ્યવસ્થાપ્યત ઇતિ ॥ ૬૭॥

---

કારિકા ૬૮

યદા તુ સંસ્કારક્ષયે તન્નિમિત્તસ્ય શરીરસ્ય ભેદઃ, અતઃ

॥ પ્રાપ્તે શરીરભેદે ॥

ધર્માધર્મૌ કૃતાર્થૌ કારણે બુદ્ધિલક્ષણે લયં ગચ્છતઃ । યશ્ચાસ્ય ભૂતાવયવઃ શરીરારમ્ભકઃ સ સર્વભૂતેષુ ભૂતાનિ તન્માત્રેષુ, ઇન્દ્રિયાણિ તન્માત્રાણિ ચાહંકારે, અહંકારો બુદ્ધૌ બુદ્ધિરવ્યક્તે । સેયં તત્ત્વાનુપૂર્વી તદર્થપ્રધાનાદુત્પન્ના પરિસમાપ્તે પુનઃ પ્રધાને પ્રલયં ગચ્છતીતિ । પ્રધાનમપ્યર્થવશાદેવાસ્ય શરીરાણિ તેષુ તેષુ જાત્યન્તરપરિવર્તેષુ કરોતિ । સ ચાર્યશ્ચરિતાર્થઃ ।
અતઃ

॥ ચરિતાર્થત્વાત્ પ્રધાનવિનિવૃત્તૌ ॥

અતીન્દ્રિયમસંવેદ્ય લઘુ સર્વત્ર સન્નિહિતં પ્રશસ્તમનિર્મિતં વિશુદ્ધમક્ષયં નિરતિશયમ્

॥ એકાન્તમાત્યન્તિકમભયં કૈવલ્યમાપ્નોતિ ॥ ૬૮ ॥

એતચ્ચાવસ્થાનં બૌદ્ધૈર્નિરુપધિશેષનિર્વાણલક્ષણમપવર્ગો વ્યાખ્યાતઃ । એતત્પરં બ્રહ્મં ધ્રુવમમલમભયમત્ર સર્વેષાં ગુણધર્માણાં પ્રતિપ્રલયઃ । એતત્પ્રાપ્ય સર્વાયાસૈઃ સર્વબન્ધનૈરનાદિકાલપ્રવૃત્તરાગદ્વેષવિયુક્તો મુક્તો ભવતિ । એતદર્થં બ્રાહ્મણા દયિતપુત્રદારધનસમ્બન્ધમપહાય ગુરુશુશ્રૂષાપરાઃ શરીરમરણ્યેષુ યાતયન્તિ । કથં નામૈકાન્તિકમાત્યન્તિકં ચ કૈવલ્યં સ્યાદિતિ યત્રૈવોત્થાનં શાસ્ત્રસ્ય તત્રૈવોપસંહાર આચાર્યેણ કૃતઃ ॥ ૬૮ ॥

કારિકા ૬૯

આહ, કિમર્થં પુનરિદં શાસ્ત્રં કેન વા પૂર્વં પ્રકાશિતમિતિ ?
ઉચ્યતે- યદુક્તં કિમર્થમિતિ-

॥ પુરુષાર્થાર્થમિદમ્ ॥

કથં નામાજ્ઞાનવશાત્તત્સંસ્કારોપનિપતિતાનાં પ્રાણિનામપવર્ગઃ

સ્યાદિત્યેવમર્થમિદં શાસ્ત્રં વ્યાખ્યાતમ્ ।
યત્તૂક્તં કેનેતિ, ઉચ્યતે-

॥ ગુહ્યં પરમર્ષિણા સમાખ્યાતમ્ ॥

ગુહ્યમિતિ ગૂહનીયમ્ । રહસ્યમકૃતાત્મનાં
યમનિયમેષ્વનવસ્થિતાનામાદરાદપ્યનધ્યેયમ્ ।
પરમર્ષિર્ભગવાન્સાંસિદ્ધિકૈર્ધર્મજ્ઞાનવૈરાગ્યૈશ્વર્યૈરાવિષ્ટપિણ્ડો
વિશ્વાગ્રજઃ કપિલમુનિઃ । તેન કપિલમુનિના સમાખ્યાતમ્ ।
સમ્યગાખ્યાતમ્, ચિરાભ્યસ્તસ્ય વિદ્યાસ્રોતસો નિર્વચનસામર્થ્યાત્ સ્યાદેતત્,
કથમિદં ગુહ્યમિતિ ? ઉચ્યતે- કથં વેદં ગુહ્યં ન સ્યાત્ ?
ભવાગ્રોત્પન્નૈરપિ સનકસનાતનસનન્દનસનત્કુમારપ્રભૃતિભિરનિત્યાનાં

॥ સ્થિત્યુત્પત્તિપ્રલયાશ્ચિન્ત્યન્તે ચ યત્ર ભૂતાનામ્ ॥ ૬૯ ॥

તત્ર સ્થિતિસ્તાવદ્રૂપપ્રવૃત્તિફલનિર્દેશેનોત્પત્તિરપિ
પ્રકૃતેર્મહાનિત્યાદિઃ । પ્રલયોઽપ્યવિભાગાદ્વૈશ્વરૂપ્યસ્યેતિ વચનાત્ ।
ઔત્સુક્યાનુપરમાત્પ્રકૃતિપુરુષયોઃ । સ્થિતિરુત્પત્તિર્દૃશ્યદર્શનશક્તયોઃ
સાપેક્ષત્વાત્ । તથા ચોક્તં-
પુરુષસ્ય દર્શનાર્થઃ કૈવલ્યાર્થસ્તથા પ્રધાનસ્ય ।
પઙ્ગ્વન્ધવદુભયોરપિ સંયોગસ્તત્કૃતઃ સર્ગઃ ॥ ઇતિ (kA0 21)
પ્રલયઃ પ્રાપ્તે શરીરભેદે
ચરિતાર્થત્વાત્પ્રધાનવિનિવૃત્તાવિતિ (kA0 68) । અથવા
સ્થિતિક્ષણભઙ્ગપ્રતિષેધાત્કાલાન્તરેષ્વસ્યાનાશાદુત્પત્તિર્વિપરિણામાન્નાભૂતપ્રાદુર્ભાવાદકસ્માદસમ્ભવાત્,
પ્રલયોઽપિ નિમિત્તાન્તરાત્સ્વાભાવ્યાદેવ ભૂતાનામપિ વ્યક્તાનાં નિષ્પત્તિમતામિતિ
યાવત્ । એવં ચ મહદાદયોઽપિ પરિગૃહીતા ઇતિ ।
આહ, પુરુષાદયસ્તર્હિ પરિત્યક્તાઃ । કથં વા ભૂતશબ્દ ઇતિ ?
ઉચ્યતે- વિતથપ્રતિષેધાર્થત્વાત્ । યાવત્ કિંચિદવિતથં ભૂતં તસ્ય
સર્વસ્યેહ સ્થિત્યાદય ઉચ્યન્ત ઇતિ । ઉત્પત્તિવિનાશપ્રતિષેધાવિશેષાત્ ।
એવમપિ પુરુષાદીનામુત્પત્તિપ્રલયાવપિ પ્રાપ્નુતઃ । કિં કારણમ્ ? અવિશેષાદિતિ ।
ઉચ્યતે- સમ્ભવતો વિશેષણં ભવતિ । તત્ર સ્થિતિરેવ પુરુષાદીનામ્ ।
ઇતરેષાં તુ સ્થિત્યુત્પત્તિપ્રલયા ઇતિ વિજ્ઞાસ્યામઃ ॥ ૬૯ ॥

---

કારિકા ૭૦

આહ, કસ્મૈ પુનરિદં શાસ્ત્રં પરમર્ષિણા પ્રકાશિતમિતિ ?
ઉચ્યતે-

॥ એતત્પવિત્રમગ્ર્યં મુનિરાસુરયેઽનુકમ્પયા પ્રદદૌ ॥

તત્ર પવિત્રં પાવનાત્ । અગ્ર્યં સર્વદુઃખક્ષપણસમર્થત્વાત્ ।
પવિત્રાન્તરાણિ પુનરેકદેશં ક્ષાલયન્ત્યઘમર્ષણગઙ્ગાદીનિ ।
તસ્માદિદમેવાગ્ર્યં મુનિરાસુરયેઽનુકમ્પયા પ્રદદૌ ।
આહ, સમ્પ્રદાનસ્યાકસ્મિકત્વમ્, ધર્માદિનિમિત્તાનુપપત્તેઃ । ન
તાવત્પરમર્ષેર્ધર્માર્થં શાસ્ત્રપ્રદાનમુપપદ્યતે, ફલેનાનભિષ્વઙ્ગાત્ ।
નાર્થકામાર્થમ્, શિષ્યાણામનાયાસપ્રસંગાત્ । ન મોક્ષાર્થમ્, સાંસિદ્ધિકેનૈવ
જ્ઞાનેન તત્પ્રાપ્તેઃ । તસ્માદ્વિપરીતાર્થાસમ્ભવાત્ પરિશેષાદકસ્માદાચાર્યઃ
શાસ્ત્રનિધાનં પ્રદદાવિતિ ।
ઉચ્યતે- નાકસ્માત્, કિં તર્હિ અનુકમ્પયા પ્રદદૌ ।
આધ્યાત્મિકાધિદૈવિકાધિભૌતિકૈર્દુઃખૈઃ પીડ્યમાનમાસુરિમુપલભ્ય સ્વાત્મનિ
ચ જ્ઞાનસામર્થ્યાત્સતિ કાર્યકારણસમ્પ્રયોગે દુઃખાનામપ્રવૃત્તિં
પરિજ્ઞાય શિષ્યગુણાંશ્ચ કથં નામ યથા મમ સુખદુઃખેષુ
જ્ઞાનોપનિપાતાત્સામ્યમેવમાસુરેરપિ સ્યાત્તદ્દ્વારેણાન્યેષામપિ
પુરુષાણામેવમનુકમ્પયા ભગવાન્પરમર્ષિઃ શાસ્ત્રમાખ્યાતવાન્ ।
યથા ચ પરમર્ષિરાસુરયે તથા

॥ આસુરિરપિ ॥

દશમાય કુમારાય ભગવત્-

॥ પઞ્ચશિખાય
તેન ચ બહુધા કૃતં તન્ત્રમ્ ॥ ૭૦ ॥

બહુભ્યો જનકવશિષ્ઠાદિભ્યઃ સમાખ્યાતમ્ । અસ્ય તુ શાસ્ત્રસ્ય
ભગવતોઽગ્રે પ્રવૃત્તત્વાન્ન શાસ્ત્રાન્તરવદ્ વંશઃ શક્યો
વર્ષશતસહસ્રૈરપ્યાખ્યાતુમ્ ॥ ૭૦॥

કારિકા ૭૧

સંક્ષેપેણ તુ દ્વાવ..
હારીતવાદ્ધલિકૈરાતપૌરિકાર્ષભેશ્વરપઞ્ચાધિકરણપતઞ્જલિવાર્ષગણ્યકૌણ્ડિન્યમૂકાદિક-

॥ શિષ્યપરમ્પરયાઽઽગતમ્ ॥

ભગવાનીશ્વરકૃષ્ણશ્ચ સાહાયકં શાસ્ત્રમ્ ।
પૂર્વાચાર્યસૂત્રપ્રબન્ધે ગુરુલાઘવમનાદ્રિયમાણઃ
પૌરસ્ત્યાન્યાખ્યાનવ્યા...ન ગર્ભમતિપ્રમાદં દદાતીતિ
ગ્રન્થભૂયસ્ત્વમુપજાયતે । તચ્ચેદાનીન્તનૈઃ પ્રાણિભિરલ્પત્વાદાયુષો
ગ્રન્થત એવ ન સૂપપાદં કિં પુનઃ શ્રવણપ્રયોગાભ્યામ્ । આહ
ચ- ચતુર્ભિઃ પ્રકારૈર્વિદ્યા સૂપયુક્તા ભવતિ- આગમકાલેન
સ્વાધ્યાયકાલેન પ્રયોગકાલેન ચ । તત્ર ચાસ્યાગમનકાલેનૈવાયુઃ
પર્યુપયુક્તં સ્યાત્તતશ્ચ શાસ્ત્રાનર્થક્યમ્ । ઇત્યસ્ય મન્દધિયામપ્યાશુ
ગ્રહણધારણપ્રયોગસમ્પત્સ્યાદિતિ ષષ્ટિતન્ત્રાદુપાખ્યાનગાથાવ્યવહિતાનિ
વાક્યાન્યેકત ઉપમૃદ્ય શિષ્યાનુકમ્પાર્થં યાવત્

॥ ઈશ્વરકૃષ્ણેન ચૈતદાર્યાભિઃ ॥

સમ્રત્યા

॥ સંક્ષિપ્તમાર્યમતિના ॥

સર્વસત્ત્વહિતપ્રવૃત્તેન

॥ સમ્યગ્ વિજ્ઞાય સિદ્ધાન્તમ્ ॥ ૭૧ ॥

કથં ચાસ્ય સમ્યક્સિદ્ધાન્તવિજ્ઞાનસ્યાપ્યનેકગ્રન્થશતસહસ્રાખ્યેયં
સાંખ્યપદાર્થં સતત્ત્વમખણ્ડમાચાર્યાણાં સમ્રત્યા સંક્ષિપ્તવાન્ ॥ ૭૧॥

---

કારિકા ૭૨

---

આહ ચ-

॥ સમ્રત્યાં કિલ યેઽર્થાસ્તેઽર્થાઃ કૃત્સ્નસ્ય ષષ્ટિતન્ત્રસ્ય ।
આખ્યાયિકાવિરહિતાઃ પરવાદવિવર્જિતાશ્ચાપિ ॥ ૭૨ ॥

યતશ્ચ નારાયણમનુજનકવશિષ્ઠદ્વૈપાયનપ્રવૃત્તિભિરાચાર્યૈઃ

પ્રધાનપુરુષાદયઃ પદાર્થાઃ પરિગૃહીતાશ્ચોપદિષ્ટાશ્ચ પ્રશસ્તાશ્ચાતઃ સ્વભાવતઃ પ્રસિદ્ધમૈશ્વર્યસ્ય ફલત ઋદ્ધ્યા આર્યમાર્ગમલંકર્તુમિતિ ભગવદીશ્વરકૃષ્ણેન પદાર્થસ્વરૂપનિરૂપણનિપુણસારમતિના પરમર્ષ્યાદિયથોક્તાગમેન પ્રમાણત્રયં પુરસ્કૃત્ય તર્કદૃશા વિચારઃ કૃતઃ । ન ચાસ્ય મૂલકનકપિણ્ડસ્યેવ સ્વલ્પમપિ દોષજાતમસ્તીતિ ॥ ૭૨॥

આહ ચ-
અજ્ઞાનધ્વાન્તશાન્ત્યર્થમૃષિચન્દ્રમસશ્ચ્યુતા ।
મલિનૈસ્તીર્થજલદૈશ્છાદ્યતે જ્ઞાનચન્દ્રિકા ॥

ઇતિ સદ્ભિરસમ્ભ્રાન્તૈઃ કુદૃષ્ટિતિમિરાપહા ।
પ્રકાશિકેયં સર્ગસ્ય ધાર્યતાં યુક્તિદીપિકા ॥

સ્ફુટાભિધેયા મધુરાપિ ભારતી મનીષિણો નોપખલં વિરાજતે ।
કૃશાનુગર્ભાઽપ્યભિતો હિમાગમે કદુષ્ણતાં યાતિ દિવાકરદ્યુતિઃ ॥

નયન્તિ સન્તશ્ચ યતઃ સ્વશક્તિતો ગુણં પરેષાં તનુમપ્યુદારતામ્ ।
ઇતિ પ્રયાત્વેષ મમ શ્રમઃ સતાં વિચારણાનુગ્રહમાત્રપાત્રતામ્ ॥

॥ ઇતિ યુક્તિદીપિકાયાં સાંખ્યસપ્તતિપદ્ધતૌ ચતુર્થં પ્રકરણમેકાદશં ચાહ્નિકં સમ્પૂર્ણમ્ ॥

કૃતિરિયં શ્રીવાચસ્પતિમિશ્રાણામ્ (?)

Encoded and proofread by Dhaval Patel drdhaval2785 at gmail.com

*yuktidIpikA*

pdf was typeset on November 5, 2024

Please send corrections to *sanskrit@cheerful.com*